अतिव्याप्ति दोष—१. अलक्ष्ये वर्तनं प्राहुरतिव्याप्तिं बुधाः यथा। गुण आत्मन्यरूपित्वमाकाशादिषु दृश्यते॥ (मोक्षपं. १५)। २. लक्ष्यालक्ष्यवर्तिव्याप्तम्, यथा तस्यैव (गोरेव) पशुत्वम्। (न्यायदीपिका पृ. ७)।

२ लक्ष्य और अलक्ष्य में लक्षण के रहने को अतिव्याप्ति दोष कहते हैं।

अतिशायिनीत्व— अत्रातिशायनीत्वमाश्रयभेदव्यापारप्रयुक्ताल्पाल्पतर-बहु - बहुतरप्रतियोगिकत्वम्। (अष्टस. यशो. वृ. १–४, पृ. ६२)।

आश्रय के भेद से होने वाले व्यापारविशेष की अल्प से अल्पतर या बहु से बहुतर प्रतियोगिकता को अतिशायिनीत्व कहते हैं।

अतिसंग्रह—इदं धान्यादिकमग्रे विशिष्टं लाभं दास्यतीति लोभावेशादतिशयेन तत्संग्रहं करोति। (रत्नक. टी. ३–१६)।

यह धान्यादिक आगे विशिष्ट लाभ देगा, इस प्रकार लोभ के आवेश से उनका अतिशय संग्रह करना; यह अतिसंग्रह नामका अतिचार है।

अतिस्थापना (अइच्छावणा, अइट्ठावणा, अदित्थावणा)—१. तमोक्कड्डिय उदयादि जाव आवलियतिभागो ताव णिक्खिवदि। आवलिय-वे-तिभागमेत्तमुवरिमभागे अइच्छावइ। तदो आवलियतिभाओ णिक्खेवविसओ, आवलिय-वे-तिभागा च अइच्छा-(त्था) वणा त्ति भण्णइ। (जयधवला) २. अपकृष्टद्रव्यस्य निक्षेपस्थानं निक्षेपः, × × × तेनातिक्रम्यमाणं स्थानं अतिस्थापनम् × × × (ल. सा. टी. ५६)।

जिन निषेकों में अपकर्षण या उत्कर्षण किये गये द्रव्य का निक्षेप नहीं किया जाता है उनका नाम अतिस्थापना है। ऐसे निषेक उदयावलि के दो त्रिभाग मात्र होते हैं।

अतिस्निग्धमधुरत्व—१. अतिस्निग्धमधुरत्वं अमृतगुडादिवत् सुखकारित्वम्। (समवा. अभय. वृ. ३५, पृ. ६३)। २. अतिस्निग्ध-मधुरत्वं बुभुक्षितस्य घृतगुडादिवत् परमसुखकारिता॥(रायप. टी. पृ. १६)।

२ भूखे व्यक्ति को घी-गुड़ आदि के समान अतिशय सुखकारी वचनादि की प्रवृत्ति का नाम अतिस्निग्धमधुरत्व है।

अतीत काल—१. णिप्फण्णो ववहारजोग्गो अदीदो णाम। (धव. पु. ३, पृ. २६)। २. वस्तु समेव विवक्षितं वर्तमानं समयमवधीकृत्य भूतवान् समयराशिः सोऽतीतः। (ज्योतिष्क. मलय. वृ. १–७)।

३. अवधीकृत्य समयं वर्तमानं विवक्षितम् । भूतः समयराशिर्यः कालोऽतीतः स उच्यते ॥ (लोकप्र. २८-२९६) ।

२ वर्तमान समय को अवधि करके जो समयराशि बीत चुकी है उस सब समयराशि का नाम अतीत काल है ।

अतीन्द्रिय प्रत्यक्ष—अतीन्द्रियप्रत्यक्षं व्यवसायात्मकं स्फुटमवितथमतीन्द्रियमव्यवधानं लोकोत्तरमात्मार्थ-विषयम् । (लघी. स्वो. वृ. ६१) ।

जो निश्चय स्वरूप ज्ञान अतिशय निर्मल, यथार्थ—भ्रान्ति से रहित, इन्द्रियव्यापार से निरपेक्ष, देशादि व्यवधान से रहित, समस्त लोक में उत्कृष्ट तथा निज को व बाह्य अर्थ दोनों को ही विषय करने वाला है वह अतीन्द्रिय प्रत्यक्ष कहा जाता है ।

अतीन्द्रिय सुख—यत्पुनः पञ्चेन्द्रियविषयव्यापार-रहितानां निर्व्याकुलचित्तानां पुरुषाणां सुखं तदतीन्द्रियसुखम् । पञ्चेन्द्रिय-मनोजनितविकल्पजाल-रहितानां निर्विकल्पसमाधिस्थानां परमयोगिनां रागादिरहितत्वेन स्वसंवेद्यमात्मसुखं तद्विशेषेणा-तीन्द्रियम् । यच्च भावकर्म-द्रव्यकर्मरहितानां सर्व-प्रदेशाह्लादैकपारमार्थिकपरमानन्दपरिणतानां मुक्ता-त्मनामतीन्द्रियसुखं तदत्यन्तविशेषेण नेतव्यम् । बृहद्द्रव्यसं. ३७) ।

इन्द्रिय व मन की अपेक्षा न रख कर आत्म मात्र की अपेक्षा से जो निराकुल—निर्बाध—सुख प्राप्त होता है वह अतीन्द्रिय सुख है ।

अतीर्थकरसिद्ध—१. अतीर्थकरसिद्धाः सामान्य-केवलित्वे सति सिद्धाः । (योगशा. स्वो. विव. ३, १२४) । २. अतीर्थकराः सामान्यकेवलिनः सन्तः सिद्धा अतीर्थकरसिद्धाः । (शास्त्रवा. टी. ११-५४)। ३. अतीर्थकरसिद्धा अन्ये सामान्यकेवलिनः । (श्रा. प्र. टी. ७६) ।

३ सामान्य केवली होकर सिद्ध होने वाले जीवों को अतीर्थकरसिद्ध कहते हैं ।

अतीर्थकरसिद्धकेवलज्ञान—तीर्थकराः सन्तो ये सिद्धास्तेषां केवलज्ञानं तीर्थकरसिद्धकेवलज्ञानम्, शेषाणामतीर्थकरसिद्धकेवलज्ञानम् । (आव. मलय. वृ. ७८, पृ. ८४) ।

तीर्थंकर होकर सिद्ध होने वालों का केवलज्ञान तीर्थंकरसिद्धकेवलज्ञान और शेष सिद्ध होने वालों का केवलज्ञान अतीर्थकरसिद्धकेवलज्ञान कहलाता है ।

अतीर्थसिद्ध—१. अतीर्थे सिद्धा अतीर्थसिद्धाः, तीर्थान्तरसिद्धा इत्यर्थः । श्रूयते च 'जिणंतरे साहुवोच्छेओ त्ति' तत्रापि जातिस्मरणादिना अवाप्तापवर्गमार्गाः सिध्यन्ति एवम् । मरुदेवीप्रभृतयो वा अतीर्थसिद्धास्तदा तीर्थस्यानुत्पन्नत्वात् । (श्रा. प्र. टी. ७६) । २. अतीर्थे जिनान्तरे साधुव्यवच्छेदे सति जातिस्मरणादिनावाप्तापवर्गमार्गाः सिद्धा अतीर्थसिद्धाः । (योगशा. स्वो. विव. ३-१२४) । ३. तीर्थस्याभावोऽतीर्थम् । तीर्थस्याभावश्चानुत्पादोऽपान्तराले व्यवच्छेदो वा, तस्मिन् ये सिद्धास्तेऽतीर्थसिद्धाः । (प्रज्ञाप. मलय. वृ. १-७) । ४. तीर्थस्याभावेऽनुत्पत्तिलक्षणे आन्तरालिकव्यवच्छेदलक्षणे वा सति सिद्धा अतीर्थसिद्धाः मरुदेव्यादयः, सुविधिस्वाम्याद्यपान्तराले विरज्याप्त-महोदयाश्च । (शास्त्रवा. यशो. टी. ११, ५४) ।

१ तीर्थ से अभिप्राय चातुर्वर्ण्य श्रमणसंघ अथवा प्रथम गणधर का है । उनके न होते हुए जो तीर्थान्तर में सिद्ध होते हैं वे अतीर्थसिद्ध हैं । उस समय तीर्थ के उत्पन्न न होने से मरुदेवी आदि भी अतीर्थसिद्ध माने गये हैं ।

अतीर्थसिद्धकेवलज्ञान — यत् पुनस्तीर्थकराणां तीर्थेऽनुत्पन्ने व्यवच्छिन्ने वा सिद्धास्तेषां यत् केवल-ज्ञानं तदतीर्थसिद्धकेवलज्ञानम् । (आव. मलय. वृ. ७८, पृ. ८४) ।

जो तीर्थंकरों के तीर्थ के उत्पन्न न होने पर या उसके विच्छिन्न हो जाने पर सिद्ध हुए हैं उनके केवलज्ञान को अतीर्थसिद्धकेवलज्ञान कहा जाता है ।

अत्यन्तानुपलब्धि—अत्यस्स दरिसणम्मि वि लद्धी एगंततो न संभवइ । दट्ठुं पि न याणंते वोहियपंडा फणस सत्तू ॥ (बृहत्क. भा. ४७) ।

अर्थ के—पदार्थ के—प्रत्यक्ष देखते हुए भी उससे अपरिचित होने के कारण जो उसका सर्वथा परि-ज्ञान नहीं होता है उसे अत्यन्तानुपलब्धि कहते हैं । जैसे—पश्चिम दिशा में रहने वाले म्लेच्छ वहाँ कटहल के न होने से उस कटहल को और पाण्ड्य (देशविशेष में उत्पन्न) जन सत्तू को देखते हुए भी विशिष्ट नामादि से उसे नहीं जानते हैं ।

अत्यन्ताभाव—१. शशशृंगादिरूपेण सोऽत्यन्ता-भाव उच्यते । (प्रमाल. ३८६) । २. अत्यन्ताभावः

अत्यन्तं सर्वथा निःसत्ताकया अभावः। (प्रमाल. टी. ३८६)। ३. कालत्रयापेक्षिणी हि तादात्म्यपरिणामनिवृत्तिरत्यन्ताभावः। (प्र. न. त. ३-६१)।

१ जिसका त्रिकाल में भी सद्भाव सम्भव न हो, उसके अभाव को अत्यन्ताभाव कहते हैं। जैसे—खरगोश के सिर पर सींगों का अभाव।

अत्यन्ताभावत्व—त्रैकालिकी तादात्म्यपरिणामनिवृत्तिरत्यन्ताभाव इत्यत्र परिणामपदमहिम्ना धर्मनियामकसम्बन्धबोधात् तृतीयातत्पुरुषाश्रयणाच्च संसर्गावच्छिन्नप्रतियोगिताकाभावत्वमत्यन्ताभावत्वम्। (अष्टस. यशो. वृ. पृ. १६६)।

देखो अत्यन्ताभाव।

अत्यन्तायोगव्यवच्छेद—क्रियासंगतैवकारोऽत्यन्तायोगव्यवच्छेदबोधकः। उद्देश्यतावच्छेदकव्यापकाभावाप्रतियोगित्वम्। यथा—नीलं सरोजं भवत्येव। (सप्तभं. पृ. २६)।

क्रियासंगत एवकार जिसका बोधक होता है वह अत्यन्तायोगव्यवच्छेद कहलाता है। जैसे—सरोज नीला होता ही है।

अत्यागी (न चाई)—वत्थ-गंधमलंकारं इत्थीओ सयणाणि य। अच्छंदा जे ण भुंजंति न से चाइ त्ति वुच्चइ॥ (दशवै. २-२)।

जो वस्त्र एवं गन्धादि रूप भोगसामग्री को स्वच्छन्दतापूर्वक—परवश होने से—नहीं भोग सकता है वह त्यागी नहीं है—अत्यागी है।

अत्यासादना—१. पंचेव अत्थिकाया छज्जीवणिकाय महव्वया पंच। पवयणमाउ-पयत्था तेत्तीसच्चासणा भणिया॥ (मूला. २-१८, पृ. ६१)। २. पञ्चास्तिकायादिविषयत्वात् पञ्चास्तिकायादय एवासादना उक्ताः, तेषां वा ये परिभवास्ता आसादना इति सम्बन्धः। (मूला. वृ. २-१८)।

पांच अस्तिकाय, छह जीवनिकाय, पांच महाव्रत, आठ प्रवचनमातृका (५ समिति व ३ गुप्ति) और नौ पदार्थ; ये तेतीस अत्यासादना (आसादना) कहे गये हैं। अथवा उनके जो परिभव हैं वे आसादना कहलाते हैं।

अत्राणभय—१. यत् सन्नाशमुपैति तन्न नियतं व्यक्तेति वस्तुस्थितिर्ज्ञानं सत्स्वयमेव तत् किल ततस्त्रातं किमस्यापरैः। अस्यात्राणमतो न किंचन भवेत् तद्भीः कुतो ज्ञानिनो निःशंकः सततं स्वयं स सहजं ज्ञानं सदा विन्दति। (समय. कलश १५१)। २. पुरुषाद्यरक्षणमत्राणभयम्। (त. वृ. श्रुत. ६-२४)।

पुरुषादिकों के संरक्षण के अभाव में जो भय उत्पन्न होता है वह अत्राणभय कहलाता है।

अथाप्रवृत्तकरण—देखो अधःप्रवृत्तकरण।

अदत्तक्रिया—अदत्तक्रिया स्तेयलक्षणा। (गु. गु. ष. स्वो. वृ. पृ. ४१)।

चोरी में प्रवर्तना अदत्तक्रिया है।

अदत्तग्रहण—१. तथा अदत्तग्रहणम्—अदत्तं यदि किंचिद् गृह्णीयात् ××× अशनस्यान्तरायो भवति। (मूला. वृ. ६-८०)। २. स्वयमेव ग्रहेऽन्नादेरदत्तग्रहणाऽऽह्वयः॥ (अन. ध. ५-५६)।

दूसरे के द्वारा विना दिये हुये अन्नादि को स्वयं ही ग्रहण करना अदत्तग्रहण दोष है।

अदत्तादान—१. अदत्तस्य अदिण्णस्स आदाणं गहणं अदत्तादाणं, ××× एत्थ वि जेण 'आदीयदे अणेण इदि आदाणं' तेण अदिण्णत्थो तग्गहणपरिणामो च अदत्तादाणं। (धव. पु. १२, पृ. २८१)। २. ग्रामाराम-शून्यागार-वीथ्यादिषु निपतितः मणि-कनक-वस्त्रादिवस्तुनो ग्रहणमदत्तादानम्। (चा. सा. पृ. ४१)। ३. धर्मविरोधेन स्वामिजीवाद्यननुज्ञात-परकीयद्रव्यग्रहणम् अदत्तादानम्। (शास्त्रवा. टी. १-४)।

२ ग्राम, आराम (उद्यान), शून्य गृह और वीथी (गली) आदि में गिरे, पड़े या रखे हुए मणि, सुवर्ण व वस्त्र आदि के ग्रहण करने का विचार करना, इसे अदत्तादान कहते हैं। ३ स्वामी की आज्ञा के विना पराई वस्तु के लेने को अदत्तादान कहते हैं।

अदत्तादान प्रत्यय—अदत्तस्स आदाणं गहणं अदत्तादाणं, सो चेव पच्चओ अदत्तादाणपच्चओ। (धव. पु. १२, पृ. २८१)।

बिना दी हुई वस्तु के ग्रहणस्वरूप प्रत्यय (ज्ञानावरणीयवेदना के कारण) को अदत्तादान प्रत्यय कहा जाता है।

अदत्तादानविरमण—देखो अचौर्यमहाव्रत। १. अदत्तादाणं तिविहं तिविहेण णेव कुज्जा, ण कारवे, ततियं [illegible]। (ऋषिभा. १-५)।

बिना दी हुई परकीय वस्तु को तीन प्रकार से—मन, वचन व काय से—न स्वयं ग्रहण करना और न दूसरे से ग्रहण कराना, यह अदत्तादानविरमण नामका तीसरा अचौर्यमहाव्रत है।

अदन्तमनव्रत (अदंतमणवय)—१ अंगुलि-णहाऽवलेहणिकलीहिं पासाणछल्लिआदीहिं। दंतमलासोहणयं संजमगुत्ती अदंतमणं॥ (मूला. १–३३)। २ दशनाघर्पणं पापाणाऽङ्गुलीत्वङ्नखादिभिः। स्याद् दन्ताकर्पणं भोग-देह-वैराग्यमन्दिरे॥ (आचा. सा. १–४६)।

अंगुली, नख, अवलेखिनी (दन्तकाष्ठ—दातोन) कलि (तृणविशेष), पत्थर और वकला आदि से दांतों के मैल को नहीं निकालना; यह अदन्तमनव्रत है जो संयमसंरक्षण का कारण है।

अदर्शन—१ दृगावरणसामान्योदयाच्चादर्शनं तथा। (त. श्लो. २, ६, ६); अदर्शनमिहार्थानामश्रद्धानं हि तद् भवेत्। सति दर्शनमोहेऽस्य न ज्ञानात् प्रागदर्शनम्॥ (त. श्लो. ६, १४, १)। २. अदर्शनो मिथ्याभिलापेण सम्यक्त्ववर्जित अन्धो वा। (श्रा. दि. पृ. ७४)।

१ सामान्य दर्शनावरण कर्म के उदय से होनेवाले वस्तुप्रतिभास के अभाव को अदर्शन कहते हैं। तथा दर्शनमोहनीय कर्म के उदय से होने वाले तत्त्वार्थश्रद्धान के अभाव को भी अदर्शन या मिथ्यादर्शन कहा जाता है। २ मिथ्या अभिलाषा से सम्यक्त्व से हीन जीव को तथा अन्धे प्राणी को भी अदर्शन कहा जाता है।

अदर्शनपरीषह—अदर्शनपरीषहस्तु सर्वपापस्थानेभ्यो विरतः प्रकृष्टतपोऽनुष्ठायी निःसंगश्चाहं तथापि धर्माधर्मात्मदेव-नारकादिभावान्नेक्षे, अतो मृषा समस्तमेतदिति अदर्शनपरीषहः। (त. भा. सिद्ध. वृ. ६–६)।

मैं सर्व पापस्थानों से विरत हूं, घोर तपश्चरण करता हूं, और समस्त परिग्रह से रहित भी हूं; तो भी क्रम से धर्म-अधर्मस्वरूप देवभाव व नारकभाव को नहीं देख रहा हूं, इससे प्रतीत होता है कि यह सब असत्य है; ऐसे विचार का नाम अदर्शनपरीषह है।

अदर्शनपरीषहजय—१. परमवैराग्यभावनाशुद्धहृदयस्य विदितसकलपदार्थतत्त्वस्यार्हदायतन-साधुधर्मपूजकस्य चिरन्तनप्रव्रजितस्याद्यापि मे ज्ञानातिशयो नोत्पद्यते, महोपवासाद्यनुष्ठायिनां प्रातिहार्यविशेषाः प्रादुरभूवन्निति प्रलापमात्रमनर्थकेयं प्रव्रज्या, विफलं व्रतपरिपालनमित्येवमसमादधानस्य दर्शनविशुद्धियोगाददर्शनपरीषहसहनमवसातव्यम्। (स. सि. ६–६; त. वा. ६, ६, २८)। २. प्रव्रज्याद्यनर्थकत्वासमाधानमदर्शनसहनम्। (त. वा. और त. श्लो. ६–६)। ३. वर्ण्यन्ते बहवस्तपोऽतिशयजाः सर्प्तद्धिपूजादयः, प्राप्ताः पूर्वतपोधनैरिति वचोमात्रं तदद्यापि यत्। तत्त्वज्ञस्य ममापि तेषु न हि कोऽपीत्यार्तसंगोज्झिता, चेतोवृत्तिरदृक्परीषहजयः सम्यक्त्वसंशुद्धितः॥ (आचा. सा. ७–१६)। ४. अदर्शनं महाव्रतानुष्ठानेनाप्यदृष्टातिशयबाधा, उपलक्षणमात्रमेतत्, अन्येऽप्यत्र पीडाहेतवो दृष्टव्याः। तस्याः क्षमणं सहनम् ××× ततः परीषहजयो भवति। (मूला. वृ. ५–५८)। ५. महोपवासादिजुषां मृषोद्याः प्राक् प्रातिहार्यातिशया न हीक्षे। किञ्चित्तथाचार्यपि तद् वृथैषा निष्ठेत्यसन् सदृगदर्शनासट्॥ (अन. ध. ६–११०)। ६. यो मुनिरत्युत्कृष्टवैराग्यभावनाविशुद्धान्तरंगो भवति, विज्ञातसमस्तवस्तुतत्त्वश्च स्यात्, जिनायतन-त्रिविधसाधु-जिनधर्मपूजनसम्माननतन्निष्ठो भवति, चिरदीक्षितोऽपि सन्नेवं न चिन्तयति—अद्यापि ममातिशयवद्बोधनं न संजायते, उत्कृष्टश्रुतव्रतादिविधायिनां किल प्रातिहार्यविशेषाः प्रादुर्भवन्ति, इति श्रुतिर्मिथ्या वर्तते, दीक्षेयं निष्फला, व्रतधारणं च फल्गु एव वर्तते, इति सम्यग्दर्शनविशुद्धिसन्निधानादेवं न मनसि करोति तस्य मुनेरदर्शनपरीषहजयो भवतीति अवसानीयम्। (त. वृ. श्रुत. ६–६)।

चिरकाल तक तपश्चरण करने पर भी ज्ञानातिशय या ऋद्धिविशेष के नहीं प्राप्त होने पर 'यह दीक्षा व्यर्थ है या व्रतों का धारण करना व्यर्थ है' ऐसा विचार न करके अपने सम्यग्दर्शन को शुद्ध बनाये रखना, इसे अदर्शनपरीषहजय कहते हैं।

अदित्साप्रत्याख्यान—दातुमिच्छा दित्सा, न दित्सा अदित्सा, तया प्रत्याख्यानमदित्साप्रत्याख्यानम्। सत्यपि देये, सति च सम्प्रदानकारके, केवलं दातुर्दानुमिच्छा नास्तीत्यतोऽदित्साप्रत्याख्यानम्। (सूत्रकृ. वृ. २, ४, १७९)

देय द्रव्य और सत्पात्र के होने पर भी दाता की

देने की इच्छा के विना जो परित्याग किया जाता है, इसका नाम अदित्साप्रत्याख्यान है।

अदीक्षाब्रह्मचारी — १. अदीक्षाब्रह्मचारिणो वेषमन्तरेणाभ्यस्तागमा गृहधर्मनिरता भवन्ति। (चा. सा. पृ. २०; सा. ध. स्वो. टी. ७–१९)। २. वेषं विना समभ्यस्तसिद्धान्ता गृहधर्मिणः। ये ते जिनागमे प्रोक्ता अदीक्षाब्रह्मचारिणः॥ (धर्म. श्रा. ९–१७)।

१ ब्रह्मचारी का वेष धारण किये विना ही गुरु के समीप आगम का अभ्यास कर तत्पश्चात् गृहस्थाश्रम के स्वीकार करने वालों को अदीक्षाब्रह्मचारी कहते हैं।

अदृष्टदोष—१. अदृष्टम् आचार्यादीनां दर्शनं पृथक् त्यक्त्वा भूप्रदेशं शरीरं चाप्रतिलेख्याऽतद्गतमनाः पृष्ठदेशतो वा भूत्वा यो वन्दनादिकं करोति तस्यादृष्टदोषः। (मूला. वृ. ७–१०९)। २. अदृष्टं गुरुदृग्मार्गत्यागो वाऽप्रतिलेखनम्। (अन. ध. ८, १०८)।

१ आचार्य आदि का दर्शन न करके अन्यमनस्क होते हुए अथवा पृष्ठ भागसे शरीर और भूमि के शुद्ध किये विना ही वन्दना करने को अदृष्टदोष कहते हैं। अथवा उनके पीछे स्थित होकर वन्दनादि करने को अदृष्ट दोष कहा जाता है।

अदेश-कालप्रलापी —कज्जविवत्तिं दट्ठुं भणाइ पुव्विं मए उ विण्णायं। एवमिदं तु भविस्सइ अदेशकालप्पलावी उ॥ (बृहत्क. ७५४)।

कार्य के विनाश को देख कर जो यह कहता है कि यह तो मैंने पहले ही जान लिया था कि भविष्य में यह इस प्रकार होगा। जैसे—किसी साधु ने पात्र का लेपन किया, तत्पश्चात् सुखाते हुए वह प्रमादवश फूट गया, यह देखकर कोई अपने चातुर्य को प्रगट करता हुआ कहता है कि जब इसका संस्कार करना प्रारम्भ किया गया था तभी मैंने जान लिया था कि यह सिद्ध होकर भी फूट जावेगा। इस प्रकार जो अवसर को न देखकर कहता है वह अदेश-कालप्रलापी है।

अद्धाकाल—चन्द्र - सूर्यादिक्रियाविशिष्टोऽर्धतृतीयद्वीप-समुद्रान्तर्वर्त्यद्धाकालः समयादिलक्षणः। (आव. हरि. व मलय. वृ. नि. ६६०)।

चन्द्र-सूर्य आदि की क्रिया से परिलक्षित होकर जो समयादिरूप काल अढ़ाई द्वीप में प्रवर्तमान है वह अद्धाकाल कहलाता है।

अद्धाद्धामिश्रिता (अद्धाद्धामीसिया)—१. तथा दिवसस्य रात्रेर्वा एकदेशोऽद्धाद्धा, सा मिश्रिता यया सा अद्धाद्धामिश्रिता। (प्रज्ञाप. मलय. वृ. १-१६५)। २. रयणीए दिवसस्स च देसो देसेण मीसियो जत्थ। भन्नइ सच्चामोसा अद्धाद्धामीसिया एसा। (भाषार. ६७); रजन्या दिवसस्य वा देशः प्रथमप्रहरादिलक्षणो देशेन द्वितीयप्रहरादिलक्षणेन यत्र मिश्रितो भण्यते एसा अद्धाद्धामिश्रिता सत्यामृषा। (भाषार. स्वो. टी. ६७)।

दिन या रात्रि के एक देश का नाम अद्धाद्धा है, उससे मिश्रित भाषा को अद्धाद्धामिश्रिता भाषा कहते हैं। जैसे—कोई किसी को शीघ्र तैयार हो जानेके विचार से प्रथम पौरुषी (प्रहर—पाद प्रमाण छाया) के होते हुए यह कहता है कि चल मध्याह्न (दोपहर) हो गया।

अद्धानशन—अद्धाशब्दः कालसामान्यवचनश्चतुर्थादिषण्मासपर्यन्तो गृह्यते। तत्र यदनशनं तदद्धानशनम्। (भ. आ. विजयो. २०९)। २. अद्धाशब्दश्चतुर्थादिषण्मासपर्यन्तो गृह्यते, तत्राहारत्यागोऽद्धानशनं कालसंख्योपवास इत्यर्थः। (भ. आ. मूला. टी. २०९)

अद्धा शब्द कालसामान्य का वाचक है, उससे यहां चतुर्थ (एक दिन) से लेकर छह मास तक का काल लिया गया है। इस काल के भीतर जो आहार का परित्याग किया जाता है उसे अद्धानशन कहते हैं।

अद्धानिषेकस्थितिप्राप्तक (अद्धाणिसेगट्ठिदिपत्तय) —जं कम्मं जिस्से ट्ठिदीए णिसित्तमणोकड्डिदमणुकड्डिदं च होदूण तिस्से चेव ट्ठिदीए उदए दिस्सदि तमद्धाणिसेगट्ठिदिपत्तयं णाम। (धव. पु. १०, पृ.११३)।

जो कर्म जिस स्थिति में निषिक्त है वह अपकर्षण व उत्कर्षण से रहित होकर उसी स्थिति में जब उदय में दिखता है तब उसे अद्धानिषेकस्थितिप्राप्तक कहा जाता है।

अद्धापल्य (अद्धारपल्ल)—१. [illegible] ॥ पुहं [illegible] तदिमं [illegible]। (ति.प. १, १२८-२९)।

२. उद्धारपल्यरोमच्छेदैर्वर्षशतसमयमात्रच्छिन्नैः पूर्णमद्धापल्यम्। (स. सि. ३-३८)। ३. असंख्यवर्षकोटीनां समयैः रोमखण्डितैः। उद्धारपल्यमद्धाख्यं स्यात् कालोऽद्धाभिधीयते। (ह. पु. ७-५३)।
२ उद्धारपल्य के प्रत्येक रोमखण्ड को सौ वर्षों के समयों से गुणित करके उनसे परिपूर्ण गड्ढे को अद्धापल्य कहते हैं।

अद्धापल्योपम काल—१. ततः (अद्धापल्यतः) समये समये एकैकस्मिन् रोमच्छेदेऽपकृष्यमाणे यावता कालेन तद्रिक्तं भवति तावान् कालोऽद्धापल्योपमाख्यः। (स. सि. ३-३८; त. वा. ३, ३८, ७)। २. अद्धा इति कालः, सो य परिमाणतो वाससयं वालग्गाण खण्डाण वा समुद्धरणतो अद्धापलितोवमं भण्णति। अहवा अद्धा इति आउद्धा, सा इमातो णेरइयाण आणिज्जति अतो अद्धापलितोवमं। (अनु. चू. पृ. ५७)। ३. अद्ध त्ति कालाख्या, ततश्च वालाग्राणां तत्खण्डानां च वर्षशतोद्धरणादद्धापल्यस्तेनोपमा यस्मिन्, अथवा अद्धा आयुःकालः, सोऽनेन नारकादीनामानीयत इत्यद्धापल्योपमम्। (अनु. हरि. वृ. पृ. ८४)। ४. अद्धा कालः, स च प्रस्तावाद्वालाग्राणां तत्खण्डानां वोद्धरणे प्रत्येकं वर्षशतलक्षणस्तत्प्रधानं पल्योपममद्धापल्योपम्। (संग्रहणी. वृ. ४; शतक. दे. स्वो. टी. ८५)। ५. तदनन्तरं समये समये एकैकं रोमखण्डं निष्कास्यते। यावत्कालेन सा महाखनिः रिक्ता संजायते तावत्कालः अद्धापल्योपमसंज्ञः समुच्यते। (त. वृ. श्रुत. ३-३८)।
अद्धापल्य में से एक एक समय में एक एक रोमखंड को निकालते हुए समस्त रोमखण्डों के निकालने में जितना काल लगे, उतने काल का नाम अद्धापल्योपम है।

अद्धाप्रत्याख्यान (अद्धापच्चक्खाण) — अद्धा कालो तस्स य पमाणमद्धं तु जं भवे तमिह। अद्धापच्चक्खाणं दसमं तं पुण इमं भणियं॥ (प्रव. सारो. गा. २०१)।
अद्धा नाम काल का है। उसके—मुहूर्त व दिन आदि के—प्रमाण से किये जाने वाले त्याग को अद्धाप्रत्याख्यान कहते हैं।

अद्धामिश्रिता—१. अद्धा कालः, स चेह प्रस्तावाद्दिवसो रात्रिर्वा परिगृह्यते, स मिश्रितो यया साऽद्धामिश्रिता। यथा—कश्चित् कंचन त्वरयन् दिवसे वर्तमान एवं वदति उत्तिष्ठ रात्रिर्यातेति, रात्रौ वा वर्तमानायामुत्तिष्ठोद्गतः सूर्य इति। (प्रज्ञापना मलय. वृ. ११-१६५, पृ. २५६)।
दिन और रात्रि रूप काल का मिश्रण कर जो भाषा बोली जाती है उसे अद्धामिश्रिता कहते हैं। जैसे—दिन के रहते हुए यह कहना कि चलो उठो रात हो गई, अथवा रात्रि के रहते हुए भी यह कहना कि उठ जाओ सूर्य निकल आया है।

अद्धासमय—अद्धेति कालस्याख्या, अद्धा चासौ समयश्चाद्धासमयः। अथवा अद्धायाः समयो निर्विभागो भागोऽद्धासमयः। अयं चैक एव वर्तमानः सन्, नातीतानागताः; तेषां यथाक्रमं विनष्टानुत्पन्नत्वात्। (जीवाजी. मलय. वृ. ४, पृ.६)।
काल को अथवा काल के अविभागी अंश को अद्धासमय कहते हैं।

अद्धासागरोपम—एषामद्धापल्यानां दश कोटीकोट्यः एकमद्धासागरोपमम्। (स. सि. ३-३८; त. वा. ३, ३८, ७; त. सुखबो. वृ. ३-३८; त. वृ. श्रुत. ३-३८)।
दश कोडाकोडी अद्धापल्यों प्रमाण काल का नाम एक अद्धासागरोपम है।

अद्धास्थान—अद्धट्ठाणं णाम समयावलिय-खण-लव-मुहुत्तादिकालवियप्पा। (जयध. पत्र ७७३)।
समय, आवली, क्षण, लव और मुहूर्त आदि रूप जो काल के विकल्प हैं वे सब अद्धास्थान कहलाते हैं।

अद्भुत रस (अब्भुअरस)—१. विम्हयकरो अपुव्वो अनुभुअपुव्वो य जो रसो होइ। हरिस-विसाउप्पत्तीलक्खणओ अब्भुओ नाम॥ (अनु. गा. ६८)। २. विस्मयकरोऽपूर्वो वा तत्प्रथमसमयोत्पद्यमानो भूतपूर्वे वा पुनरुत्पन्ने यो रसो भवति स हर्ष-विषादोत्पत्तिलक्षणस्तद्वीजत्वाद् अद्भुतनाम। (अनु. हरि. वृ. गाथा ६८, पृ. ६६)। ३. श्रुतं शिल्पं त्यागतपःशौर्यकर्मादि वा सकलभुवनातिशायि किमप्यपूर्वं वस्त्वद्भुतमुच्यते, तद्दर्शन-श्रवणादिभ्यो जातो रसोऽप्युपचाराद्विस्मयरूपोऽद्भुतः। (अनु. मल. हेम. वृ. गा. ६३, पृ. १३५)।
१ अपूर्व अथवा पूर्व में अनुभूत भी जो हर्ष-विषाद की उत्पत्तिस्वरूप आश्चर्यजनक रस होता है उसका नाम अद्भुतरस है।

अद्वेष—अद्वेपः अप्रीतिपरिहारः। (पोडशक वृ. १६–१३)।
तत्त्वविषयक अप्रीति (विद्वेष) के दूर करने का नाम अद्वेष है।

अधन—चलितवृत्तोऽधनः। (प्रश्नो. २१)।
जो चारित्र से भ्रष्ट है उसका नाम अधन है।

अधम उपवास—××× अनेकभवतः सोऽधमः ×××॥ (अन. ध. ७–१५); तथा भवत्यधमः स उपवासः। कीदृशः? धारणे पारणे चैकभक्तरहितः साम्बुरित्येव। (अन. ध. स्वो. टी. ७–१५)।
जिस उपवास में धारणा और पारणा के दिन एकाशन न किया जाय और उपवास के दिन पानी पिया जाय, उसे अधम उपवास कहते हैं।

अधम (जघन्य) पात्र—१. अविरयसम्माइट्ठी जहण्णपत्तं मुणेयव्वं॥ (वसु. श्रा. २२२)। २. यतिः स्यादुत्तमं पात्रं मध्यमं श्रावकोऽधमम्। सुदृष्टिस्तद्विशिष्टत्वं विशिष्टगुणयोगतः। (सा. ध. ५-४४)
अविरतसम्यग्दृष्टि जीव को अधम या जघन्य पात्र कहते हैं।

अधर्म—१. यदीयप्रत्यनीकानि (मिथ्यादृष्टि-ज्ञान-वृत्तानि) भवन्ति भवपद्धतिः॥ (रत्नक. १–३)। २. सयलदुक्खकारणं अधम्मो। (जयध. पु. १, पृ. ३७०)। ३. प्रत्यवायहेतुरधर्मः। (वृ. सर्वज्ञ. सि. ७७)। ४. अधर्मस्तु तद्विपरीतः [मिथ्यादर्शन-ज्ञान-चारित्रात्मकः, यतो नाभ्युदय-निश्रेयससिद्धिः]। गद्यचि. ११, पृ. २४३)। ५. अधर्मः पुनरेतद्विपरीतफलः। (नीतिवा. १–२)। ६. अहिंसा परमो धर्मः स्यादधर्मस्तदत्ययात्। (लाटीसं. २–१); अधर्मस्तु कुदेवानां यावानाराधनोद्यमः। तैः प्रणीतेपु धर्मेपु चेष्टावाक्कायचेतसाम्॥ (लाटीसं. ४–१२२; पंचाध्या. २–६००)। ७. मिथ्यात्वाविरति-प्रमाद-कषाय-योगरूपः कर्मबन्धकारणम् आत्मपरिणामोऽधर्मः। (अभि. रा. १, पृ. ५६६)।
४ जिससे अभ्युदय और निःश्रेयस की सिद्धि न हो, ऐसे कर्मबन्ध के कारणभूत मिथ्यादर्शन, ज्ञान व चारित्र रूप आत्मपरिणाम को अधर्म कहते हैं।

अधर्म द्रव्य—१. जह हवदि धम्मदव्वं तह तं जाणेह दव्वमधमक्खं। ठिदिकिरियाजुत्ताणं कारणभूदं तु पुढवीव। (पञ्चा. का. ८६)। २. गमणणिमित्तं धम्ममधम्मं ठिदि जीव-पुग्गलाणं च। (नि. सा. ३०)। ३. गति-स्थित्युपग्रहौ धर्माधर्मयोरुपकारः। (त. सू. ५–१७)। ४. स्थितिपरिणामिनां जीव-पुद्गलानां स्थित्युपग्रहे कर्तव्येऽधर्मास्तिकायः साधारणाश्रयः। (स. सि. ५–१७)। ५. अधम्मत्थिकाओ ठिइलक्खणो। (दशवै. चू. अ. ४, पृ. १४२)। ६. तद्विपरीतोऽधर्मः॥ २०॥ तस्य (धर्मद्रव्यस्य) विपरीतलक्षणः (स्वयं स्थितिपरिणामिनां जीव-पुद्गलानां यः साचिव्यं दधाति सः) अधर्म इत्याम्नायते। (त. वा. ५, १, २०)। ७. एवं चेव (धम्मदव्वमिव ववगदपंचवण्णं ववगदपंचरसं ववगददुगंधं ववगदअट्ठपासं असंखेज्जपदेसियं लोगपमाणं) अधम्मदव्वं पि। णवरि जीव-पोग्गलाणं एदं ठिदिहेदू। (धव. पु. ३, पृ. ३); अधम्मदव्वस्स जीव-पोग्गलाणमवट्ठाणस्स णिमित्तभावेण परिणामो सब्भावकिरिया। (धव. पु. १३. पृ. ४३); तेसिं (जीव-पोग्गलाणं) अवट्ठाणस्स णिमित्तकारणलक्खणमधम्मदव्वं। (धव. पु. १५, पृ. ३३)। ८. अहम्मो ठाणलक्खणो। (उत्तरा. २८–८)। ९. स्थानक्रियासमेतानां महीवाधर्म उच्यते। (वरांग. २६, २४)। १०. सकृत्सकलस्थितिपरिणामिनामसान्निध्यधानाद् गतिपर्यायादधर्मः। (त. श्लो. ५–१)। ११. यः स्थितिपरिणामपरिणतयोर्जीव-पुद्गलयोरेव स्थित्युपष्टम्भहेतुर्विवक्षया क्षितिरिव झपस्य, स खल्वसंख्येयप्रदेशात्मकोऽमूर्त एवाधर्मास्तिकाय इति। (नन्दी. हरि. वृ. पृ. ५८)। १२. जीव-पुद्गलानां स्वाभाविके क्रियावत्त्वे तत्परिणतानां तत्स्वभावाधारणादधर्मः। (अनु. हरि. वृ. पृ. ४१)। १३. (सर्वेषामेव जीव-पुद्गलानां) स्थितिपरिणामभाजां चाधर्मम्। (त. भा. हरि. वृ. ५–१७)। १४. अधर्मः स्थित्युपग्रहः। (म. पु. २४, ३३)। १५. स्थित्या परिणतानां तु सचिवत्वं दधाति यः। तमधर्मं जिनाः प्राहुर्निरावरणदर्शनाः॥ जीवानां पुद्गलानां च कर्तव्ये स्थित्युपग्रहे। साधारणाश्रयोऽधर्मः पृथिवीव गवां स्थितौ॥ (त. सा. ३, ३६–३७)। १६. तं (गतिहेतुत्वसंगितं गुणं) न धारयतीत्यधर्मः। अथवा स्थितेरुदासीनहेतुत्वादधर्मः। (भ. आ. विजयो. टी. ३६)। १७. ठिदिकारणं अधम्मो विस्सामट्ठाणं च होइ जह छाया। पहियाणं रुक्खस्स य गच्छंतं णेव सो धरई॥ (भावसं. ३०७)। १८. ठाणजुदाण अधम्मो पुग्गलजीवाण ठाणसहयारी।

छाया जह पहियाणां गच्छंता णेव सो धरई ॥ (द्रव्यसं. १८)। १९. द्रव्याणां पुद्गलादीनामधर्मः स्थितिकारणम्। लोकेऽभिव्यापकत्वादिधर्मोऽधर्मोऽपि धर्मवत् ॥ (चन्द्र. च. १८–७१)। २०. स्वहेतुस्थितिमज्जीव-पुद्गलस्थितिकारणम्। अधर्मः ××॥ (आ. सा. ३–२१)। २१. जीव-पुद्गलयोः स्थितिहेतुलक्षणोऽधर्मः। (पंचा. का. जय. वृ. ३)। २२. दत्ते स्थितिं प्रपन्नानां जीवादीनामयं स्थितिम्। अधर्मः सहकारित्वाद्यथा छायाध्ववर्तिनाम् ॥ (ज्ञाना. ६, ४३)। २३. स्वकीयोपादानकारणेन स्वयमेव तिष्ठतां जीवपुद्गलानामधर्मद्रव्यं स्थितेः सहकारिकारणम्, लोकव्यवहारेण तु छायावद्वा पृथिवीवद्वेति। (वृ. द्रव्यसं. १८)। २४. स्वभाव-विभावस्थितिपरिणतानां तेषां (जीव-पुद्गलानां) स्थितिहेतुरधर्मः। (नि.सा.टी.९)। २५. ××अहम्मो ठाणलक्खणो। (गु. गु. षट्. स्वो. वृ. ५, पृ. २२)। २६. अधर्मास्तिकायः स्थानं स्थितिस्तल्लक्षणः। (उत्तरा. वृ. २८, ८)। २७. ××× थिरसंठाणो अहम्मो य। (नवत. ९)। २८. जीवानां पुद्गलानां च स्थितिपरिणामपरिणतानां तत्परिणामोपष्टम्भकोऽमूर्तोऽसंख्यातप्रदेशात्मकोऽधर्मास्तिकायः। (जीवाजी. मलय. वृ. ४)। २९. स्थितिहेतुरधर्मः स्यात् परिणामी तयोः स्थितेः। सर्वसाधारणोऽधर्मः×××॥ (द्रव्यानु. १०–५)। ३०. जीवानां पुद्गलानां च प्रपन्नानां स्वयं स्थितिम्। अधर्मः सहकार्येषु ×××। (योगशा. स्वो. विव. १–१६, पृ. ११३)। ३१. तयोरेव (जीव-पुद्गलयोः)साधारण्येन स्थितिहेतुरधर्मः। (भ. आ. मूला. ३६)। ३२. स्थानक्रियावतोर्जीव - पुद्गलयोस्तत्क्रियासाधनभूतमधर्मद्रव्यम्। (गो. जी. जी. प्र. ६०५)। ३३. अधर्मः स्थितिदानाय हेतुर्भवति तद्द्वयोः। (भावसं. वाम. ६६४)। ३४. स्थानयुक्तानां स्थितेः सहकारिकारणमधर्मः। (आरा. सा. टी. ४)। ३५. स्थितिपरिणामपरिणतानां स्थित्युपष्टम्भकोऽधर्मास्तिकायो मत्स्यादीनामिव मेदिनी, विवक्षया जलं वा। (स्थाना. अभय. वृ. १–८); अधर्मास्तिकायः स्थित्युपष्टम्भगुणः। (स्थाना. अभय. २–५८)। ३६. तिष्ठद्भाववतोऽस्य पुद्गल-चितोदचौदास्यभावेन यद्धेतुत्वं पथिकस्य मार्गमटतश्छाया यथावस्थितेः। धर्मोऽधर्मसनाह्वयस्य गतमोहात्मप्रदिष्टः सदा शुद्धोऽयं सकृदेव शश्वदनयोः स्थित्यात्मशक्तावपि ॥ (अध्या. मा. ३–३१)।३७.×××अधर्मः स्थित्युपग्रहः ॥(जम्बू. च. ३–३४)। ३८. तद्विपरीतलक्षणः (स्वयं स्थितिक्रियापरिणामिनां जीव-पुद्गलानां साचिव्यं यो ददाति सः)। (त. सुखबो. वृ. ५–१)

४ जो स्वयं ठहरते हुए जीव और पुद्गल द्रव्यों के ठहरने में सहायक होता है उसे अधर्म द्रव्य कहते हैं।

अधर्मास्तिकायद्रव्यत्व—क्रम-यौगपद्यवृत्तिस्वपर्यायव्याप्यधर्मास्तिकायत्वोपहितं सत्त्वमधर्मास्तिकायद्रव्यत्वम्। (स्या. र. वृ. पृ. १०)।

अधर्मास्तिकाय की क्रम से और युगपद् होने वाली अपनी पर्यायों से समन्वित द्रव्यता को अधर्मास्तिकायद्रव्यत्व कहते हैं।

अधर्मास्तिकायानुभाग—तेसि-(जीव-पोग्गलाण-) मवट्ठाणहेदुत्तं अधम्मत्थिकायाणुभागो। (धव. पु. १३, पृ. ३४९)।

जीव और पुद्गलों के ठहरने में सहायक होना, यह अधर्मास्तिकाय का अनुभाग (शक्ति) है।

अधःकर्म(आधाकम्म, अहेकम्म)—देखो आधाकर्म। १. जं तं आधाकम्मं णाम ॥ तं ओद्दावण-विद्दावण-आरंभकदणिप्फण्णं तं सव्वं आधाकम्मं णाम ॥ (षट्खं. ५, ४, २१–२२–धव.पु. १३, पृ. ४६)। २. जं दव्वं उदगाइसु छूढमहे वयइ जं च भारेण। सीईए रज्जुएण व ओयरणं दव्वऽहेकम्मं। संजमठाणाणं कंडगाण लेसा-ठिईविसेसाणं। भावं अहे करेई तम्हा तं भावऽहेकम्मं ॥ (पिं. नि. ९८–९९)। ३. विशुद्धसंयमस्थानेभ्यः प्रतिपत्याऽऽत्मानमविशुद्धसंयमस्थानेषु यदधोऽधः करोति तदधःकर्म। (बृहत्क. भा. ४)। ४. संयमस्थानानां कण्डकानां संख्यातीतसंयमस्थानसमुदायरूपाणाम्, उपलक्षणमेतत् षट्स्थानकानां संयमश्रेणेश्च, तथा लेश्यानां तथा सातावेदनीयादिशुभप्रकृतीनां सम्बन्धिनां स्थितिविशेषाणां च सम्बन्धिषु विशुद्धेषु विशुद्धतरेषु स्थानेषु वर्तमानं सन्तं निजं भावम्—अध्यवसायम्—यस्मादाधाकर्म भुञ्जानः साधुरधः करोति—हीनेषु हीनतरेषु स्थानेषु विदत्ते—तस्मादाधाकर्म भावादधःकर्म। (पिं. नि. मलय. वृ. ९९)। ५. साध्वर्थं यत् सचित्तमचित्तीक्रियते अचित्तं वा यत् पच्यते तदाधाकर्म। (आचा. शी. वृ. २, १, २६६)।

६. एतैः (आरम्भोपद्रव-विद्रावण-परितापनैः) चतुर्भिर्दोषैर्निष्पन्नमन्नमतिनिन्दितमधःकर्म। (भा. प्रा. टी. ६६)

१ उपद्रावण, विद्रावण, परितापन और आरम्भ; इन कार्यों से उत्पन्न—उनके आश्रयभूत—औदारिक शरीर को अधःकर्म कहा जाता है। २ अधःकर्म दो प्रकारका है—द्रव्य अधःकर्म और भाव अधःकर्म। पानी आदि में छोड़ी गई वस्तु (पाषाण आदि) स्वभावत. अपने भार से नीचे जाती है, अथवा नसैनी या रस्सी के सहारे जो नीचे उतरते हैं; यह द्रव्य अधःकर्म है। असंख्यात संयमस्थानों के समुदाय रूप संयमकाण्डक, छह स्थानकों की संयमश्रेणि, लेश्या और सातावेदनीय आदि पुण्य प्रकृतियों सम्बन्धी स्थितिविशेष; इनसे सम्बन्धित विशुद्ध व विशुद्धतर स्थानों में वर्तमान साधु चूंकि आधाकर्म का उपभोग करता हुआ अपने भाव को—अध्यवसाय को—नीचे करता है—हीन से हीनतर स्थानों में करता है, अतएव उस आधाकर्म को अधःकर्म कहा जाता है।

अधःप्रवृत्तकरण (अधापवत्तकरण)—१. एदासिं विसोधीणमधापवत्तलक्खणाणमधापवत्तकरणमिदि सण्णा। कुदो? उवरिमपरिणामा अध हेट्ठा हेट्ठिमपरिणामेसु पवत्तंति त्ति अधापवत्तसण्णा। (धव. पु. ६, २१७)। २. जम्हा हेट्ठिमभावा उवरिमभावेहिं सरिसगा हुंति। तम्हा पढमं करणं अधापवत्तो त्ति णिद्दिट्ठं॥ (गो. जी. ४८; ल. सा. ३५)। ३. अथ प्रागप्रवृत्ताः कदाचिदीदृशाः करणाः परिणामा यत्र तदथाप्रवृत्तकरणम्। अधस्थैरुपरिस्थाः समानाः प्रवृत्ताः करणा यत्र तदधःप्रवृत्तकरणमिति चान्वर्थसंज्ञा॥ (पंचसं. अमित. १, पृ. ३८)। ४. अधः अधस्तनसमये वृत्ताः प्रवृत्ता इव करणाः उपरितनसमयवर्तिविशुद्धिपरिणामा यस्मिन् सन्ति स अधःप्रवृत्तकरणः। (गो. जी. म. प्र. टी. २४८)।

२ अधःप्रवृत्तकरण परिणाम वे कहलाते हैं जो अधस्तन समयवर्ती परिणाम उपरितन समयवर्ती परिणामों के साथ कदाचित् समानता रखते हैं। उनका दूसरा नाम अथाप्रवृत्तकरण भी है। ये परिणाम अप्रमत्तसंयत गुणस्थान में पाये जाते हैं।

अधःप्रवृत्तकरणविशुद्धि—तत्थ अधापवत्तकरणसण्णिदविसोहीणं लक्खणं उच्चदे। तं जधा—अंतोमुहुत्तमेत्तसमयपंतिमुड्ढायारेण ठएदूण दुविय तेसिं समयाणं पाओग्गपरिणामपरूवणं कस्सामो—पढमसमयपाओग्गपरिणामा असंखेज्जा लोगा, अधापवत्तकरणविदियसमयपाओग्गा वि परिणामा असंखेज्जा लोगा। एवं समयं पडि अधापवत्तपरिणामाणं पमाणपरूवणं कादव्वं जाव अधापवत्तकरणद्धाए चरिमसमओ त्ति। पढमसमयपरिणामेहिंतो विदियसमयपाओग्गपरिणामा विसेसाहिया। विसेसो पुण अंतोमुहुत्तपडिभागिओ। विदियसमयपरिणामेहिंतो तदियसमयपरिणामा विसेसाहिया। एवं णेयव्वं जाव अधापवत्तकरणद्धाए चरिमसमओ त्ति। (धव. पु. ६, पृ. २१४–२१५)

प्रथम समय के योग्य अधःप्रवृत्त-परिणामों की अपेक्षा द्वितीय समय के योग्य परिणाम अनन्तगुणे विशुद्ध होते हैं, इनकी अपेक्षा तृतीय समय के योग्य परिणाम अनन्तगुणे विशुद्ध होते हैं, इस प्रकार अन्तर्मुहूर्त के समयों प्रमाण उन परिणामों में समयोत्तरक्रम से अनन्तगुणी विशुद्धि समझना चाहिए।

अधःप्रवृत्तसंक्रम (अहापवत्तसंकम)—१. बंधे अहापवित्तो परित्तिओ वा अबंधे वि। (कर्मप्र. संक्रम. गा. ६६, पृ. १८४)। २. अहापवत्तसंकमो णाम संसारत्थाणं जीवाणं बंधणजोग्गाणं कम्माणं बज्झमाणाणं अबज्झमाणाणं वा थोवातो थोवं बहुगाओ बहुगं बज्झमाणीसु य संकमणं। (कर्मप्र. चू. संक्रम. गा. ६६, पृ. १०६)। ३. बंधपयडीणं सगबंधसंभवविसए जो पदेससंकमो सो अधापवत्तसंकमो त्ति भण्णदे। (जयध. भा. ६, पृ. १७१)। ४. ध्रुवबन्धिनीनां प्रकृतीनां बन्धे सति यथाप्रवृत्तसंक्रमः प्रवर्तते। ××× इयमत्र भावना—सर्वेषामपि संसारस्थानामसुमतां ध्रुवबन्धिनीनां बन्धे, परावर्तप्रकृतीनां तु स्व-स्वभवबन्धयोग्यानां बन्धेऽबन्धे वा यथाप्रवृत्तसंक्रमो भवति। (कर्मप्र. मलय. वृ. संक्रम. ६६, पृ. १८४–८५)। ५. बन्धप्रकृतीनां स्वबन्धसम्भवविषये यः प्रदेशसंक्रमस्तदधःप्रवृत्तसंक्रमणं नाम। (गो. क. जी. प्र. टी. ४१३)।

१, ४ संसारी जीवों के ध्रुवबन्धिनी प्रकृतियों का उनके बन्ध के होने पर, तथा स्व-स्व-भवबन्धयोग्य परावर्तमान प्रकृतियों का बन्ध या अबन्ध की दशा में भी जो प्रदेशसंक्रम—परप्रकृतिरूप परिणमन—

होता है, उसे यथाप्रवृत्त या अधःप्रवृत्तसंक्रम कहते हैं। ३ अपने बन्ध की सम्भावना रहने पर जो बन्धप्रकृतियों का प्रदेशसंक्रम—परप्रकृतिरूप परिणमन—होता है उसे अधःप्रवृत्तसंक्रम कहा जाता है।

अधिक (सूत्रदोष)—वर्णादिभिरभ्यधिकमधिकम् ×××, अथवा हेतूदाहरणाधिकमधिकम्। यथा—अनित्यः शब्दः, कृतकत्व-प्रयत्नानन्तरीयकत्वाभ्यां घट-पटवदित्यादि। (आव. हरि. व मलय.वृ.८८१)। वर्णादि से अधिक होना, यह अधिक नामका सूत्रदोष है। अथवा हेतु और उदाहरणसे अधिक होना, इसे अधिक नामका सूत्रदोष समझना चाहिए। जैसे—'शब्द अनित्य है' इस प्रतिज्ञावाक्य की पुष्टि के लिए कृतकत्व व प्रयत्नानन्तरीयत्व रूप हेतु और घट-पदादिरूप उदाहरण का अधिक प्रयोग।

अधिकमास—१. तन्मध्ये (युगमध्ये)ऽन्ते चाधिकमासौ। (त. भा. ४–१५)। २. तेषां पञ्चानां संवत्सराणां मध्येऽभिवर्धिताख्येऽधिमासकः, एतदन्ते चाभिवर्धित एव। (त. भा. हरि. वृ. ४–१५)। ३. तेषां पंचानां संवत्सराणां मध्येऽभिवर्धिताख्ये संवत्सरेऽधिकमासकः पतति, अन्ते च अभिवर्धित एव। (त. भा. सिद्ध वृ. ४–१५)। ४. इगिमासे दिणवड्ढी वस्से बारह दुवस्सगे सदले। अहिओ मासो पंचयवासप्पजुगे दुमासहिया। (त्रि. सा. ४१०)। ५. एकस्मिन् मासे दिनैकवृद्धिः, एकस्मिन् वर्षे द्वादशदिनवृद्धिः,दलसहिते द्विवर्षे एकमासोऽधिकः, पञ्चवर्षात्मके युगे द्वौ मासौ अधिकौ ×××। (त्रि. सा. टी. ४१०)।

४ एक मास में एक दिन की वृद्धि होती है। इस प्रकार से एक वर्ष में १२ दिन की व अढ़ाई वर्षों में एक मास की वृद्धि होती है। यह एक मास अधिक मास कहलाता है। पञ्चवर्षात्मक युग के भीतर दो मास अधिक होते हैं।

अधिकरण— अधिक्रियन्तेऽस्मिन्नर्था इत्यधिकरणम्॥ अर्थाः प्रयोजनानि पुरुषाणां यत्राधिक्रियन्ते प्रस्तूयन्ते तदधिकरणम्, द्रव्यमित्यर्थः। (त. वा. ६, ६, ५)। २. अधिकरणं द्विविधम्—द्रव्याधिकरणं भावाधिकरणं च। तत्र द्रव्याधिकरणं छेदन-भेदनादि, शस्त्रं च दशविधम्। भावाधिकरणमष्टोत्तरशतविधम्। एतदुभयं जीवाधिकरणमजीवाधिकरणं च। (त. भा. ६–८)।

जहाँ पुरुषों के प्रयोजन अधिकृत अर्थात् प्रस्तुत होते हैं वह अधिकरण—द्रव्य—कहलाता है, यह अधिकरण का निरुक्त लक्षण है।

अधिकरणक्रिया—देखो आधिकरणिकी क्रिया। १. हिंसोपकरणादानं तथाधिकरणक्रिया॥ (त. श्लो. ६, ५, ६)। २. अधिक्रियते येनात्मा दुर्गतिप्रस्थानं प्रति तदधिकरणं परोपघातिकूट-गलपाशादिद्रव्यजातम्, तद्विषयाऽधिकरणक्रिया। (त. भा. सिद्ध. वृ. ६–६)। ३. हिंसोपकरणाधिकृतिरधिकरणक्रिया। (त. सुखबो. वृ. ६–५)। ४. अधिक्रियते स्थाप्यते नरकादिष्वात्माऽनेनेत्यधिकरणमनुष्ठानविशेषो बाह्यं वस्तु वा चक्र-खड्गादि, तत्र भवा तेन वा निर्वृता आधिकरणिकी। (प्रज्ञाप. मलय. वृ. २२–२७६); आधिकरणिकी खड्गादिप्रगुणीकरणम्। (प्रज्ञाप. मलय. वृ. २२–२८१)।

१ हिंसा के उपकरणों को ग्रहण करना अधिकरणक्रिया या आधिकरणिकी क्रिया कहलाती है।

अधिकरणोदीरक (अहिगरणोदीरण)–अधिकरणोदीरकम्—खामिय-उवसमियाइं अहिगरणाइं पुणो उदीरेइ। जो कोइ तस्स वयणं अहिगरणोदीरणं [गं]भणिअं। (गु. गु. षट्. स्वो. वृ. ५, पृ. १६)। जो क्षमित और उपशान्त अधिकरणों को पुनः उदीर्ण करता है उसके वचन को अधिकरण-उदीरक कहा जाता है।

अधिक-हीन-मान-तुला—मानं प्रस्थादि हस्तादि च, तुला उन्मानम्, मानं च तुला च मान-तुलम्, अधिकं च हीनं चाधिक-हीनम्, तच्च तन्मान-तुलं च (अधिक-हीनमान-तुलम्)। अधिकमाने हीनमानम्, अधिकतुला हीनतुला चेत्यर्थः। तत्र न्यूनेन मानादिना ऽन्यस्मै ददाति, अधिकेनात्मनो गृह्णातीत्येवमादिकूटप्रयोगो हीनाधिकमानोन्मानमित्यर्थः। (सा. ध. स्वो. टीका ४–५०)।

नाप-तौल के पात्रों और बांटों को हीनाधिक रखना और अधिक से लेना तथा हीन से देना, यह अचौर्याणुवत का अधिक-हीन-मान-तुला नामक अतिचार है।

अधि (अभि) गतचारित्रार्य — चारित्रमोहस्योपशमात् क्षयाच्च बाह्योपदेशानपेक्षा आत्मप्रसादादेव चारित्रपरिणामास्कन्दिनः उपशान्तकषायाः क्षीण-

कषायाश्चाऽविगतचारित्रार्याः। (त. वा. ३, ३६,२)। चारित्रमोह के उपशम अथवा क्षय से जो उपशान्त-कषाय अथवा क्षीणकषाय जीव बाह्य उपदेश की अपेक्षा न कर आत्मनैर्मल्य से ही चारित्ररूप परिणाम को प्राप्त होते हैं उन्हें अधिगतचारित्रार्य कहा जाता है।

अधिगम—१. शिक्षागमोपदेशश्रवणान्येकार्थकान्यधिगमस्य। (प्रशम. प्र. २२३)। २. अधिगमो णाणपमाणमिदि एगट्ठो। (धव. पु. ३, पृ. ३९)। ३. अधिगम्यन्ते परिच्छिद्यन्ते पदार्था येन सोऽधिगमः—ज्ञानमेवोच्यते। (आव. हरि. वृ. नि. ११५४)। ४. अधिगच्छत्यनेन तत्त्वार्थानधिगमयत्यनेनेति वाऽधिगमः। (त. श्लो. वा. १–१)। ५. अधिगमो हि स्वार्थाकारव्यवसायः। (अष्टस. २, ३६)। ६. निश्चीयते पदार्थानां लक्षणं नयभेदतः। सोऽधिगमोऽभिमन्तव्यः सम्यग्ज्ञानविलोचनैः॥ (भावसं. वाम. ३३६)। ७. जीवाद्यर्थस्वरूपावधारणमधिगमः। (त. सुखबो. वृ. १–३)।

३ जिसके द्वारा पदार्थ जाने जाते हैं, ऐसे ज्ञान को अधिगम कहते हैं। ४ जिसके द्वारा तत्त्वार्थों को स्वयं जानता है, अथवा जिसके आश्रय से उनका बोध दूसरों को कराया जाता है, उसे अधिगम कहते हैं।

अधिगम या अधिगमज सम्यग्दर्शन–१. यत्परोपदेशपूर्वकं जीवाद्यधिगमनिमित्तं स्यात्तदुत्तरम्। (स. सि. १–३; त. वा. १–३)। २. अथवा, यत् सम्यग्दर्शनं विध्युपायज्ञमनुष्यसम्पर्काज्जीवादिपदार्थतत्त्वाधिगमापेक्षमुत्पद्यते तदधिगमसम्यग्दर्शनम्। (त. वा. १, ३, ८)। ३. अधिगमः अभिगमः आगमो निमित्तं श्रवणं शिक्षा उपदेश इत्यनर्थान्तरम्। तदेवं परोपदेशाद्यत्तत्त्वार्थश्रद्धानं भवति तदधिगमसम्यग्दर्शनमिति। (त. भा. १–३)। ४. अधिगमाज्जीवादिपदार्थपरिच्छेदलक्षणात् श्रद्धानलक्षणमधिगमसम्यक्त्वम्। (आव. हरि. वृ. नि. ११४२)। ५. परोपदेशतस्तु बाह्यनिमित्तापेक्षं कर्मोपशमादिजमेवाधिगमसम्यग्दर्शनमिति। (त. भा. हरि. वृ. १, ३)। ६. ××× अधिगमस्तेन (परोपदेशेन) कृतं तदिति निश्चयः॥ (त. श्लो. १, ३, ३)। ७. यत्पुनस्तीर्थंकराद्युपदेशे सति बाह्यनिमित्तमपेक्ष्योपशमादिभ्यो जायते तदधिगमसम्यग्दर्शनमिति। (त. भा. सिद्ध. वृ. १–३)। ८. ××× जिनागमाभ्यासभवं द्वितीयम्॥ (धर्मप. २०–६६)। ९. गुरूपदेशमालम्ब्य सर्वेषामपि देहिनाम्। यत्तु सम्यक् श्रद्धानं तत् स्यादधिगमजं परम्॥ (योगशा. स्वो. विव. १–१७, पृ. ११८), १०. गुरूपदेशमालम्ब्य भव्यानामिह देहिनाम्। सम्यक् श्रद्धानं तु यत्तद् भवेदधिगमोद्भवम्॥ (त्रि. श. पु. च. १३–५९८)। ११. ××× तत्कृतोऽधिमश्च सः॥ (अन. ध. २, ४८)। स तत्त्वबोधः ××× तत्कृतस्तेन परोपदेशेन जनितः। (अन. ध. स्वो. टीका २–४८)। १२. यत्पुनः परोपदेशपूर्वकं जीवाद्यर्थनिश्चयादाविर्भवति तदधिगमजम्। (त.सुखबो.वृ.१–३)। १३. यत्सम्यग्दर्शनं परोपदेशेनोत्पद्यते तदधिगमजमुच्यते। (त. वृ. श्रुत. १–३)। १४. यत्पुनश्चान्तरङ्गेऽस्मिन् सति हेतौ तथाविधे। उपदेशादिसापेक्षं स्यादधिगमसंज्ञकम्॥ लाटीसं. ३–२२)

१ परोपदेशपूर्वक जीवादि तत्त्वों के निश्चय से जो सम्यक्त्व उत्पन्न होता है, उसे अधिगम या अधिगमज सम्यग्दर्शन कहते हैं।

अधिराज (अहिराज)–१. पंचसयरायसामी अहिराजो होदि कित्तिभरिददिसो। (ति. प. १–४५)। २. पञ्चशतनरपतीनामधिराजोऽधीश्वरो भवति लोके। (धव. पु. १, पृ. ५७ उद्धृत), ३. पंचसयरायसामी अहिराजो ×××॥ (त्रि. सा. ६८४)

पांच सौ राजाओं के स्वामी को अधिराज कहते हैं।

अधिवास—गन्धमाल्यादिभिः संस्कारविशेषः। (चैत्यवं. भा. चू. पृ. ५)

१ गन्ध व माला आदि के द्वारा किये जाने वाले संस्कारविशेष को अधिवास कहते हैं।

अधोऽति(व्यति)क्रम — १. कूपावतरणादेरधोऽतिक्रमः। (स. सि. ७–३०)। २. कूपावतरणादेरधोऽतिवृत्तिः। (त. वा. ७, ३०, ३; त. श्लो. ७–३०)। ३. कूपावतरणादिरधोऽतिक्रमः। (चा. सा. पृ. ८)। ४. अधो ग्राम-भूमिगृह-कूपादेः ××× योऽसौ भागो नियमितः प्रदेशः तस्य व्यतिक्रमः। (योगशा. स्वो. विव. ३–९७), ५. अधो ग्राम-भूमिगृह-कूपादेः व्यतिक्रमः। (सा. ध. स्वो. टीका ५-५)। ६. अवटावतरणादिरधोव्यतिक्रमः। (त. वृत्ति श्रुत. ७–३०)। ७. वापी[illegible]क्रमः, अधोदिशः परिमाणस्य अतिक्रमः। (कार्तिके.

३४२)। ८. अगाधभूवरावेशाद् विख्यातोऽधोव्यतिक्रमः। (लाटीसं. ६–११८)।

१ कूप व बावड़ी आदि में नीचे उतरने की स्वीकृत सीमा के उल्लंघन को अधोऽतिक्रम कहते हैं।

अधोदिग्व्रत—१. अधोदिक्परिमाणं अधोदिग्व्रतम्। (श्रा. प्र. टी. २८०)। २. अधोदिक् तत्सम्बन्धि तस्यां वा व्रतं अधोदिग्व्रतम् अर्वाग्दिव्रतम्, एतावती दिगध इन्द्रकूपाद्यवतरणादवगाहनीया, न परत इत्येवं भूतमिति हृदयम्। (आव. वृ. ६, पृ. ८२७)।

१ अधोदिशा सम्बन्धी कुएँ आदि में गमनागमन के परिमाण को अधोदिग्व्रत कहते हैं।

अधोलोक—१. हेट्ठिमलोयायारो वेत्तासणसण्णिहो सहावेण। (ति. प. १–१३७)। २. वेत्तासणसरिसो च्चिय अहलोगो चेव होइ नायव्वो। (पउमच. ३–१६)। ३. तत्र छव्वी नाम विस्तीर्णा पुष्पचङ्गेरी, तदाकारोऽधोलोकः। (आव. वृ. टि. मल. हेम. पृ. ६४)। ४. मंदरमूलादो हेट्ठा अधोलोगो। (धव. पु. ४, पृ. ६)।

१ पुरुषाकार लोक में नीचे का भाग, जो वेत्रासन सदृश है, उसे अधोलोक कहते हैं।

अधोव्यतिक्रम—देखो अधोऽतिक्रम।

अध्यधिदोष, अध्यवधिरोध (अज्झोवज्ज)—देखो अध्यवपूरक। १. जलतन्दुलपक्खेवो दाणट्ठं संजदाण सयपयणे। अज्झोवज्झं णेयं अहवा पागं तु जाव रोहो वा॥ (मूला. ६–८)। २. तन्दुलाम्बुविकक्षेपः स्वार्थं पाके यतीन् प्रति। स्यादध्यवधिरोधो वा पाकान्तं तत्तपस्विनाम्॥ (आचा. सा. ८–२४)। ३. स्याद्दोषोऽध्यधिरोधो यत् स्वपाके यतिदत्तये। प्रक्षेपस्तण्डुलादीनां रोधो वा ऽऽपाचनाद्यतेः॥ (अन. ध. ५–८)। ४. अथाध्यवधिर्नाम दोषो द्वितीय उच्यते यतीनाम्—पाके क्रियमाण आत्मन्यागते च सति तत्र पाके तन्दुला अम्बु चाधिकं क्षिप्यते सोऽध्यवधिर्दोष उच्यते। अथवा यावत्कालं पाको न भवति तावत्कालं तपस्विनां रोधः क्रियते, सोऽध्यवधिर्दोषः उत्पद्यते। (भा. प्रा. टीका ६६)। ५. अपवरकं संयतानां भवत्विति विहितं अज्झोवज्झं। (कार्तिके. ४४६)।

१ अकस्मात् अतिथि के आ जाने पर अपने लिए पकाई जाने वाली भोज्यसामग्री में और भी जल व चावलादि के मिलाने को अध्यधिदोष कहते हैं। अथवा रसोई तैयार होने तक साधु को चर्चा आदि करके रोके रहना भी अध्यधिदोष कहलाता है।

अध्ययन (अज्झयण)—१. जेण सुहप्पज्झयणं अज्झप्पाणयणमहियमयणं वा। वोहस्स संजमस्स व मोक्खस्स व जं तमज्झयणं॥ (विशे. भा. ६६३)। २. अधिगम्मंति व अत्था अणेण अधिगं व णयणमिच्छति। अधिगं व साहु गच्छति तम्हा अज्झयणमिच्छंति॥ (अभि. रा. १, पृ. २३१)।

१ जो शुभ (निर्मल) अध्यात्म (चित्त) को उत्पन्न करता है वह अध्ययन है। अथवा जो अध्यात्मको—निर्मल चित्तवृत्ति को—लाता है उसका नाम अध्ययन है। अथवा जिसके द्वारा बोध, संयम और मोक्ष की प्राप्ति होती है उसे अध्ययन जानना चाहिए। यह अध्ययन का निरुक्त लक्षण है।

अध्यवपूरक—देखो अध्यधिदोष। १. अध्यवपूरकं स्वार्थमूलाद्रहणप्रक्षेपरूपम्। (दशवै. हरि. वृ. ५, ५५)। २. यद् गृहिणा मूलारम्भे स्वार्थकृते तन्मध्ये यतिनिमित्तमधिकावतारणं सोऽध्यवपूरकः। (गु. गु. षट्. स्वो. वृ. २०, पृ. ४६)। ३. स्वार्थमधिश्रयणादौ कृते पश्चात्तन्दुलादिप्रक्षेपणादध्यवपूरकः। (आचा. शी. वृ. २, १, २६६)। ४. स्वार्थमधिश्रयणे सति साधुसमागमश्रवणात्तदर्थं पुनर्यो धान्यादिवापः सोऽध्यवपूरकः। (योगशा. स्वो. विव. १, ३८)। ५. गृहिणः स्वार्थमग्निज्वालनाद्याद्रहणदानान्ते आरम्भे कृते सति पश्चात् स्वार्थकल्पितं तन्दुलमध्ये कर्पटिकार्थं तन्दुलादीनां माणकं संकल्पितं प्रक्षिप्य राध्नोति यदा तदध्यवपूरकः। (जीतक. चू. वि. व्या. पृ. ४६)।

४ अपने लिए बनाये जाने वाले भोजन में साधु का आगमन सुन कर उनके निमित्त कुछ और अधिक अन्न के मिला देने को अध्यवपूरक कहते हैं।

अध्यवसान—१. स्व-परयोरविवेके सति जीवस्याध्यवसितिमात्रमध्यवसानम्। (समयप्रा. अमृत. वृ. २६५)। २. अध्यवसानं राग-स्नेह-भयात्मकोऽध्यवसायः। (स्थाना. अभय. वृ. ७–५६१, पृ. ३७६)। ३. अतिहर्ष-विषादाभ्यामविकमवसानं चिन्तनमध्यवसानम्। (विशे.—अभि. रा. १, पृ. २३२); मणसंकेप्पेत्ति वा अज्झवसाणं ति वा एगट्ठा। (अभि. रा. भा. १, पृ. २३२)।

१ स्व और पर के विवेक के विना केवल जीव का निश्चय होने को अध्यवसान कहते हैं। ३ अधि—अतिशय हर्ष-विषादसे जो अधिक—अवसान चिन्तन होता है उसका नाम अध्यवसान है। यह अध्यवसान का निरुक्त लक्षण है। मन का संकल्प और अध्यवसान ये दोनों समानार्थक हैं।

अध्यात्म—१. गतमोहाधिकाराणामात्मानमधिकृत्य या। प्रवर्तते क्रिया शुद्धा तदध्यात्मं जगुर्जिनाः॥ (अध्या. सा. २–२)। २. आत्मानमधिकृत्य स्याद्यः पञ्चाचारचारिमा। शब्दयोगार्थनिपुणास्तदध्यात्मं प्रचक्षते॥ (अध्यात्मो. १–२)।

१ निर्मोह अवस्था में आत्मा को अधिकृत करके जो शुद्ध क्रिया प्रवर्तित होती है उसका नाम अध्यात्म है।

अध्यात्मक्रिया—१ कोङ्कणसाधोरिव यदि सुताः सम्प्रतिक्षेत्रवल्लराणि ज्वलयन्ति, तदा भव्यमित्यादि चिन्तनमध्यात्मक्रिया। (धर्मसं. मान. स्वो. वृ. ३, २७, पृ. ८२)। २. अध्यात्मक्रिया चित्तकलमलकरूपा। (गु. गु. ष. वृत्ति पृ. ४१)।

२ चित्त की कलमलक रूप क्रिया का नाम अध्यात्मक्रिया है।

अध्यात्ममयी क्रिया—अपुनर्बन्धकाद्यावद् गुणस्थानं चतुर्दशम्। क्रमशुद्धिमती तावत् क्रियाऽध्यात्ममयी मता॥ (अध्या. सा. २–४)।

अपुनर्बन्धक—फिर से उत्कृष्ट बन्ध न करने वाले—गुणस्थान से लेकर चौदहवें गुणस्थान तक क्रमशः बढ़ने वाली विशुद्धिरूप क्रिया को अध्यात्ममयी क्रिया कहते हैं।

अध्यात्मयोग—१. आत्ममनोमरुत्तत्त्वसमतायोगलक्षणो। ह्यध्यात्मयोगः × × ×॥(यशस्ति. ६-१)। २. तत्र अनादिपरभावं औदयिकभावरमणीयताधर्मत्वेन निर्धार्य तत्पुष्टिहेतुक्रियां कुर्वन् अधर्मं धर्मवृत्त्या इच्छन् प्रवृत्तः स एव निरामयः निःसङ्गशुद्धात्मभावनाभावितान्तःकरणस्य स्वभाव एव धर्म इति योगवृत्त्या अध्यात्मयोगः। (ज्ञानसार वृ. ६–१, पृ. २२)।

१ आत्मा, मन और वायु के एक रूप समायोग को अध्यात्मयोग कहते हैं।

अध्यात्मविद्या—अधिकमधिकृतं वाऽधिष्ठितं या यदात्मन्यधिगमजनितं वा निस्तरङ्गान्तरङ्गम्। निरवधि निरवद्यं वेदनं मुक्तिहेतुः स्फुटघटितनिरुक्तिः सैवमध्यात्मविद्या॥ (आत्मप्र. ४८)।

आत्मविषयक ज्ञान से जो संकल्प-विकल्प से रहित निर्मल अन्तरङ्ग होता है, वही अध्यात्मविद्या है।

अध्यात्मवैरिणी क्रिया—आहारोपधिपूजर्द्धिगौरवप्रतिबन्धतः। भवाभिनन्दी यां कुर्यात् क्रियां साऽध्यात्मवैरिणी॥ (अध्यात्मसार २–५)।

अपने संसार को वृद्धिगत करने वाले जीव के द्वारा आहार, परिग्रह, पूजा व ऋद्धि-गौरव आदि से सम्बद्ध जो क्रिया की जाती है वह अध्यात्मवैरिणी कही जाती है।

अध्यापकवर्णजनन—देखो उपाध्यायवर्णजनन। १. अधिगतश्रुतार्थयाथातथ्यवाच्यवाचकानुरूपव्याख्यानाः निरस्तनिद्रा-तन्द्रा-प्रमादाः सुचरिताः सुशीलाः सुमेधसः इत्यध्यापकवर्णजननम्। (भ. आ. विजयो. टी. १–४७)। २. उपेत्य विनयेन ढौकित्वाऽधीयते श्रुतमेतेभ्य इति उपाध्यायाः। प्रबुद्धजिनागमार्थयाथातथ्याः सुचरितचूडामणयः पटुतर्कानुरस्रोतस्विनीनदीष्णमतयो निरस्तनिद्रा-तन्द्रा-प्रमादाः सुमेधसः शिष्यमेवानुरूपव्याख्याना इत्यध्यापकवर्णजननम्। (भ. आ. मूला. टी. ४७)।

पठित श्रुत के अर्थ का यथार्थ वाच्य-वाचक-भावके अनुसार व्याख्यान करने वाले अध्यापक—उपाध्याय—निद्रा, आलस्य व प्रमाद से रहित होते हुए अपने पद के योग्य उत्तम आचरण करनेवाले व निर्मल बुद्धि के धारक होते हैं। इस प्रकार अध्यापकों की स्तुति करने का नाम अध्यापकवर्णजनन है।

अध्येषणा—१. अध्येषणीये प्रयोक्तुरनुग्रहद्योतिकाऽध्येषणा। (शास्त्रवा.टी. ३–३)। २. अध्येषणा सत्कारपूर्वो व्यापारः। (अष्टस. यशो. वृ. ३, पृ. ५८)।

२ सत्कार-पूर्वक किये जाने वाले व्यापार को अध्येषणा कहते हैं।

अध्रुव प्रत्यय—देखो अध्रुवावग्रह। स एवायमहमेव स इति प्रत्ययो ध्रुवः, तत्प्रतिपक्षः प्रत्ययः अध्रुवः। (धव. पु. ६. पृ. १५४); विद्युत्प्रदीपज्वालादौ उत्पाद-विनाशविशिष्टवस्तुप्रत्ययः अध्रुवः। उत्पाद-व्यय-ध्रौव्यविशिष्टवस्तुप्रत्ययोऽपि अध्रुवः, ध्रुवात् पृथग्भूतत्वात्। (धव. पु. १३, पृ. २३९)।

कभी बहुत पदार्थों का तो कभी स्तोक पदार्थ का, अथवा कभी बहुत प्रकारके पदार्थ का तो कभी एक प्रकारके पदार्थ का, इस प्रकार हीनाधिकरूप से जो पदार्थ का अवग्रह होता है उसे अध्रुवप्रत्यय या अध्रुवावग्रह कहते हैं।

अध्रुव बन्ध—१.कालान्तरे व्यवच्छेदभागध्रुवः। (पञ्चसं. मलय. वृ. ५–२३)। २. यः पुनरायत्यां कदाचिद् व्यवच्छेदं प्राप्स्यति स भव्यसम्बन्धी बन्धोऽध्रुवः। (शतक. मल. हेम. टी. ३६, पृ. ५२)।

जिस बन्ध की आगामी काल में कभी व्युच्छित्ति होगी ऐसे भव्य जीवों के कर्मबन्ध को अध्रुव बन्ध कहते हैं।

अध्रुवबन्धिनी—१. निजबन्धहेतुसम्भवेऽपि भजनीयबन्धा अध्रुवबन्धिन्यः। (कर्मप्र. मलय. वृ. पृ. ८)। २. यासां च निजहेतुसद्भावेऽपि नावश्यम्भावी बन्धस्ता अध्रुवबन्धिन्यः। (शतक. दे. स्वो.टी. १)।

बन्धकारणों का सद्भाव होने पर भी जिन प्रकृतियों का कदाचित् बन्ध होता है और कदाचित् नहीं भी होता है, उन्हें अध्रुवबन्धिनी कहते हैं।

अध्रुवसत्कर्म, अध्रुवसत्ताक–१. यत् कादाचित्कभावि तदध्रुवसत्कर्म। (पञ्चसं. स्वो. वृ. ३–५५)। २. यत् पुनरवाप्तगुणानामपि कदाचिद् भवति, कदाचिन्न, तदध्रुवसत्कर्म। (पञ्चसं. मलय.वृ. ३–५५)। ३. यास्तु कादाचित्कभाविन्यस्ता अध्रुवसत्ताकाः। (शतक. दे. स्वो. टी. गा. १)। ४. कदाचिद् भवन्ति कदाचिन्न भवन्तीत्येवमनियता सत्ता यासां ता अध्रुवसत्ताकाः। (कर्मप्र. यशो. टीका गा. १)।

२ विवक्षित कर्मप्रकृतियों का जो सत्कर्म उत्तरगुणों के प्राप्त होने पर भी कदाचित् होता है और कदाचित् नहीं भी होता है वह अध्रुव सत्कर्म कहलाता है। ४ जिनकी सत्ता अनियत हो—कभी पाई जावे और कभी न पाई जावे—ऐसी कर्मप्रकृतियों को अध्रुवसत्कर्म या अध्रुवसत्ताक कहते हैं।

अध्रुवानुप्रेक्षा—लोगो विलीयदि इमो फेणो व्व सदेव-माणुस-तिरिक्खो। रिद्धीओ सव्वाओ सिविणय-संदंसणसमाओ॥ (भ. आ. १७१६)।

यह चतुर्गतिरूप लोक जलफेन या बुद्बुद के समान देखते-देखते ही विलय को प्राप्त हो जाता है और ये सांसारिक ऋद्धियां स्वप्न में देखे हुए राज्यादि के समान विलीन हो जाती हैं, ऐसा चिन्तवन करना अध्रुवानुप्रेक्षा है।

अध्रुवावग्रह—१. कदाचिद् बहूनां कदाचिदल्पस्य कदाचिद् बहुविधस्य कदाचिदेकविधस्य वेति न्यूनाधिकभावादध्रुवावग्रहः। (स. सि. १–१६)। २. पौनःपुन्येन संक्लेश-विशुद्धिपरिणामकारणापेक्षस्यात्मनो यथानुरूपपरिणामोपात्तश्रोत्रेन्द्रियसान्निध्येऽपि तदावरणस्येषदीषदाविर्भावात् पौनःपुनिकं प्रकृष्टावकृष्टश्रोत्रेन्द्रियावरणादिक्षयोपशमपरिणतत्वाच्चाध्रुवमवगृह्णाति × × ×। (त. वा. १, १६, १६)। ३. न सोऽयमित्याद्यध्रुवावग्रहः। (धव. पु. १, पृ. ३५७); तव्विवरीय-(अणिच्चत्ताए) गहणमद्धुवावग्गहो। (धव. पु. ६, पृ. २१)। ४. विद्युदादेरनित्यत्वेनान्वितस्याध्रुवो ग्रहः। (आचा. सा. ४-२६)। ५. तद्विपरीत-(अयथार्थग्रहण-) लक्षणः पुनरध्रुवावग्रहः। (त. सुखबो. वृ. १–१६)।

१ कभी बहुत पदार्थों का तो कभी स्तोक पदार्थ का, अथवा कभी बहुत प्रकारके पदार्थ का तो कभी एक ही प्रकारके पदार्थ का; इस प्रकार हीनाधिकरूप जो पदार्थ का अवग्रह होता है उसे अध्रुवावग्रह कहते हैं।

अध्रुवोदय—१. वोच्छिण्णो वि हु संभवइ जाण अधुवोदया ताओ। (पञ्चसं. गा. ३–१५६, पृ. ४८); यासां तु व्यवच्छिन्नोऽपि विनाशमुपगतोऽपि (उदयो) भूयः प्रादुर्भवति तथाविधहेतुसम्बन्धं प्राप्य ता अध्रुवोदयाख्याः। (पञ्चसं. स्वो. वृ. ३–३८)। २. यासां पुनः प्रकृतीनां व्यवच्छिन्नोऽपि विनाशमुपगतोऽपि, हु निश्चितं, तथाविधद्रव्यादिसामग्रीविशेषरूपं हेतुं सम्प्राप्य भूयोऽप्युदय उपजायते ता अध्रुवोदयाः सातवेदनीयादयः। (पञ्चसं. मलय. वृ. ३–३८)। ३. ×××× एगसमयादिअंतोमुहुत्तमेत्तकालावट्ठाणस्सेव अद्धुवोदयविवक्खादो। (संतकम्मपंजिया—धव. पु. १५, पृ. २४)।

२ उदय-व्युच्छित्ति हो जाने पर भी द्रव्यादि सामग्रीविशेष के निमित्त से जिनका उदय पुनः सम्भव है ऐसी सातावेदनीयादि प्रकृतियों को अध्रुवोदय कहते हैं।

अध्वर्यु—षोडशानामुदारात्मा यः प्रभुर्भावनर्त्विजाम्। सोऽध्वर्युरिह बोद्धव्यः शिवशर्माध्वरोद्धुरः॥ (उपासका. ८८३)।

जो महापुरुष तीर्थंकर प्रकृति की वन्धक षोडश-कारणभावनारूप ऋत्विजों का—याजकों का—प्रभु होकर मोक्षसुखरूप यज्ञ के बोझ का धारक हो उसे अध्वर्यु जानना चाहिए।

अनक्षरगता भाषा—अनक्षरगता अनक्षरात्मिका द्वीन्द्रियाद्यसंज्ञिपंचेन्द्रियपर्यन्तानां जीवानां स्व-स्वसंकेतप्रदर्शिका भाषा। (गो. जी. म. प्र. व जी. प्र. टीका २२६)।

द्वीन्द्रिय से लेकर असंज्ञी पंचेन्द्रिय पर्यन्त जीवों की जो अपने अपने संकेत को प्रगट करने वाली भाषा है उसे अनक्षरगता भाषा कहते हैं।

अनक्षरश्रुत—से किं तं अणक्खरसुयं? अणक्खरसुयं अणेगविहं पण्णत्तं। तं जहा—ऊससियं णीससियं णिच्छूढं खासियं च छीयं च। णिस्सिंघियमणुसारं अणक्खरं छेलियाईयं॥ से तं अणक्खरसुयं। (नन्दी. सू. ३८, पृ. १८७; आव. नि. २०)।

उच्छ्वसित, निःश्वसित, निष्ठ्यूत (थूक), कासित या काशित (छींक), छींक, निस्सिंघिय (अव्यक्त शब्द), अनुस्वार के समान उच्चारण की जाने वाली हुंकार आदि ध्वनि और छेलिय (सेण्टित—चीत्कार); इत्यादि सब संकेतविशेष होने से अनक्षर-श्रुतस्वरूप हैं।

अनक्षरात्मक शब्द—१. अनक्षरात्मको द्वीन्द्रियादीनामतिशयज्ञानस्वरूपप्रतिपादनहेतुः। (स. सि. ५, २४)। २. अवर्णात्मको द्वीन्द्रियादीनाम्, अतिशयज्ञानस्वरूपप्रतिपादनहेतुश्च। (त. वा. ५, २४, ३)। ३. बालादिसंज्ञ्यसंज्ञिगिवागनक्षरवागिमाः। (आचा. सा. ५–९०)। ४. अनक्षरः शब्दो द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रियाणां प्राणिनां ज्ञानातिशयस्वभावकथनप्रत्ययः। (त. वृत्ति श्रुत. ५–२४)। ५. अनक्षरात्मको द्वीन्द्रियादिशब्दरूपो दिव्यध्वनिरूपश्च। (पंचा. का. जय. वृ. ७९)।

द्वीन्द्रियादि असंज्ञी प्राणियों का जो शब्द अतिशय ज्ञानस्वरूप के प्रतिपादन का कारण होता है उसे अनक्षरात्मक शब्द कहते हैं।

अनगार—१. न विद्यतेऽगारमस्येत्यनगारः। ××× चारित्रमोहोदये सत्यगारसम्बन्धं प्रत्यनिवृत्तः परिणामो भावागारमित्युच्यते। (स. सि. ७–१९; त.वा. ७, १९, १; त.वृ. श्रुत. ७–१९)। २. अगाः वृक्षाः, तैः कृतमगारम्, नास्य अगारं विद्यते इत्यनगारः। (उत्तरा. चू. ६२, ६७, पृ. ६१)। ३. न गच्छन्तीत्यगाः वृक्षास्तैः कृतमगारं गृहम्। नास्यागारं विद्यते इत्यनगारः परित्यक्तद्रव्य-भावगृह इत्यर्थः। (नन्दी. हरि. वृ. पृ. ३१)। ४. अगारं गृहम्, तद्येषां विद्यते इति अगाराः गृहस्थाः, न अगारा अनगाराः। (दशवै. हरि. वृ. नि. १–९०)। ५. अगारं गृहम्, न विद्यते अगारं यस्यासावनगारः, परित्यक्तद्रव्य-भावगृह इत्यर्थः। (नन्दी. मलय. वृ. सू. ६, पृ. ८१ सूर्यप्र. मलय. वृ. ३; जीवाजी. मलय. वृ. ३, २, १०३)। ६. न विद्यते अगारमस्येत्यनगारः। (त. श्लो. ७–१९)। ७. निवृत्तरागभावो यः सोऽनगारो गृहोषितः। (ह. पु. ५८–१३७)। ८. महाव्रतोऽनगारः स्यात् ×××। (त. सा. ४, ७९)। ९. अनगाराः सामान्यसाधवः। (चा. सा. पृ. २२)। १०. योऽनीहो देह-गेहेऽपि सोऽनगारः सतां मतः। (उपासका. ८६२)। ११. गात्रमात्रधना पूर्वे सर्वसावद्यवर्जिताः। (क्ष. चू. ७–१९)। १२. पूर्वे (अनगाराः) सावद्यवर्जिताः। (जी. च. ७–१३)। १३. नास्यागारं गृहं विद्यत इत्यनगारः। (जम्बूद्वी. शान्ति. वृ. २, पृ. १५)।

१ भावागार का त्यागी महाव्रती अनगार कहा जाता है। चारित्रमोह का उदय रहने पर जो गृह-निवृत्ति के प्रति परिणति नहीं होती है, इसका नाम भावागार है।

अनङ्गक्रीडा—१. अङ्गं प्रजननं योनिश्च, ततोऽन्यत्र क्रीडा अनङ्गक्रीडा। (स. सि. ७–२८)। २. अनङ्गेषु क्रीडा अनङ्गक्रीडा॥३॥ अंगं प्रजननं योनिश्च ततोऽन्यत्र क्रीडा अनङ्गक्रीडा। अनेकविधप्रजननविकारेण जघनादन्यत्र चाङ्गे रतिरित्यर्थः। (त. वा. ७, २८, ३)। ३. अनङ्गक्रीडा नाम कुच-कक्षोरु-वदनान्तरक्रीडा, तीव्रकामाभिलाषेण वा परिनमाप्तसुरतस्याप्याहार्यैः स्थूलकादिभिर्योषिद्वाच्यप्रदेशासेवनमिति। (श्रा. प्र. टी. २७३)। ४. अनङ्गः कामः कर्मोदयात् पुंसः स्त्री-नपुंसक-पुरुषासेवनेच्छा हस्तकर्मादीच्छा वा, योषितोऽपि योषित्-पुरुषासेवनेच्छा हस्तकर्मादीच्छा वा; नपुंसकस्य पुरुष-स्त्रीसेवनेच्छा हस्तकर्मादीच्छा वा; स एवंविधोऽभिप्रायो मोहोदयादुद्भूतः काम उच्यते। नान्यः कश्चित् कामः। तेन तत्र क्रीडा रमणमनङ्गक्रीडा। आहार्यैः काष्ठ-पुस्त-फल-मृत्तिका-चर्मादिघटितप्रजननैः कृत-

कृत्योऽपि स्वलिंगेन भूयः मृद्नात्येवावाच्यप्रदेशं योषिताम्, तथा केशाकर्षण-प्रहारदान-दन्त-नखकदर्थना-प्रहारैर्मोहनीयकर्मविशात् किल क्रीडति तथाप्रकारं कामी। सर्वेषामनङ्गक्रीडा बलवति रागे प्रसूयते। (त. सू. हरि. वृ. ७-२३; योगशा. स्वो. विव. ३-९४)। ५. अङ्गं लिङ्गं योनिश्च, तयोरन्यत्र मुखादिप्रदेशे क्रीडाऽनङ्गक्रीडा। (रत्नक. टी. २, १४)। ६. अङ्गं प्रजननं योनिश्च, ततो जघनादन्यानेकविधप्रजननविकारेण रतिरनङ्गक्रीडा। (चा. सा. पृ. ७)। ७. अनङ्गानि कुच-कक्षोरु-वदनादीनि, तेषु क्रीडनं अनङ्गक्रीडा। योनि-मेहनयोरन्यत्र रमणम्। (पंचा. विव. ३)। ८. अङ्गं देहावयवोऽपि मैथुनापेक्षया योनिर्मेहनं वा, तद्व्यतिरिक्तानि अनङ्गानि कुच-कक्षोरु-वदनादीनि, तेषु क्रीडा रमणं अनङ्गक्रीडा। अथवा अनङ्गः कामः, तस्य तेन वा क्रीडा अनङ्गक्रीडा। स्वलिङ्गेन निष्पन्नप्रयोजनस्याहार्यैश्चर्मादिघटितप्रजननैर्योषिदवाच्यप्रदेशासेवनम्। (धर्मवि. वृ. ३-२६, पृ. ३९)। ९. अङ्गं साधनं देहावयवो वा, तच्चेह मैथुनापेक्षया योनिर्मेहनं च, ततो ऽन्यत्र मुखादिप्रदेशे रतिः। यतश्च चर्मादिमयैर्लिगैः स्वलिङ्गेन कृतार्थोऽपि स्त्रीणामवाच्यप्रदेशं पुनः पुनः कुद्नाति, केशाकर्षणादिना वा क्रीडन् प्रबलरागमुत्पादयति, सोऽप्यनङ्गक्रीडोच्यते। (सा. ध. स्वो. टी. ४-५८)। १०. अङ्गं स्मरमन्दिरं स्मरलता च, ताभ्यामन्यत्र कर-कक्षा-कुचादिप्रदेशेषु क्रीडनमनङ्गक्रीडा। अनङ्गाभ्यां क्रीडा अनङ्गक्रीडा। (त. वृ. श्रुत. ७-२८)। ११. दोषश्चानंगक्रीडाख्यः स्वप्नादौ शुक्रविच्युतिः। विनापि कामिनीसङ्गात् क्रिया वा कुत्सितोदिता॥ (लाटीसं. ६, ७७)। १२. अङ्गं योनिर्लिङ्गं च, ताभ्यां योनिलिङ्गाभ्यां विना कर-कुक्ष-कुचादिप्रदेशेषु क्रीडनमनङ्गक्रीडा। (कार्तिके. टी. ३३७-३८)।

१ कामसेवन के अङ्गों (प्रजनन और योनि) के अतिरिक्त अन्य अङ्गों से कामक्रीडा करने को अनङ्गक्रीडा कहते हैं।

अनङ्गप्रविष्ट—१. अनङ्गप्रविष्टं तु स्थविरकृतं आवश्यकादि। (आव. हरि. वृ. २०)। २. यत् पुनः स्थविरैर्भद्रबाहुस्वामिप्रभृतिभिराचार्यैरुपनिबद्धं तदनङ्गप्रविष्टम्, तच्चावश्यकनिर्युक्त्यादि। (आव. मलय. वृ. नि. २०)। ३. शेषं प्रकीर्णकाद्यनङ्गप्रविष्टम्। (कर्मस्त. गोवि. टी. ९-१०, पृ. ८१)।

२ जो आगम साहित्य स्थविरों—भद्रबाहु आदि आचार्यों—द्वारा रचित है वह अनंगप्रविष्ट माना जाता है। जैसे—आवश्यकनिर्युक्ति आदि।

अनङ्गश्रुत—सामाइयं चउवीसत्थओ वंदणं पडिक्कमणं वेणइयं किदियम्मं दसवेयालियं उत्तरज्झयणं कप्पववहारो कप्पाकप्पियं महाकप्पियं पुंडरीयं महापुंडरीयं णिसिहियमिदि चोद्दसविहमणंगसुदं। (धव. पु. ९, पृ. १८८)।

सामायिक व चतुर्विशतिस्तव आदि चौदह अनंगश्रुत के अन्तर्गत माने जाते हैं।

अनार्य—१. ये सिंहला बर्बरका किराता गान्धार-काश्मीर-पुलिन्दकाश्च। काम्बोज-बाह्लीक-खसौद्रकाद्यास्तेऽनार्यवर्गे निपतन्ति सर्वे॥ × × × त्वनार्या विपरीतवृत्ताः॥(वरांग.८, ३-४)। २. अनार्याः क्षेत्र-भाषा-कर्मभिर्बहिष्कृताः × × यदि वा अविपरीत-दर्शनाः साम्प्रतेक्षिणो दीर्घदर्शिनो न भवन्त्यनार्याः। (सूत्रकृ. शी. वृ. २, ६, १८)। ३. सग-जवण-सवर-बब्बर-काय मुरुंडोड्ड गोण पक्कणया। अरवाग हूण रोमय पारस खस खासिया चेव॥ दुंबिलय लउस बोक्कस-भिल्लंध पुलिंद कुंच भमररुया। कोवाय चीण चंचुय मालव दमिला कुलग्घा य॥ केक्कय किराय हयमुह खरमुह गय-तुरग-मिढयमुहा य। हयकन्ना गयकन्ना अन्नेऽवि अणारिया बहवे॥ (प्रव. सारो. १५८३–८५)। ४. आराद् दूरेण हेयधर्मेभ्यो याताः प्राप्ताः उपादेयधर्मैरित्यार्याः, × × × तद्विपरीता अनार्याः, शिष्टासम्मतनिखिलव्यवहारा इत्यर्थः। (प्रव. सारो. वृ. १५८५)।
१ जिनका आचरण विपरीत है—निन्द्य है—वे अनार्य कहलाते हैं। वे कुछ ये हैं—सिंहल, बर्बरक, किरात, गान्धार, काश्मीर, पुलिन्द, काम्बोज, बाह्लीक, खस और शौद्रक (आदि)।

अनालब्ध दोष—१. उपकरणादिकं लप्स्येऽहमिति बुद्ध्या यः करोति [illegible] [illegible]। (मूला. वृ. ७-१०६)। २. [illegible] × × × [illegible] [illegible]। (अन. ध. ८–१०६)। ३. [illegible]

दोषः स्यात् । या किम् ? या क्रिया । कया ? तदाशया उपकरणाद्याकांक्षया । (अन. ध. स्वो. टीका ८, १०६) ।

१ उपकरणादि प्राप्त करने की इच्छा से गुरु की वन्दनादिक करना, यह अनालब्ध दोष कहलाता है।

अनालम्बनयोग—१. तग्गुणपरिणइरूवो सुहुमोऽणालंवणो नाम ॥ (योगवि. १९) । २. सामर्थ्ययोगतो या तत्र दिदृक्षेत्यसङ्गसक्त्याढ्या । साऽनालम्बनयोगः प्रोक्तस्तद्दर्शनं यावत् ॥ (षोडशक १५-८) ।

२ सामर्थ्ययोग से—क्षपकश्रेणि के द्वितीय अपूर्वकरण गुणस्थान में होने वाले अतिक्रान्तविषयक शास्त्रदर्शित उपाय से—जो आसक्ति रहित निरन्तर प्रवृत्तिरूप असंग शक्ति से परिपूर्ण परतत्त्वविषयक देखने की इच्छा होती है, इसका नाम अनालम्बनयोग है।

अनावृष्टि—आवृष्टिर्वर्षणम्, तस्य अभावः अनावृष्टिः । (धव. पु. १३, पृ. ३३६) ।

वृष्टि का अर्थ वर्षा होता है, उस वर्षा के न होने का नाम अनावृष्टि है।

अनाशंसा—अनाशंसा सर्वेच्छोपरमः । (ललितवि. पं० पृ. १०२) ।

किसी भी प्रकारकी इच्छा के नहीं करने को अनाशंसा कहते हैं।

अनाश्वान्—योऽक्ष-स्तेनेष्वविश्वस्तः शाश्वते पथि निष्ठितः । समस्तसत्त्वविश्वास्यः सोऽनाश्वानिह गीयते ॥ (उपासका. ८६९) ।

जो इन्द्रियरूप चोरों के विषय में विश्वास न कर—उनके विषयों की आशा स रहित हो, मोक्षमार्ग पर निष्ठा (आस्था) रखता हो, और समस्त प्राणियों का विश्वासपात्र हो; उसे अनाश्वान् कहते हैं।

अनास्र(श्र)व (अणासव)—पाणवह-मुसावाया अदत्त-मेहुण-परिग्गहा विरओ । राईभोयणविरओ जीवो हवइ अणासवो ॥ पंचसमिओ तिगुत्तो अकसाओ जिइंदिओ । अगारवो य णिस्सल्लो जीवो हवइ अणासवो ॥ (उत्तरा. ३०, २-३) ।

हिंसादि पांच पापों से रहित, रात्रिभोजन से विरत, पांच समिति व तीन गुप्तियों से युक्त, कषाय से रहित, जितेन्द्रिय तथा गारव व शल्य से विहीन संयतको अनास्रव कहते हैं।

अनाहार—शरीरप्रायोग्यपुद्गलपिण्डग्रहणमाहारः । ××× तद्विपरीतोऽनाहारः । (धव. पु. १, पृ. १५३) ।

औदारिकादि तीन शरीरों के योग्य पुद्गलों को नहीं ग्रहण करना अनाहार है।

अनाहारक—१. त्रयाणां शरीराणां षण्णां पर्याप्तीनां योग्यपुद्गलग्रहणमाहारः, तदभावादनाहारकः । (स. सि. २-३०; त. श्लो. २-३०; त. वृ. श्रुत. २-३० । २. विग्गहगदिमावण्णा केवलिणो समुग्घदो अजोगी य । सिद्धा य अणाहारा ×××॥ (प्रा. पञ्चसं. १-१७७; गो. जी. ६६५) । ३. अनाहारका ओजाद्याहाराणामन्यतमेनापि नाहारयन्तीत्यर्थः । (श्रा. प्र. टी. १६८) । ४. ××× ततोऽनाहारकोऽन्यथा ॥ (त.सा. २-९४) । ५. सिद्ध-विग्रहगत्यापन्न-समुद्घातगतसयोगकेवल्ययोगिकेवलिनामेवानाहारकत्वात् । (जीवाजी. मलय. वृ. ९-२४७, पृ. ४४३) । ६. त्रीण्यौदारिक-वैक्रियिकाहारकाख्यानि शरीराणि षट् चाहार-शरीरेन्द्रियानप्राण-भाषा-मनःसंज्ञिकाः पर्याप्तीर्यथासम्भवमाहरतीत्याहारकः, नाहारकोऽनाहारकः । (त. सुखबो. वृ. २-३०) ।

१ तीन शरीर और छह पर्याप्तियों के योग्य पुद्गल स्वरूप आहार को न ग्रहण करने वाले जीवों को अनाहारक कहते हैं। २ विग्रहगति को प्राप्त चारों गति के जीव, समुद्घातगत सयोगिकेवली, अयोगिकेवली और सिद्ध; ये अनाहारक होते हैं।

अनिकाचित—तव्विवरीदं (णिकाचिदविवरीयं) अणिकाचिदं । (धव. पु. १६, पृ. ५७६) ।

निकाचित से विपरीत अर्थात् जिन कर्मप्रदेशाग्रों का उत्कर्षण, अपकर्षण, संक्रमण या उदीरणा की जा सके; उन्हें अनिकाचित कहते हैं।

अनिच्छाप्रवृत्तदर्शनबालमरण—१. कालेऽकाले वाऽध्यवसानादिना यन्मरणं जिजीविषोस्तद्द्वितीयम् । (भ. आ. विजयो.टी. २५)। २. कालेऽकाले वाऽध्यवसानादिना विना जिजीविषोर्मरणमनिच्छाप्रवृत्तम् । (भा. प्रा. टी. ३२) ।

२ काल या अकाल में अध्यवसान (विचार) आदि के विना जो जीवित के इच्छुक का मरण होता है उसे अनिच्छाप्रवृत्त-दर्शनबालमरण कहते हैं।

अनित्थंलक्षण संस्थान—१. ततोऽन्यन्मेघादीनां संस्थानमनेकविधमित्थमिदमिति निरूपणाभावादनि-

त्थंलक्षणम् । (स. सि. ५–२४) । २. ××× अतोऽन्यदनित्थम् ।। ××× अतोऽन्यन्मेघादीनां संस्थानमनेकविधमित्थमिदमिति निरूपणाभावात् अनित्थंलक्षणम् । (त. वा. ५, २४, १३; त. सुखबो. ५–२४) । ३. अनित्थंलक्षणं चानियताकारम् । (त. श्लो. ५–२४) । ४. ज्ञेयमम्भोधरादीनामनित्थलक्षणं तथा । (त. सा. ३–६४) । ५. इदं वस्तु इत्थंभूतं वर्तते इति वक्तुमशक्यत्वात् अनित्थंलक्षणं संस्थानमुच्यते । (त. वृत्ति श्रुत. ५–२४) । ६. पूर्वभवाकारस्यान्यथाव्यवस्थापनाच्छुपिरपूर्त्या । संस्थानमनित्थंस्थं स्यादेषामनियताकारम् ।। (लोकप्र. २–११८) ।

१ किसी एक निश्चित आकार से रहित—अनियत आकार वाले—मेघादिकों के संस्थान को अनित्थंलक्षण संस्थान कहते हैं । ६ रिक्त स्थानों—जैसे आत्मप्रदेशों से रहित नासिका आदि—की पूर्ति होकर जो अनियत आकारवाला मुक्त जीवों का अन्य प्रकारका आकार हो जाता है वह अनित्थंलक्षण आकार कहा जाता है ।

अनित्य—अनित्यो हि प्रतिक्षणविनाशी । (स्या. मं. टी. ५) ।

प्रतिक्षण विनश्वर वस्तु को अनित्य कहते हैं ।

अनित्यनिगोत—त्रसभावमवाप्ता अवाप्स्यन्ति च ये ते अनित्यनिगोताः । (त. वा. २, ३२, २७) ।

जो निगोत जीव त्रस पर्याय को प्राप्त कर चुके हैं व आगे प्राप्त करने वाले हैं वे अनित्य निगोत कहे जाते हैं ।

अनित्यभावना—देखो अनित्यानुप्रेक्षा ।

अनित्यानुप्रेक्षा—१. इमानि शरीरेन्द्रियविषयोपभोग-परिभोगद्रव्याणि समुदायरूपाणि जलबुद्बुदनवस्थितस्वभावानि गर्भादिष्ववस्थाविशेषेषु सदोपलभ्यमानसंयोगविपर्ययाणि । मोहादत्राज्ञो नित्यतां मन्यते । न किञ्चित् संसारे समुदितं ध्रुवमस्ति आत्मनो ज्ञानदर्शनोपयोगस्वभावादन्यदिति चिन्तनमनित्यतानुप्रेक्षा । (स. सि. ६–७; त. वा. ६, ७, १) । २. इष्टजनसम्प्रयोगर्द्धिविषयसुखसम्पदस्तथाऽऽरोग्यम् । देहश्च यौवनं जीवितञ्च सर्वाण्यनित्यानि ।। (प्रशमर. १५१) । ३. जं किंचि वि उप्पण्णं तस्स विणासो हवेइ णियमेण । परिणामसरूवेण वि ण य किंचि वि सासयं अत्थि ।। जम्मं मरणेण समं संपज्जइ जोव्वणं जरासहियं । लच्छी विणाससहिया इय सव्वं भंगुरं मुणह ।। अथिरं परियणसयणं पुत्त-कलत्तं सुमित्त-लावण्णं । गिह-गोहणाइ सव्वं णवघणविंदेण सारिच्छं ।। सुरधणु-तडि व्व चवला इंदियविसया सुभिच्चवग्गा य । दिट्ठपणट्ठा सव्वे तुरय-गया रह-वरादी य ।। पंथे पहियजणाणं जह संजोओ हवेइ खणमित्तं । बंधुजणाणं च तहा संजोओ अद्धुओ होइ ।। अइलालिओ वि देहो ण्हाण-सुयंधेहिं विविह-भक्खेहिं । खणमित्तेण वि विहडइ जलभरिओ आमघडओ व्व ।। जा सासया ण लच्छी चक्कहराणं पि पुण्णवंताणं । सा किं बंधेइ रइं इयरजणाणं अपुण्णाणं ।। कत्थ वि ण रमइ लच्छी कुलीण-धीरे वि पंडिए सूरे । पुज्जे धम्मिट्ठे वि य सुवत्त-सुयणे महासत्ते ।। जलबुब्बुयसारिच्छं धण-जोव्वण-जीवियं पि पेच्छंता । मण्णंति तो वि णिच्चं अइबलिओ मोहमाहप्पो ।। चइऊण महामोहं विसये मुणिऊण भंगुरे सव्वे । णिव्विसयं कुणह मणं जेण सुहं उत्तमं लहइ ।। (कार्तिके. ४–११ व २१-२२) । ४. उपात्तानुपात्तद्रव्यसंयोगव्यभिचारस्वभावोऽनित्यत्वम् । (त. श्लो. ६–७) । ५. शरीरेन्द्रियविषयभोगादेर्भंगुरत्वमनित्यत्वम् । (त. सुखबो. वृ. ६–७) ६. संसारे सर्वपदार्थानामनित्यताचिन्तनमनित्यभावना । (सम्बोधस. वृ. १६) ।

१ शरीर तथा इन्द्रियां और उनके विषयभूत भोग-उपभोग द्रव्य जलबुद्बुदों के समान क्षणभंगुर हैं, मोह से अज्ञ प्राणी उनमें नित्यता की कल्पना करता है; वस्तुतः आत्मा के ज्ञान-दर्शनमय उपयोग स्वभाव को छोड़कर और कोई वस्तु नित्य नहीं है, इस प्रकार से चिन्तवन करने को अनित्यभावना या अनित्यानुप्रेक्षा कहते हैं ।

अनिदा—नितरां निश्चितं वा सम्यक् दीयते चित्तमस्यामिति निदा ××× सामान्येन चित्तवती सम्यग्विवेकवती वा इत्यर्थः । इतरा त्वनिदा चित्तविकला सम्यग्विवेकविकला । (प्रज्ञाप. मलय. वृ. ३५, सू. ३३०) ।

पिछले भव में किये गये शुभाशुभ के स्मरण से रहित ऐसे चित्त के अभाव में अथवा सम्यक् विवेक के अभाव में जिस वेदना का अनुभव किया जाता है वह अनिदा वेदना कहलाती है ।

अनिधत्त—तव्विवरीयं (णिधत्तविवरीयं—जं पदेसग्गमोकड्डिज्जदि, उक्कड्डिज्जदि, परपयडि संकामिज्जदि, उदये दिज्जदि तं) अणिधत्तं । (धव. पु. १६, पृ. ५७६)।

जिस कर्मप्रदेशाग्र का अपकर्षण, उत्कर्षण और परप्रकृति संक्रमण किया जा सकता है तथा जो उदय में भी दिया जा सकता है उसे अनिधत्त कहते हैं।

अनिन्द्रिय—अनिन्द्रियं मनः अन्तःकरणमित्यनर्थान्तरम् । ××× ईषदिन्द्रियमनिन्द्रियमिति, यथा अनुदरा कन्या इति । (स. सि. १–१४) । २ अनिन्द्रियं मनोऽनुदरावत् ॥२॥ मनोऽन्तःकरणमनिन्द्रियमित्युच्यते । (त. वा. १, १४, २) । ३. नेन्द्रियमनिन्द्रियम्, नो-इन्द्रियं च प्रोच्यते । अत्रेषदर्थे प्रतिवन्वो द्रष्टव्यो यथाऽनुदरा कन्येति । तेनेन्द्रियप्रतिषेधेनात्मनः करणमेव मनो गृह्यते, तदन्तःकरणं चोच्यते । (त. सुखवो. वृ. १–१४) । ४. इन्द्रियादन्यदनिन्द्रियं मनः ओघश्चेति । (त. भा. सिद्ध. व. १–१४)।

१ इन्द्रियों के समान वाह्य में दृष्टिगोचर न होकर इन्द्रिय के ही कार्य (ज्ञानोत्पादन) के करनेवाले अन्तःकरण रूप मन को अनिन्द्रिय कहते हैं।

अनिन्द्रिय जीव—न सन्ति इन्द्रियाणि येषां तेऽनिन्द्रियाः। के ते ? अशरीराः सिद्धाः। (धव. पु. १, पृ. २४८); ण य इंदिय-करणजुदा अवग्गहाईहि गाहया अत्थे । णेव य इंदियसोक्खा अणिंदियाणंतणाण-सुहा ॥ (प्रा. पञ्चसं. १–७४; धव. पु. १, प. २४८ उ.; गो. जी. १७३) ।

जो इन्द्रिय रूप करणों से युक्त होकर अवग्रहादि के द्वारा पदार्थों को ग्रहण नहीं करते तथा इन्द्रियजन्य सुख से रहित हैं ऐसे अतीन्द्रिय अनन्त ज्ञान (केवलज्ञान) धारक मुक्त जीव अनिन्द्रिय—इन्द्रियविहीन —कहे जाते हैं।

अनिन्द्रिय प्रत्यक्ष—१. अनिन्द्रियप्रत्यक्षं स्मृतिसंज्ञा-चिन्ताभिनिवोधात्मकम् । (लघी. स्वो. वृ. ६१) । २. अनिन्द्रियप्रत्यक्षं वह्वादिद्वादशप्रकारार्थविषयमवग्रहादिविकल्पमष्टचत्वारिंशत्संख्यम् । (प्रमाणप. पृ. ६८) । ३. अनिन्द्रियादेव विशुद्धिसव्यपेक्षादुपजायमानमनिन्द्रियप्रत्यक्षम् । (प्र. र. मा. २–५) । ४. केवलमनोव्यापारप्रभवमनिन्द्रियप्रत्यक्षम् । (लघीय. अभय. वृ. ६१) ।

१ स्मृति, प्रत्यभिज्ञान, तर्क और अभिनिवोध (अनुमान) रूप ज्ञान को अनिन्द्रिय प्रत्यक्ष कहते हैं। ४ एक मात्र—इन्द्रियनिरपेक्ष—मन से उत्पन्न होने वाले ज्ञान को अनिन्द्रियप्रत्यक्ष कहा जाता है जो उपर्युक्त स्मृति आदि रूप है।

अनिन्द्रिय सुख—अणुवमममेयमक्खयममलमजरमरुजमभयमभवं च । एयंतियमच्चंतियमव्वावाघं सुहमजेयं ॥ (भ. आ. २१५३) ।

अनुपम, अमेय, अक्षय, निर्मल, अजर, अरुज (रोगरहित), भयविरहित, संसारातीत—मुक्तिजनित—ऐकान्तिक (असहाय), आत्यन्तिक (अविनश्वर), निर्वाध और अजेय सुख को अनिन्द्रिय या अतीन्द्रिय कहते हैं।

अनिबद्ध मंगल—जो सुत्तस्सादीए सुत्तकत्तारेण कयदेवदाणमोक्कारो तमणिवद्धमंगलं । (धव. पु. १, पृ. ४१) ।

सूत्र के आदि में सूत्रकार के द्वारा जो देवता-नमस्कार किया तो गया हो, पर ग्रन्थ में निवद्ध न किया गया हो, उसे अनिवद्ध मंगल कहते है।

अनियत विहार—अनियतविहारोऽनियतक्षेत्रावासः। (अन. ध. स्वो. टी. ७–६८) ।

अनियत क्षेत्र में रहने का नाम अनियतविहार है।

अनिर्वृत्तिकर—निर्वृत्तिः सुखम्, अनिर्वृत्तिः पीडा, तत्करणशीलोऽनिर्वृत्तिकरः । (आव. मलय. वृत्ति १०८६) ।

स्वभावतः पीडा उत्पन्न करने वाले को अनिर्वृत्तिकर कहते हैं।

अनिर्हारिम—यत्पुनर्गिरिकन्दरादौ तदनिर्हरणादनिर्हारिमम् । (स्थाना. अभय. वृ. २, ४, १०२) ।

पर्वत की गुफा आदि में जो पादपोपगमन—छिन्न होकर गिरे हुए पादप (वृक्ष) के समान उपगमन —अतिशय निश्चेष्ट अवस्था युक्त मरण—होता है वह अनिर्हारिम मरण कहलाता है। कारण यह कि वसतिमें हुए मरण में जैसे शरीर का निर्हरण होता है वैसे वह यहां नहीं होता।

अनिवृत्ति(वर्ति)करण—१. यतस्तावन्न निवर्तते यावत्सम्यक्त्वं न लब्धमित्यतोऽनिवर्तिकरणम् । (त. भा. हरि. वृत्ति १–३, पृ. २५); २. निवर्तनशीलं निवर्ति, न निवर्ति अनिवर्ति, आ सम्यग्दर्शन-

लाभान्न निवर्तते । (श्राव. हरि. वृत्ति नि. १०६)। ३. येनाध्यवसायविशेषेणानिवर्तकेन ग्रन्थिभेदं कृत्वाऽतिपरमाह्लादजनकं सम्यक्त्वमवाप्नोति तदनिवृत्तिकरणम् । (गुण. क्रमा. स्वो. टी. २२) ।

३ जिस विशिष्ट आत्मपरिणाम के द्वारा जीव ग्रन्थि को भेदकर अतिशय आनन्दजनक सम्यक्त्व को प्राप्त करता है वह अनिवर्ति या अनिवृत्तिकरण कहलाता है। इस परिणाम से चूंकि सम्यक्त्व की प्राप्ति होने तक जीव निवृत्त नहीं होता है, अतः उसकी यह सार्थक संज्ञा है।

अनिवृत्तिकरण गुणस्थान—१. एकम्मि कालसमए संठाणादीहिं जह णिवट्टंति । ण णिवट्टंति तहा वि य परिणामेहिं मिहो जम्हा ।। होंति अणियट्टिणो ते पडिसमयं जेसिमेक्कपरिणामा । विमलयरझाण-हुयवहसिहाहिं णिद्दड्ढकम्म-वणा ।।(प्रा. पञ्चसं. १, २०–२१, धव. पु. १, पृ. १८६ उ.; गो. जी. ५६–५७; भावसं. दे. ६४९–५० । २. विणिवट्टंति विसुद्धिं समयपइट्ठा वि जस्स अन्नोन्नं । तत्तो णियट्टिठाणं विवरीयमओ उ अनियट्टी ।। (शतक. भा. ८९; गु. गु. षट्. स्वो. वृ. १८,पृ. ४५) । ३. परस्पराध्यवसायस्थानव्यावृत्तिलक्षणा । निवृत्तिर्यस्य नास्त्येषोऽनिवृत्ताख्योऽसुमान् भवेत् ।। ततः पदद्वयस्यास्य विहिते कर्मधारये । स्यात्सोऽनिवृत्तिवादरसम्परायाभिधस्ततः ।। तस्यानिवृत्तिवादरसम्परायस्य कीर्तितम् । गुणस्थानमनिवृत्तिवादरसम्परायकम् ।। (लोकप्र. ३, ११८८–९०) । ४. तुल्ये समाने काले यतः समा सर्वेषामपि तत्प्रविष्टानां विशोधिर्भवति, न विषमा; ततो नाम सान्वयं निर्वचनीयं अनिवृत्तिकरणम् ।(कर्मप्र. मलय. वृ. उप. क. गा. १६) । ५. निवर्तन्तेऽङ्गिनोऽन्योऽन्यं यत्रैकसमयाश्रिताः । निवृत्तिः कथ्यते तेनानिवृत्तिस्तद्विपर्ययात् ।।(सं. प्रकृतिवि. जयति. १–१४)। ६. युगपदेतद्गुणस्थानकं प्रतिपन्नानां बहूनामपि जीवानामन्योऽन्यमध्यवसायस्थानस्य व्यावृत्तिः निवृत्तिर्नास्ति यस्येति अनिवृत्तिः । समकालमेतद् गुणस्थानकमारूढस्यापरस्य यदध्यवसायस्थानं विवक्षितोऽन्योऽपि कश्चित्तद्वर्त्यैवेत्यर्थः । (कर्मस्त. दे. स्वो. वृ. २)। ७. भावानामनिवृत्तित्वादनिवृत्तिगुणास्पदम् । (गुण. क्रमा. ३७) । दृष्टश्रुतानुभूतभोगाकांक्षादिसंकल्पविकल्परहितनिश्चलपरमात्मैकत्वैकाग्रध्यान—परिणतिरूपाणां भावानामनिवृत्तित्वादनिवृत्तिगुणास्पदं गुणस्थानं भवति । (गुण. क्रमा. स्वो. वृ. ३७) । ८. दृष्टश्रुतानुभूतभोगाकांक्षादिरूपसमस्तसंकल्प-विकल्परहितनिजनिश्चलपरमात्मतत्त्वैकाग्र—ध्यानपरिणामेन कृत्वा येषां जीवानामेकसमये ये परस्परं पृथक्कर्तुं नायान्ति ते वर्णसंस्थानादिभेदेऽप्यनिवृत्तिकरणौपशमिक-क्षपकसंज्ञा द्वितीयकषायाद्येकविंशतिभेदभिन्नचारित्रमोहप्रकृतीनामुपशमक्षपणसमर्था नवमगुणस्थानवर्तिनो भवन्ति । (बृ. द्रव्यसं. टी. १३) । ९. परिणामा निवर्तन्ते मिथो यत्र न यत्नतः । अनिवृत्तिवादरः स्यात् क्षपकः शमकश्च सः । (योगशा. स्वो. वि. १–१६) । १०. क्षपयन्ति न ते कर्म शमयन्ति न किञ्चन । केवलं मोहनीयस्य शमनक्षपणोद्यताः ।। संस्थानादिना भिन्नाः समानाः परिणामतः । समानसमयावस्थास्ते भवन्त्यनिवृत्तयः । (पञ्चसं. अमित. १, ३७–३८);एकसमयस्थानामनिवृत्तयोऽभिन्नाः करणाः यत्र तदनिवृत्तिकरणम् । (पञ्चसं. अमित. १, पृ. ३८; अन. ध. स्वो. टी. २. ४६–४७) । ११. साम्परायशब्दे कषायो लभ्यते । यत्र साम्परायस्य कषायस्य स्थूलत्वेनोपशमः क्षयश्च वर्तते तदनिवृत्तवादरसाम्परायसंज्ञं गुणस्थानमुच्यते । तत्र जीवा उपशमकाः क्षपकाश्च भवन्ति । एकस्मिन् समये नानाजीवापेक्षयापि एकरूपाः परिणामा भवन्ति । यतः परिणामानां परस्परं स्वरूपानिवृत्तिस्तेन कारणेनानिवृत्तिकरणवादरसाम्परायसंज्ञं नवमगुणस्थानमुच्यते । (त. वृत्ति श्रुतसागर ९-१) ।

जिस गुणस्थान में विवक्षित एक समय के भीतर वर्तमान सर्व जीवों के परिणाम परस्पर में भिन्न न होकर समान हों, उसे अनिवृत्तिकरण गुणस्थान कहते हैं।

अनिश्रितवचनता—अनिश्रितवचनता रागाद्यकलुषितवचनता । (उत्तरा. नि. वृ. १–५७) ।

राग-द्वेषादि जनित कालुष्य से रहित वचनों के बोलने को अनिश्रितवचनता कहते हैं।

अनिश्रितावग्रह—अनिश्रितमवगृह्णातीति लिङ्गेन निश्रितोऽभिधीयते, यथा यूथिकाकुसुमानामत्यन्तशीत-मृदु-स्निग्धादिरूपः प्राक् स्पर्शोऽनुभूतस्तदनुमानेन लिङ्गेन तं विषयं न यदा परिच्छिन्दन् तदाऽयं प्रवर्तते तदा अनिश्रितम् अनिश्रितमवगृह्णातीत्युच्यते ।

(त. भा. सिद्ध. वृ. १-१६)।

निश्रित का अर्थ है लिंग से जाना गया। जैसे जूही के फूलों का शीत, कोमल और स्निग्ध आदि रूप स्पर्श पूर्व में अनुभव में आया था; उस अनुमान रूप लिंग से उस विषय को न जानता हुआ जब ज्ञान उत्पन्न होता है तब वह अनिश्रितावग्रह कहा जाता है।

अनिष्टयोगार्त—१. आर्तममनोज्ञस्य सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः। (त. सू. ९-३०)। २. अमणुण्णाणं सद्दाइविसयवत्थूण दोसमइलस्स। घणिअं विओगचिंतणमसंपयोगाणुसरणं च ॥ (गु. गु. षट्. स्वो. वृ. २, पृ. ८)। ३. अमनोज्ञानां शब्दादीनां सम्प्रयोगे तद्विप्रयोगचिन्तनमसम्प्रयोगप्रार्थना च प्रथमम्। (योगशा. स्वो. विव. ३-७३)।

देखो अनिष्टसंयोगज आर्तध्यान।

अनिष्टसंयोगज आर्तध्यान—१. अमनोज्ञानां विषयाणां सम्प्रयोगे तेषां विप्रयोगे यः स्मृतिसमन्वाहारो भवति तदार्त्तध्यानमाचक्षते। (त. भा. ९-३१)। २. तस्य (अमनोज्ञस्य विप-कण्टकादेः) सम्प्रयोगे स कथं नाम मे न स्यादिति सङ्कल्पश्चिन्ताप्रबन्धः स्मृतिसमन्वाहारः प्रथममार्तमित्याख्यायते। (स. सि. ९-३०)। ३. अमनोज्ञस्योपनिपाते स कथं नाम मे न स्यादिति संकल्पश्चिन्ताप्रबन्धः आर्तमित्याख्यायते। (त. वा. ९, ३०, २; त. श्लो. ९-३०)। ४. अमनोज्ञविषयविप्रयोगोपाये व्यवस्थापनं मनसो निश्चलमार्तध्यानम्, केनोपायेन वियोगः स्यादित्येकतानमनोनिवेशनमार्तध्यानमित्यर्थः। (त. भा. सिद्ध. वृ. ९-३१)। ५. क्रूरैर्व्यन्तर-चौर-वैरि-मनुजैर्व्यालैर्मृगैरापदि प्राप्तायां गरलादिकैश्च महती तन्नाशचिन्ताऽऽपदा। संयोगो न भवेत्सदा कथमिति क्लेशातिनुन्नं मनश्चार्तध्यानमनिष्टयोगजनितं जातं दुरन्तैनसः॥ (आचा. सा. १०-१५)। ६. विक्षिप्तः अनिष्टसंयोगेन विक्षेपं व्याकुलतां प्राप्तः आकुल-व्याकुलमनाः इति अनिष्टसंयोगाभिधानम् आर्त्तध्यानम्। (कार्तिके. टी. ४७३)।

२ विष व कण्टक आदि अनिष्ट पदार्थों का संयोग होने पर उसके दूर करनेके लिये मन में जो बार बार संकल्प-विकल्प उठते हैं, इसे अनिष्टसंयोगज आर्तध्यान कहते हैं।

अनिसृष्ट—१. गृहस्वामिनाऽनियुक्तेन वा दीयते वसतिः, यत्स्वामिनापि बालेन परवशवर्तिना दीयते सोभय्यनिसृष्टेति उच्यते। (भ. आ. विजयो. टी. २३०)। २. अनिसृष्टमीशानीशाऽनभिमतया यदर्प्यते। (आचा. सा. ८-३४)। ३. यद्बहुसाधारणं अन्यैरदत्तं एको गृही दत्ते तदनिसृष्टम्। (गु. गु. षट्. स्वो. वृ. २०, पृ. ४९)। ४. सामान्यं श्रेणीभक्तकाद्येकस्य ददतोऽनिसृष्टम्। (आचारांग शी. वृ. २, १, २९६)। ५. यद् गोष्ठीभक्तादिसर्वैरदत्तमननुमतं वा एकः कश्चित् साधुभ्यो ददाति तदनिसृष्टम्। (योगशा. स्वो. विव. १-३८)। ६. ईशानीशानभिमतेन स्वाम्यस्वाम्यनभिमतेन यद्दीयते तदनिसृष्टम्। (भावप्रा. टी. ९९)। ७. गृहस्वामिना अनियुक्तेन या दीयते यद् [त्] स्वामिनापि बालेन परवशवर्तिना दीयते तद् द्विविधमनिसृष्टम्। (कार्तिके. टी. ४४८-४९)।

१ अनियुक्त—अनधिकारी—गृहस्वामी के द्वारा जो वसति दी जाती है, अथवा पराधीन बालक जैसे स्वामी के द्वारा जो वसति दी जाती है, इसका नाम अनिसृष्ट दोष है।

अनिस्सरणात्मक तैजस—१. औदारिक-वैक्रियिकाहारकदेहाभ्यन्तरस्थं देहस्य दीप्तिहेतुरनिस्सरणात्मकम्। (त. वा. २, ४९, ८ पृ. १५३)। २. जं तमणिस्सरणप्पयं तेजइयसरीरं तं भुत्तण्ण-पाणप्पाचयं होदूण अच्छति अन्तो। (धव. पु. १४, पृ. ३२८)। ४. अनिस्सरणात्मकं त्वौदारिकवैक्रियिकाहारकशरीराभ्यन्तरवर्ति तेषां त्रयाणामपि दीप्तिहेतुकम्। (त. वृत्ति श्रुत. २-४८)।

१ औदारिक, वैक्रियिक और आहारक शरीर के भीतर स्थित जो शरीर देहदीप्ति का कारण है उसे अनिस्सरणात्मक तैजस कहा जाता है।

अनिःसृतावग्रह—१. सुविशुद्धश्रोत्रादिपरिणामात् साकल्येनानुच्चारितस्य ग्रहणादनिःसृतमवगृह्णाति। त. वा. १, १६, १६, पृ. ६४, पं. ४); पञ्चवर्णवस्त्रकम्बलचित्रपटादीनां सकृदेकदेशविषयपञ्चवर्णग्रहणात् कृत्स्नपञ्चवर्णेष्वदृष्टेष्वनिःसृतेष्वपि तद्वर्णाविष्करणसामर्थ्यादनिःसृतमवगृह्णाति। अथवा देशान्तरस्य पञ्चवर्णपरिणतैकवस्त्रादिकथनात् साकल्येनाकथितस्याप्येकदेशकथनेनैव तत्कृत्स्नपञ्चवर्णग्रहणादनिःसृतम्। (त. वा. १, १६, १६, पृ. ६४,

पं. २८-२९)। २. अणहिमुहअत्थग्गहणं अणिसियावग्गहो। अहवा तेण (उवमाणोवमेयभावेण) विणा गहणं अणिसियावग्गहो। (धव. पु. ९, पृ. २०); वस्त्वेकदेशमवलम्ब्य साकल्येन वस्तुग्रहणं वस्त्वेकदेशं समस्तं वा अवलम्ब्य तत्रासन्निहितवस्त्वन्तरविषयोऽपि अनिःसृतप्रत्ययः। (धव. पु. ९, पृ. १५२); वस्त्वेकदेशस्य आलम्बनीभूतस्य ग्रहणकाले एकवस्तुप्रतिपत्तिः, वस्त्वेकदेशप्रतिपत्तिकाले एव वा दृष्टान्तमुखेन अन्यथा वा अनवलम्बितवस्तुप्रतिपत्तिः, अनुसन्धानप्रत्ययः प्रत्यभिज्ञानप्रत्ययश्च अनिःसृतप्रत्ययः। (धव. पु. १३, पृ. २३७); ३. वत्थुस्स पदेसादो वत्थुग्गहणं तु वत्थुदेसं वा। सयलं वा अवलंबिय *अणिस्सिदं अण्णवत्थुगई॥ पुक्खरगहणे काले* हत्थिस्स य वदण-गवयगहणे वा। वत्थंतरचंदस्स य धेणुस्स य वोहणं च हवे॥ (गो. जी. ३११-३१२)। ४. वस्त्वंशाद्वस्तुनस्तस्य वस्त्वंशाद्वस्तुनोऽथवा। तत्रासन्निहितान्यस्याऽनिसृतं मननं यथा॥ घटार्वाग्भागकन्यास्य-गवयग्रहणक्षणे। स्फुटं घटेन्दु-गोज्ञानमभ्याससमयान्विते॥ (आचा. सा. ४, २०-२१)। ५. अनभिमुखार्थग्रहणमनिःसृतावग्रहः। (मूला. वृ. १२-१८७)। ६. एकदेशदर्शनात् समस्तस्यार्थस्य ग्रहणमनिःसृतावग्रहः। यथा जलनिमग्नस्य हस्तिनः एकदेशकरदर्शनादयं हस्तीति समस्तस्यार्थस्य ग्रहणम्। (त. सुखबो. वृ. १-१६)।

१ कानों की निर्मलतारूप परिणाम के वश पूर्णतया नहीं उच्चारण किये गये शब्दादि का ग्रहण, अथवा पांच वर्ण वाले कम्बल आदि के एक भाग से सम्बद्ध उन पांच वर्णों के देखने से अदृष्ट और अनिःसृत भी उन समस्त पांचों वर्णों का सामर्थ्य से होने वाला ज्ञान, अथवा देशान्तर के पांच वर्ण वाले वस्त्र के एक देश कथन से ही पूर्णरूप में न कहे जाने पर भी उसके समस्त पांच वर्णों का होने वाला ज्ञान; अनिःसृतावग्रह कहलाता है।

अनिह्नव—अनिह्नव इति गृहीतश्रुतेनानिह्नवः कार्यः, यद्यत्सकाशेऽधीतं तत्र स एव कथनीयो नान्यः, चित्तकालुष्यापत्तेः।(धर्मबि. मु. वृ. २-११)।

जिस गुरु के समीप में जो कुछ पढ़ा हो, उसके विषय में उसी गुरु का उल्लेख करना, अन्य का नहीं; यह अनिह्नव नामक ज्ञानाचार है।

अनिह्नवाचार—देखो अनिह्नव। यस्मात् पठितं श्रुतं स एव प्रकाशनीयः। यद्वा पठित्वा श्रुत्वा ज्ञानी सञ्जातस्तदेव श्रुतं ख्यापनीयमिति अनिह्नवाचारः। (मूला. वृ. ५-७२)।

जिस गुरु से शास्त्र पढ़ा हो उसी के नाम को प्रकट करना, अथवा जिस आगम को पढ़-सुनकर ज्ञानवान् हुआ हो उसी आगम को प्रकट करना; यह ज्ञान का अनिह्नवाचार है।

अनीक—१. सेणोवमा यणीया। (ति. प. ३-६७)। २. अनीकं दण्डस्थानीयम्। (स. सि. ४-४)। ३. दण्डस्थानीयान्यनीकानि। पदात्यादीनि सप्तानीकानि दण्डस्थानीयानि वेदितव्यानि। (त. वा. ४, ४, ७)। ४. *अनीकानि अनीकस्थानीयान्येव*। (त. भा. ४-४)। ५. अनीकान्यनीकान्येव, सैन्यानीत्यर्थः। हय-गज-रथ-पदाति-वाहनस्वरूपाणि प्रतिपत्तव्यानि। (त. भा. सिद्ध. वृ. ४-४)। ६. दण्डस्थानीयानि सप्तानीकानि भवन्ति। उक्तं च—गजाश्व-रथ-पादात-वृष-गन्धर्व-नर्तकी। सप्तानीकानि ज्ञेयानि प्रत्येकं च महत्तराः॥(त. सुखबो. वृ. ४-४)। ७. अनीकाः हस्त्यश्व-रथ-पदाति-वृषभ-गन्धर्व-नर्तकी-लक्षणोपलक्षितसप्तसैन्यानि। (त. वृत्ति श्रुत-सागर ४-४)।

६ हाथी, घोड़े, रथ, पादचारी, बैल, गन्धर्व और नर्तकी; इन सात प्रकार की सेना रूप देवों को अनीक कहते हैं।

अनीश्वर—१. निषिद्धमीश्वरं भर्त्रा व्यक्ताव्यक्तोभयात्मना। वारितं दानमन्येन तन्मन्येन त्वनीश्वरम्॥ (अन. ध. ५-१५)। व्यक्तरूपेणाव्यक्तरूपेण व्यक्ताव्यक्तरूपेण च स्वामिना वारितं दानमीश्वराख्यं निषिद्धं त्रिधा स्यात्—व्यक्तेश्वरनिषिद्धमव्यक्तेश्वरनिषिद्धं व्यक्ताव्यक्तेश्वरनिषिद्धं चेति। × × × तद्यथा—निषिद्धाख्यो दोषस्तावदीश्वरोऽनीश्वरश्चेति द्वेधा। तत्राप्याद्यस्त्रेधा—व्यक्तेश्वरेण वारितं दानं यदा साधुर्गृह्णाति तदा व्यक्तेश्वरो नाम दोषः, यदाऽव्यक्तेश्वरेण वारितं गृह्णाति तदाऽव्यक्तेश्वरो नाम, यदैकेन दानपतिना व्यक्तेन द्वितीयेन चाव्यक्तेन च वारितं गृह्णाति तदा व्यक्ताव्यक्तेश्वरो नाम तृतीय ईश्वराख्यनिषिद्धभेदः स्यात्। एवमनीश्वरेऽपि व्याख्येयम्। (अन. ध.

स्वो. टी. ५–१५)।
व्यक्त, अव्यक्त या उभयरूप अपने आपको स्वामी माननेवाले अन्य—स्वामी से भिन्न—अमात्य आदि के द्वारा निवारण किये जाने पर भी दिये गये दान को अनीश्वर दोष युक्त दान कहते हैं।

अनुकम्पा—१. तिसिदं बुभुक्खिदं वा दुहिदं दट्ठूण जो दु दुहिदमणो। पडिवज्जदि तं किवया तस्सेसो होदि अणुकंपा ॥ (पञ्चा. का. १३५)। २. अनुग्रहार्द्रीकृतचेतसः परपीडामात्मस्थामिव कुर्वतोऽनुकम्पनमनुकम्पा। (स. सि. ६–१२; त. वा. ६, १२, ३)। ३. सर्वप्राणिषु मैत्री अनुकम्पा। (त. वा. १, २, ३०)। ४. त्रस-स्थावरेषु दयाऽनुकम्पा। (त. श्लो. १, २, १२)। ५. अनुकम्पा दुःखितेषु कारुण्यम्।(त.भा.हरि. वृ. १–२)। ६. दट्ठूण पाणिणिवहं भीमे भव-सागरम्मि दुक्खत्तं। अविसेसतोऽणुकंपं दुहावि सामत्थतो कुणति ॥ (धर्मसं. ८११; श्रा. प्र. ५८)। ७. अनुकम्पा घृणा कारुण्यं सत्त्वानामुपरि, यथा सर्व एव सत्त्वा सुखार्थिनो दुःखप्रहाणार्थिनश्च, नैतेषामल्पापि पीडा मया कार्येति निश्चित्य चेतसाऽऽर्द्रेण प्रवर्तते स्वहितमभिवाञ्छन् ×××। (त. भा. सिद्ध. १–२); अनुकम्पा दया घृणेत्यनर्थान्तरम्। ××× अथवा अनुग्रहबुद्ध्याऽऽर्द्रीकृतचेतसः परपीडामात्मसंस्थामिव कुर्वतोऽनुकम्पनमनुकम्पा। (त. भा. सिद्ध. वृ. ६–१३)। ८. सत्त्वे सर्वत्र चित्तस्य दयार्द्रत्वं दयालवः। धर्मस्य परमं मूलमनुकम्पां प्रचक्षते ॥ (उपासका. २३०)। ९. अनुकम्पा दुःखितसत्त्वविषया कृपा। (धर्मवि. मु. वृ. ३–७)। १०. अनु पश्चाद् दुःखितसत्त्वकम्पनादनन्तरं यत्कम्पनं सा अनुकम्पा। (बृहत्क. वृ. १३२०)। ११. अनुकम्पा दुःखितेषु अपक्षपातेन दुःखप्रहाणेच्छा। (योगशा. स्वो. विव. २–१५)। १२. एकेन्द्रियप्रभृतीनां सर्वेषामपि देहिनाम्। भवाब्धौ मज्जतां क्लेशं पश्यतो हृदयार्द्रता ॥ तद्दुःखैर्दुःखितत्वं च तत्प्रतीकारहेतुषु। यथाशक्ति प्रवृत्तिश्चेत्यनुकम्पाऽभिधीयते ॥ (त्रि. श. पु. च. १, ३, ६१५–६१६)। १३. क्लिश्यमानजन्तूद्धरणबुद्धिः अनुकम्पा। (भ. आ. मूला. टी. १६९६)। १४. ×××अनुकम्पाऽखिलसत्त्वकृपा×××॥ (अन. ध. २–५२)। १५. अनुकम्पा कृपा ज्ञेया सर्वसत्त्वेष्वनुग्रहः। (लाटीसं. ३–८९; पंचाध्यायी २–४४६)। १६. दुःखितं जनं दृष्ट्वा कारुण्यपरिणामोऽनुकम्पा। (चारित्रप्रा. टी. १०)। १७. सर्वेषु प्राणिषु चित्तस्य दयार्द्रत्वमनुकम्पा। (त. वृत्ति श्रुत. १–२; कार्तिके. टी. ३२६; त. सुखबो. वृ. १–२ व ६–१२)। १८. आत्मवत् सर्वसत्त्वेषु सुखदुःखयोः प्रियाप्रियत्वदर्शनेन परपीडापरिहारेच्छा। (शास्त्रवा. टी. ९–५)।

१ तृषित, बुभुक्षित एवं दुखित प्राणी को देखकर उसके दुःख से स्वयं दुःखी होना व मन में उसके उद्धार की चिन्ता करना, इसका नाम अनुकम्पा है।

अनुकृष्टि (अणुकट्ठी)—१. अधापवत्तकरणपढमसमयपहुडि जाव चरमसमओ त्ति ताव पादेक्कमेक्केक्कम्मि समए असंखेज्जलोगमेत्ताणि परिणामट्ठाणाणि छवड्ढिकमेणावट्ठिदाणि ट्ठिदिबंधोसरणादीणं कारणभूदाणि अत्थि, तेसिं परिवाडीए विरचिदाणं पुणरुत्तापुणरुत्तभावगवेसणा अणुकट्ठी णाम। अनुकर्षणमनुकृष्टिरन्योन्येन समानत्वानुचिन्तनमित्यनर्थान्तरम्। (जयध. अ. प. ९४६)। २. अणुकट्ठी णाम [अणिओगद्दारं] ट्ठिदिं पडि ठिदिबंधज्झवसाणट्ठाणाणं समाणत्तमसमाणत्तं च परूवेदि। (धव. पु. ११, पृ. ३४९)। ३. अनुकृष्टिर्नाम अधस्तनसमयपरिणामखण्डानामुपरितनसमयपरिणामखण्डैः सादृश्यम्। (गो. जी. जी. प्र. ४९)।

१ अधःप्रवृत्तकरण के प्रथम समय से लेकर अन्तिम समय तक प्रत्येक समय में जो असंख्यात लोक मात्र परिणामस्थान छह वृद्धियों के क्रम से अवस्थित होते हुए स्थितिबन्धापसरणादि के कारण होते हैं, परिपाटी क्रम से विरचित उन परिणामों की पुनरुक्तता व अपुनरुक्तता की खोज करना, इसका नाम अनुकृष्टि है।

अनुक्त—१. अनुक्तमभिप्रायेण ग्रहणम्। (स. सि. १–१६)। २. अनुक्तमभिप्रायेण प्रतिपत्तेः॥१२॥ 'अभिप्रायेण प्रतिपत्तिरस्ति' इत्यनुक्तग्रहणं क्रियते। (त. वा. १, १६, १२)। ३. प्रकृष्टविशुद्धिश्रोत्रेन्द्रियादिपरिणामकारणत्वात् एकवर्णनिर्गमेऽपि अभिप्रायेणैवानुच्चारितं शब्दमवगृह्णाति 'इमं भवान् शब्दं वक्ष्यति' इति। अथवा, स्वरसञ्चारणात् प्राक् तंत्रीद्रव्यातोद्याद्यामर्शनेनैव अवादितमनुक्तमेव शब्दमभिप्रायेणावगृह्याचष्टे 'भवानिमं शब्दं वादयिष्यति' इति। (त. वा. १–१६, पृ. ६४ पं.

५-८)। ३. स्तोकपुद्गलनिष्क्रान्तेरनुक्तस्त्वाभिसंहितः। (त. श्लो. १, १६, ७)। ४. अनुक्तस्तूक्तादन्यः इति। अनया कल्पनया शब्द एवानक्षरात्मकोऽभिधीयते, तमवगृह्णाति अनुक्तमवगृह्णातीति भण्यते। (त. भा. सिद्ध. वृ. १-१६)। ५. प्रत्यक्षनियताऽन्यादृग्गुणार्थैकाक्षवोधनम्। अनुक्तम् × × ×॥ (आचा. सा. ४-२३)। ६. अनियमितगुणविशिष्टद्रव्यग्रहणमनुक्तावग्रहः। (मूला. वृ. १२-१८७)। ७. अनुक्तं चाभिप्राये स्थितम्। (त. वृत्ति श्रुत. १-१६)।

१ शब्दोच्चारण के विना अभिप्राय से ही पदार्थ के ग्रहण करने को अनुक्त-अवग्रह कहते हैं। इसी को अनुक्तप्रत्यय या अनुक्तज्ञान भी कहते हैं।

अनुक्तप्रत्यय—देखो अनुक्त। इन्द्रियप्रतिनियतगुणविशिष्टवस्तूपलम्भकाल एव तदिन्द्रियानियतगुणविशिष्टस्य तस्योपलब्धिर्यतः सोऽनुक्तप्रत्ययः। (धव. पु. ६, पृ. १५३-१५४)।

विवक्षित इन्द्रिय के प्रतिनियत गुण—जैसे स्पर्शन का स्पर्श—से विशिष्ट वस्तु के उपलम्भ के समय में ही उसके अनियत गुण—जैसे उक्त स्पर्शन के रसादि—से विशिष्ट उस वस्तु की जिस ज्ञान से उपलब्धि होती है वह अनुक्तप्रत्यय कहलाता है। जैसे—नमक के उपलम्भ के समय में ही उसके खारेपन का ज्ञान अथवा शक्कर के दृष्टिगोचर होने पर उसकी मिठास का ज्ञान।

अनुक्तावग्रह—देखो अनुक्तप्रत्यय। १. अणियमियगुणविसिट्ठदव्वग्गहणमउ[णु]त्तावग्गहो। जहा—चक्खिंदिएण गुडादीणं रसस्स गहणं, घाणिंदिएण दहियादीणं रसग्गहणमिच्चादि। (धव. पु. ६, पृ. २०)। २. अग्निमानयेति केनचिद् भणिते कर्परादिना समानयेति परेणानुक्तस्य कर्परादेरन्यानयनोपायस्य स्वयमूहनमनुक्तावग्रहः। (त. सुखबो. वृ. १-१६)।

अनियमित गुणविशिष्ट वस्तु के ग्रहण को अनुक्तावग्रह कहते हैं। जैसे—चक्षु इन्द्रिय से गुड़ आदि को देख कर उनके रस का अथवा घ्राण इन्द्रिय से सूंघ कर दही आदि के रस का ज्ञान।

अनुगम—१. अनुगम्यतेऽनेनास्मिन्निति अनुगमनम् अनुगमः। अनुगो वा सूत्रस्य गमोऽनुगमः सूत्रानुसरणमित्यर्थः। (उत्तरा. चू. पृ. ६)। २. यदनुगमनमनुगमः, अनुरूपार्थगमनं वा अनुगमः, अनुरूपं वाऽन्तस्यानुगमनाद्वा अनुगमः; सूत्रानुकूलगमनं वा अनुगमः। (अनुयो. चू. १३-५३, पृ. २३)। ३. अनुगमनम् अनुगमः, अनुगम्यते वाऽनेनास्मादस्मिन्निति वाऽनुगमः सूत्रस्यानुकूलः परिच्छेद इत्यर्थः। (आव. हरि. वृ. नि. ७६, पृ. ५४)। ४. तथानुगमः आनुपूर्व्यादीनामेव सत्पदप्ररूपणादिभिरनुयोगद्वारैरनेकधाऽनुगमनम् अनुगमः। (अनु. हरि. वृ. पृ. ३२)। ५. यथावस्त्ववबोधः अनुगमः, केवलि-श्रुतकेवलिभिरनुगतानुरूपेणावगमो वा। (धव. पु. ३, पृ. ८); जधा दव्वाणि ट्ठिदाणि तधावबोधो अणुगमो। (धव. पु. ४, पृ. ६ व पृ. ३२२); जम्हि जेण वा वत्तव्वं परूविज्जदि सो अणुगमो। अहियारसण्णिदाणमणिओगद्दाराणं जे अहियारा तेसिमणुगमो त्ति सण्णा। ××× अथवा अनुगम्यन्ते जीवादयः पदार्था अनेनेत्यनुगमः। (धव. पु. ६, पृ. १४१)। ६. अनुगम्यतेऽनेन प्राक् ततोऽधिकार इत्यनुगमः। (जयध. पत्र ४५६)।६. अनुगमः संहितादिव्याख्यानप्रकाररूपः उद्देश-निर्देश-निर्गमनादिद्वारकलापात्मको वा। (समवा. अभय. वृ. १४०)। ७. सूत्रस्यानुकूलमर्थकथनमनुगमः, अथवा अनुगम्यते व्याख्यायते सूत्रमनेनास्मिन्नस्मादिति वा। (अनुयो. मल. हेम. वृ. सू. ५६)। ८. एवमनुगमनमनुगम्यतेऽनेनास्मिन्नस्मादिति वा अनुगमः, निक्षिप्तसूत्रस्यानुकूलः परिच्छेदोऽर्थकथनमिति यावत्। (जम्बूद्वी. शान्ति. वृ. पृ. ५)। ९. अनुगमनमनुगमः, सूत्रस्यानुरूपमर्थाख्यानम्। (व्यव. सू. भा. मलय. वृ. १, पृ. १)। १०. अनुगमनमनुगम्यते वा शास्त्रमनेनेति अनुगमः सूत्रस्यानुकूलः परिच्छेदः। (आव. मलय. वृ. नि. ८६, पृ. ६०)। अनुरूपं सूत्रपरिपाट्या तदनुगुणं गमनं संहितादिक्रमेण व्याख्यातुः प्रवर्तनमनुगमः। (उत्तरा. नि. वृ. २८, पृ. १०); सूत्रस्यानुगमनिर्युक्त्यनुगमः × × ×। (उत्तरा. नि. वृ. २८, पृ. ११ उद्.)।

५ (ध. पु. ६) जिस अधिकार में या जिसके द्वारा प्रस्तुत पदार्थ की प्ररूपणा की जाती है उसे अनुगम कहते हैं। अधिकार नामक अनुयोगद्वारों के जो अवान्तर अधिकार होते हैं उनका नाम अनुगम है। अथवा जिसके द्वारा जीवादि पदार्थ जाने जाते हैं

उसे अनुगम जानना चाहिये।

अनुगामी अवधि—१. से किं तं आणुगामिअं ओहिणाणं? आणुगामिअं ओहिणाणं दुविहं पण्णत्तं। तं जहा—अंतगयं च मज्झगयं च। से किं तं अंतगयं? अंतगयं तिविहं पण्णत्तं। तं जहा—पुरओ अंतगयं मग्गओ अंतगयं पासओ अंतगयं। से किं तं पुरओ अंतगयं? पुरओ अंतगयं—से जहा नामए केइ पुरसे उक्कं वा चडुलिअं वा अलायं वा मणिं वा पईवं वा जोइं वा पुरओ काउं पणुल्लेमाणे पणुल्लेमाणे गच्छेज्जा, से तं पुरओ अंतगयं। से किं तं मग्गओ अंतगयं? मग्गओ अंतगयं—से जहा नामए केइ पुरसे उक्कं वा चडुलिअं वा अलायं वा मणिं वा पईवं वा जोइं वा मग्गओ काउं अणुकड्ढेमाणे अणुकड्ढेमाणे गच्छिज्जा से तं मग्गओ अंतगयं। से किं तं पासओ अंतगयं? पासओ अंतगयं—से जहा नामए केइ पुरिसे उक्कं वा चडुलिअं वा अलायं वा मणिं वा पईवं वा पासओ काउं परिकड्ढेमाणे परिकड्ढेमाणे गच्छिज्जा से तं पासओ अंतगयं। से तं अंतगयं। से किं तं मज्झगयं? मज्झगयं से जहानामए केइ पुरिसे उक्कं वा चडुलिअं वा अलायं वा मणिं वा पईवं वा जोइं वा मत्थए काउं समुव्वहमाणे समुव्वहमाणे गच्छिज्जा से तं मज्झगयं। ××× से तं आणुगामिअं ओहिणाणं। (नन्दी. सू. १०, पृ. ८२–८३ व ८५)। २. कश्चिदवधिर्भास्करप्रकाशवद् गच्छन्तमनुगच्छति। (स. सि. १, २२; त. वा. १, २२, ४)। ३. अणुगामिओऽणुगच्छइ गच्छंतं लोयणं जहा पुरिसं। (विशेषा. ७११)। ४. जमोहिणाणमुप्पण्णं संतं जीवेण सह गच्छदि तमणुगामी णाम। (धव. पु. १३, पृ. २९४)। ५. विशुद्धयनुगमात् पुंसोऽनुगामी देशतोऽवधिः। परमावधिरप्युक्तः सर्वावधिरपीदृशः॥ (त. श्लो. १, २२, ११)। ६. तत्र गच्छन्तं पुरुषं आ समन्तादनुगच्छतीत्येवंशीलमानुगामी। आनुगाम्येवानुगामिकम्। स्वार्थे 'कः' प्रत्ययः। अथवा अनुगमः प्रयोजनं यस्य तदानुगामिकम्। यल्लोचनवद् गच्छन्तमनुगच्छति तदवविज्ञानमानुगामिकमिति भावः। (नन्दी. मलय. वृ. ९, कर्मस्त. गो. वृ. ९–१०)। ७. तत्र भास्करप्रकाशवद् देशान्तरं गच्छन्तमनुगच्छति विशुद्धिपरिणामवशात् सोऽवधिरनुगामी। (त. सुखबो. वृ. १–२२)। ८. यदवधिज्ञानं स्वस्वामिनं जीवमनुगच्छति तदनुगामी। (गो. जी. मं. प्र. व जी. प्र. टीका ३७२)। ९. कश्चिदवधिर्गच्छन्तं भवान्तरं प्राप्नुवन्तमनुगच्छति पृष्ठतो याति सवितुः प्रकाशवत्। (त. वृत्ति श्रुत. १–२२)। १०. यद्धि देशान्तरगतमप्यन्वेति स्वधारिणम्। अनुगाम्यवधिज्ञानं तद्विज्ञेयं स्वनेत्रवत्। (लोकप्र. ३–८३९)।

२ सूर्य के प्रकाश के समान देशान्तर या भवान्तर में जाते हुए अवधिज्ञानी के साथ जाने वाले अवधिज्ञान को अनुगामी अवधिज्ञान कहते हैं।

अनुग्रह— १. स्व-परोपकारोऽनुग्रहः। (स. सि. ७–३८; त. वा. ७–३८; त. श्लो. ७–३८ त. वृत्ति श्रुत. ७–३८)। २. अनुग्रहः परस्परोपकारादिलक्षणो जीवानाम्। (त. भा. सिद्ध. वृ. ७–७); अनुगृह्यतेऽननेत्यनुग्रहोऽन्नादिरुपकारकः प्रतिगृहीतुः, दातुश्च प्रधानानुपङ्गिकफलम्। प्रधानं मुक्तिः, आनुपङ्गिकं स्वर्गादिप्राप्तिः। (त. भा. सिद्ध. वृ. ७–३३)।

१ अपने और पर के उपकार को अनुग्रह कहते हैं। २ जीवों के पारस्परिक उपकार को भी अनुग्रह कहा जाता है।

अनुग्रहबुद्धि— रागवशात् कटक-कटिसूत्रादिना भूषणाभिप्रायोऽनुग्रहबुद्धिं कुर्वते। (समाधि.टी. ९१)। बहिरात्मा राग के वश से कटक व कटिसूत्र आदि आभूषणों के द्वारा भूषित करने के अभिप्राय रूप अनुग्रहबुद्धि को करते हैं।

अनुच्छेद—परमाणुगदएगादिदव्वसंखाए अण्णेसिं दव्वाणं संखावगमो अणुच्छेदो णाम। अथवा, पोग्गलागासादीणं णिव्विभागच्छेदो अणुच्छेदो णाम। (धव. पु. १४, पृ. ४३६)।

परमाणुगत एक आदि द्रव्यसंख्या से अन्य द्रव्यों की संख्या का बोध होना, इसका नाम अनुच्छेद है। अथवा पुद्गल व आकाश आदि के विभागरहित छेद को अनुच्छेद जानना चाहिए।

अनुज्ञा—१. सूत्रार्थयोरन्यप्रदानं प्रदानं प्रत्यनुमननं अनुज्ञा। (व्यव. सू. भा. मलय. वृ. गा. १–११५)। २. निषेधाभावव्यञ्जिकाऽनुज्ञा। (शास्त्रवा. ३, ३ टी.)।

दूसरे के लिए सूत्र और अर्थ के स्वयं प्रदान करने को तथा प्रदान करते हुए अन्य की अनुमोदना करने

को अनुज्ञा कहते हैं।

अनुत्कृष्ट वेदना—१. तव्वदिरित्तमणुक्कस्सा। (षट्खं. ४, २, ४, ३३—पु. १०, पृ. २१०); २. तदो उक्कस्सादो वदिरित्तं जं दव्वं तमणुक्कस्स (णाणावरणीय) वेयणा होदि। (धव. पु. १०, पृ. २१०)।

उत्कृष्ट वेदना से विपरीत ज्ञानावरण की द्रव्यवेदना को अनुत्कृष्ट द्रव्यवेदना कहते हैं।

अनुत्कृष्ट द्रव्यवेदना—१. तव्वदिरित्तमणुक्कस्सं। (षट्खं. ४, २, ४, ४७—पु. १०, पृ. २५५)। २. तदो उक्कस्सादो वदिरित्तमणुक्कस्सवेयणा (आउवस्स)। (धव. पु. १०, पृ. २५५)।

उत्कृष्ट वेदना से विपरीत आयु की द्रव्यवेदना को अनुत्कृष्ट द्रव्यवेदना कहते हैं।

अनुत्तर (श्रुतज्ञान) — उत्तरं प्रतिवचनम्, न विद्यते उत्तरं यस्य श्रुतस्य तदनुत्तरं श्रुतम्। अथवा अधिकम् उत्तरम्, न विद्यते उत्तरोऽन्यसिद्धान्तः अस्मादित्यनुत्तरं श्रुतम्। (धव. पु. १३, पृ. २८३)।

जिस श्रुतवचन का कोई प्रतिवचनरूप उत्तर उपलब्ध न हो, उसे अनुत्तर (श्रुत) कहते हैं। अथवा जिससे अधिक कोई अन्य सिद्धान्त न हो, ऐसे भावश्रुत को अनुत्तर (श्रुत) कहते हैं।

अनुत्तरौपपादिकदशा—१. × × × अणुत्तरोववाइअदसासु णं अणुत्तरोववाइआणं नगराइं उज्जाणाइं चेइआइं वणसंडाइं समोसरणाइं रायाणो धम्मायरिया धम्मकहाओ इहलोइअ-परलोइआ इड्ढिविसेसा भोगपरिच्चागा पव्वज्जाओ परिआगा सुअपरिग्गहा तवोवहाणाइं पडिमाओ उवसग्गा संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं अणुत्तरोववाइयत्ते उववत्ती सुकुलपच्चायाईओ पुण बोहिलाभा अंतकिरिआओ आघविज्जंति × × × से तं अणुत्तरोववाइयदसाओ। (नन्दी. सू. ५३)। २. उपपादो जन्म प्रयोजनमेषां त इमे औपपादिकाः, विजय-वैजयन्त-जयन्ताऽपराजित-सर्वार्थसिद्धाख्यानि पञ्चानुत्तराणि। अनुत्तरेषु औपपादिकाः अनुत्तरौपपादिकाः ऋषिदास-धा(ध)न्य-सुनक्षत्र-कार्तिक-नन्द-नन्दन-शालिभद्राऽभय-वारिषेण-चिलातपुत्रा इत्येते दश वर्धमानतीर्थंकरतीर्थे। एवमृषभादीनां त्रयोविंशतेस्तीर्थेषु अन्ये अन्ये दश-दशानगाराः दारुणानुपसर्गान्निर्जित्य विजयाद्यनुत्तरेषूत्पन्ना इत्येवमनुत्तरौपपादिका दशाऽस्यां वर्ण्यन्त इति अनुत्तरौपपादिकदशा, अथवा अनुत्तरौपपादिकानां दशा अनुत्तरौपपादिकदशा तस्यामायुर्वैक्रियिकानुबन्धविशेषः। (त. वा. १, २०, १२; धव. पु. ६, पृ. २०२)। ३. उत्तरः प्रधानः, नास्योत्तरो विद्यत इति अनुत्तरः। उपपतनमुपपातः, जन्मेत्यर्थः। अनुत्तरः प्रधानः संसारे ऽन्यस्य तथाविधस्याभावात्, उपपातो येषामिति समासः, तद्वक्तव्यताप्रतिबद्धा दशाः दशाध्ययनोपलक्षिता अनुत्तरौपपादिकदशाः। (नन्दी. हरि. वृ. पृ. १०५)। ४. अणुत्तरोववादियदसा णाम अंगं वाणउदिलक्ख-चोयालसहस्सपदेहिं (९२४४०००) एक्केक्कम्हि य तित्थे दारुणे बहुविहोवसग्गे सहिऊण पाडिहेरं लद्धूण अणुत्तरविमाणं गदे दस दस वण्णेदि। (धव. पु. १, पृ. १०३)। ५. अनुत्तरौपपादिका देवा येषु ख्याप्यन्ते ताः अनुत्तरौपपादिकदशाः। (त. भा. सिद्ध. वृ. १–२०)। ६. चतुश्चत्वारिंशत्सहस्रद्विनवतिलक्षपदपरिमाणं प्रतितीर्थं निर्जितदुर्द्धरोपसर्गाणां समासादितपञ्चानुत्तरोपपादानां दश-दशमुनीनां प्ररूपकम् अनुत्तरौपपादिकदशम्। उपपादो जन्म प्रयोजनं येषां ते औपपादिका मुनयः, अनुत्तरेषु औपपादिकाः अनुत्तरौपपादिकाः, ते दश यत्र निरूप्यन्ते तत्तथोक्तम्। (श्रुतभक्ति टीका ८)। ७. तीर्थङ्कराणां प्रतितीर्थं दश दश मुनयो भवन्ति। ते उपसर्गं सोढ्वा पञ्चानुत्तरपदं प्राप्नुवन्ति। तत्कथानिरूपकं चतुश्चत्वारिंशत्सहस्राधिकद्विनवतिलक्षपदप्रमाणमनुत्तरौपपादिकदशम्। (त. वृत्ति श्रुत. १–२०)। ८. ति-ण्हं-चउ-चउ-दुग-णव-पयाणि णाणुत्तरोववाददसे। विजयादि(दी)सु पंचसु य उववादिदा विमाणेसु॥ पडितित्थं सहिऊण दु दारुणउवसग्गोपलद्धमाहप्पा। दह दह मुणिणो विहिणा पाणे मोत्तूण झाणमया॥ विजयादिसु उववण्णा वण्णिज्जंते सुहावसुहबहुला। ते पनह वीरतित्थे उजु (रिसि) दासो सालिभद्दक्खो॥ सुणक्खत्तो अभओ वि य धण्णो वरवारिसेण-णंदणया। णंदो चिलायपुत्तो कत्तइओ जह तह अण्णे॥ (अंगपण्णत्ती १, ५२–५५)। ९. अनुत्तरेषु विजय-वैजयन्त-जयन्ताऽपराजित-सर्वार्थसिद्धाख्येष्वौपपादिका अनुत्तरौपपादिकाः। प्रतितीर्थं दश दश मुनयो दारुणान् महोपसर्गान् सोढ्वा लब्धप्रातिहार्याः समाधिविधिना त्यक्तप्राणा ये विजयाद्यनुत्तरविमानेषूत्पन्नास्ते वर्ण्यन्ते अस्मिन्निति-

नुत्तरौपपादिकदशं नाम नवममङ्गम् । (गो.जी. जी. प्र. ३५७) ।

२ उपपाद अर्थात् जन्म ही जिनका प्रयोजन है वे औपपादिक कहे जाते हैं । प्रत्येक तीर्थंकर के समय में दारुण उपसर्गों को सहन करके विजयादि पांच अनुत्तर विमानों में उत्पन्न होने वाले दश दश महामुनियों के चरित्र का जिस अंग में वर्णन किया जाता है उसे अनुत्तरौपपादिकदशा या अनुत्तरौपपादिकदशांग कहते हैं । जैसे—वर्धमान तीर्थंकर के तीर्थ में ऋषिदास आदि दस का (मूल में देखिये) ।

अनुत्पादानुच्छेद—अनुत्पादः असत्त्वम्, अनुच्छेदोऽविनाशः । अनुत्पाद एव अनुच्छेदः (अनुत्पादानुच्छेदः), असत अभाव इति यावत्, सतः असत्त्वविरोधात् । एसो पज्जवट्ठियणयववहारो । (धव. पु. ८, पृ. ६–७); अणुप्पादाणुच्छेदो णाम पज्जवट्ठिओ णओ, तेण असंतावत्थाए अभाववएसमिच्छदि, भावे उवलब्भमाणे अभावत्तविरोहादो । (धव. पु. १२, पृ. ४५८) ।

पर्यायार्थिक नय को अनुत्पादानुच्छेद कहा जाता है। अनुपाद का अर्थ असत्त्व और अनुच्छेद का अर्थ है अविनाश । 'अनुत्पाद ही अनुच्छेद' ऐसा कर्मधारय समास करने पर उसका अभिप्राय होता है असत् का अभाव। कारण कि कभी सत् का अभाव सम्भव नहीं है । अतः अभाव का व्यवहार पर्यायार्थिक नय की अपेक्षा ही सम्भव है ।

अनुत्सेक—१. विज्ञानादिभिरुत्कृष्टस्यापि सतस्तत्कृतमदविरहोऽनहङ्कारताऽनुत्सेकः । (स. सि. ६, २६; त. वा. ६, २६, ४; त. श्लो. ६–२६; त. सुखबो. वृ. ६–२६) । २. उत्सेको गर्वः श्रुत-जात्यादिजनितः, नोत्सेकोऽनुत्सेको विजितगर्वता । (त. भा. हरि. व सिद्ध. वृ. ६-२५); उत्सेकश्चित्त-परिणामो गर्वरूपः, तद्विपर्ययोऽनुत्सेकः । (त. भा. हरि. व सिद्ध. वृ. ९–६) । ३. ज्ञान-तपःप्रभृतिभि-गुणैर्यदुत्कृष्टोऽपि सन् ज्ञान-तपःप्रभृतिभिर्मदमहंकारं यन्न करोति सोऽनुत्सेक इत्युच्यते । (त. वृत्ति श्रुत. ६–२६) ।

१ विशिष्ट ज्ञान और तप आदि से उत्कृष्ट होकर भी उनका मद—अहंकार—न करना, इसका नाम अनुत्सेक है ।

अनुदयबन्धोत्कृष्ट — १. अनुदये बन्धादुत्कृष्टं स्थितिसत्कर्म यासां ता अनुदयबन्धोत्कृष्टाः । (पञ्चसं. स्वो. वृ. ३–६२) । २. यासां तु विपाकोदयाभावे बन्धादुत्कृष्टस्थितिसत्कर्मावाप्तिस्ता अनुदयबन्धोत्कृष्टाः । (पंचसं. मलय. वृ. ३–६२; कर्मप्र. यशो. टी. १, पृ. १५) ।

२ जिन कर्मप्रकृतियों का विपाकोदय के अभाव में बन्ध से उत्कृष्ट स्थितिसत्त्व पाया जाता है, उन्हें अनुदयबन्धोत्कृष्ट कहते हैं ।

अनुदयवती प्रकृति (अणुदयवई)—१. चरिमसमयम्मि दलियं जासिं अन्नत्थ संकमे ताओ × × ×॥ (पंचसंग्रह ३–६६) । २. यासां प्रकृतीनां दलिकं चरमसमयेऽन्यासु प्रकृतिषु स्तिबुकसंक्रमेण संक्रमय्य अन्यप्रकृतिव्यपदेशेनानुभवेत्, न स्वोदयेन, ताः अनुदयवत्योऽनुदयवतीसंज्ञाः । (पंचसं. मलय. वृत्ति ३–६६; कर्मप्र. यशो. टी. १, पृ. १५) ।

जिन कर्मप्रकृतियों का प्रदेशपिण्ड चरम समय में स्तिवुक संक्रमण के द्वारा अन्य प्रकृतियों में संक्रान्त होकर अन्य प्रकृतिरूप से ही विपाक को प्राप्त हो, स्वोदय से नहीं; उन प्रकृतियों को अनुदयवती प्रकृतियां कहते हैं ।

अनुदयसंक्रमोत्कृष्ट—१. अनुदये संक्रमेण उत्कृष्टं स्थितिसत्कर्म यासां ता अनुदयसंक्रमोत्कृष्टाः । (पंचसं. स्वो. वृ. ३–६२) । २. यासां पुनरनुदये संक्रमत उत्कृष्टस्थितिलाभस्ता अनुदयसंक्रमोत्कृष्टाख्याः । (पंचसं. मलय. वृ. ३–६२); अनुदये सति संक्रमत उत्कृष्टा स्थितिर्यासां ता अनुदयसंक्रमोत्कृष्टाः । (पंचसं. मलय. वृ. ५–१४५) ।

२ जिन कर्मप्रकृतियों का विपाकोदय के अभाव में संक्रमण से उत्कृष्ट स्थितिसत्त्व पाया जावे, उन्हें अनुदयसंक्रमोत्कृष्ट कहते हैं ।

अनुदीर्णोपशामना— जा सा अकरणोवसामणा तिस्से दुवे णामधेयाणि—अकरणोवसामणा त्ति वि अणुदिण्णोवसामणा त्ति वि । (कसायपा. चूर्णि पृ. ७०७) ।

देखो अकरणोपशामना ।

अनुनादित्व — १. अनुनादित्वं प्रतिरवोपेतत्वम् । (समवा. अभय. वृ. सू. ३५) । २. अनुनादिता प्रतिरवोपेतता । (रायप. मलय. वृ. पृ. १६) ।

शब्द का प्रतिध्वनि से सहित होना, इसे अनुनादित्व कहते हैं ।

अनुपक्रम—१. जेणाउमुवक्कमिज्जइ अप्पसमुत्थेन इयरगेणावि । सो अज्झवसाणाई उवक्कमो अणुवक्कमो इअरो । (संग्रहणी. २६६)। २. इतरस्तु तद्विपरीतो (आयुषोऽपवर्तनहेतुभूताध्यवसानादिनाऽऽत्मसमुत्थेन वाह्येन च विषाग्नि-शस्त्रादिना विरहितो) ऽनुपक्रमः । (संग्रहणी. दे. वृ. २६६) ।

आयु के अपवर्तन (विघात) के कारणभूत अध्यवसान आदि तथा वाह्य विष, शस्त्र एवं अग्नि आदि के अभाव का नाम अनुपक्रम है ।

अनुपगूहन— प्रमादाज्जातदोषस्य जिनमार्गरतस्य तु । ईर्ष्ययोद्भासनं लोके तत् स्यादनुपगूहनम् । (धर्मसं. श्रा. ४–४६) ।

ईर्ष्या के वश जिनमार्ग पर चलने वाले किसी धर्मात्मा के प्रमादजनित दोष के प्रकट करने को अनूपगूहन कहते हैं ।

अनुपचरितसद्भूतव्यवहारनय—१. निरुपाधिगुण-गुणिनोर्भेदविषयोऽनुपचरितसद्भूतव्यवहारो यथा जीवस्य केवलज्ञानादयो गुणाः । (आलाप. पृ. १४८)। २. स्यादादिमो यथान्तर्लीना या शक्तिरस्ति यस्य सतः । तत्तत्सामान्यतया निरूप्यते चेद्विशेषनिरपेक्षम् ।। इदमत्रोदाहरणं ज्ञानं जीवोपजीवि जीवगुणः । ज्ञेयालम्बनकाले न तथा ज्ञेयोपजीवि स्यात् ।। (पंचाध्यायी १, ५३५–३६) । ३. निरुपाधिगुण-गुणिनोर्भेदकोऽनुपचरितसद्भूतव्यवहारः, यथा केवलज्ञानादयो गुणाः । (नयप्रदीप पृ. १०२) ।

१ उपाधिरहित गुण-गुणी के भेद को विषय करने वाले नय को अनुपचरित-सद्भूत-व्यवहारनय कहते हैं । जैसे जीव के केवलज्ञानादि गुण । २ वस्तु की अन्तर्गत शक्ति के विशेष-निरपेक्ष होकर सामान्यरूप से निरूपण करने वाले नय को अनुपचरित-सद्भूत-व्यवहारनय कहते हैं ।

अनुपचरितासद्भूतव्यवहारनय —१. संश्लेषसहितवस्तुसम्बन्धविषयोऽनुपचरितासद्भूतव्यवहारो यथा जीवस्य शरीरमिति । (आलाप. पृ. १४८; नयप्रदीप १४, पृ. १०३) । २. अपि वाऽसद्भूतो योऽनुपचरिताख्यो नयः स भवति यथा । क्रोधाद्या जीवस्य हि विवक्षिताश्चेदबुद्धिभवाः ।। (पंचाध्यायी १–५४६) ।

१ जो नय संश्लेश (संयोग) युक्त वस्तु के सम्बन्ध को विषय करता है वह अनुपचरित-असद्भूतव्यवहारनय कहलाता है । जैसे—जीव का शरीर । २ अबुद्धिपूर्वक होने वाले क्रोधादिक भावों में जीव के भावों की विवक्षा करने को अनुपचरितासद्भूतव्यवहारनय कहते हैं ।

अनुपदेश—अनर्थक उपदेशोऽनुपदेशः । (त. वा. १, ४, २) ।

निरर्थक उपदेश का नाम अनुपदेश है ।

अनुपरतकायिकी क्रिया — उपरतो देशतः सर्वतो वा सावद्ययोगाद्विरतः । नोपरतोऽनुपरतः, कुतश्चिदप्यनिवृत्त इत्यर्थः । तस्य कायिकी अनुपरतकायिकी । इयं प्रतिप्राणिनि वर्तते । इयमविरतस्य वेदितव्या, न देशविरतस्य सर्वविरतस्य वा । (प्रज्ञाप. मलय. वृ. २२–२७६) ।

जो सावद्य योग से–पाप कार्यों से—सर्वदेश या एकदेश रूप से विरत नहीं है उसका नाम अनुपरत (अविरत) है । उसके द्वारा जो भी शरीर से क्रिया की जाती है वह अनुपरतकायिकी क्रिया कहलाती है ।

अनुपलम्भ—अन्योपलम्भोऽनुपलम्भः । (प्रमाणसं. स्वो. वृ. ३१) ।

किसी एक के अभावस्वरूप जो अन्य की उपलब्धि होती है उसका नाम अनुपलम्भ है । जैसे—क्षणक्षय एकान्त सम्भव नहीं है, क्योंकि उसका अनुपलम्भ है—वह पाया नहीं जाता । यहां क्षणक्षय एकान्त का अनुपलम्भ कथंचित् नित्यानित्यात्मक अनेकान्त की उपलब्धिस्वरूप है ।

अनुपवास—१. जलवर्जनचतुर्विधाहारत्यागः, ईषदुपवासोऽनुपवास इति व्युत्पत्तेः । (सा. ध. स्वो. टी. ५–३५) । २. × × × आरम्भादनुपवासः ।। (धर्मसं. श्रा. ६–१७०) ।

१ जल को छोड़ कर शेष चारों प्रकार के आहार के परित्याग को अनुपवास कहते हैं । २ अथवा गृह सम्बन्धी कार्य को करते हुए जो उपवास किया जाता है उसे अनुपवास कहते हैं ।

अनुपस्थान, अनुपस्थापन (परिहारप्रायश्चित्त)—१. अपकृष्टमाचार्यमूले प्रायश्चित्तग्रहणमनुपस्थापनम् । (त. वा. ९, २२, १०)। २. परिहारो दुविहो अणवट्ठओ पारंचिओ चेदि । तत्थ अणवट्ठओ जहण्णेण छम्मासकालो उक्कस्सेण वारसवासपेरंतो । कायभूमीदो परदो चेव कयविहारो पडिवंदणविरहिद-

हिदो गुरुवदिरित्तासेसजणेसु कयमोणाभिग्गहो खवणायंविलपुरिमड्ढेयट्ठाण-णिव्वियादीहि सोसियरस-रुहिर-मांसो होदि। (धव. पु. १३, पृ. ६२)। ३. परिहारोऽनुपस्थान-पारञ्चिकभेदेन द्विविधः। तत्रानुपस्थानं निज-परगणभेदाद् द्विविधम्। प्रमादादन्यमुनिसम्वन्धिनमृषिं छात्रं वा परपाखण्डिप्रतिवद्धचेतनाचेतनद्रव्यं वा परस्त्रियं वा स्तेनयतो मुनीन् प्रहरतो वा अन्यदप्येवमादि विरुद्धाचरितमाचरतो नव-दशपूर्वधरस्य आदित्रिकसंहननस्य जितपरीषहस्य दृढधर्मिणो धीरस्य भवभीतस्य निजगणानुपस्थापनं प्रायश्चित्तं भवति। तेन ऋष्याश्रमाद् द्वात्रिंशद्दण्डान्तरं विहितविहारेण, वालमुनीनपि वन्दमानेन, प्रतिवन्दनाविरहितेन, गुरुणा सहालोचयता, शेषजनेषु कृतमौनव्रतेन, विधृतपराङ्मुखपिच्छेन, जघन्यतः पञ्च-पञ्चोपवासा उत्कृष्टतः पण्मासोपवासाः कर्तव्याः। उभयमप्याद्वादशवर्षादिति। दर्पादनन्तरोक्तान् दोषानाचरतः परगणोपस्थापनं प्रायश्चित्तं भवतीति। स सापराधः स्वगणाचार्येण परगणाचार्यं प्रति प्रहेतव्यः। सोऽप्याचार्यस्तस्यालोचनमाकर्ण्य प्रायश्चित्तमदत्त्वा आचार्यान्तरं प्रस्थापयति सप्तमं यावत्। पश्चिमश्च प्रथमालोचनाचार्यं प्रति प्रस्थापयति। स एव पूर्वः पूर्वोक्तप्रायश्चित्तेनैवमाचारयति। (चा. सा. पृ. ६३–६४; अन. ध. स्वो. टी. ७–५६)। ४. परिहारोऽनुपस्थापन-पारञ्चिकभेदभाक्। निजान्यगणभेदं तत्राद्यं तत्राद्यमुत्तमम्॥ द्वादशाब्देषु पण्मास-पण्मासानशनं मतम्। जघन्यं पञ्च-पञ्चोपवासं मध्यं तु मध्यमम्॥ द्वात्रिंशद्दण्डदूरालयस्थेन वसतेर्यतीन्। सर्वान् प्रणमतापेतप्रतिवन्दनसाधुना॥ स्वदोपख्यातये पिच्छं विभ्राणेन पराङ्मुखम्। सूरीतरैः सहोपात्तमोनेनैतद्विधीयते। प्रमादेनान्यपाखण्डिगृहस्थ-यतिसंश्रितम्। वस्तु स्तेनयतः किञ्चिच्चेतनाचेतनात्मकम्॥ यतीन् प्रहरतोऽन्यस्त्रीहरणादींश्च कुर्वतः। दश-नवपूर्वज्ञस्य ह्याद्यसंहननस्य तत्॥ करोति यदि दर्पेण दोपान् पूर्वविभापितान्। सोऽयमन्यगणानुपस्थापनेन विशुद्धयति॥ प्रायश्चित्तं तदेवात्र किन्तु स्वगणसूरिणा। आलोच्य प्रेपितः सप्तसूरिपार्श्वमनुक्रमात्॥ आलोच्य तैस्तैरप्राप्तप्रायश्चित्तोऽन्त्यसूरिणा। तमाद्यं प्रापितस्तेन दत्तं चरति पूर्ववत्॥ (आचा.सा. ६, ५३-६१)।

३ परिहारप्रायश्चित्त अनुपस्थापन (अनवस्थाप्य या अनुपस्थान) और पारंचिक के भेद से दो प्रकारका है। उनमें अनुपस्थापन भी दो प्रकारका है—निज-गण-अनुपस्थापन और परगण-उपस्थापन। जो साधु प्रमाद से दूसरे मुनि सम्वन्धी ऋषि या छात्र को, अन्य पाखण्डी से सम्वद्ध चेतन-अचेतन द्रव्य को, अथवा परस्त्री को चुराता है; मुनियों पर प्रहार करता है, या इसी प्रकार का अन्य भी विरुद्ध आचरण करता है; नौ-दश पूर्वों का धारक है, आदि के तीन संहननों में से किसी एक से सहित है, दृढधर्मी है, धीर है, और संसार से भयभीत है; ऐसे साधु को निजगण-अनुपस्थापन प्रायचित्त दिया जाता है। तदनुसार वह ऋष्याश्रम से ३२ धनुष दूर जाता है, वालमुनियों को भी वन्दन करता है, गुरु के पास आलोचना करता है, शेष जन के प्रति मौन रखता है, अपराध को प्रगट करने के लिए पीछी को विपरीत स्वरूप से (उलटी) धारण करता है, इस प्रकार रहता हुआ वह १२ वर्ष तक कम-से-कम ५-५ और अधिक से अधिक ६–६ मास का उपवास करता है।

उपर्युक्त अपराध को ही यदि कोई मुनि अभिमान के वश करता है तो उसे परगण-उपस्थापन प्रायश्चित्त दिया जाता है। तदनुसार उसे अपने संघ का आचार्य अन्य संघ के आचार्य के पास भेजता है। वह उसके अपराध की आलोचना को सुनकर विना प्रायश्चित्त दिये ही अन्य आचार्य के पास भेजता है, इस प्रकार से उसे सातवें आचार्य के पास तक भेजा जाता है। वह भी उसकी आलोचना को सुनकर विना प्रायश्चित्त दिये ही उसी प्रथम आचार्य के पास भेज देता है। तव वही उसे पूर्वोक्त (निजगण-अनुपस्थापनोक्त) प्रायश्चित्त को देता है। इस प्रकार अनुपस्थापन प्रायश्चित्त दो प्रकारका है।

अनुपालनाशुद्ध—१. आदंके उवसग्गे समे य दुब्भिक्खवुत्तिकंतारे। जं पालिदं ण भग्गं एदं अणुपालणासुद्धं॥ (मूला. ७–१४५)। २. कंतारे दुब्भिक्खे आयंके वा महइ समुप्पण्णे। जं पालियं ण भग्गं तं जाण अणुपालणासुद्धं॥ (आव. भा. ६–२१४)। आतंक (रोग), उपसर्ग, श्रम, दुर्भिक्षवृत्ति (अकाल के कारण भिक्षा की अप्राप्ति) और वनप्रदेश; इन कारणों के रहते हुए संरक्षित चारित्र के भग्न न होने देने का नाम अनुपालनशुद्ध है।

अनुप्रेक्षा (भावना)—१. अनित्याशरणसंसारैकत्वान्यत्वाशुच्यास्रवसंवरनिर्जरालोकबोधिदुर्लभधर्मस्वाख्याततत्त्वानुचिन्तनमनुप्रेक्षाः। (त. सू. ९–७)। २. शरीरादीनां स्वभावानुचिन्तनमनुप्रेक्षा। (स. सि. ९–२; त. सुखबो. वृत्ति ९–२)। ३. स्वभावानुचिन्तनमनुप्रेक्षाः। शरीरादीनां स्वभावानुचिन्तनमनुप्रेक्षा वेदितव्याः। (त. वा. ९, २, ४) ४. स्वभावानुचिन्तनमनुप्रेक्षा। (त. श्लो. ९–२)। ५. अनुचिन्तनमेतेषामनुप्रेक्षाः प्रकीर्तिताः। (त. सा. ६–३०)। ६. अनुप्रेक्षाऽर्हद्गुणानामेव मुहुर्मुहुरनुस्मरणम्। (योगशा. स्वो. विव. ३–१२४)। ७. अनुप्रेक्ष्यन्ते शरीराद्यनुगतत्वेन स्तिमितचेतसा दृश्यन्ते इत्यनुप्रेक्षाः। (अन. ध. स्वो. टी. ६–५७)। ८. कायादिस्वभावादिचिन्तनमप्रेक्षा। (त. वृत्ति श्रुत. ९–२); निज-निजनामानुसारेण तत्त्वानुचिन्तनमनुप्रेक्षा भवति। (त. वृ. श्रुत. ९–७)। ९. अनु पुनः पुनः प्रेक्षणं चिन्तनं स्मरणमनित्यादिस्वरूपाणामित्यनुप्रेक्षा, निज-निजनामानुसारेण तत्त्वानुचिन्तनमनुप्रेक्षा इत्यर्थः। (कार्तिके. टी. १)। १०. परिज्ञातार्थस्य एकाग्रेण मनसा यत्पुनः पुनरभ्यसनमनुशीलनं सानुप्रेक्षा, अनित्यादिभावनाचिन्तनाऽनुप्रेक्षा। (कार्तिके. टी. ४६६)।

२ शरीर आदि के स्वभाव का चिन्तन करना, इसका नाम अनुप्रेक्षा है।

अनुप्रेक्षा (स्वाध्याय)—१. अणुप्पेहा णाम जो मणसा परियट्टेइ, णो वायाए। (दशवै. नि. १–४८; दशवै. चूर्णि १, पृ. २९)। २. अधिगतार्थस्य मनसाऽभ्यासोऽनुप्रेक्षा। (स. सि. ९–२५; त. श्लो. वा. ९–२५)। ३. अनुप्रेक्षा ग्रन्थार्थयोरेव मनसाऽभ्यासः। (त. भा. ९–२५; योगशा. स्वो. विव. ४–९०)। ४. अधिगतार्थयोरेव मनसाऽभ्यासोऽनुप्रेक्षा। अधिगतपदार्थप्रक्रियस्य तप्तायस्पिण्डवदर्पितमनसाभ्यासोऽनुप्रेक्षा वेदितव्याः। (त. वा. ९, २५, ३; भावप्रा. टी. ७८)। ५. कम्मणिज्जरणट्ठमट्ठि-मज्जाणुगयस्स सुदणाणस्स परिमलणमणुपेक्खणा णाम। (धव. पु. ९, पृ. २६३); सुदत्थस्स सुदाणुसारेण चिंतणमणुपेहणं णाम। (धव. पु. १४, पृ. ९)। ६. ग्रन्थार्थानुचिन्तनमनुप्रेक्षा। (अनुयो. हरि. वृ. ७, पृ. १०)। ७. अनुप्रेक्षा नाम तत्त्वार्थानुचिन्ता। (ललितवि. पृ. ८२)। ८. सत्देहे सति ग्रन्थार्थयोर्मनसाऽभ्यासोऽनुप्रेक्षा। (त. भा. सि. वृत्ति ९–२५)। ९. अवगतार्थानुप्रेक्षणमनुप्रेक्षा। (भ. आ. विजयो. टी. १०३)। १०. साधोरधिगतार्थस्य योऽभ्यासो मनसा भवेत्। अनुप्रेक्षेति निर्दिष्टः स्वाध्यायः सः जिनेशिभिः। (त. सा. ७–२०)। ११. अधिगतपदार्थप्रक्रियस्य तप्तायःपिण्डवदर्पितचेतसो मनसाऽभ्यासोऽनुप्रेक्षा। (चा. सा. पृ. ६७)। १२. अनुप्रेक्षा परिज्ञाते भावना या मुहुर्मुहुः। (आचा. सा. ४–९१)। १३. अन्विति ध्यानतः पश्चात् प्रेक्षा त्वालोचनं हृदि। अनुप्रेक्षा स्यादसौ चाश्रयभेदाच्चतुर्विधा॥ (लोकप्र. ३०, ४७०)। १४. अर्थाविस्मरणार्थं च तच्चिन्तनमनुप्रेक्षा। (धर्मसं. स्वो. वृ. ३–५४, पृ. १४२)। १५. साऽनुप्रेक्षा यदभ्यासोऽधिगतार्थस्य चेतसा। स्वाध्यायलक्ष्म पाठोऽन्तर्जल्पात्मात्रापि विद्यते॥ (अन. ध. ७–८६)। १६. निश्चितार्थस्य मनसाऽभ्यासोऽनुप्रेक्षा। (त. सुखबो. वृ. ९–२५)। १७. परिज्ञातार्थस्य एकाग्रेण मनसा यत्पुनः पुनरभ्यसनमनुशीलनं साऽनुप्रेक्षा। (त. वृ. श्रुत. ९–२५)।

२ पठित अर्थ का मन से अभ्यास करना अनुप्रेक्षा स्वाध्याय है।

अनुप्रेक्षादोष—अनुप्रेक्षमाणस्यैवोष्ठपुटे चलयतः स्थानमनुप्रेक्षादोषः। (योगशा. विव. ३–१३०)। वस्तुस्वरूप का चिन्तवन करते हुए ओष्ठों के चलाने को अनुप्रेक्षा दोष कहते हैं।

अनुबन्धयुता मुदिता—अनुबन्धः सन्तानोऽव्यवच्छिन्नसुखपरम्परया देव-मनुजजन्मसु कल्याणपरम्परारूपस्तेन प्रयुज्यते सुखे परमसुखलवापेक्षया आत्म-परापेक्षया च तृतीया। (षोड. वृ. १३–१०)। देव और मनुष्य के जन्म में अविच्छिन्न कल्याणपरम्परा के भोगने से प्राप्त होने वाली प्रसन्नता को अनुबन्धयुता मुदिता भावना कहते हैं।

अनुबन्धसारा (उपेक्षा)—अनुबन्धः कार्यनिष्पत्तिः प्रधानफलपरिणामस्तत्सारा [उपेक्षा अनुबन्धसारा]। यथा कश्चित् कुशलः सदानन्दादिरूपोऽन्तर्गादिषु न प्रवर्तते, न चाप्रवर्तमानमन्यथा गतिकार्यो प्रवर्तयति, किन्तु काले परिणामसुन्दरं कार्यमेवानासो

यदा माध्यस्थ्यमालम्बते तदा तस्यानुबन्धसारोपेक्षा। (षोडश. वृ. १३-१०)।
कार्यविषयक प्रवाहपरिणामरूप अनुबन्ध से युक्त उपेक्षा अनुबन्धसारा उपेक्षा कहलाती है। जैसे—कोई आलस्यादि के कारण धनार्जन आदि में प्रवृत्त नहीं हो रहा था। तब किसी समय उसके हितैषी ने उसे उसमें प्रवृत्त कराया। योग्य अवसर पर जब वह परिणाम में सुन्दर कार्य को देखता हुआ मध्यस्थता का आलम्बन लेता है तब उसके अनुबन्धसारा उपेक्षा कही जाती है।

अनुभय भाषा—अनक्षरात्मिका द्वीन्द्रियाद्यसंज्ञिपञ्चेन्द्रियपर्यन्तानां जीवानां स्वसंकेतप्रदर्शिका भाषा अनुभयभाषा। (गो. जी. जी. प्र. २२६)।
दो-इन्द्रिय से लेकर असंज्ञी पंचेन्द्रिय पर्यन्त जीवों की अपने संकेत को सूचित करने वाली जो अनक्षरात्मक भाषा है, वह अनुभय भाषा कही जाती है।

अनुभव (वेदनस्वरूप)—अनुभवलक्षणं च योगदृष्टिसमुच्चयानुसारेण लिख्यते — यथार्थवस्तुस्वरूपोपलब्धि-परभावारमण-स्वरूपरमण-तदाऽऽस्वादनैकत्वमनुभवः। (ज्ञानसार वृ. २६, पृ. ८७; अभिधा. रा. १, पृ. ३९२)।
वस्तु के यथार्थ स्वरूप की उपलब्धि, पर पदार्थों में विरक्ति, आत्मस्वरूप में रमण और हेय-उपादेय के विवेक को अनुभव कहते हैं।

अन्ध—१. अन्धः योऽकार्यरतः। (प्रश्नो. र. मा. १६)। २. एकं हि चक्षुरमलं सहजो विवेकस्तद्वद्भिरेव सह संवसति द्वितीयम्। एतद्द्वयं भुवि न यस्य स तत्त्वतोऽन्धस्तस्यापमार्गचलने खलु कोऽपराधः॥ (अभि. रा. १, पृ. १०५)।

१ अकार्यरत पुरुष को अन्ध कहते हैं।

अन्न-पाननिरोध—१. गवादीनां क्षुत्पिपासाबाधाकरणमन्न-पाननिरोधः। (स. सि. ७–२५; त. वा. ७, २५, ५; त. श्लो. ७–२५)। २. अन्न-पाननिरोधस्तु क्षुद्बाधादिकरोऽङ्गिनाम्। (ह. पु. ५८, १६५)। ३. तेषां गवादीनां कुतश्चित्कारणात् क्षुत्पिपासाबाधोत्पादनमन्न-पाननिरोधः। (चा. सा. पृ. ५)। ४. अन्न-पानयोः भोजनोदकयोर्निरोधः व्यवच्छेदः अन्न-पाननिरोधः। (धर्मवि.मु. वृ. ३-२३)। ५. अन्नं च पानं चान्नपाने, तयोर्निरोधः, गवादीनां कुतश्चित्कारणात् क्षुत्पिपासाबाधोत्पादनमित्यर्थः। (त. सुखबो. ७–२५)। ६. गो-महिषी-बलीवर्द-वाजि-गज-महिष-मानव-शकुन्तादीनां क्षुत्तृष्णादिपीडोत्पादनमन्न-पाननिरोधः। (त. वृ. श्रुत. ७–२५; कार्तिके. टी. ३३२)। ७. नराणां गो-महिष्यादितिरश्चां वा प्रमादतः। तृणाद्यन्नादिपानानां निरोधो व्रतदोषकृत्॥ (लाटीसं. ५–२७१)।

१ गाय-भैंस आदि प्राणियों के खाने-पीनेके समय पर उन्हें भोजन-पान न देना, यह अन्न-पाननिरोध नामक अहिंसाणुव्रत का अतीचार है।

अन्नप्राशन—१. गते मासपृथक्त्वे च जन्मायस्य यथाक्रमम्। अन्नप्राशनमाम्नातं पूजाविधिपुरस्सरम्॥ (म. पु. ३८–९५)। २. नवान्नप्राशनं श्रेष्ठं शिशूनामन्नभोजनम्। (आ. दि. पृ. १६—उद्धृत)।

जन्म के तीन मास से लेकर नौ मास के भीतर बालक को पूजाविधिपूर्वक अन्न खिलाना प्रारम्भ करने को अन्नप्राशन कहते हैं।

अन्नशुद्धि — अन्नशुद्धिश्चतुर्दशमलरहितस्याहारस्य यतनया शोधितस्य हस्तपुटेऽर्पणम्। (सा. ध. स्वो. टी. ५–४५)।

चौदह मलोंसे रहित और प्रयत्नपूर्वक शोधित आहार को हस्त-पुट में अर्पण करना अन्नशुद्धि कहलाती है।

अन्य(पर)गणानुपस्थापन प्रायश्चित्त—देखो अनुपस्थापन प्रायश्चित्त। दर्पादनन्तरोक्तान् (अन्य-मुनि-छात्राद्यपहरण-तत्प्रहरणादीन्) दोषानाचरतः पर (अन्य) गणोप [गणानुप] स्थापनं प्रायश्चित्तं भवतीति। (चा. सा. पृ. ६४)।

देखो अनुपस्थापन प्रायश्चित्त।

अन्यता—अन्यता सर्वद्रव्याणां परस्परं भेदपरिणा-

मोऽनादिः। (त. भा. सिद्ध. वृत्ति ७–७)।
सर्व द्रव्यों की अनादिकालीन परस्पर विभिन्नता को अन्यता कहते हैं।

अन्यतीर्थिक-प्रवृत्तानुयोग—अन्यतीर्थिकेभ्यः कपिलादिभ्यः सकाशाद्यः प्रवृत्तः स्वकीयाचारवस्तुतत्त्वानामनुयोगो विचारः, तत्पुरस्करणार्थः शास्त्रसन्दर्भ इत्यर्थः, सोऽन्यतीर्थिकप्रवृत्तानुयोग इति। (समवा. अभय. वृ. सू. २९)।
अन्यतीर्थिक अर्थात् कपिल आदि अन्य मतावलम्बियों से प्रवृत्त हुआ जो अपने आचार-विषयक अनुयोग (विचार) है उसके पुरस्कृत करने वाले शास्त्रसन्दर्भ को अन्यतीर्थिक-प्रवृत्तानुयोग कहते हैं।

अन्यत्वभावना—जीवानां देहात् पृथक्त्वे सति पुत्र-कलत्र-धनादिपदार्थेभ्योऽत्यन्तभेदः, अतस्तत्त्ववृत्त्या लोके कस्यापि सम्बन्धो नास्तीत्यादिचिन्तनमन्यत्वभावना। (सम्बोधस. वृ. १६)।
जीव के शरीर से भिन्न होने पर उस शरीर से सम्बद्ध पुत्र-मित्र-कलत्र आदि तो उससे सर्वथा भिन्न रहने वाले ही हैं, वस्तुतः जीवका इन सब में से किसी के साथ भी सम्बन्ध नहीं है, ऐसा विचार करना; इसका नाम अन्यत्वभावना है।

अन्यत्वानुप्रेक्षा—देखो अन्यत्वभावना। १. शरीरादन्यत्वचिन्तनमन्यत्वानुप्रेक्षा। (स. सि. ९–७)। २. शरीराद् व्यतिरेको लक्षणभेदादन्यत्वम् ॥५॥ ××× तत्र बन्धं प्रत्येकत्वे सत्यपि लक्षणभेदादन्यत्वम्, ततः कुशलपुरुषप्रयोगसन्निधौ शरीरादत्यन्तव्यतिरेकेण आत्मनो ज्ञानादिभिरनन्तैरहेयैरवस्थानं मुक्तिरन्यत्वं शिवपदमिति चोच्यते। तदवाप्तये च ऐन्द्रियिकं शरीरम् अतीन्द्रियोऽहम्, अज्ञं शरीरं ज्ञोऽहम्, अनित्यं शरीरं नित्योऽहम्, आद्यन्तवच्छरीरम् अनाद्यन्तोऽहम्, बहूनि मे शरीरशतसहस्राणि अतीतानि संसारे परिभ्रमतः, स एवाहम् अन्यस्तेभ्यः इत्येवं शरीरादन्यत्वं मे, किमङ्ग पुनर्बाह्येभ्यः परिग्रहेभ्य इति चिन्तनम् अन्यत्वानुप्रेक्षा। (त. वा. ९, ७, ५)। ३. शरीरव्यतिरेको लक्षणभेदोऽन्यत्वम्। (त. श्लो. वा. ९–७)। ४. शरीरादपि जीवस्य व्यतिरेकोऽन्यत्वम्। (त. सुखबो. वृ. ९–७)। ५. जीवात् कायादिकस्य पृथक्त्वानुचिन्तनमन्यत्वानुप्रेक्षा भवति। तथाहि—जीवस्य बन्धं प्रति एकत्वे सत्यपि लक्षणभेदात् काय इन्द्रियमयः आत्माऽनिन्द्रियोऽन्यो वर्तते, कायोऽज्ञः आत्मा ज्ञानवान्, कायोऽनित्यः आत्मा नित्यः, कायः आद्यन्तवान् आत्मा अनाद्यनन्तवान्, कायानां बहूनि कोटिलक्षाणि अतिक्रान्तानि आत्मा संसारे निरन्तरं परिभ्रमन् स एव तेभ्योऽन्यो वर्तते। एवं यदि जीवस्य कायादपि पृथक्त्वं वर्तते, तर्हि कलत्र-पुत्र-गृह-वाहनादिभ्यः पृथक्त्वं कथं न बोभवीति? अपि तु बोभवीत्येव। एवं भव्यजीवस्य समाहितचेतसः कायादिषु निःस्पृहस्य तत्त्वज्ञानभावनापरस्य कायादेर्भिन्नत्वं चिन्तयतो वैराग्योत्कृष्टता भवति। तेन तु अनन्तस्य मुक्तिसौख्यस्य प्राप्तिर्भवतीत्यन्यत्वानुप्रेक्षा। ××× भवन्ति चात्र काव्यानि ××× नो नित्यं जडरूपमैन्द्रियकमाद्यन्ताश्रितं वर्ष्म यत् सोऽहं तानि बहूनि चाश्रयमयं खेदोऽस्ति सङ्गादतः। नीर क्षीरवदङ्गतोऽपि यदि मे ऽन्यत्वं ततोऽन्यद् भृशं साक्षात्पुत्र-कलत्र-मित्र-गृह-रै-रत्नादिकं मत्परम् ॥ (त. वृत्ति श्रुत. ९–७)। ६. अण्णं देहं गिण्हदि जणणी अण्णा य होदि कम्मादो। अण्णं होदि कलत्तं अण्णो वि य जायदे पुत्तो ॥ एवं बाहिरदव्वं जाणदि रूवादु अप्पणो भिण्णं। जाणंतो वि हु जीवो तत्थेव हि रच्चदे मूढो ॥ जो जाणिऊण देहं जीवसरूवादु तच्चदो भिण्णं। अप्पाणं पि य सेवदि कज्जकरं तस्स अण्णत्तं ॥ (कार्तिके. ८०–८२)।
१ शरीर से आत्मा की भिन्नता के बार-बार चिन्तवन करने को अन्यत्वानुप्रेक्षा कहते हैं।

अन्यथानुपपत्ति—१. अन्यथा अन्येन साध्याभावप्रकारेण, या अनुपपत्तिः लिंगस्य अघटना [सा अन्यथानुपपत्तिः]। (सिद्धिवि. टी. ५–१५, पृ. ३४६, पं. २०); अन्यथा साध्याभावप्रकारेण अनुपपत्तिः अन्यथानुपपत्तिः। (सिद्धिवि. टी. ५–२१, पृ. ३५८, पं. १७); तदभावे (व्यापकाभावे) अवश्यं तत् (व्याप्यं) न भवति इति अन्यथानुपपत्तिरेव समर्थिता। (सिद्धिवि. टी. ६–२, पृ. ३७९, पं. ५)। २. ××× असति साध्ये हेतोरनुपपत्तिरेवान्यथानुपपत्तिः। (प्र. न. त. ३–३०)।
साध्य के अभाव में हेतु के घटित न होने को अन्यथानुपपत्ति कहते हैं।

अन्यथानुपपन्नत्व—अन्यथानुपपन्नत्वं साध्याभावे नियमेन साधनस्य अघटनम्। (सिद्धिवि. टी. ५, २३, पृ. ३६१, पं. १३)।

देखो—अन्यानुपपत्ति ।

अन्यदृष्टि—१. अन्यदृष्टिरित्यर्हच्छासनव्यतिरिक्तां दृष्टिमाह । (त. भा. ७–१८) । २. जिनवचनव्यतिरिक्ता दृष्टिरन्यदृष्टिरसर्वज्ञप्रणीतवचनाभिरतिः । (त. भा. सिद्ध. वृ. ७–१८) ।

जिनशासन से भिन्न, असर्वज्ञप्रणीत अन्य मत-मतान्तरों से अनुराग रखने को अन्यदृष्टि कहते हैं।

अन्यदृष्टिप्रशंसा—१. मनसा मिथ्यादृष्टेर्ज्ञान-चारित्रगुणोद्भावनं प्रशंसा । (स. सि. ७–२३; त. वृ. श्रुत. ७–२३) । २. अन्यदृष्टियुक्तानां क्रियावादिनामक्रियावादिनामज्ञानिकानां वैनयिकानां च प्रशंसा । (त. भा. ७–१८) । ३. अन्यदृष्टीनां सर्वज्ञप्रणीतदर्शनव्यतिरिक्तानां × × × पाषण्डिनां प्रशंसा अन्यदृष्टिप्रशंसा । (धर्मवि. मु. वृ. ३-२१)।

१ मन से मिथ्यादृष्टि के ज्ञान-चारित्र गुणों के प्रगट करने को अन्यदृष्टिप्रशंसा कहते हैं ।

अन्यदृष्टिसंस्तव—१. अन्यदृष्टियुक्तानां क्रियावादिनामक्रियावादिनामज्ञानिकानां वैनयिकानां च संस्तवोऽन्यदृष्टिसंस्तवः । (त. भा. ७–१८) । २. मिथ्यादृष्टेर्भूतगुणोद्भावनवचनं संस्तवः । (स. सि. ७–२३) ।

२ मिथ्यादृष्टि के सद्भूत और असद्भूत गुणों को वचन से स्तुति करने को अन्यदृष्टिसंस्तव कहते हैं ।

अन्ययोगव्यवच्छेद–१. विशेषण-विशेष्याभ्यामुक्तो च क्रियया सह । अयोगं योगमपरैरत्यन्तायोगं न चान्यथा ॥ व्यवच्छिनत्ति धर्मस्य निपातो व्यतिरेचकः । सामर्थ्याच्चाप्रयोगेऽर्थो गम्यः स्यादेवकारयोः ॥ (सिद्धिवि. ६, ३२–३३) । २. न वै पुरुषेच्छया चित्रो धनुर्धर एव, पार्थ एव धनुर्धरः, नीलं सरोजं भवत्येवेति अयोगव्यवच्छेदादिस्वभावस्थितवाक्येषु अन्यथात्वं सम्भाव्यते, तथाप्रतिपत्तिप्रसंगात् । (सिद्धिवि. स्वो. वृ. ६, ३२–३३) । ३. विशेष्यसंगतैवकारोऽन्ययोगव्यवच्छेदबोधकः । यथा पार्थ एव धनुर्धरः इति । अन्ययोगव्यवच्छेदो नाम विशेष्यभिन्नतादात्म्यादिव्यवच्छेदः । तत्रैवकारेण पार्थान्यतादात्म्याभावो धनुर्धरे बोध्यते । तथा च पार्थान्यतादात्म्याभाववद्धनुर्धराभिन्नः पार्थ इति बोधः । (सप्तभं. पृ. २६) ।

विशेष्य के साथ प्रयुक्त एवकार को अन्ययोगव्यवच्छेद कहते हैं । जैसे—पार्थ (अर्जुन) ही धनुर्धर है ।

अन्यलिङ्ग—अन्यलिङ्गं भौत-परिव्राजकादिवेषः । (त. भा. सिद्ध. वृ. १०–७) ।

जैन लिङ्ग से भिन्न भौत (भौतिक) व परिव्राजक आदि के वेष को अन्यलिङ्ग कहते हैं ।

अन्यलिङ्गसिद्ध—१. अन्यलिङ्गसिद्धाः परिव्राजकादिलिङ्गसिद्धाः । (श्रा. प्र. टी. ७६; नन्दी. हरि. वृ. पृ. ५१) । २. × × × वल्कलचीरी य अन्नलिंगम्मि । (नवतत्त्व. गा. ५७) । ३. अन्येषां परिव्राजकादीनां लिङ्गेन सिद्धा अन्यलिङ्गसिद्धाः । (योगशा. स्वो. विव. ३–१२४) । ४. अन्यलिङ्गे परिव्राजकादिसम्बन्धिनि वल्कल-कापायादिरूपे द्रव्यलिङ्गे व्यवस्थिताः सन्तो ये सिद्धास्तेऽन्यलिङ्गसिद्धाः । (प्रज्ञाप. मलय. वृ. १-७) । ५. जन्मलिङ्गे परिव्राजकादिसम्बन्धिन्येव व्यवस्थिताः सिद्धाः अन्यलिङ्गसिद्धाः । (शास्त्रवा. टी. ११–५४) ।

१ परिव्राजक आदि अन्य लिङ्गों से सिद्ध होने वाले जीवों को अन्यलिङ्गसिद्ध कहते हैं ।

अन्यलिङ्गसिद्धकेवलज्ञान—अन्यलिङ्गसिद्धकेवलज्ञानं नाम यदन्यस्मिन् लिङ्गे वर्तमानाः सम्यक्त्वं प्रतिपद्य भावनाविशेषात् केवलज्ञानमुत्पाद्य केवलोत्पत्तिसमकालमेव कालं कुर्वन्ति तदन्यलिङ्गसिद्धकेवलज्ञानम् । यदि पुनस्तेऽन्यलिङ्गस्थिताः केवलमुत्पाद्यात्मनोऽपरिक्षीणमायुः पश्यन्ति ततः साधुलिङ्गमेव परिगृह्णन्ति । (आव. मलय. वृ. ७८, पृ. ८५) ।

जो अन्य लिङ्ग में रहते हुए ही सम्यक्त्व को प्राप्त कर और भावनाविशेष से केवलज्ञान को उत्पन्न कर केवलोत्पत्ति के साथ ही निर्वाण को प्राप्त करते हैं, उनके केवलज्ञान को अन्यलिङ्गसिद्धकेवलज्ञान कहते हैं ।

अन्य(पर) विवाहकरण—१. परस्य (अन्यस्य) विवाहः परविवाहः, परविवाहस्य करणं पर (अन्य) विवाहकरणम् । (स. सि. ७–२८; त. वा. ७, २८, १) । २. अन्येषां स्व-स्वापत्यव्यतिरिक्तानां विवाहनं विवाहकरणं कन्याफललिप्सया स्नेहसम्बन्धादिना वा परिणयनविधानम् (योगशा. स्वो. विव. ३–९४) । ३. स्वपुत्र-पुत्र्यादीन् वर्जयित्वा अन्येषां गोत्रिणां मित्र-स्वजन-परजनानां विवाहकरणं अन्यविवाहकरणम् । (कार्तिके. टी. ३३८) ।

३ अपने पुत्र पुत्री आदि को छोड़कर अन्य गोत्र वालों के, तथा मित्र व स्वजन-परजनादिकों के पुत्र पुत्री आदि का विवाह करना, यह अन्य (पर) विवाह-करण नामक ब्रह्मचर्याणुव्रत का अतिचार है।

अन्यहितयुता करुणा—अन्यहितयुता सामान्येनैव प्रीतिमत्तासम्बन्धविकलेष्वपि सर्वेषु एवान्येषु सत्त्वेषु केवलिनामिव भगवतां महामुनीनां सर्वानुग्रहपरायणा हितबुद्धया चतुर्थी करुणा (षोडशक वृ. १३-६)।

प्रीतिमत्ता (रागविषयता) का सम्बन्ध नहीं होने पर भी केवलियों के समान महामुनियों के जो सर्वप्राणियों के अनुग्रहविषयक बुद्धि होती है, उसे अन्यहितयुता करुणा कहते हैं।

अन्यापदेश—"अन्यस्य परस्य सम्बन्धीदं गुड-खण्डादि" इति व्यपदेशो व्याजोऽन्यापदेशः। (योगशा. स्वो. विव. ३-११६)।

'यह गुड़ अथवा खांड आदि अन्य गृहस्थ के हैं, मेरे नहीं हैं', इस प्रकार के कपटपूर्ण वचन को अन्यापदेश कहते हैं। यह अतिथिसंविभागव्रत का पांचवां अतिचार है।

अन्यापोह—स्वभावान्तरात्स्वभावव्यावृत्तिन्यापोहः। (अष्टशती ११)।

स्वभावान्तर से विवक्षित स्वभाव की भिन्नता को अन्यापोह कहते हैं।

अन्योन्यप्रगृहीतत्व—अन्योन्यप्रगृहीतत्वं परस्परेण पदानां वाक्यानां वा सापेक्षता। (समवा. अभय. वृ. सू. ३५; रायप. टी. पृ. १६)।

पदों या वाक्यों की परस्पर सापेक्षता को अन्योन्य-प्रगृहीतत्व कहते हैं।

अन्योन्याभाव—१. गवि योऽश्वाद्यभावश्च सोऽन्योन्याभाव उच्यते। (प्रमाल. ३८६)। २. गवि बलीवर्दे योऽयमश्वादीनामभावः सोऽन्योन्याभावः, अन्योऽपरो गोरश्वस्तस्यान्यस्याश्वादेर्गवि अभावस्तादात्म्यनिषेधो यः सोऽयमन्योन्याभाव उच्यते इति सम्बन्धः। ३. तादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावलक्षणम्। (अष्टस. यशो. वृ. ११, पृ. १६६)।

गाय आदि किसी एक वस्तु में अन्य अश्व आदि के अभाव को अन्योन्याभाव कहते हैं।

अन्वय—१. अवस्था-देश-कालानां भेदेऽभेदव्यवस्थितिः॥ या दृष्टा सोऽन्वयो लोके व्यवहाराय कल्पते। (न्यायवि. २, १७७-७८)। २. अनुरित्यव्युच्छिन्नप्रवाहरूपेण वर्तते यद्वा। अयतीत्ययगत्यर्थाद्धातोरन्वर्थतोऽन्वयं द्रव्यम्॥ (पञ्चाध्यायी १-१४२)।

अवस्था, देश और काल के भेद के होते हुए जो कथंचित् तादात्म्य की व्यवस्था देखी जाती है उसे व्यवहार के लिए अन्वय माना जाता है।

अन्वयदत्ति—१. आत्मान्वयप्रतिष्ठार्थं सूनवे यदशेषतः। समं समय-वित्ताभ्यां स्ववर्गस्यातिसर्जनम्॥ सैषा सकलदत्तिः स्यात् × । ×× ॥ (सा. ध. १-१८, टि. १)। २. अथाहूय सुतं योग्यं गोत्रजं वा तथाविधम्। ब्रूयादिदं प्रशान् साक्षाज्जातिज्येष्ठसधर्मणाम्॥ ताताद्ययावदस्माभिः पालितोऽयं गृहाश्रमः। विरज्यैनं जिहासूनां त्वमद्यार्हसि नः पदम्॥ पुत्रः पुपूषोः स्वात्मानं सुविधेरिव केशवः। यः उपस्कुरुते वप्तुरन्यः शत्रुः सुतच्छलात्॥ तदिदं मे धनं धर्म्यं पोष्यमप्यात्मसात्कुरु। सैषा सकलदत्तिर्हि परं पथ्या शिवार्थिनाम्॥ (सा. ध. ७, २४-२७)। ३. सकलदत्तिः आत्मीयस्वसन्ततिस्थापनार्थं पुत्राय गोत्रजाय वा धर्मं धनं च समर्प्य प्रदानमन्वयदत्तिश्च सैव। (कार्तिके. टीका ३९१)।

२ अपनी सन्तानपरम्परा को स्थिर रखने के लिये पुत्र को या सगोत्री को धर्म के साधनभूत चैत्यालय आदि एवं धनादि के प्रदान करने को अन्वयदत्ति कहते हैं। इसका दूसरा नाम सकलदत्ति भी है।

अन्वयदृष्टान्त—१. साध्यव्याप्तं साधनं यत्र प्रदर्श्यते सोऽन्वयदृष्टान्तः। (परीक्षा. ३-४४)। २. साधनसत्तायां यत्रावश्यं साध्यसत्ता प्रदर्श्यते सोऽन्वयदृष्टान्तः। (षड्दर्शन. टीका ४-५५, पृ. २१०)। २. अन्वयव्याप्तिप्रदर्शनस्थानमन्वयदृष्टान्तः। (न्यायदी. पृ. ७८)।

१ जिस स्थान पर साध्य से व्याप्त साधन दिखाया जाय उसे अन्वयदृष्टान्त कहते हैं।

अन्वयद्रव्यार्थिक—णिस्सेससहावाणं अण्णयरुवेण दव्वदव्वेदि [दव्वदव्वमिदि]। दव्वठवणो हि जो सो अण्णयदव्वत्थिओ भणियो॥ (ल. नयच. २४); णिस्सेससहावाणं अण्णयरुवेण सव्वदव्वेहि। विवहावणाहि जो सो अण्णयदव्वत्थिओ भणिदो॥ (वृ. नयच. १९७, पृ. ७३); सामान्यगुणाद्यन्वयरूपेण द्रव्यं द्रव्यमिति द्रवति व्यवस्थापयतीत्यन्वय-

द्रव्यार्थिकः । (आलाप.—नयच. पृ. १४५) ।
यह भी द्रव्य है, यह भी द्रव्य है; इस प्रकार समस्त स्वभावों के अन्वय रूप से जो द्रव्य को स्थापित करता है उसे अन्वयद्रव्यार्थिक कहते हैं ।

अन्वयव्यतिरेकी — पञ्चरूपोपपन्नोऽन्वयव्यतिरेकी । (न्या. दी. पृ. ९०) ।
जो हेतु पक्षधर्मत्व, सपक्षसत्त्व, विपक्षव्यावृत्ति, अबाधितविषयत्व और असत्प्रतिपक्षत्व; इन पाँचों रूपों से युक्त होता है उसे अन्वयव्यतिरेकी हेतु कहते हैं ।

अपकर्षण (ओक्कड्डुण)—१. पदेसाणं ठिदीणमोवट्टणा ओक्कड्डुणा णाम । (धव. पु. १०, पृ. ५३)। २. स्थित्यनुभागयोर्हानिरपकर्षणम् । (गो. क. जी. प्र. टी. ४३८) ।
कर्मप्रदेशों की स्थितियों के हीन करने का नाम अपकर्षण है ।

अपक्रमषट्क—१. चतसृषु दिक्षूर्ध्वमधश्चेति भवान्तरसंक्रमणषट्केनापक्रमेण युक्तत्वात् षट्कापक्रमयुक्तः । (पंचास्तिकाय अमृत. वृत्ति ७२) । २. छक्कापक्कमजुत्तो—अस्य वाक्यस्यार्थः कथ्यते—अपगतो विनष्टः विरुद्धक्रमः प्रांजलत्वं यत्र स भवत्यपक्रमो वक्र इति ऊर्ध्वाधोमहादिक्चतुष्टयगमनरूपेण षड्विधेनापक्रमेण मरणान्ते युक्तः इत्यर्थः । (पंचा. का. जय. वृ. ७२) । ३. पूर्वदक्षिण-पश्चिमोत्तरोर्ध्वाधोगतिभेदेन संसारावस्थायां षट्कापक्रमयुक्तः । (गो. जी. म. प्र. व जी. त. प्र. टी. ३५६) ।
मरण के समय विरुद्ध गति का न होना, इसका नाम अपक्रम है । यह ऊर्ध्व, अधः और पूर्वादि चार; इन छह दिशाओं के भेद से छह प्रकारका है । इसीसे उसे 'अपक्रमषट्क' के नाम से कहा जाता है ।

अपक्व दोष—१. × × × अपक्वं पावकादिभिः । द्रव्यैरत्यक्तपूर्वस्ववर्ण-गन्ध-रसं विदु. ।। (आचा. सा. ८–५२; भावप्रा. टी. १००) । २. अपक्वं यदग्निनाऽन्येन वा इन्धनधूमादिना प्रकारेण न पक्वम् । (बृहत्क. वृ. १०८) ।
अग्नि आदि द्रव्य के द्वारा जिसका रूप, रस व गन्ध अन्यथा न हुआ हो, उसका सेवन करने पर अपक्वदोष होता है ।

अपगतवेद—१. करिस-तणेट्टावग्गीसरिसपरिणामवेदणुम्मुक्का । अवगयवेदा जीवा सगसंभवणंतवरसोक्खा ।। (प्रा. पंचसं. १–१०८; धव. पु. १, पृ. ३४२ उ.; गो. जी. २७५) । २. अपगतास्त्रयोऽपि वेदसन्तापा येषां तेऽपगतवेदाः, प्रक्षीणान्तर्दाहा इति यावत् । (धव. पु. १, पृ. ३४२); मोहणीयदव्वकम्मक्खंधो तज्जणिदजीवपरिणामो वा वेदो । वेदजणिदजीवपरिणामस्स परिणामेण सह कम्मक्खंधस्स वा अभावो अवगदवेदो । (धव. पु. ५, पृ. २२२) । ३. करीषजेन तार्णेन पावकेनेष्टकेन च । समतो वेदतोऽपेताः सन्त्यवेदा गतव्यथा. ।। (पंचसं. अमित. १–२०२) ।
१ कारीष, तृण और इष्टिकापाक की अग्नि के समान जो क्रम से स्त्रीवेद, पुरुषवेद और नपुंसकवेद रूप परिणामों के वेदन (उदय) से रहित जीवों को अपगतवेद या अपगतवेदी कहते हैं ।

अपचयद्रव्यमन्द—अपचयद्रव्यमन्दस्तु यः कृशशरीरतया कमपि प्रयासं न कर्तुमीष्टे । (बृहत्क. वृ. ६९७) ।
जो शरीर के कृश होने से कुछ भी प्रयास (परिश्रम) न कर सके उसे अपचयद्रव्यमन्द कहते हैं ।

अपचयपद—१. अवयवापचयनिबन्धनानि—यथा छिन्नकर्णः छिन्ननासिक इत्यादीनि नामानि । धव. पु. १, पृ. ७७); छिण्णकरो छिण्णणासो काणो कुंटो इच्चादीणि अवचिदणिबंधणाणि । (धव. पु. ९, पृ. १३७) । २. छिण्णकण्णो छिण्णणासो काणो कुंठो (टो) खंजो वहिरो इच्चाईणि णामाणि अवचयपदाणि, सरीरावयवविगलत्तमवेक्खिय एदेसिं णामाणं पउत्तिदंसणादो । (जयध. पु. १, पृ. ३३) ।
२ छिन्नकर्ण, छिन्ननासा, काना, कुंट (कुबड़ा, बौना अथवा हाथ से हीन), कुबड़ा, लंगड़ा और बहिरा आदि नामपद विशिष्ट शरीरावयव की हीनता के सूचक होने से अपचयपद कहलाते हैं ।

अपचयभावमन्द—अपचयभावमन्दस्तु यो निजसहजबुद्धेरभावेनान्यदीयाया बुद्धेरनुपजीवनेन हिताहितप्रवृत्ति-निवृत्ती न कर्तुमीशः स बुद्धेरपचयेन भावतो मन्दत्वादपचयभावमन्दः । अथवा यस्तु परिस्फूर्तमतिः स बुद्धेः स्थूलसूक्ष्मतया अन्तर्निःसारतालक्षणमपचयमधिकृत्यापचयभावमन्दः । (बृहत्क. वृ.६९७)
जो अपनी बुद्धि की हीनता से अपने हित-अहित में प्रवृत्ति और परिहार न कर सके और परकी बुद्धि से

कार्य करे उसे बुद्धिहीनता के कारण भावनिक्षेप के आश्रय से अपचयभावमन्द कहते हैं।

अपद दोष—१. अपदं पद्यविधौ पद्ये विधातव्येऽन्यच्छन्दोऽभिधानम्। यथा आर्यापादे वैतालीयपादाभिधानम्। (आव. हरि. वृ. ८८२, पृ. ३७५)। ३. अपदं यत्र पद्ये विधातव्येऽन्यच्छन्दोभिधानम्। (आव. मलय. वृ. ८८२, पृ. ४८३)।

१ किसी पद्य की रचना में अन्य छन्द के कहने को अपददोष कहते है। जैसे—आर्या छन्द में वैतालीय छन्द के चरण की योजना। यह सूत्र के अलीक आदि ३२ दोषों में १८वां दोष है।

अपद-सचित्त-द्रव्यपरिक्षेप—यत्पुनर्वृक्षैः [परिवेष्टनं] सोऽपदपरिक्षेपः। (बृहत्क. वृ. ११२२)।

पादविहीन वृक्षों से ग्राम-नगरादि के वेष्टित करने को अपद-सचित्त-द्रव्यपरिक्षेप कहते हैं।

अपदोपक्रम—अपदानां वृक्षादीनां वृक्षायुर्वेदोपदेशाद् वार्धक्यादिगुणापादनमपदोपक्रमः। (आव. नि. मलय. वृ. गा. ७६, पृ. ६१)।

पादरहित सचित्त वृक्षादिकों के वृक्ष सम्बन्धी आयुर्वेद के उपदेश से वृद्धत्व आदि गुणों का कथन करना, इसे अपद-सचित्त-द्रव्योपक्रम कहते हैं।

अपध्यान—१. वध-बन्धच्छेदादेर्द्वेषाद्रागाच्च परकलत्रादेः। आध्यानमपध्यानं शासति जिनशासने विशदाः॥ (रत्नक. ३-३२)। २. परेषां जय-पराजय-वध-बन्धनाङ्गच्छेद-परस्वहरणादि कथं स्यादिति मनसा चिन्तनमपध्यानम्। (स. सि. ७-२१; त. वा. ७, २१, २१; चा. सा. पृ. ९; त. सुखबो. वृ. ७-२१; त. वृत्ति श्रुत. ७-२१)। ३. अपध्यान इति अपध्यानाचरितोऽप्रशस्तध्यानेनासेवितः। अत्र देवदत्तश्रावककोङ्कणार्यकप्रभृतयो ज्ञापकम्। (श्रा. प्र. टी. २८९)। ४. अपध्यानं जयः स्वस्य यः परस्य पराजयः। वध-बन्धार्थहरणं कथं स्यादिति चिन्तनम्॥ (ह. पु. ५८-१४६)। ५. संकल्पो मानसी वृत्तिर्विषयेष्वनुतर्षिणी। सैव दुःप्रणिधानं स्यादपध्यानमतो विदुः॥ (म. पु. २१-२५)। ६. नरपतिजय-पराजयादिसंचिन्तनलक्षणादपध्यानात् ××× । (त. श्लो. ७-२१)। ७. पापर्द्धि-जय-पराजय-सङ्गर-परदारगमन-चौर्याद्याः। न कदाचनापि चिन्त्याः पापफलं केवलं यस्मात्॥ (पु. सि. १४१)। ८. स्वयं विषयानुभवरहितोऽप्ययं जीवः परकीयविषयानुभवं दृष्टं श्रुतं च मनसि स्मृत्वा यद्विषयाभिलाषं करोति तदपध्यानं भण्यते। (बृ. द्रव्यसं. २२)। ९. अपकृष्टं ध्यानमपध्यानम्। तदनर्थदण्डस्य प्रथमो भेदः। ××× एवमार्त-रौद्रध्यानात्मकमपध्यानमनर्थदण्डस्य प्रथमो भेदः। (योगशा. स्वो. विव. ३-७३, पृ. ४९५ व ४९७)। १०. वैरिघातो नरेन्द्रत्वं पुरघाताग्निदीपने। खचरत्वाद्यपध्यानं मुहूर्तात् परतस्त्यजेत्॥ (योगशा. ३-७५)। ११. वैरिघात-पुरघाताग्निदीपनादिविषयं रौद्रध्यानम्, नरेन्द्रत्वं खचरत्वम्, आदिशब्दादप्सरोविद्याधरीपरिभोगादि, तेष्वार्तध्यानरूपमपध्यानम्। (योगशा. स्वो. विव. ३-७५)। ११. ××× अपध्यानं नार्त-रौद्रात्म चान्वियात्। (सा. ध. ५-९)। १२. वधो बन्धोऽङ्गच्छेद-स्वहृती जय-पराजयौ। कथं स्यादस्य चिन्तेत्यपध्यानं तन्निगद्यते॥ (धर्मसं. श्रा. ७-९)।

१ राग-द्वेष के वशीभूत होकर दूसरों के बध, बन्धन, छेदन और परस्त्री आदि के हरने का विचार करना अपध्यान कहलाता है।

अपरत्व—१. ते (परत्वापरत्वे) च क्षेत्रनिमित्ते प्रशंसानिमित्ते कालनिमित्ते च सम्भवतः। तत्र क्षेत्रनिमित्ते तावदाकाशप्रदेशाल्पबहुत्वापेक्षे। एकस्यां दिशि बहूनाकाशप्रदेशानतीत्य स्थितः पदार्थः पर इत्युच्यते। ततोऽल्पानतीत्य स्थितोऽपर इति कथ्यते। प्रशंसाकृते अहिंसादिप्रशस्तगुणयोगात् परो धर्मः। तद्विपरीतलक्षणस्त्वधर्मोऽपर इत्युच्यते। कालहेतुके—शतवर्षः पुमान् परः, षोडशवर्षस्त्वपर इत्याख्यायते। (त. सुखबोध वृत्ति ५-२२)। २. दूरदेशवर्तिनि गर्भरूपे [अर्भकरूपे] व्रतादिगुणसहिते च अपरत्वव्यवहारो वर्तते। (त. वृत्ति श्रुत. ५-२२)।

१ परत्व और अपरत्व तीन प्रकारके हैं—क्षेत्रनिमित्त, प्रशंसानिमित्त और कालनिमित्त। उनमें वे क्षेत्रनिमित्त आकाशप्रदेशों के अल्प-बहुत्व की अपेक्षा माने जाते हैं। जैसे—जो पदार्थ एक दिशा में बहुत आकाशप्रदेशों को लांघकर स्थित है वह पर और जो अल्प आकाशप्रदेशों को लांघकर स्थित हैं वह अपर माना जाता है। प्रशंसानिमित्त—अहिंसा आदि प्रशस्त गुणों के सम्बन्ध से धर्म को पर तथा इसके विपरीत अधर्म को अपर कहा जाता है। कालहेतुक—सौ वर्ष का वृद्ध पुरुष पर और सोलह वर्ष का बालक अपर कहा जाता है।

अपरमर्मवेधित्व—अपरमर्मवेधित्वं परमर्मानुद्घट्टनस्वरूपत्वम् । (समवा. अभय. वृत्ति ३५, रायप. वृ. पृ. १६–१७) ।

दूसरे के मर्मस्थान के नहीं भेदने वाले वचन का बोलना, इसका नाम अपरमर्मवेधित्व है ।

अपरविदेह—मेरोः सकाशात् पश्चिमायां दिश्यपरविदेहः । (त. वृत्ति श्रुत. ३–१०) ।

मेरु पर्वत से पश्चिम की ओर जो विदेह क्षेत्र का आधा भाग अवस्थित है वह अपरविदेह कहलाता है ।

अपरसंग्रह—द्रव्यत्वादीन्यवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलम्बमानः पुनरपरसंग्रहः ॥ धर्माधर्माकाश-काल-पुद्गल-जीवद्रव्याणामैक्यं द्रव्यादिभेदादित्यादिर्यथा ॥ (प्र. न. त. ७, १९–२०; स्याद्वादमं. टी. श्लो. २८; जैनतर्कप. पृ. १२७; नयप्र. पृ. १०१) ।

जो द्रव्यत्व आदि अवान्तर सामान्यों को स्वीकार करता हुआ उनके भेदो की उपेक्षा करता है उसे अपरसंग्रहनय कहते हैं ।

अपरसंग्रहाभास—द्रव्यत्वादिकं प्रतिजानानस्तद्विशेषान् निह्नुवानस्तदाभासः । (प्र. न. त. ७–२१) ।

द्रव्यत्व आदि अवान्तर सामान्यों के मानने वाले तथा उनके विशेष भेदों का परिहार करने वाले नय को अपरसंग्रहाभास कहते हैं ।

अपराजित—१. तैरेव विघ्नहेतुभिर्न पराजिताः अपराजिताः । (त. भा. ४–२०) । २. तैरेव चाभ्युदयविघातहेतुभिर्न पराजिता इत्यपराजिताः । (त. भा. सिद्ध. वृ. ४–२०) ।

जो विघ्न के कारणों से पराजित न हों, उन्हें अपराजित विमान कहा जाता है ।

अपराध (अवराह)—१. संसिद्धिराधसिद्धी साधिदमाराधिदं च एयट्ठो । अवगदराधो जो खलु चेदा सो होदि अवराहो ॥ (समयप्रा. ३३२) । २. परद्रव्यपरिहारेण शुद्धस्वात्मनः सिद्धिः साधनं वा राधः, अपगतो राधो यस्य भावस्य सोऽपराधः । (समयप्रा. अमृत. वृ. ३३२) ।

२ पर द्रव्यों का परिहार करके शुद्ध आत्मा को सिद्ध करना, इसका नाम राध है । इस प्रकारके राध से जो रहित है उसे अपराध कहते हैं ।

अपरावर्तमाना (प्रकृति)—१. या तु बन्धोदयोभयं प्रति नान्यस्या उपघातं करोति सा अपरावर्तमाना । (पंचसं. स्वो. वृ. ३–४४) । २. यास्त्वन्यस्याः प्रकृतेर्बन्धमुदयमुभयं वाऽनिवार्य स्वकीयं बन्धमुदयमुभयं वा दर्शयन्ति, ता न परावर्तन्त इति कृत्वाऽपरावर्तमाना उच्यन्ते । (शतक. दे. स्वो. टी. १) ।

२ जो प्रकृतियां अन्य प्रकृतियों के बन्ध, उदय या दोनों को ही नहीं रोक कर अपने बन्ध, उदय या दोनों को प्राप्त होती हैं, परिवर्तित नहीं होती हैं, उन्हें अपरावर्तमान प्रकृति कहते हैं ।

अपरिखेदित्व—अपरिखेदित्वं अनायाससम्भवः । (समवा. अभय. वृ. ३५; रायप. वृ. पृ. १७) ।

अनायास - विना परिश्रम के—ही वचन के निर्गमन को अपरिखेदित्व कहा जाता है । यह सत्य वचन के पैंतीस अतिशयों में चौतीसवां है ।

अपरिगृहीता—या गणिकात्वेन पुंश्चलीत्वेन वा परपुरुषगमनशीला अस्वामिका सा अपरिगृहीता । (स. सि. ७–२८; त. वा. ७, २८, २; त. सुखबो. वृ. ७–२८; त. वृ. श्रुत. ७–२८) ।

जो पतिविहीन स्त्री गणिका या पुंश्चली रूप से पर पुरुषों के पास आती जाती हो उसे अपरिगृहीता इत्वरिका कहते हैं ।

अपरिगृहीतागमन—१. अपरिगृहीता नाम वेश्या अन्यसक्ता गृहीतभाटी कुलाङ्गना वा अनाथेति, तद्गमनम् अपरिगृहीतागमनम् । (श्रा. प्र. टी. २७३; आव. हरि. वृ. ६, पृ. ८२५) । २. वेश्या स्वैरिणी प्रोषितभर्तृकादिरनाथा अपरिगृहीता, तदभिगममाचरतः स्वदारसन्तुष्टस्यातिचारः, न तु निवृत्तपरदारस्य । (त. भा. सिद्ध. वृ. ७–२३) ।

वेश्या अथवा अन्य पुरुष में आसक्त होकर भाड़े को ग्रहण करने वाली अनाथ व कुलीन स्त्री अपरिगृहीता कहलाती है । इस प्रकारकी अपरिगृहीता स्त्री के साथ समागम करना, यह ब्रह्मचर्य-अणुव्रत का एक अतिचार है ।

अपरिग्रह—१. ममेदंभावो मोहोदयजः परिग्रहः, ततो निवृत्तिरपरिग्रहता । (भ. आ. विजयो. टी. ५७) । २. विज्ञाय जन्तुक्षपणप्रवीणं परिग्रहं यस्तृणवज्जहाति । विमर्दितोद्दामकषायशत्रुः प्रोक्तो मुनीन्द्रैरपरिग्रहोऽसौ ॥ (धर्मप. २०–६१) । ३. सर्वभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः । (योगशा.

३–२४; त्रि. श. पु. च. १, ३, ६२६)।

१ मोह के उदय से होने वाले 'ममेदंभाव को—यह मेरा है, इस प्रकार की ममत्वबुद्धि को' परिग्रह कहा जाता है। उस परिग्रह से निवृत्त हो जाना, इसका नाम अपरिग्रहता है।

अपरिग्रहमहाव्रत—धण-धण्णाइवत्थूणं परिग्गह-विवज्जणं। तिविहेणावि जोगेणं पंचमं तं महव्वयं॥ (गु. गु. षट्. स्वो. टी. ३, पृ. १३)।

धन-धान्यादि सर्व प्रकारके परिग्रह का यावज्जीवन मन-वचन-काय से त्याग करने को अपरिग्रहमहाव्रत कहते हैं।

अपरिणत दोष—१. तिलतंडुलउसणोदय चणोदय तुसोदयं अविद्धत्थं। अण्णं तहाविहं वा अपरिणदं णेव गेण्हिज्जो॥ (मूला. ६–५४)। २. तथाऽपरिणतोऽविध्वस्तोऽग्न्यादिकेनापक्वः, तमाहारं पानादिकं वा यद्यादत्तेऽपरिणतनामाशनदोषः। (मूला. वृ. ६–४३)। ३. देयद्रव्यं मिश्रमचित्तत्वेनापरिणमनादपरिणतम्। (योगशा. स्वो. विव. वृ. १–३८, पृ. १३७)। ४. तुपचणतिलतण्डुलजलमुष्णजलं च स्ववर्णगन्धरसैः। अरहितमपरमपीदृशमपरिणतम् × × ×॥ (अन. ध. ५–३२)।

२ अग्नि आदि से जिन पदार्थों के रूप, रस, गन्ध आदि नहीं बदले हैं, ऐसे पदार्थों को आहार में ग्रहण करने पर अपरिणत दोष होता है।

अपरिणामक साधु—जो दव्व-खेत्तकयकाल-भावओ जं जहा जिणक्खायं। तं तह असद्दहंतं जाण अपरिणामयं साहुं॥ (बृहत्क. ७९४)।

जिनदेव ने जिस वस्तु को द्रव्य, क्षेत्र, काल और भाव की अपेक्षा जैसा कहा है उसका उसी प्रकार से श्रद्धान नहीं करने वाले साधु को अपरिणामक कहते हैं।

अपरिमितकाल सामायिक—ईर्यापथादौ (सामायिकग्रहणं) अपरिमितकालं वेदितव्यम्। (त. वृ. श्रुत. ७–१८)।

ईर्यापथ आदि में जिस सामायिक को ग्रहण किया जाता है वह अपरिमितकाल सामायिक कहलाती है।

अपरिवर्तमान परिणाम—अणुसमयं वड्ढमाणा हायमाणा च जे संकिलेस-विसोहिपरिणामा ते अपरियत्तमाणा णाम। (धव. पु. १२, पृ. २७)।

प्रतिसमय वर्धमान या हीयमान संक्लेश व विशुद्ध परिणामों को अपरिवर्तमान परिणाम कहते हैं।

अपरिश्राविन् (आचार्य)—जो अन्नस्स वि दोसे न कहेइ अ सो अपरिसावी। (गु. गु. षट्. स्वो. टी. ७, पृ. २८)।

जो पुरुष दूसरों के भी दोषों को न कहे, उसे अपरिश्रावी कहते हैं।

अपरिश्राविन् (स्नातक)—निष्क्रियत्वात् सकलयोगनिरोधे त्वपरिश्रावी। (त. भा. सिद्ध. वृ. ९–४९)।

योगों का निरोध हो जाने पर सर्व प्रकारके कर्मास्रव से रहित हुए अयोगिकेवली को अपरिश्रावी स्नातक कहते हैं।

अपरीक्षित प्रतिसेवना — १. अपरिच्छियत्ति कज्जाकज्जाइं अपरिक्खिउं सेवइ। (जीत. चू. पृ. ३, पं. १९)। २. आय-व्ययमपरीक्ष्य पडिसेवणा। (जीत. चू. वि. व्या. पृ. ३४, ७)।

अपने आय-व्यय का विचार न करके जो अपवाद—विशेष नियम—में प्रवृत्त होता है, इसे अपरीक्षित प्रतिसेवना कहते हैं।

अपरीक्षी—अपरीक्षी युक्तायुक्तपरीक्षाविकलः। (व्यव. भा. मलय. वृ. ६३४, पृ. ८४)।

योग्य-अयोग्य की परीक्षा से रहित व्यक्ति अपरीक्षी कहलाता है।

अपरीतसंसार—१. संसारअपरित्ते दु० प० त० अणादीए वा सपज्जवसिते अणादीए वा अपज्जवसिते। (प्रज्ञाप. १८–२४७)। २. अणादियमिच्छादिट्ठी अपरित्तसंसारो अवापवत्तकरणं अपुव्वकरणं अणियट्टिकरणमिदि एदाणि तिण्णि करणाणि कादूण सम्मत्तं गहिदपढमसमए चेव सम्मत्तगुणेण पुव्विल्लो अपरित्तो संसारो ओहट्टिदूण परित्तो पोग्गलपरियट्टस्स अद्धमेत्तो होदूण उक्कस्सेण चिट्ठदि। (धव. पु. ४, पृ. ३३५)। ३. संसारापरीतः सम्यक्त्वादिना अकृतपरिमितसंसारः। × × × संसारापरीतो द्विधा—अनाद्यपर्यवसितो यो न कदाचनापि संसारव्यवच्छेदं करिष्यति, यस्तु करिष्यति सो अनादि-सपर्यवसितः। (प्रज्ञाप. मलय. वृ. १८–२४७, पृ. ३९४)।

२ अनादि मिथ्यादृष्टि जीव अपरीतसंसार—अनन्तसंसार की परमिततासे रहित—कहलाता है। ३ जिसने सम्यक्त्व आदि के द्वारा संसार को परि-

मित नहीं किया है वह अपरीतसंसार या संसारापरीत कहलाता है। वह अनादि-अपर्यवसित और सादि-सपर्यवसित के भेद से दो प्रकारका है। जिसका संसार अनादि होकर कभी अन्त को प्राप्त होने वाला नहीं है—जैसे अभव्य जीव का—वह अनादि-अपर्यवसित अपरीतसंसार कहलाता है। और जिसका संसार अनादि होकर भी अन्त को प्राप्त होने वाला है—जैसे भव्य जीव का—उसका नाम अनादि-सपर्यवसित अपरीतसंसार है।

अपर्याप्त—१. अपर्याप्ता आहार-शरीरेन्द्रिय-प्राणापान-भाषा-मनःपर्याप्तिभी रहिताः। (श्रा. प्र. टी. ७०)। २. अपर्याप्तिकनामकर्मोदयादनिष्पन्न-पर्याप्तियोगादपर्याप्तास्त एवापर्याप्तिका इति। (नन्दी. हरि. वृ. पृ. ४४)। ३. अपर्याप्तनामकर्मोदयजनितशक्त्याविर्भावितवृत्तयः अपर्याप्ताः। (धव. पु. १, पृ. २६७); अपज्जत्तणामकम्मोदयसहिद-पुढविकाइयादओ अपज्जत्ता त्ति घेत्तव्वा, णाणिप्पण्णसरीरा; पज्जत्तणामकम्मोदय [ये] अणिप्पण्णसरीराणं पि गहणप्पसंगादो। (धव. पु. ३, पृ. ३३१); अपज्जत्तणामकम्मोदएण अपज्जत्ता भण्णंति। (धव. पु. ६, पृ. ४१९)। ४. तद्विपक्षनामोदयादपर्याप्तकाः। (पंचसं. स्वो. वृ. ३–९)। ५. ये पुनः स्वयोग्यपर्याप्तिविकलास्ते अपर्याप्ताः। (पंचसं. मलय. वृ. १–५)। ६. ये पुनः स्वयोग्यपर्याप्तिपरिसमाप्तिविकलास्तेऽपर्याप्तकाः। (षडशी. दे. स्वो. वृ. २)। ७. अपर्याप्तनामकर्मोदयादपर्याप्तिका ये स्वपर्याप्तीर्न पूरयन्तीति। (स्थाना. अभय. वृ. २, १, ७३)। ८. अपर्याप्तकजीवस्तु नाश्नुते वपुःपूर्णताम्। अपर्याप्तकसंज्ञस्य तद्विपक्षस्य पाकतः॥ (लाटीसं. ५–७९)।

३ जो पृथिवीकायिक आदि जीव अपर्याप्त नामकर्म के उदय से सहित होते हैं उन्हें अपर्याप्त कहा जाता है। जिन जीवों का शरीर पूर्ण नहीं हुआ है, उन्हें अपर्याप्त नहीं कहा जा सकता, क्योंकि अन्यथा पर्याप्त नामकर्म के उदय में भी जिनका शरीर पूर्ण नहीं हुआ है उनके भी अपर्याप्त होने का प्रसंग प्राप्त होता है।

अपर्याप्तनाम—१. जस्स कम्मस्स उदएण जीवो पज्जत्तीओ समाणेदुं ण सक्कदि तस्स कम्मस्स अपज्जत्तणामसण्णा। (धव. पु. ६, पृ. ६२)। २. ता एव षड् यथास्वं शक्तयो विकला अपर्याप्तियस्ता यस्योदयाद् भवन्ति तदपर्याप्तकनाम। (कर्मस्त. गो. वृ. ९–१०; शतकप्र. मल. हे. वृ. ३८, पृ. ५०)। ३. यदुदयाच्च स्वयोग्यपर्याप्तिपरिसमाप्तिसमर्थो न भवति तदपर्याप्तकनाम। (प्रव. सारो टी. गा. १२६४; पृ. ३६५)। ४. यदुदयात् स्वयोग्यपर्याप्तिपरिसमाप्तिविकला जन्तवो भवन्ति तदपर्याप्तिनाम। (कर्मवि. दे. स्वो. वृ. ५०)। ५. पर्याप्तिकनामविपरीतमपर्याप्तकनाम यदुदयात् स्वयोग्यपर्याप्तिपरिसमाप्तिसमर्थो न भवति। (कर्मवि. मलय. वृ. ५)। ६. अपर्याप्तकनाम उक्तविपरीतम्—यदुदयात् सम्पूर्णपर्याप्त्यनिष्पत्तिर्भवति। (धर्मसं. मलय. वृ. गा. ६१९)। ७. षड्विधपर्याप्त्यभावहेतुरपर्याप्तनाम। (भ. आ. मूला. टी. २१२४)। ८. यस्योदये स्वपर्याप्तिभिरपरिपूर्णो भवति, न्यून एव कालं करोति, तदपर्याप्तनाम च ज्ञातव्यम्। (कर्मवि. पू. व्याख्या ७३, पृ. ३३)।

१ जिस कर्म के उदय से जीव अपनी यथायोग्य पर्याप्तियों को पूरा न कर सके, उसे अपर्याप्त नामकर्म कहते हैं।

अपर्याप्ति—एतासां (पर्याप्तीनां) अनिष्पत्तिरपर्याप्तिः। (धव. पु. १, पृ. २५६); पर्याप्तीनामर्धनिष्पन्नावस्था अपर्याप्तिः। (धव. पु. १, पृ. २५७)।

पर्याप्तियों की अपूर्णता अथवा उनकी अर्धपूर्णता का नाम अपर्याप्ति है।

अपर्याप्तिनाम— १. षड्विधपर्याप्त्यभावहेतुरपर्याप्तिनाम। (स. सि. ८–११; त. वा. ८, ११, ३३; त. श्लो. ८–११)। २. अपर्याप्तिनिर्वर्तकमपर्याप्तिनाम, (अपर्याप्तिनाम) तत्परिणामयोग्यदलिकद्रव्यमात्मनोपात्तमित्यर्थः। (त. भा. ८–१२)। ३. यदुदयेन अपरिपूर्णोऽपि जीवो म्रियते तदपर्याप्तिनाम। (त. वृत्ति श्रुत. ८–११)।

१ छह प्रकारकी अपर्याप्तियों के अभाव का जो कारण है उसे अपर्याप्ति नामकर्म कहते हैं।

अपलाप—१. कस्यचित्सकाशे श्रुतमधीत्यान्यो गुरुरित्यभिधानमपलापः। (भ. आ. विजयो. टी. ११३)। किसी के पास में आगम को पढ़कर अन्य गुरु का

नाम बतलाना अपलाप कहलाता है।

अपवर्ग—१. तद्भावे(रागादिप्रक्षये)ऽपवर्गः। स आत्यन्तिको दुःखविगम इति। (धर्मवि. २, ७४–७५)। अपवर्गो फलं यस्य जन्म-मृत्यादिवर्जितः। परमानन्दरूपश्च × × ×)। (धर्मवि. श्लोक ५–२६, पृ. ६३)। २. अपवृज्यन्ते उच्छिद्यन्ते जाति-जरा-मरणादयो दोषा अस्मिन्नित्यपवर्गः मोक्षः। (धर्मवि. मु. च. वृ. १, श्लोक २)।

जहां जन्म, जरा और मरणादि दोषों का अत्यन्त विनाश हो जाता है ऐसे मोक्ष का नाम अपवर्ग है।

अपवर्त—बाह्यप्रत्ययवशादायुषो ह्रासोऽपवर्तः। बाह्यस्योपघातनिमित्तस्य विष-शस्त्रादेः सति सन्निधाने ह्रासोऽपवर्त इत्युच्यते। (त. वा. २, ५३, ५)।

आयुविघात के बाह्य निमित्तरूप जो विष व शस्त्र आदि हैं उनकी समीपता के होने पर जो उस (आयु-स्थिति) में कमी होती है उसका नाम अपवर्त है।

अपवर्तन—देखो अपकर्षण व अपवर्तना। १. अपवर्तनं शीघ्रमन्तर्मुहूर्तात् कर्मफलोपभोगः। (त. भा. २-५२)। २. अपवर्तनं स्थिति-रसह्रापनम्। (षडशी. हरि. वृ. ११)। ३. अपवर्तनं स्वप्रकृतावेव स्थितेः ह्रस्वीकरणं प्रकृत्यन्तरे वा स्थितेर्नयनम्। (पंचसं. स्वो. वृ. संक्रम. गा. ३५)। ४. शीघ्रं यः सकलायुष्ककर्मफलोपभोगस्तदपवर्तनम्। (त. भा. सिद्ध. वृ. २–५१)। ५. अपवर्तनं स्थितिह्रासः। विशेषा. वृ. गा. ३०१५)। ६. अपवर्तनं दीर्घकालवेद्यस्यायुषः स्वल्पकालवेद्यतापादनम्। (संग्रहणी. दे. वृ. २५६)। ७. अपवर्तनं तेषामेव कर्मपरमाणूनां दीर्घस्थितिकालतामपगमय्य ह्रस्वस्थितिकालतया व्यवस्थापनम्। (पंचसं. मलय. वृ. संक्रम. गा. ३५)।

३ अपनी प्रकृति में ही स्थिति के कम करने अथवा अन्य प्रकृति में उस स्थिति के ले जाने को अपवर्तन कहा जाता है।

अपवर्तना—१. आ वंधा उक्कड्डइ सव्वहितोकड्डणा ठिइ-रसाणं। किट्टीवज्जे उभयं किट्टीसु ओवट्टणा णवरं। (कर्मप्र. २२३) २. अपवर्तना नाम प्राक्तनजन्मविरचितस्थितेरल्पतापादनमध्यवसानादिविशेषात्। (त. भा. सिद्ध. वृ. २–५१)। ३. ह्रस्वीकरणमपवर्तनाकरणम्। (पंचसं. स्वो. वृ. बन्ध.क.गा.१)। ४. ह्रस्वीकरणमोवट्टणाकरणम्। (कर्मप्र. चू.बन्ध.क. गा. २)। ५. अपवर्त्यते ह्रस्वीक्रियते स्थित्यनुभागौ यया सा अपवर्तना। (पंचसं. मलय. वृ. गा. १–१)। ६. तयोरेव (स्थित्यनुभागयोः) ह्रस्वीकरणमपवर्तना। अपवर्त्यते ह्रस्वीक्रियते स्थित्यादि यया साऽपवर्तना। (कर्मप्र. मलय. वृ. गा. १–२)। ७. अपवर्त्येते ह्रस्वीक्रियेते तौ यया साऽप्रवर्तना। (कर्मप्र. यशो. टी. गा. १–२)।

१ सर्वत्र—बन्धाबन्धकाल में—जो स्थिति और अनुभाग की अपवर्तना होती है—उन्हें कम किया जाता है, इसका नाम अपवर्तना या अपकर्षण है।

अपवर्तनासंक्रम—प्रभूतस्य सतः स्तोकीकरणमपवर्तनासंक्रमः। (पंचसं. मलय. वृ. संक्रम. गा. ५७)।

जिसके द्वारा कर्मों की प्रचुर स्थिति और अनुभाग को कम किया जाय उसे अपवर्तनासंक्रम कहते हैं।

अपवर्त्य— १. बाह्यस्योपघातनिमित्तस्य विषशस्त्रादेः सन्निधाने ह्रस्वं भवतीत्यपवर्त्यम्। (स. सि. २–५३)। २. विष-शस्त्र-वेदनादिबाह्यनिमित्तविशेषेणापवर्त्यते ह्रस्वीक्रियते इत्यपवर्त्यम्, अपवर्तनीयमित्यर्थः। (त. सुखबो. २–५३)।

१ जो आयु उपघात के कारणभूत विष-शस्त्रादिरूप बाह्य निमित्त के मिलने पर हानि को प्राप्त हो सकती है वह अपवर्त्य आयु कहलाती है।

अपवाद—१. × × × रहियस्स तमववाओ उचियं चियरस्स × × × ॥ (उप. पद ७८४)। २. बाल-वृद्ध-श्रान्त-ग्लानेन शरीरस्य शुद्धात्मतत्त्वसाधनभूतसंयमसाधनत्वेन मूलभूतस्य छेदो यथा न स्यात्तथा बाल-वृद्ध-श्रान्त-ग्लानस्य स्वस्य योग्यं मृद्वेवाचरणमाचरणीयमित्यपवादः। (प्रव. सा. अमृत. वृ. ३–३०)। ३. रहितस्य द्रव्यादिभिरेव तदनुष्ठानमपवादो भण्यते। कीदृशमित्याह—उचितमेव पञ्चकादिपरिहाण्या तथाविधान्नपानाद्यासेवनारूपम्। कस्येत्याह—इतरस्य द्रव्यादियुक्तापेक्षया तद्रहितस्यैव। तद्रहितस्य पुनस्तदौचित्येनैव च यदनुष्ठानं सोऽपवादः। (उप. पद मु. टी. ७८४)। ४. विशेषोक्तौ विविरवादः। (द. प्रा. टी. २४)।

२ सामान्य विधि का निर्देश कर देने पर पश्चात् आवश्यकता के अनुसार जो उसमें यथायोग्य विशेषता का विधान किया जाता है, इसका नाम अपवाद है। जैसे—शुद्ध आत्मतत्त्व का साधन संयम है और उस संयम का मूल कारण शरीर है। अतएव जो साधु बाल है, वृद्ध है, श्रान्त (थका

हुआ) है, अथवा रोगपीड़ित है; उसके द्वारा संयम के मूल साधनभूत उस शरीर का जिस प्रकार विनाश न हो, इस प्रकार से कुछ मृदु (शिथिल) संयम भी आचरण योग्य है; इस प्रकारका विशेष विधान।

अपवादसापेक्ष उत्सर्ग—वाल-वृद्ध-श्रान्त-ग्लानेन संयमस्य शुद्धात्मतत्त्वसाधनत्वेन मूलभूतस्य छेदो न यथा स्यात्तथा संयतस्य स्वस्य योग्यमतिकर्कशमाचरणमाचरता शरीरस्य शुद्धात्मतत्त्वसाधनभूतसंयमसाधनत्वेन मूलभूतस्य छेदो न यथा स्यात्तथा वाल-वृद्ध-श्रान्त-ग्लानस्य स्वस्य योग्यं मृद्वप्याचरणमाचरणीयमित्यपवादसापेक्ष उत्सर्गः ।। (प्रव. सा. अमृत. वृ. ३-३०, पृ. ३१४)।

वाल, वृद्ध, श्रान्त और रोगपीड़ित साधु के द्वारा शुद्ध आत्मतत्त्व का साधन होने से मूलभूत संयम का जिस प्रकार विनाश न हो, इस प्रकार संयत के अपने योग्य अतिशय कठोर आचरण के करते हुए भी उक्त संयम के मूल साधनभूत शरीर का जिस प्रकार से विनाश न हो; इस प्रकार उक्त वाल, वृद्ध, श्रान्त व रुग्ण साधु के द्वारा अपने योग्य मृदु भी आचरण आचरणीय होता है; इस प्रकारका विधान अपवादसापेक्ष-उत्सर्ग कहलाता है।

अपवादिक लिङ्ग — यतीनामपवादकारणत्वात् परिग्रहोऽपवादः। अपवादो यस्य विद्यत इत्यपवादिकं परिग्रहसहितं लिङ्गमस्येत्यपवादिकलिङ्गम्। (भ. आ. विजयो. व मूला. टी. ७७)।

साधु के लिए अपवाद का कारण होने से परिग्रह अपवाद है, अतः उस परिग्रह-सहित वेष को अपवादिक लिङ्ग कहा जाता है।

अपवृद्धि—संजमासंजम-संजमलद्धीहिंतो हेट्ठा परिवदमाणस्स संकिलेसवसेण पडिसमयमणंतगुणहाणिपरिणामो ओवड्ढित्ति भण्णदे। (जयध. पत्र ८१६)।

संयमासंयम और संयम लब्धियों से च्युत होते हुए जीव के जो संक्लेश के वश प्रतिसमय अनन्तगुणित हानिरूप परिणाम होते हैं, इसका नाम अपवृद्धि है।

अपहृत (त्य) संयम—१. अपहृतसंयमस्त्रिविधः—उत्कृष्टो मध्यमो जघन्यश्चेति। तत्र प्रासुकवसत्याहारमात्रवाह्यसाधनस्य स्वाधीनेतरज्ञानचरणकरणस्य वाह्यजन्तूपनिपाते आत्मानं ततोऽपहृत्य जीवान् परिपालयत उत्कृष्टः। मृदुना प्रमृज्य जन्तून् परिहरतो मध्यमः। उपकरणान्तरेच्छया जघन्यः। (त. वा. ९, ६, १५; त. श्लो. वा. ९-६; त. वृ. श्रुत. ९-६; कार्तिके. टी. ३९९)। २. प्राणीन्द्रियपरिहारोऽपहृतसंयमः। (चा. सा. पृ. ३२)। ३. अपहृत्यसंयम इति—प्रोज्झ्य परिवर्ज्य संयमं लभते, वस्त्र-पात्राद्यतिरिक्तमनुपकारकं चरणस्य वर्जयतः संयमलाभः। भक्त-पानादि वा संसक्तं विधिना परित्यज्यत इति। (त. भा. सिद्ध. वृ. ९-६)। ४. अपहरणमपनयनं पञ्चेन्द्रिय - द्वीन्द्रियादीनामपनयनमुपकरणेभ्योऽन्यत्र संक्षेपणमु[म]पवर्तनम्, तस्य संयमः निराकरणम्, उदरकृम्यादिकस्य वा निराकरणमपहरणसंयमः। (मूला. वृ. ५-२२०)।

अपहृतसंयम उत्कृष्ट, मध्यम और जघन्य के भेद से तीन प्रकारका है। उनमें प्रासुक वसति व आहार मात्र वाह्य साधनों से सहित होते हुए वाहिरी जीवों के आने पर उनसे अपने आपको दूर कर उनकी रक्षा करते हुए निर्दोष संयम के पालन करने को उत्कृष्ट अपहृतसंयम कहते हैं। मोरपिच्छी जैसे मृदु उपकरण से जीवों को दूर करना मध्यम अपहृतसंयम है। अन्य उपकरण से जीवों को दूर करना जघन्य अपहृतसंयम है।

अपात्र—१. गतकृपः प्रणिहन्ति शरीरिणो वदति यो वितथं परुषं वचः। हरति वित्तमदत्तमनेकधा मदनवाणहतो भजतेऽङ्गनाम् ।। विविधदोषविधायिपरिग्रहः पिवति मद्यमयंत्रितमानसः। कृमिकुलाकुलितं ग्रसते पलं कलिलकर्मविधानविशारदः ।। दृढकुटुम्वपरिग्रहपञ्जरः प्रशमशीलगुणव्रतवर्जितः। गुरुकषाय-भुजङ्गमसेवितो विषयलोलमपात्रमुशन्ति तम् ।। (अमित. श्रा. ३६-३८)। २. अपात्रः सम्यक्त्वरहितप्राणी। (सा. ध. स्वो. टी. २-६७)। ३. व्रतसम्यक्त्वनिर्मुक्तो रागद्वेषसमन्वितः। सोऽपात्रं भण्यते जैनैर्यो मिथ्यात्वपटावृतः ।। (पूज्य. उपा. ४८)।

२ जो सम्यक्त्व से रहित हो उसे अपात्र कहते हैं।

अपान—१. तेनैव (वीर्यान्तराय-ज्ञानावरणक्षयोपशमाङ्गोपाङ्गनामोदयापेक्षिणा) आत्मना वाह्यो वायुरभ्यन्तरीक्रियमाणो निःश्वासलक्षणोऽपानः। (स. सि. ५-१९; त. वा. ५, १९, ३६; त. वृत्ति श्रुत. ५-१९; कार्तिके. टीका २०९)। २. अपा-

गतिसमीरणोऽपानः। (त. भा. हरि. वृ. ८–१२)। ३. अपानः कृष्णरुगमन्यापृष्ठपृष्ठान्तपार्ष्णिगः। (योगशा. ५–१६)। ५. मूत्र-पुरीषगर्भादीनपनयतीत्यपानः। (योगशा. स्वो. विव. ५–१३)।

वीर्यान्तराय और ज्ञानावरण कर्म के क्षयोपशम तथा अंगोपांग नामकर्म के उदय युक्त आत्मा के द्वारा जो बाहिरी वायु भीतर की जाती है, उसका नाम अपान है।

अपाय—देखो अवाय। १. अभ्युदय-निःश्रेयसार्थानां क्रियाणां विनाशकप्रयोगोऽपायः। (स. सि. ७–९)। २. **अभ्युदय-निःश्रेयसार्थानां नाशकोऽपायो भयं वा ॥** अभ्युदय-निःश्रेयसार्थानां क्रियासाधनानां नाशकोऽनर्थोऽपाय इत्युच्यते, अथवा ऐहलौकिकादिसप्तविधं भयमपाय इति कथ्यते। (त. वा. ७, ९, १; त. सुखबो. वृ. ७–९)।

२ अभ्युदय और निःश्रेयस की साधक क्रियाओं के विनाशक प्रयोग को अथवा ऐहलौकिक आदि सात प्रकारके भय को अपाय कहते हैं।

अपायदर्शी—इह-परलोयावाए दंसेइ अवायदंसी हु। (गु. गु. ष. स्वो. वृ. ७, पृ. २८)।

इस लोक और पर लोक में पाप के फल रूप अपाय (विनाश) के देखने वाले पुरुष को अपायदर्शी कहते हैं।

अपायविचय—१. कल्लाणपावगाओ पाए विचणादि जिणमदमुविच्च। विचणादि वा अपाये जीवाण सुहे य असुहे य ॥ (मूला. ५–२०३; भ. आ. १७१२)। २. जात्यन्धवन्मिथ्यादृष्टयः सर्वज्ञप्रणीतमार्गाद्विमुखा मोक्षार्थिनः सम्यङ्मार्गापरिज्ञानात्सुदूरमेवापयन्तीति सन्मार्गापायचिन्तनमपायविचयः। अथवा, मिथ्यादर्शन-ज्ञान-चारित्रेभ्यः कथं नाम इमे प्राणिनोऽपेयुरिति स्मृतिसमन्वाहारोऽपायविचयः। (स. सि. ९–३६; भ. आ. मूला. टी. १७०९)। ३. **सन्मार्गापायचिन्तनमपायविचयः।** मिथ्यादर्शनपिहितचक्षुषाम् आचार-विनयाप्रमादविधयः संसारविवृद्धये भवन्त्यविद्याबाहुल्यादन्धवत्। तद्यथा—जात्यन्धा बलवन्तोऽपि सत्पथात्प्रच्युताः कुशलमार्गादेशकेनाननुष्ठिताः नीचोन्नतशैलविषमोपलकठिनस्थाणुनिहितकण्टकाकुलाटवीदुर्गपतिताः परिस्पन्दवन्तोऽपि न तत्त्वमार्गमनुसर्तुमर्हन्ति, देशकाभावात्। तथा सर्वज्ञप्रणीतमार्गाद्विमुखा मोक्षार्थिनः सम्यङ्मार्गापरिज्ञानात्सुदूरमेवापयन्तीति सन्मार्गापायचिन्तनमपायविचयः। **असन्मार्गापायसमाधानं वा।** अथवा मिथ्यादर्शनाकुलितचेतोभिः प्रवादिभिः प्रणीतादुन्मार्गात् कथं नाम इमे प्राणिनोऽपेयुः, अनायतनसेवापायो वा कथं स्यात्, पापकरणवचनभावनाविनिवृत्तिर्वा कथमुपजायते इत्यपायार्पितचिन्तनमपायविचयः। (त. वा. ९, ३६, ६–७)। ४. अपाया विपदः शारीर-मानसानि दुःखानीति पर्यायाः, तेषां विचयः अन्वेषणम्। (त. भा. हरि. वृ. ९–३७; त. भा. सि. वृ. ९–३७)। ५. अपायविचयं नाम मिच्छादरिसणाविरइ-पमाद-कसाय-जोगा संसारबीजभूया दुक्खावहा अइभयाणय त्ति वा जाणिऊण वज्जेयव्व त्ति झायइ। (दशवै. चू. अ. १, पृ. ३२)। ६. आस्रव-विकथा-गौरव-परीषहाद्येष्वपायस्तु ॥ (प्रशमर. श्लो. २४८)। ७. संसारहेतवः प्रायस्त्रियोगानां प्रवृत्तयः। अपायो वर्जनं तासां स मे स्यात् कथमित्यलम् ॥ चिन्ताप्रबन्धसम्बन्धः शुभलेश्यानुरञ्जितः। अपायविचयाख्यं तत्प्रथमं धर्म्यमीप्सितम् ॥ (ह. पु. ५६, ३९–४०)। ८. मिच्छत्तासंजम-कसाय-जोगजणिदकम्मसमुप्पण्णजाइ-जरा-मरण-वेयणाणुसरणं तेहिंतो अवायचिन्तणं च अवायविचयं णाम धम्मज्झाणं। एत्थ गाहाओ— रागद्दोसकसायासवादिकिरियासु वट्टमाणाणं। इह-परलोगावाए झाएज्जो वज्जपरिवज्जी। कल्लाणपावगा जे उवाए विचिणादि जिणमयमुवेच्च। विचिणादि वा अवाए जीवाणं जे सुहा असुहा ॥ (धव. पु. १३, पृ. ७२ उ.)। ९. तापत्रयादिजन्माब्धिगतापायविचिन्तनम्। तदपायप्रतीकारचिन्तोपायानुचिन्तनम् ॥ (म. पु. २१–४२)। १०. असन्मार्गादपायः स्यादनपायः स्वमार्गतः। स एवोपाय इत्येष ततो भेदेन नोदितः ॥ (त. श्लो. ९, ३६, ३)। ११. अनादौ संसारे स्वैरं मनोवाक्कायवृत्तेर्ममाशुभमनोवाक्कायस्यापायः कथं स्यादित्यपाये विचयो मीमांसा अस्मिन्नस्तीत्यपायविचयं द्वितीयं धर्म्यध्यानम्। जात्यन्धसंस्थानीया मिथ्यादृष्टयः समीचीनमुक्तिमार्गापरिज्ञानाद् दूरमेवापयन्ति मार्गादिति सन्मार्गापाये प्राणिनां विचयो विचारो यस्मिंस्तदपायविचयम्। मिथ्यादर्शन-ज्ञान-चारित्रेभ्यः कथमिमे प्राणिनोऽपेयुरिति स्मृतिसमन्वाहारोऽपायविचयः। (भ. आ. विजयो. टी. १७०८)। १२. कथं मार्गं प्रपद्येरन्नमी

उन्मार्गतो जनाः। अपायमिति या चिन्ता तदपायविचारणम्। (त. सा. ७–४१)। १३. अपायविचयं ध्यानं तद्वदन्ति मनीषिणः। अपायः कर्मणो यत्र सोऽपायः स्मर्यते बुधैः। (ज्ञाना. ३४–१)। १४. तत्रापायविचयं नामानाद्याजवंजवे यथेष्टचारिणो जीवस्य मनोवाक्कायविशेषोपार्जितपापानां परिवर्जनं तत्कथं नाम मे स्यादिति संकल्पश्चिन्ताप्रबन्धः प्रथमं धर्म्यम्। (चा. सा. पृ. ७७)। १५. भेदाभेदरत्नत्रयभावनाबलेनास्माकं परेषां वा कदा कर्मणामपायो विनाशो भविष्यतीति चिन्तनमपायविचयं ज्ञातव्यम्। (बृ. द्रव्यसं. ४८; कार्तिके. टीका ४८२)। १६. एवं रागद्वेषमोहैर्जायमानान् विचिन्तयेत्। यत्रापायांस्तदपायविचयध्यानमिष्यते ॥ (त्रि. श. पु. च. २, ३, ४५६; योगशा. १०–१०; गु. गु. ष. स्वो. टी. २, पृ. १०)। १७. दुःकर्मात्मदुरीहितैरुपचितं मिथ्याविरत्यादिभिर्व्यापज्जन्म-जरा-मृतिप्रभृतयो वाऽपाय एनःकृताः। जीवेऽनादिभवे भवेत्कथमतोऽपायादपायः कदा कस्मिन् केन ममेत्यपायविचयः सत्कारणादीक्षणम् ॥ (आचा. सा. १०–३०)। १८. असुहकम्मस्स णासो सुहस्स वा होइ केणुवाएण। इय चिंतंतस्स हवे अवायविचयं परं झाणं ॥ (भावसं. दे. ३६८)। १९. शुभाशुभकर्मभ्यः कथमपायो जीवानां भवेदित्यपायविचयं ध्यायतीत्यर्थः। (भ.आ. मूला. टी. १७१२)। २०. कर्मात्मनोः सर्वथा विश्लेषोऽयमपायः, विचयस्तद्भावनी भावना। (आत्मप्र. ८८)। २१. एवं सन्मार्गापायः स्यादिति चिन्तनमपायविचयः, सन्मार्गापायो नैवमिति वा। (त. सुखबो. वृ. ९, ३६)। २२. अपायश्चिन्त्यते वाढं यः शुभाशुभकर्मणाम्। अपायविचयं ××× ॥ (भावसं. वाम. ६४०)। २३. मिथ्यादृष्टयो जन्मान्धसदृशाः सर्वज्ञवीतरागप्रणीतसन्मार्गपराङ्मुखाः मोक्षमाकाङ्क्षन्ति, तस्य तु मार्गं न सम्यक् परिजानते, तं मार्गमतिदूरं परिहरन्तीति सन्मार्गविनाशचिन्तनमपायविचयः उच्यते। अथवा मिथ्यादर्शन-मिथ्याज्ञान-मिथ्याचारित्राणाम् अपायो विनाशः कथममीषां प्राणिनां भविष्यतीति स्मृतिसमन्वाहारो ऽपायविचयो भण्यते। (त. वृ. श्रुत. ९–३६)। २४. रागद्वेषकषायास्रवादिक्रियासु प्रवर्तमानानामिह-परलोकयोरपायान् ध्यायेदिति अपायविचयः। (धर्मसं. वृत्ति ३–२७, पृ. ८०)। २५. आस्रवविकथागौरवपरीषहाद्यैरपायस्तु। (लोकप्र. ३०–४५९)। २६. अपायविचयं नाम अनादिसंसारे यथेष्टचारिणो जीवस्य मनोवाक्कायप्रवृत्तिविशेषोपार्जितपापानां परिवर्जनम्, तत्कथं नाम मे स्यादिति। अथवा मिथ्यादर्शनज्ञानचारित्रेभ्यः स्वजीवस्य अन्येषां वा कथम् अपायः विनाशः स्यादिति सङ्कल्पश्चिन्ताप्रबन्धः प्रथमं धर्म्यम्। (कार्तिके. टी. ४८२)।

१ जिनमत का आश्रय लेकर कल्याणप्रापक उपायों का—सम्यग्दर्शन, ज्ञान और चारित्र का—चिन्तन करना; इसका नाम अपायविचय है। अथवा अपायों का—कर्मापगम स्वरूप स्थितिखण्डन, अनुभागखण्डन, उत्कर्षण और अपकर्षण का—तथा जीवों के सुख व दुख का विचार करना, इसे अपायविचय धर्मध्यान कहा जाता है।

अपायानुप्रेक्षा—अपायानां प्राणातिपाताद्याश्रवद्वारजन्यानामनर्थानामनुप्रेक्षा अनुचिन्तनमपायानुप्रेक्षा। (औप. अभय. वृ. २०, पृ. ४५)।

अपायों का—हिंसादिरूप आश्रवद्वारों से उत्पन्न होने वाले अनर्थों का—बार बार विचार करना, इसका नाम अपायानुप्रेक्षा है।

अपार्थक — पौर्वापर्यायोगादप्रतिसम्बन्धार्थमपार्थकम्। यथा दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः त्वर कीटिके दिशमुदीचीं स्पर्शनकस्य पिता प्रतिसीन इत्यादि। (आव. हरि. व मलय. वृ. ८८१)।

पूर्वापर सम्बन्ध से रहित होने के कारण असम्बद्ध अर्थ वाले शब्दसमूह को अपार्थक कहते हैं। जैसे—दस अनार छह पूआ कुण्ड बकरी का चमड़ा मांसपिण्ड हे कीडी शीघ्रता कर उत्तर दिशा को स्पर्शन का पिता प्रतिसीन, इत्यादि असम्बद्ध प्रलाप। यह सूत्र के ३२ दोषों में चौथा दोष है।

अपूर्वकरण—१. ततः परमपूर्वकरणम्, अप्राप्तपूर्वं तादृगध्यवसायान्तरं जीवेनेत्यपूर्वकरणमुच्यते ग्रन्थि विदारयताम्। (त. भा. हरि. वृ. १–३, पृ. २५)। २. करणाः परिणामाः, न पूर्वाः अपूर्वाः—नानाजीवापेक्षया प्रतिसमयमादितः क्रमप्रवृद्धासंख्येयलोकपरिणामस्यास्य गुणस्यान्तर्विवक्षितसमयवर्तिप्राणिनो व्यतिरिच्यान्यसमयवर्तिप्राणिभिरप्राप्या अपूर्वाः, अत्रतनपरिणामैरसमाना इति यावत्; अपूर्वाश्च ते करणाश्चापूर्वकरणाः। (धव. १, पृ. १८०); करणं

परिणामः; अपुव्वाणि च ताणि करणानि च अपुव्वकरणानि, असमानपरिणामा त्ति जं उत्तं होदि। (धव. पु. ६, पृ. २२१)। ३. अपूर्वाः समये समये अन्ये शुद्धतराः, करणाः यत्र तदपूर्वकरणम्। (पंचसं. अमित. १–२८८, पृ. ३८; अन. ध. स्वो. टी. २–४७)। ४. अप्राप्तपूर्वमपूर्वं स्थितिघात-रसघाताद्यपूर्वार्थनिवर्तकं वा अपूर्वकम्, तच्च करणं च अपूर्वकरणम्। (आव. मलय. वृ. नि. १०६)। ५. अपूर्वम् अभिनवम्, अनन्यसदृशमिति यावत्, करणं स्थितिघात-रसघात-गुणश्रेणि-गुणसङ्क्रम-स्थितिवन्धानां पञ्चानामर्थानां निवर्तनं यस्यासावपूर्वकरणः। (पंचसं. मलय. वृ. १–१५; कर्मस्त. दे. स्वो. टी. २; धर्मवि. मु. वृ. ८–५। ६. अपूर्वात्मगुणाप्तित्वादपूर्वकरणं मतम्। (गुण. क्र. ३७)। ७. येनाप्राप्तपूर्वेण अध्यवसायविशेषेण तं ग्रन्थि घनरागद्वेषपरिणतिरूपं भेत्तुमारभते तदपूर्वकरणम्। (गुण. क्र. टी. २२)। ८. अपूर्वाणि करणानि स्थिति यावत् रसघात-गुणश्रेणि-स्थितिवन्धादीनां निर्वर्तनानि यस्मिन् तदपूर्वकरणम्। (ज्ञानसार वृ. ५–६)।

२ मोहकर्म के उपशम या क्षपणा को प्रारम्भ करते हुए जो अन्तर्मुहूर्त तक प्रतिसमय अपूर्व ही अपूर्व—इस गुणस्थान में विवक्षित समयवर्ती जीवों को छोड़कर अन्य समयवर्ती जीवोंके न पाये जाने वाले—भाव होते हैं उन्हें अपूर्वकरण परिणाम कहते हैं।

अपूर्वकरण गुणस्थान—१. देखो अपूर्वकरण। भिण्णसमयट्ठिएहिं दु जीवेहिं ण होदि सव्वदा सरिसो। करणेहिं एक्कसमयट्ठिएहिं सरिसो विसरिसो वा॥ एदम्हि गुणट्ठाणे विसरिससमयट्ठिएहिं जीवेहिं। पुव्वमपत्ता जम्हा होंति अपुव्वा हु परिणामा॥ तारिसपरिणामट्ठियजीवा हु जिणेहिं गलियतिमिरेहिं। मोहस्स ऽपुव्वकरणा खवणुवसमणुज्जया भणिया॥ (प्रा. पंचसं. १, १७–१९; धव. पु. १, पृ. १८३ उ.; गो. जी. ५२–५४)। २. एवमपुव्वमपुव्वं जहुत्तरं जो करेइ ठीखंडं। रसखंडं तग्घायं सो होइ अपुव्वकरणो त्ति॥ (शतकप्र. ६, भा. गा. ८८, पृ. २१; गु. गु. प. स्वो. वृ- १८, पृ. ४५)। ३. समए समए भिण्णा भावा तम्हा अपुव्वकरणो हु॥ जम्हा उवरिमभावा हेट्ठिमभावेहिं णत्थि सरिसत्तं। तम्हा विदियं करणं अपुव्वकरणेत्ति णिद्दिट्ठं॥ (ल. सा. ३६, पृ. व ५१)। ४. अपूर्वः करणो येषां भिन्नं क्षणमुपेयुषाम्। अभिन्नं सदृशोऽन्यो वा ते अपूर्वकरणाः स्मृताः॥ (पंचसं. अमित. १–३५)। ५. स एवातीतसंज्वलनकषायमन्दोदये सत्यपूर्वपरमाल्हादैकसुखानुभूतिलक्षणापूर्वकरणोपशमक-क्षपकसंज्ञो ऽष्टमगुणस्थानवर्ती भवति। (वृ. द्रव्यसं. १३)। ६. अपूर्वाणि अपूर्वाणि करणानि स्थितिघात-रसघात-गुणश्रेणि-स्थितिवन्धादीनां निर्वर्तनानि यस्मिन् तदपूर्वकरणम्। (कर्मप्र. मलय. वृ. उपश. गा. १२)। ७. खइएण उवसमेण य कम्माणं जं अउव्वपरिणामो। तम्हा तं गुणठाणं अउव्वणामं तु तं भणियं॥ (भावसं. दे. ६४८)। ८. क्रियन्ते ऽपूर्वापूर्वाणि पञ्चामून्यत्र संस्थितेः। निवृत्तिवादरस्तेनापूर्वकरण उच्यते॥ स्थितिघातो रसघातो गुणश्रेण्यविरोहणम्। गुणसङ्क्रमणं चैव स्थितिवन्धश्च पञ्चमः॥ (सं. कर्मग्रन्थ १, १२–१३; लो. प्र. ३, ११६७–६८; योगशा. स्वो. विव. १–१६, पृ. १३२)।

१ जिस गुणस्थान में भिन्नसमयवर्ती जीवों के परिणाम कभी सदृश नहीं होते हैं तथा एक समयवर्ती जीवों के परिणाम कदाचित् सदृश और कदाचित् विसदृश भी होते हैं उसे भिन्नसमयवर्ती जीवों के द्वारा अप्राप्तपूर्व परिणामों के प्राप्त करने से अपूर्वकरण गुणस्थान कहते हैं। ६ जिस गुणस्थान में स्थितिघात, रसघात, गुणश्रेणि और स्थितिवन्ध आदि के निवर्तक अपूर्व कार्य होते हैं उसे अपूर्वकरण गुणस्थान कहते हैं।

अपूर्वस्पर्धक—१. संसारावत्थाए पुव्वमलद्धप्पसरूवाणि पुव्वफद्दएहिंतो अणंतगुणहाणीए ओवट्टिज्जमाणसहावाणि जाणि फद्दयाणि ताणि अपुव्वफद्दयाणि त्ति भण्णंते। (जयध. अ. ११०६)। २. वर्धमानं मतं पूर्वं हीयमानमपूर्वकम्। स्पर्धकं द्विविधं ज्ञेयं स्पर्द्धकक्रमकोविदैः॥ (पंचसं. अमित. १–४६)।

१. संसार-अवस्था में जिन्हें पहले कभी नहीं प्राप्त किया, किन्तु क्षपकश्रेणी में ही अश्वकर्णकरणकाल में जिन्हें प्राप्त किया है, और जो पूर्वस्पर्द्धकों से अनन्तगुणित हीन अनुभागशक्तिवाले हैं, ऐसे स्पर्धकों को अपूर्वस्पर्धक कहते हैं।

अपूर्वार्थ—१. अनिश्चितो ऽपूर्वार्थः। दृष्टोऽपि समारोपात्तादृक्। (परीक्षा. १, ४–५)। २. स्वरूपेणाकारविशेषरूपतया वानवगतोऽखिलोऽप्यपूर्वार्थः। (प्र. क. मा. १–४, पृ. ५९)। ३. यः प्रमा-

णान्तरेण संशयादिव्यवच्छेदेनानव्यवसितः सोऽपूर्वार्थः। (प्रमेयर. १–४)।

१ प्रमाणान्तर से अनिश्चित पदार्थको अपूर्वार्थ कहते हैं। तथा एक वार जान लेने के पश्चात् भी यदि उसमें संशय, विपर्यय या अनध्यवसाय हो जाय तो वह पदार्थ भी अपूर्वार्थ कहलाता है।

अपोद्धारव्यवहार—अपोद्धारव्यवहारो हि भेदव्यवहारः। (न्यायकु. २–७, पृ. २७७)।

भेद-व्यवहार को अपोद्धारव्यवहार कहते हैं।

अपोह(हा)—१. अपोहनम् अपोहः, निश्चय इत्यर्थः। (आव. मलय. वृ. १२; नन्दी. मलय. वृ. गा. ७८, पृ. १७६)। २. अपोह्यते संशयनिबन्धनविकल्पः अनया इति अपोहा। (धव. पु. १३, पृ. २४२)। ३. उक्ति-युक्तिभ्यां विरुद्धादर्थात् प्रत्यभावसम्भावनया व्यावर्तनमपोहः॥ अथवा ज्ञानसामान्यमूहो ज्ञानविशेषोऽपोहः। (नीतिवा. ५–५१, पृ. ५२)। ४. अपोह उक्ति-युक्तिभ्यां विरुद्धादर्थात् प्रत्यपायसम्भावनया व्यावर्तनम्। ××× अथवा अपोहो विशेषज्ञानम्। (योगशा. स्वो. विव. १-५१, पृ. १५२; ललितवि. पृ. ४३; धर्मबि. वृ. १–३३; धर्मसं. स्वो. वृ. १–१४, पृ. ६; श्राद्धगुणवि. पृ. ३७)। ५. ईहितविशेषनिर्णयरूपोऽपोहः। (जम्बूद्वी. वृ. ३–७०)।

२ जिसके द्वारा संशय के कारणभूत विकल्प को दूर किया जाय, ऐसे ज्ञानविशेष को अपोह या अपोहा कहते हैं।

अप्काय—१. पृथिवीकायिकजीवपरित्यक्तः पृथिवीकायो मृतमनुष्यादिकायवत्। ××× एवमवादिष्वपि योज्यम्। (स. सि. २–१३)। २. पृथिवीकायिकजीवपरित्यक्तः पृथिवीकायः, मृतमनुष्यादिकायवत्। ××× एवमापः, अप्कायः। (त. वा. २, १३, १)।

३ अप्कायिक जीव के द्वारा छोड़े हुए जल शरीर को अप्काय कहते हैं।

अप्कायिक जीव—१. पृथिवी कायो ऽस्यास्तीति पृथिवीकायिकः तत्कायसम्बन्धवशीकृत आत्मा। एवमवादिष्वपि योज्यम्। (स. सि. २–१३; त. वा. २, १३, १)। २. ओसा य हिमो धूमरि हरदणु सुद्धोदओ घणोदो य। एदे हु आउकाया जीवा जिणसासणुद्दिट्ठा॥ (पंचसं. १–७८; धव. पु. १, पृ. २७३ उद्धृत)। ३. अप्कायो विद्यते अस्य स अप्कायिकः। (त. वृत्ति श्रुत. २–१३)।

अप् (जल) ही जिनका शरीर हो, उन्हें अप्कायिक कहते हैं। जैसे—ओस, वर्फ और शुद्ध जल आदि।

अप्जीव — १. समवाप्तपृथिवीकायनामकर्मोदयः कार्मणकाययोगस्थो यो न तावत् पृथिवीं कायत्वेन गृह्णाति स पृथिवीजीवः। एवमवादिष्वपि योज्यम्। (स. सि. २–१३; त. वा. २, १३, १)। २. अपः कायत्वेन यो गृहीष्यति विग्रहगतिप्राप्तो जीवः सोऽप्जीवः कथ्यते। (त. वृ. श्रुत. २–१३)।

अप्काय नामकर्म के उदय से युक्त जो जीव कार्मण काययोग (विग्रहगति) में स्थित होता हुआ जलको शरीररूप से ग्रहण नहीं करता है—आगे उसे ग्रहण करने वाला है—वह अप्जीव कहलाता है।

अप्रकीर्णप्रसृतत्व—१. अप्रकीर्णप्रसृतत्वं सुसम्बन्धस्य सतः प्रसरणम्। अथवा ऽसम्बन्धानधिकारित्वातिविस्तरयोरभावः। (समवा. अभय. वृ. ३५)। २. अप्रकीर्णप्रसृतत्वं सम्बन्धाधिकारपरिमितता। (रायप. टी. पृ. १६)।

१ उत्तम सम्बन्धयुक्त वचन के विस्तार का नाम अप्रकीर्णप्रसृतत्व है। अथवा वचन में सम्बन्धविहीन अनधिकारिता और अतिविस्तार का न होना, यह अप्रकीर्णप्रसृतत्व है। यह वक्तव्य वचन के ३२ भेदों में १६वां भेद है।

अप्रणतिवाक्—१. यां श्रुत्वा तपोविज्ञानाधिकेष्वपि न प्रणमति सा ऽप्रणतिवाक्। (त. वा. १, २०, १२; धव. पु. १, पृ. ११७)। २. वञ्चनाप्रवणं जीवं कर्ता निःकृतिवाक्यतः। न नमत्यधिकेष्वात्मा सा चाप्रणतिवागभूत्। (ह. पु. १०–९५)। ३. तव-णाणादिसु अवणियवयणमवणदिवयणं। (अंगप. पृ. २९२)।

१ जिस वचन को सुनकर जीव तप और विज्ञान में अधिक महापुरुषों को भी प्रणाम नहीं करता है, वह अप्रणतिवाक् (अप्रणतिवचन) कहलाता है।

अप्रतिघात ऋद्धि—१. सेल-सिला-तरुपहुदीणब्भंतरं होइदूण गमणं व। जं वच्चदि सा रिद्धी अप्पडिघादेत्ति गुणणामं॥ (ति. प. ४–१०३१)। २. अद्रिमध्ये वियतीव गमनागमनमप्रतिघातः। (त. वा. ३–३६)। ३. पर्वतमध्येऽपि आकाश इव गमनम् अप्रतिघातः। (त. वृत्ति श्रुत. ३–३६)।

१ आकाश के समान शैल, शिला, वृक्ष और भित्ति आदि पदार्थों के भीतर से विना किसी व्याघात के निकल जाने को अप्रतिघात ऋद्धि कहते हैं।

अप्रतिघातित्व—अद्रिमध्येऽपि निःसङ्गगमनम् अप्रतिघातित्वम्। (योगशा. स्वो. विव. १–८)।

देखो अप्रतिघात ऋद्धि।

अप्रतिपात—१. प्रतिपतनं प्रतिपातः, न प्रतिपातः अप्रतिपातः। उपशान्तकषायस्य चारित्रमोहोद्रेकात् प्रच्युतसंयमशिखरस्य प्रतिपातो भवति, क्षीणकषायस्य प्रतिपातकारणाभावादप्रतिपातः। (स. सि. १–२४)। २. × × × निजरूपतः। प्रच्युत्य सम्भवश्चास्याप्रतिपातः प्रतीयते॥ (त. श्लो. १, २४, २)।

१ चारित्ररूप पर्वत के शिखर से नहीं गिरने को अप्रतिपात कहते हैं। प्रतिपात उपशान्तकषाय जीव का तो होता है, किन्तु क्षीणकषाय का नहीं होता।

अप्रतिपाति (ती)—देखो अप्रतिपात। १. प्रतिपातीति विनाशी, विद्युत्प्रकाशवत्। तद्विपरीतो ऽप्रतिपाती। (त. वा. १, २२, ४, पृ. ८२)। २. जमोहिणाणमुप्पण्णं संतं केवलणाणे समुप्पण्णे चेव विणस्सदि, अण्णहा ण विणस्सदि; तमप्पडिवादी णाम। (धव. पु. १३, पृ. २९५)। ३. न प्रतिपाति अप्रतिपाति, यत् किलाऽलोकस्य प्रदेशमेकमपि पश्यति, तदप्रतिपातीति भावः। (कर्मवि. दे. स्वो. वृ. गा. ८)। ४. न प्रतिपाती अप्रतिपाती। यत्केवलज्ञानाद्वा मरणादारतो वा न भ्रंशमुपयातीत्यर्थः। (प्रज्ञाप. मलय. वृ. ३३–३१७, पृ. ५३९)। ५. यत्प्रदेशमलोकस्य दृष्टुमेकमपि क्षमम्। तत्स्यादप्रतिपात्येव केवलं तदनन्तरम्। (लोकप्र. ३–८४७)। ६. आ केवलप्राप्तेरामरणाद्वाऽवतिष्ठमानमप्रतिपाति। (जैनत. पृ. ११८)।

१ जो अवधिज्ञान विजली के प्रकाश के समान विनश्वर नहीं है, किन्तु केवलज्ञान की प्राप्ति तक स्थिर रहने वाला है, उसे अप्रतिपाती अवधि कहते हैं। ३ जो अलोक के एक प्रदेश को भी देखता है उसे अप्रतिपाती अवधिज्ञान कहा जाता है।

अप्रतिबद्ध—१. अन्तरालग्राम-नगरादिसन्निवेशस्य-यति-गृहिसत्कार-सम्मान-प्राघूर्णकभक्तादौ सर्वत्राप्रतिबद्धत्वात् 'अप्पडिबद्धो य सव्वत्थ' इत्युच्यते। (भ. आ. विजयो. टी. ४०३)। २. अप्पडिबद्धो आसक्ति-रहितः। (भ. आ. मूला. टी. ४०३)।

जो ग्राम, नगर व अरण्यादि में रहने वाले मुनि या गृहस्थ के द्वारा किये जाने वाले आदर-सत्कार से मोहित न होकर सर्वत्र अनासक्त रहता है; ऐसे निर्मोही साधु को अप्रतिबद्ध कहते हैं।

अप्रतिबुद्ध—१. कम्मे णोकम्मम्हि य अहमिदि अहकं च कम्म णोकम्मं। जा एसा खलु बुद्धी अप्पडिबुद्धो हवदि ताव॥ (समयप्रा. २२)। २. अप्रतिबुद्धः स्वसंवित्तिशून्यो वहिरात्मा। (समयप्रा. जय. वृ. २२)।

कर्म-नोकर्म को आत्मा और आत्मा को कर्म-नोकर्म समझने वाला जीव अप्रतिबुद्ध (वहिरात्मा) कहलाता है।

अप्रतिलेख—अप्रतिलेखश्चक्षुषा पिच्छिकया वा द्रव्यस्थानस्याप्रतिलेखनमदर्शनम्। (मूला. वृ. ५–२२०)।

विवक्षित द्रव्य या उसके स्थान को आंख से न देखने और पिच्छी से प्रमार्जित न करने को अप्रतिलेख कहते हैं।

अप्रतिश्रावी—अप्रतिश्रावी निश्छिद्रशैलभाजनवत् परकथितात्मगुह्यजलाप्रतिश्रवणशीलः। (सम्बोधस. वृ. श्लो. १९)।

निश्छिद्र पत्थर का वर्तन जिस प्रकार जल को धारण करता है—उसे नहीं निकलने देता—उसी प्रकार जो दूसरे की गुप्त वात को स्थिरता से धारण करता है—उसे प्रगट नहीं होने देता उसे अप्रतिश्रावी कहते हैं। यह आचार्य के ३६ गुणों में से एक (८वां) है।

अप्रत्यवेक्षणदोष—आलोकितं प्रमृष्टं च, न पुनः शुद्धमशुद्धं चेति निरूपितमित्यादान-निक्षेपकरणाच्चतुर्थोऽप्रत्यवेक्षणाख्यो दोषः। (भ. आ. मूला. टी. ११९८)।

वस्तु को देखकर और पिच्छी से स्वच्छ करके भी उसकी शुद्धि-अशुद्धि को न देखते हुए उसे ग्रहण करना या रखना, यह आदान निक्षेपणसमिति का अप्रत्यवेक्षण नामका चौथा दोष है।

अप्रत्यवेक्षितनिक्षेपाधिकरण — १. प्रमार्जनोत्तरकाले जीवाः सन्ति न सन्तीति वाऽप्रत्यवेक्षितं यन्निक्षिप्यते तदप्रत्यवेक्षितनिक्षेपाधिकरणम्। (भ. आ. विजयो. ८१४)। २. प्रमार्जनोत्तरकालं जीवाः

सन्त्यत्र, न सन्तीति वा ऽप्रत्यवेक्षितं निक्षिप्यमाणमप्रत्यवेक्षितनिक्षेपः। (अन. ध. स्वो. टी. ४–२८)।

भूमि आदि के प्रमार्जन के पश्चात् 'यहां पर जीव हैं या नहीं' इस प्रकार देखे विना ही वस्तु को रख देना अप्रत्यवेक्षितनिक्षेपाधिकरण कहलाता है।

अप्रत्यवेक्षिताप्रमार्जित-संस्तरोपक्रमण— अप्रत्यवेक्षिताप्रमार्जितस्य प्रावरणादेः संस्तरस्योपक्रमणं अप्रत्यवेक्षिताप्रमार्जितसंस्तरोपक्रमणम्। (स सि. ७–३४; त. वा. ७, ३४, ३; चा. सा. पृ. १२; त. वृत्ति श्रुत. ७-३४)।

बिना देखे और बिना शोधे बिस्तर आदिके बिछाने, लौटने व घड़ी करने आदि को अप्रत्यवेक्षिताप्रमार्जितसंस्तरोपक्रमण कहते हैं।

अप्रत्यवेक्षिताप्रमार्जितादान—अप्रत्यवेक्षिताप्रमार्जितस्यार्हदाचार्यपूजोपकरणस्य गन्धमाल्यधूपादेरात्मपरिधानाद्यर्थस्य च वस्त्रादेरादानमप्रत्यवेक्षिताप्रमार्जितादानम्। (स. सि. ७–३४; त. वा. ७, ३४, ३; चा. सा. पृ. १२; त. वृ. श्रुत ७–३४)।

बिना देखे व बिना शोधे पूजा के उपकरणों को, गन्ध, माल्य व धूपादि को तथा वस्त्रादि को ग्रहण करना; अप्रत्यवेक्षिताप्रमार्जितादान कहलाता है।

अप्रत्यवेक्षिताप्रमार्जितोत्सर्ग—१. अप्रत्यवेक्षिताप्रमार्जितायां भूमौ मूत्र-पुरीषोत्सर्गोऽप्रत्यवेक्षिताप्रमार्जितोत्सर्गः। (स. सि. ७–३४; त. वा. ७, ३४, ३)। २. तत्र जन्तवः सन्ति न सन्ति वेति प्रत्यवेक्षणं चक्षुषोर्व्यापारः, मृदुनोपकरणेन यत्क्रियते प्रयोजनं [प्रमार्जनं] तत्प्रमार्जनम्, अप्रत्यवेक्षितायां भुवि मूत्र-पुरीषोत्सर्गोऽप्रत्यवेक्षिताप्रमार्जितोत्सर्गः। (चा. सा. पृ. १२)। ३. प्रत्यवेक्षन्ते स्म प्रत्यवेक्षितानि, न प्रत्यवेक्षितानि अप्रत्यवेक्षितानि; अप्रत्यवेक्षितानि च तानि अप्रमार्जितानि अप्रत्यवेक्षिताप्रमार्जितानि। मूत्र-पुरीषादीनामुत्सर्जनं त्यजनम् उत्सर्गः××× । अप्रत्यवेक्षिताप्रमार्जितभूमौ मूत्र-पुरीषादेरुत्सर्गः अप्रत्यवेक्षिताप्रमार्जितोत्सर्गः। (त. वृ. श्रुत. ७–३४)।

बिना देखे और बिना शोधे भूमि पर मल-मूत्रादि के छोड़ने को अप्रत्यवेक्षिताप्रमार्जितोत्सर्ग कहते हैं।

अप्रत्याख्यान—ईषत्प्रत्याख्यानमप्रत्याख्यानं देशसंयमं ×××। (भ. आ. मूला. टी. २०९६; त. सुखबो. वृ. ८–९)।

थोड़ेसे प्रत्याख्यान (व्रत) का नाम अप्रत्याख्यान (देशसंयम) है।

अप्रत्याख्यानक्रिया—१. संयमघातिकर्मोदयवशादनिवृत्तिरप्रत्याख्यानक्रिया। (स. सि. ६–५; त. वा. ६. ५, ११; त. सुखबो. वृ. ६–५)। २. संयमविघातिनः कषायाद्यरीन् प्रत्याख्येयान् न प्रत्याचष्ट इत्यप्रत्याख्यानक्रिया। (त. भा. सिद्ध. वृ. ६–६)। ३. कर्मोदयवशात् पापादनिवृत्तिरपि क्रिया। अप्रत्याख्यानसंज्ञा सा×××॥ (ह. पु. ५८–८२)। ४. वृत्तमोहोदयात् पुंसामनिवृत्तिः कुकर्मणः। अप्रत्याख्या क्रियेत्येताः पंच पंच क्रियाः स्मृताः॥ (त. श्लो. ६, ५, २६)। ५. संयमघातककर्मविपाकपारतन्त्र्यान्निर्वृ त्तावर्तनमप्रत्याख्यानक्रिया। (त. वृ. श्रुत. ६–५)।

१ संयम का घात करने वाले कर्म के उदय से विषय-कषायों से विरक्ति न होना अप्रत्याख्यानक्रिया है।

अप्रत्याख्यानक्रोधादि—१. अप्रत्याख्यानकषायोदयाद् विरतिर्न भवति। (त. भा. ८–१०)। २. अविद्यमानप्रत्याख्याना अप्रत्याख्यानाः, देशप्रत्याख्यानं सर्वप्रत्याख्यानं च नैषामुदये लभ्यते। (श्रा. प्र. टी. १७, धर्मसंग्रहणि मलय. वृ. ६१४)। ३. न विद्यते देशविरति-सर्वविरतिरूपं प्रत्याख्यानं येषु उदयप्राप्तेषु सत्सु ते ऽप्रत्याख्यानाः।(श्राव. नि. हरि. वृ. १०६; कर्मवि. पू. व्या. ४१)। ४. सर्वं प्रत्याख्यानं देशप्रत्याख्यानं च येषामुदये न लभ्यते ते भवन्त्यप्रत्याख्यानाः। सर्वनिषेधवचनोऽयं नञ्। (प्रज्ञापना. मलय. वृ. २३–२९३, पृ. ४६८)। ५. न विद्यते प्रत्याख्यानं यदुदये तेऽप्रत्याख्यानकषायाः। (पंचसं. स्वो. वृ. १२३)। ६. अविद्यमानं प्रत्याख्यानं येषामुदयात् तेऽप्रत्याख्यानाः क्रोधादयः। अपरे पुनरावरणशब्दमत्रापि सम्बध्नन्ति 'अप्रत्याख्यानावरणाः' इति। अप्रत्याख्यानं देशविरतिः, तदप्यावृण्वन्ति। (त. भा. सिद्ध. वृ. ८–१०, पृ. १३६)। ७. न विद्यते (कर्म. वि.—वेद्यते) स्वल्पमपि प्रत्याख्यानं येषामुदयात्तेऽप्रत्याख्यानाः। (पंचसं. मलय. वृ. ३-५; कर्मप्र. मलय. वृ. १–१, पृ. ४; कर्मवि. दे. स्वो. वृ. १७; षडशी. मलय. वृ. ७६, पृ. ७९)। ८. देशविरतिगुणविघाती

अप्रत्याख्यान:। (प्रज्ञाप. मलय. वृ. १४–१८८)। ९. नाल्पमप्युत्सहेद्येषां प्रत्याख्यानमिहोदयात्। अप्रत्याख्यानसंज्ञास्तो द्वितीयेषु निवेशिता ॥ (कर्मवि. दे. स्वो. वृत्ति गा. १७ उद्धृत)। १०. अप्रत्याख्यानरूपाश्च देशव्रतविघातिन:। (उपासका. ६२५)। ११. न विद्यते प्रत्याख्यानं अणुव्रतादिरूपं यस्मिन् सो ऽप्रत्याख्यानो देशविरत्यावारक:। (स्थाना. सू. २४६, पृ. १८३)।

१ जिनके उदय से व्रत का अभाव होता है, उन्हें अप्रत्याख्यानक्रोधादि कहा जाता है।

अप्रत्याख्यानावरण क्रोधादि—१. यदुदयाद्देशविरतिं संयमासंयमाख्यामल्पामपि कर्तुं न शक्नोति ते देशप्रत्याख्यानमावृण्वन्तोऽप्रत्याख्यानावरणा: क्रोध-मान-माया-लोभा:। (स. सि. ८–९; त. वा. ८, ९, ५; त. वृ. श्रुत. ८–९)। २. अप्रत्याख्यानं संयमासंयम:, तमावृणोतीति अप्रत्याख्यानावरणीयम्। (धव. पु. ६, पृ. ४४)। ३. ईषत्प्रत्याख्यानमप्रत्याख्यानं देशसंयममावृण्वन्ति निरुन्धन्तीत्यप्रत्याख्यानावरणा: क्रोधमानमायालोभा:। (भ. आ. मूला. टी. २०९६; गो. जी. जी. प्र. टी. २८३; त. सुखबो. वृ. ८–९)। ४. त एव च क्रोधादयो यथाक्रमं पृथिवीरेखाऽस्थि-मेषशृङ्ग-कर्दमरागसमाना: (कर्मस्तव गो. वृत्ति में आगे 'संवत्सरानुबन्धिन:' विशेषण अधिक है) अप्रत्याख्यानावरणा उच्यन्ते। नभो [नञो]ऽल्पार्थत्वादल्पं प्रत्याख्यानमप्रत्याख्यानं देशविरतिरूपम्, तदप्यावृण्वन्तीत्यप्रत्याख्यानावरणा:। (शतक. मल. हेम. वृ. ३८, पृ. ४६; कर्मस्तव गो. वृत्ति ९–१०, पृ. १६)। ५. त एव च क्रोधादयो यथाक्रमं पृथिवीरेखाऽस्थिमेषशृङ्गकर्दमरागसमाना: सम्वत्सरानुबन्धिनोऽप्रत्याख्यानावरणा:। (कर्मस्तव गो. वृ. ९–१०, पृ. १६)।

१ जिनके उदय से लेश मात्र भी संयमासंयम न धारण किया जा सके उन्हें अप्रत्याख्यानावरण क्रोध-मान-माया-लोभ कहते हैं।

अप्रत्युपेक्षण—अप्रत्युपेक्षणं गोचरापन्नस्य शय्यादेश्चक्षुषाऽनिरीक्षणम्। (श्रा. प्र. टी. ३२३)।

इन्द्रियविषयता को प्राप्त शय्या आदि का आंख से निरीक्षण नहीं करने को अप्रत्युपेक्षण कहते हैं।

अप्रत्युपेक्षित—अप्रत्युपेक्षितं सर्वथा चक्षुषाऽनिरीक्षितम्। (जीतक. चू. वि. व्या. पृ. ५१)।

अप्रत्युपेक्षित—देखो अप्रत्युपेक्षण।

अप्रथमसमय - सयोगिभवस्थ - केवलज्ञान—यस्मिन् समये केवलज्ञानम् उत्पन्नं तस्मिन् समये तत्प्रथमसमय-सयोगिभवस्थकेवलज्ञानम्, शेषेषु तु समयेषु शैलेशीप्रतिपत्तेरर्वाक् वर्तमानमप्रथमसमय-सयोगिभवस्थ-केवलज्ञानम्। (आव. मलय. वृ. ७८, पृ. ८३)।

जिस समय में केवलज्ञान उत्पन्न हुआ है उस समय में वह प्रथमसमय-सयोगिभवस्थ-केवलज्ञान कहलाता है। तत्पश्चात् शैलेशी अवस्था प्राप्त होने के पहले तक उक्त प्रथम समय के सिवाय शेष समयों में वर्तमान सयोगिकेवली के केवलज्ञान को अप्रथमसमय-सयोगिभवस्थ-केवलज्ञान कहते हैं।

अप्रदेशत्व—[कालद्रव्यस्य] एकप्रदेशमात्रत्वादप्रदेशत्वमिष्यते। (त. सा. ३–२१)।

एक प्रदेश मात्र के पाये जाने से पुद्गल परमाणु और कालाणुके अप्रदेशत्व माना गया है।

अप्रदेशानन्त—एकप्रदेशे परमाणौ तद्व्यतिरिक्तापरो द्वितीय: प्रदेशोऽन्तव्यपदेशभाक् नास्तीति परमाणुरप्रदेशानन्त:। (धव. पु. ३, पृ. १५–१६)।

एकप्रदेशी पुद्गल परमाणु में चूंकि अन्त नामवाला दूसरा प्रदेश नहीं सम्भव है, अतएव वह अप्रदेशानन्त कहलाता है।

अप्रदेशासंख्यात—जं तं अपदेसासंखेज्जयं तं जोगविभागे पलिच्छेदे पडुच्च एगो जीवपदेसो। (धव. पु. ३, पृ. १२४)।

योग के अविभागी प्रतिच्छेदों की अपेक्षा एक जीवप्रदेश अप्रदेशासंख्यात कहा जाता है।

अप्रदेशिक अनन्त—जं तं अपदेसियाणंतं तं परमाणू। (धव. पु. ३, पृ. १५)।

परमाणु को अप्रदेशिक-अनन्त कहा जाता है।

अप्रभावना—कुदर्शनस्य माहात्म्यं दूरीकृत्य बलादित:। द्योतते न यदार्हन्त्यमसौ स्यादप्रभावना ॥ (धर्मसं. श्रा. ४–५२)।

मिथ्यादर्शन के माहात्म्य को दूर करके जैनदर्शन के माहात्म्यके नहीं फैलाने को अप्रभावना कहते हैं।

अप्रमत्तसंयत—१. णट्ठासेसपमाओ वयगुणसीलोलिमंडिओ णाणी। अणुवसमओ अखवओ ज्झाणणिलीणो हु अपमत्तो सो ॥ (प्रा. पंचसं. १–१६; धव. पु. १, पृ. १७९ उ.; गो. जी. ४६; भावसं. दे.

६१४)। २. न प्रमत्तसंयता अप्रमत्तसंयताः, पञ्चदशप्रमादरहिता इति यावत्। (धव. पु. १, पृ. १७८)। ३. पमादहेदुकसायस्स उदयाभावेण अपमत्तो होदूण (पमादहेदुकसाओदओ जस्स णत्थि सो अप्पमत्तो)। (धव. पु. ७, पृ. १२)। ४. प्रमादरहितोऽप्रमत्तसंयतः। (त. वा. ६, १, १८)। ५. पंचसमिओ तिगुत्तो अपमत्तजई मुणेयव्वो। (बन्धश. भा. गा. ८७, पृ. २१; गु. गु. षट्. स्वो. वृत्ति १८, पृ. ४५)। ६. संयतो ह्यप्रमत्तः स्यात्पूर्ववत्प्राप्तसंयमः। प्रमादविरहाद् वृत्तेर्वृत्तिमस्खलितां दधत्॥ (त. सा. २-२४)। ७. संजलणणोकसायाणुदओ मंदो जदा तदा होदि। अपमत्तगुणो तेण य अपमत्तो संजदो होदि॥ (गो. जी. ४५)। ८. स एव (सद्दृष्टिः) जलरेखादिसदृशसंज्वलनकषायमन्दोदये सति निष्प्रमादशुद्धात्मसंवित्तिमलजनकव्यक्ताव्यक्तप्रमादरहितः सन् सप्तमगुणस्थानवर्ती अप्रमत्तसंयतो भवति। (बृ. द्रव्यसं. टी. १३)। ९. सोऽप्रमत्तसंयतो यः संयमी न प्रमाद्यति। (योगशा. स्वो. विव. १-१६)। १०. नास्ति प्रमत्तमस्येति अप्रमत्तो विकथादिप्रमादरहितः, अप्रमत्तश्चासौ संयतश्चेत्यप्रमत्तसंयतः। (कर्मस्त. गो. वृ. २, पृ. ७२)। ११. न प्रमत्तोऽप्रमत्तः, यद्वा नास्ति प्रमत्तमस्येत्यप्रमत्तः, अप्रमत्तश्चासौ संयतश्चाप्रमत्तसयतः। (पंचसं. मलय. वृ. १-१५, पृ. २१)। १२. चतुर्थानां कषायाणां जाते मन्दोदये सति। भवेत् प्रमादहीनत्वादप्रमत्तो महाव्रती। (गु. क्रमा. ३२, पृ. २५)। १३. यश्च निद्राकषायादिप्रमादरहितो व्रती। गुणस्थानं भवेत्तस्याप्रमत्तसंयताभिधम्॥ (लोकप्र. ३, ११६६)।

१ सर्व प्रकारके प्रमादों से रहित और व्रत, गुण एवं शील से मण्डित तथा सद्ध्यान में लीन ऐसे सम्यग्ज्ञानवान् साधु को अप्रमत्तसंयत कहते हैं।

अप्रमाद — पंचमहव्वयाणि पंचसमिदीओ तिण्णि गुत्तीओ णिस्सेसकसायाभावो च अप्पमादो णाम। (धव. पु. १४, पृ. ८९)।

पांच महाव्रत, पांच समिति और तीन गुप्तियों को धारण करना तथा समस्त कषायों का अभाव होना; इसका नाम अप्रमाद है।

अप्रमार्जनासंयम—अप्रमार्जनासंयमः पात्रादेरप्रमार्जनया ऽविधिप्रमार्जनया वेति। (समवा. अभय. वृ. १७, पृ. ३२)।

पात्र आदि को या तो मांजना ही नहीं—स्वच्छ नहीं करना—या उन्हें विधिपूर्वक नहीं मांजना—उनके मांजने में आगमोक्त विधि की उपेक्षा करना; इसका नाम अप्रमार्जनासंयम है।

अप्रवीचार—१. प्रवीचारो हि वेदनाप्रतीकारस्तदभावे तेषां (ग्रैवेयकादिवासिनां) परमसुखमनवरतमित्येतस्य प्रतिपत्त्यर्थमप्रवीचारा इत्युच्यते। (त. वा. ४, ९, २)। २. प्रवीचारो मैथुनसेवनम् ××× प्रवीचारो वेदनाप्रतीकारः। वेदनाभावाच्छेषाः देवाः अप्रवीचाराः, अनवरतसुखा इति यावत्। (धव. पु. १, पृ. ३३८-३९)।

१ कामवेदना के प्रतीकार का नाम प्रवीचार है। उससे रहित ग्रैवेयकादिवासी देवों को अप्रवीचार कहा जाता है।

अप्रशस्त ध्यान—अप्रशस्तं (ध्यान) अपुण्यास्रवकारणत्वात्। (त. वा. ९,२८, ४)।

पापास्रव के कारणभूत आर्त-रौद्रस्वरूप ध्यान को अप्रशस्त ध्यान कहते हैं।

अप्रशस्त निदान—१. माणेण जाइ-कुल-रूवमादि आइरिय-गणधर-जिणत्तं। सोभग्गाणादेयं पत्थंतो अप्पसत्थं तु॥ (भ. आ. १२१७)। २. भोगाय मानाय निदानमीशैर्यदप्रशस्तं द्विविधं तदिष्टम्। विमुक्तिलाभप्रतिबन्धहेतोः संसार-कान्तारनिपातकारि॥ (अमित. श्रा. ७-२५)।

१ मान कषाय से प्रेरित होकर परभव में उत्तम कुल, जाति, एवं रूपादिके पाने की इच्छा करना; तथा आचार्य, गणधर और तीर्थंकरादि पदों के पाने की कामना करना अप्रशस्त निदान कहलाता है।

अप्रशस्त निःसरणात्मक तैजस—तत्थ अप्पसत्थं बारहजोयणायामं णवजोयणवित्थारं सूचिअंगुलस्स संखेज्जदिभागबाहल्लं जासवणकुसुमसंकासं भूमि-पव्वदादिदहणक्खमं पडिवक्खरहियं रोसिंधणं वामंसप्पभवं इच्छियखेत्तमेत्तविसप्पणं। (धव. पु. ४, पृ. २८)।

बारह योजन लम्बे, नौ योजन चौड़े, सूच्यंगुल के संख्यातवें भाग मोटे, जपापुष्प के समान रक्तवर्णवाले, पृथिवी व पर्वतादि के जलाने में समर्थ, प्रतिपक्षसे रहित तथा बायें कन्धेसे प्रगट होकर अभीष्ट स्थान तक फैलने वाले तैजस शरीर को अप्रशस्त

निःसरणात्मक तैजस कहते हैं। यह तैजस शरीर क्रोध के वशीभूत हुए साधु के वायें कन्धे से निकलता हैं।

अप्रशस्त-नोआगम-भावोपक्रम—अप्रशस्तो गणिकादीनाम्, गणिकाद्यप्रशस्तेन संसाराभिवर्धिना व्यवसायेन परभावमुपक्रामन्ति। (व्यव. सू. भा. मलय. वृ. १, पृ. २)।

संसार बढ़ाने वाले गणिकादि के अप्रशस्त व्यवसाय से जो पर भाव का उपक्रम होता है उसे अप्रशस्त-नोआगम-भावोपक्रम कहते हैं।

अप्रशस्त-प्रतिसेवना—१. अप्पसत्थेति अप्रशस्तेन भावेन सेवइ। (जीतक. चू. पृ. ३, पं. १८–१९)। २. वल-वर्णाद्यर्थं प्रासुकभोज्यपि जं पडिसेवइ सा अप्रशस्तप्रतिसेवना। किं पुण अविसुद्धं आहाकम्माइं? (जीतक. चू. वि. व्या. ५, पृ. ३४)। ३. अप्रशस्तो वल-वर्णादिनिमित्तं प्रतिसेवी। (व्यव. भा. मलय. वृ. गा. ६३४)।

१ वल व वर्णादि की प्राप्तिके लिए प्रासुक भी भोजन के सेवन करने को अप्रशस्त प्रतिसेवना कहते हैं।

अप्रशस्त प्रभावना—मिच्छत्त-अण्णाणाईणं अप्पसत्था [पहावणा]। (जीतक. चू. पृ. १३)।

मिथ्यात्व और अज्ञान आदि भावों की प्रभावना करने को अप्रशस्त प्रभावना कहते हैं।

अप्रशस्त भावशीति—यैर्हेतुभिस्तेषामेव संयमस्थानानां संयमकण्डकानां लेश्यापरिणामविशेषाणां वा ऽधस्तात् संयमस्थानेष्वपि गच्छति सा अप्रशस्ता भावशीतिः। (व्यव. भा. मलय. वृ. गा. ४०९)।

जिन हेतुओं के द्वारा उन्हीं विवक्षित संयमस्थानों, संयमकाण्डकों एवं लेश्यापरिणामविशेषों के नीचे संयमस्थानों में भी जावे उसे अप्रशस्त भावशीति कहते हैं।

अप्रशस्त भावसंयोग—से किं तं अपसत्थे? कोहेणं कोही, माणेणं माणी, मायाए मायी, लोहेणं लोही, से तं अपसत्थे। (अनुयो. सू. १३०, पृ. १४४)

जीव क्रोध के संयोग से क्रोधी, मान के संयोग से मानी, माया के संयोग से मायी और लोभ के संयोग से लोभी कहा जाता है। इस प्रकारके अप्रशस्त भाव के संयोग से प्रसिद्ध ऐसे (क्रोधी आदि) नाम अप्रशस्त भाव संयोग जनित माने गये हैं।

अप्रशस्त राग—स्त्री-राज-चौर-भक्तविकथाऽऽलापाकर्णन-कौतूहलपरिणामो हि अप्रशस्तरागः। (नि. सा. वृ. १–६)।

स्त्री, राजा, चोर और भोजनादि विषयक विकथाओं के कहने-सुनने का कौतूहल होना; यह अप्रशस्त राग है।

अप्रशस्त वात्सल्य—ओसन्नाइगिहत्थाणं अप्पसत्थं [वच्छलं]। (जीतक. चूर्णि पृ. १३, पं. १८-१९)।

अवसन्न—अवसाद या खेद को प्राप्त—गृहस्थों के साथ वात्सल्य भाव रखने को अप्रशस्त वात्सल्य कहते हैं।

अप्रशस्त विहायोगति—१. जस्स कम्मस्स उदएण खरोट्ट-सियालाणं व अप्पसत्था गई होज्ज सा अप्पसत्थविहायोगदीणाम। (धव. पु. ६, पृ. ७७)। २. उष्ट्र-खराद्यप्रशस्तगतिनिमित्तमप्रशस्तविहायोगतिनाम। (त. वा. ८, ११, १८; त. सुखबो. वृ. ८, ११)। ३. जस्सुदएणं जीवो अमणिट्ठाए उ गच्छइ गईए। सा असुहा विहगगई उट्टाईणं हवे सा उ। (कर्मवि. गर्ग. १२९, पृ. ५३)। ४. यस्य कर्मण उदयेनोष्ट्र-शृगाल-श्वादीनामिवाप्रशस्ता गतिर्भवति, तदप्रशस्तविहायोगतिनाम। (मूला. वृ. १२-१९५)। ५. यदुदयात् पुनरप्रशस्ता विहायोगतिर्भवति, यथा खरोष्ट्र-महिषादीनाम्, तदप्रशस्तविहायोगतिनाम। (षष्ठ कर्म. मलय. वृ. ६, पृ. १२५; सप्ततिका दे. स्वो. वृ. ५, पृ. ५३)।

१ जिस कर्म के उदय से ऊँट, गर्दभ और शृगाल आदि के समान निन्द्य चाल उत्पन्न हो उसे अप्रशस्त विहायोगति नामकर्म कहते हैं।

अप्रशस्तोपवृंहण—अप्पसत्था (उववूहा) मिच्छत्ताइसु (अब्भुज्जयस्स उच्छाहवड्ढणं उववूहणं)। (जीतक. चू. पृ. १३, पं. १५–१६)।

मिथ्यात्व आदि में उद्यत प्राणियों के उत्साह के बढ़ाने को अप्रशस्त उपवृंहा (उपवृंहण) कहते हैं।

अप्रशस्तोपशामना—१. जा सा देशकरणुवसामणा तिस्से अण्णाणि दुवे णामाणि—अगुणोवसामणा त्ति च अप्पसत्थुवसामणा त्ति च। (धव. पु. १५, पृ. २७५, २७६)। २. कम्मपरमाणूणं वज्झंतरंगकारणवसेण केत्तियाणं पि उदीरणावसेण उदयाणागमणपइण्णा अप्पसत्थ-उवसामणा त्ति भण्णदे। (जयध. अ. प. ९७०—धव. पु. ६, पृ. २५४ का टिप्पण १)। ३. संसारपाओग्ग-अप्पसत्थपरिणामणिबंधणत्तादो

एसा अप्पसत्थोवसामणा त्ति भण्णदे। (जयध.—क. पा. पृ. ७०८ का टिप्पण २)।

किन्हीं कर्म-परमाणुओंका बाह्य और अन्तरंग कारणों के वश तथा किन्हीं का उदीरणा के वश उदय में न आना, इसका नाम अप्रशस्तोपशामना है। इसी को दूसरे नाम से अगुणोपशामना भी कहा जाता है।

अप्रसेनिकाकुशील — कश्चिदप्रसेनिकाकुशील: विद्याभिर्मंत्रौपत्रप्रयोगैर्वा ऽसंयतचिकित्सां करोति, सोऽप्रसेनिकाकुशील: । (भ. आ. विजयो. टी. १६५०)।

जो साधु विद्या, मंत्र और औषधि के द्वारा असंयमी जनों की चिकित्सा करता है उसे अप्रसेनिका-कुशील कहते हैं।

अप्रामाण्य — × × × अर्थान्यथात्वपरिच्छेदसामर्थ्यलक्षणाप्रामाण्यस्य (अप्रामाण्यस्य लक्षणं ह्यर्थान्यथात्वपरिच्छेदसामर्थ्यम्) × × ×। (प्र. क. मा. पृ. १६३ पं. १३)।

अर्थ के अन्यथापन के—जैसा कि वह है नहीं वैसा —जानने के सामर्थ्य का नाम अप्रामाण्य है। तात्पर्य यह कि पदार्थ के जानने में जो यथार्थता का अभाव होता है उसे अप्रामाण्य समझना चाहिए।

अप्रिय वचन—१. अरतिकरं भीतिकरं खेदकरं वैर-शोक-कलहकरम्। यदपरमपि तापकरं परस्य तत्सर्वमप्रियं ज्ञेयम् ॥ (पु. सि. ९८)। २. कर्कश-निष्ठुर-भेदन-विरोधनादिबहुभेदसंयुक्तम् । अप्रियवचनं प्रोक्तं प्रियवाक्यप्रवणवाणीकै: ॥ (अमित. श्रा. ६-५४)।

२ कर्कश, निष्ठुर, दूसरे प्राणियों का छेदन-भेदन करने वाले और विरोध को उत्पन्न करने वाले वचनों को अप्रिय वचन कहते हैं।

अबद्धश्रुत—बद्धमबद्धं तु सुअं बद्धं तु दुवालसंग निद्दिट्ठं। तव्विवरीयमबद्धं × × ×॥ (आव. नि. १०२०)।

द्वादशांग रूप बद्ध श्रुत से भिन्न श्रुत को अबद्धश्रुत कहते हैं।

अबन्ध (अबन्धक)—१. सिद्धा अबंधा ॥७॥ बंधकारणवदिरित्तमोक्खकारणेहि संजुत्तत्तादो। (षट्खं. २, १, ७—धव. पु. ७, पृ. ८-९)। २. मिच्छत्तासंजम-कसाय-जोगाणं बंधकारणाणं सव्वेसिमजोगिम्हि अभावा अजोगिणो अबंधया। (धव. पु. ७, पृ. ८)।

जो सिद्ध जीव बन्ध के कारणों से रहित होकर मोक्ष के कारणों से संयुक्त हैं वे, तथा मिथ्यात्वादि सभी बन्धकारणों से रहित अयोगी जिन भी अबन्धक हैं।

अबला—अबल त्ति होदि जं से ण दढं हिदयम्मि धिदिबलं अत्थि। (भ. आ. ९८०)।

जिसके हृदय में दृढ़ धैर्यबल न हो उसे अबला कहते हैं।

अबहुश्रुत—अबहुश्रुतो नाम येनाऽऽचारप्रकल्पाध्ययनं नाधीतम्, अधीतं वा विस्मारितम्। (बृहत्क. वृत्ति ७०३)।

जिसने आचारकल्प का अध्ययन नहीं किया, अथवा पढ़ करके भी उसे भुला दिया है, ऐसे व्यक्ति को अबहुश्रुत कहते हैं।

अबाधा, अबाधाकाल—देखो आबाधा। १. होई अबाहकालो जो किर कम्मस्स अणउदयकालो। शतक. भा. ४२, पृ. ६७)। २. ततश्च सप्तति: सागरोपमानां कोटीकोट्यो मोहनीयस्योत्कृष्टा स्थितिर्भवति। अत्र च सप्तवर्षसहस्राणि कर्मणोऽनुदयलक्षणाऽबाधा द्रष्टव्या। बद्धमपीत्यमेतत् कर्म सप्तवर्षसहस्राणि यावद्विपाकोदयलक्षणां बाधां न करोतीत्यर्थ:। (शतक. मल. हेम. वृ. ५१, पृ. ६५)।

बंधने के पश्चात् भी कर्म जितने समय तक बाधा नहीं पहुंचाता—उदय में नहीं आता है—उतना समय उसका अबाधाकाल कहलाता है।

अबाधितविषयत्व— साध्यविपरीतनिश्चायकप्रबलप्रमाणरहितत्वमबाधितविषयत्वम्। (न्या. दी. पृ. ८५)।

साध्य से विपरीत के निश्चायक प्रबल प्रमाण के अभाव को अबाधितविषयत्व कहते हैं।

अबुद्धजागरिका—जे इमे अणगारा भगवंतो इरियासमिया भासासमिया जाव गुत्तबंभयारी, एए णं अबुद्धा अबुद्धजागरिया जागरति। (भगवती सू. १२, १, ११ पृ. २५५)।

ईर्यासमिति और भाषासमिति से युक्त गुप्त ब्रह्मचारी—नौ ब्रह्मगुप्तियों (शीलवाड़ों) से संरक्षित ब्रह्मचर्य के परिपालक—तक साधु अबुद्धजागरिका जागृत होते हैं।

अबुद्धि — आत्मस्थदुःखबीजापायोपायचिन्ताशून्यत्वादनिवार्यपरदुःखशोचनानुचरणाच्चाबुद्धिः। (भ. आ. मूला. टी. १७५४)।
जिसे अपने दुःख के दूर करने की चिन्ता न हो, पर दूसरे के दुःख में दुःखी होकर जो उसे दूर करने का प्रयत्न करता है वह अबुद्धि है—अज्ञानतावश ऐसा करता है।

अबुद्धिपूर्वा निर्जरा—नरकादिषु गतिषु कर्मफलविपाकजाऽबुद्धिपूर्वा, सा अकुशलानुबन्धा। (स. सि. ९–७; त. वा. ९, ७, ७)।
नरकादिक गतियों में कर्मों के उदय से फल को देते हुए जो कर्म झड़ते हैं उसे अबुद्धिपूर्व-निर्जरा कहते हैं।

अबुद्धिपूर्व विपाक—देखो अबुद्धिपूर्वा निर्जरा। १. नरकादिषु कर्मफलविपाकोदयोऽबुद्धिपूर्वकः। (त. भा. ९–७)। २. बुद्धिः पूर्वा यस्य—कर्म शाटयामि इत्येवंलक्षणा बुद्धिः प्रथमं यस्य विपाकस्य—स बुद्धिपूर्वः, न बुद्धिपूर्वोऽबुद्धिपूर्वः। (त. भा. सिद्ध. वृत्ति ९–७)।
२ नरकादि में 'मैं कर्म को दूर करता हूं' इस प्रकारके विचार से रहित जो कर्मफल का विपाकोदय होता है उसे अबुद्धिपूर्व विपाक कहा जाता है।

अब्रह्म—१. मैथुनमब्रह्म। (त. सू. ७–१६)। २. अहिंसादयो गुणा यस्मिन् परिपाल्यमाने बृंहन्ति वृद्धिमुपयान्ति तद् ब्रह्म। न ब्रह्म अब्रह्म इति। (स. सि. ७–१६; त. सुखबो. वृत्ति ७–१६; त. वृत्ति श्रुत. ७–१६)। ३. अहिंसादिगुणबृंहणाद् ब्रह्म। अहिंसादयो गुणा यस्मिन् परिपाल्यमाने बृंहन्ति वृद्धिमुपयन्ति तद् ब्रह्म। न ब्रह्म अब्रह्म। किं तत्? मैथुनम्। (त. वा. ७, १६, १०)। ४. स्त्री-पुंसयोर्मिथुनभावो मिथुनकर्म वा मैथुनम्, तदब्रह्म। (त. भा. ७–११)। ५. कषायादिप्रमादपरिणतस्यात्मनः कर्तुः कायादिकरणव्यापारात् × × × मोहोदये सति चेतनाचेतनयोरा- (सिद्ध.वृत्ति—चेतनस्रोतसोरा) सेवनमब्रह्म। (त.भा. हरि. व सिद्ध. वृ. ७–१)। ६. अब्रह्मान्यत्तु रत्यर्थं स्त्री-पुंसमियुनेहितम्। (ह. पु. ५८–१३२)। ७. अहिंसादिगुणबृंहणाद् ब्रह्म, तद्विपरीतमब्रह्म। (त. श्लो. ७–१६)। ८. यद्वेदरागयोगान्मैथुनमभिधीयते तदब्रह्म। (पु. सि. १०७)। ९. मैथुनं मदनोद्रेकादब्रह्म परिकीर्तितम्॥ (त. सा. ४–७७)। १०. वेदतीव्रोदयात् कर्म मैथुनं मिथुनस्य यत्। तदब्रह्मापदामेकं पदं सद्गुणलोपनम्॥ (आ. सा. ५–४७)। ११. स्त्री-पुंसव्यतिकरलक्षणमब्रह्म। (शास्त्रवा. टी. १–४)।
२ अहिंसादि गुणों के बढ़ाने वाले ब्रह्म के अभाव को—उसके न पालन करने को—अब्रह्म कहते हैं। ४ स्त्री-पुरुषों की रागपूर्ण चेष्टा (मैथुन क्रिया) को अब्रह्म कहा जाता है।

अब्रह्मचर्या—ततो (ब्रह्मतः आत्मनः) ऽन्यो वामलोचनाशरीरगतो रूपादिपर्यायोऽब्रह्म, तत्र चर्या नामाभिलापापरिणतिः। (भ. आ. विजयो. टी. ८७९)।
ब्रह्म से भिन्न जो स्त्री के शरीरगत लावण्य आदि है उसका नाम अब्रह्म है, इस अब्रह्म की अभिलाषा करना या उसमें परिणत होना, इसे अब्रह्मचर्या कहते हैं।

अब्रह्मवर्जन—१. पुव्वोइयगुणजुत्तो विसेसओ विजियमोहणिज्जो य। वज्जइ अबंभमेगं तओ उ राइं पि थिरचित्तो॥ सिंगारकहाविरओ इत्थीए समं रहम्मि णो ठाइ। चयइ य अतिप्पसंगं तहा विहूसं च उक्कोसं॥ एवं जा छम्मासा एसोऽहिगतो इहरहा दिट्ठं। जावज्जीवं पि इमं वज्जइ एयम्मि लोगम्मि॥ (पञ्चाशक १०, ४६४–६६)। २. परस्त्रीस्मरणं यत्र न कुर्यान्न च कारयेत्। अब्रह्मवर्जनं नाम स्थूलं तुर्यं च तद् व्रतम्॥ (धर्मसं. श्रा. ६–६३)।
१ पूर्व पांच प्रतिमाओं का परिपालन करते हुए स्थिरतापूर्वक रात में भी अब्रह्म का सर्वथा त्याग कर देना और शृंगारकथा को छोड़कर स्त्री के साथ एकान्त में न रहते हुए शरीर के शृंगार को त्याग देना; यह अब्रह्मवर्जन नामकी छठी प्रतिमा है। इसका परिपालन छह मास अथवा जीवन पर्यन्त भी किया जाता है। २ जिस व्रत में परस्त्री का स्मरण न स्वयं करता है और न दूसरों को कराता है उसे स्थूल अब्रह्मवर्जन (चतुर्थ अणुव्रत) कहते हैं।

अभद्र—अभद्रं हि संसारदुःखम् अनन्तम्, तत्कारणत्वान्मिथ्यादर्शनमभद्रम्। तद्योगान्मिथ्यादृष्टिरभद्रः। (युक्त्यनु. टी. ६३)।
संसार सम्बन्धी अनन्त दुःख का नाम अभद्र है। उस अभद्र का कारण होने से मिथ्यादर्शन को और उस मिथ्यादर्शन के योग से मिथ्यादृष्टि जीव को

भी अभद्र कहा जाता है।

अभयदान—१. दानान्तरायस्यात्यन्तसंक्षयात् अनन्त-प्राणि-गणाऽनुग्रहकरं क्षायिकं अभयदानम्। (स. सि. २–४; त. वा. २, ४, २)। २. दानान्तरायाक्षयादभयदानम्। (त. श्लो. २-४)। ३. भवत्यभयदाने तु जीवानां वधवर्जनम्। मनोवाक्कायैः करण-कारणाऽनुमतैरपि ॥(त्रि. श. पु. १,१, १५७); तत्पर्यायक्षयाद् दुःखोत्पादात् संक्लेशतस्त्रिधा। वधस्य वर्जनं तेष्वभयदानं तदुच्यते ॥ (त्रि. श. पु. १, १, १६६)। ४. जं सुहुम-वायराणं जीवाण ससत्तिओ सयाकालं। कीरइ रक्खणजयणा तं जाणह अभयदाणं ति ॥ (गु. गु. षट्. स्वो. वृ. २, पृ. ६)। ५. धर्मार्थ-काम-मोक्षाणां जीवितव्ये यतः स्थितिः। तद्दानतस्ततो दत्तास्ते सर्वे सन्ति देहिनाम् ॥ (अमित. श्रा. ६–८४)। ६. जं कीरइ परिरक्खा णिच्चं मरणभयभीरुजीवाणं। तं जाण अभयदाणं सिहामणिं सव्वदाणाणं ॥ (वसु. श्रा. २३८)। ७. सर्वेषां देहिनां दुःखाद्बिभ्यतामभयप्रदः। (सा. ध. २–७५)। ८. सव्वेसिं जीवाणं अभयं जो देइ मरणभीरूणं। (भावसं. दे. ४६)। ६. अभयं प्राणसंरक्षा। (भावसं. वाम. ५–६६)। १०. सर्वेभ्यो जीवराशिभ्यः स्वशक्त्या करणैस्त्रिभिः। दीयतेऽभयदानं यद्दयादानं तदुच्यते ॥ (धर्मसं. श्रा. ६–१६१)।

१ अनन्त प्राणियों के अनुग्रह करने वाले दान को—दिव्य उपदेश को—अभयदान कहते हैं। यह अभयदान दानान्तराय के सर्वथा निर्मूल हो जाने पर सयोगकेवली अवस्था में होता है। ४ सूक्ष्म और बादर जीवों की अपनी शक्ति प्रमाण रक्षा करने और उन्हें दुःख नहीं पहुंचाने को भी अभयदान कहते हैं। (यह अभयदान उक्त दानान्तराय के क्षयोपशम से होता है)।

अभयमुद्रा—दक्षिणहस्तेन ऊर्ध्वाङ्गुलिना पताकाकारेण अभयमुद्रा। (निर्वाणकलिका १–३३)।

दाहिने हाथ की अंगुलियों को ऊंचा करके पताका (ध्वज) के आकार करने को अभयमुद्रा कहते हैं।

अभव्य— १. सम्यग्दर्शनादिभावेन भविष्यतीति भव्यः, तद्विपरीतोऽभव्यः। (स. सि. २–७); सम्यग्दर्शनादिभिर्व्यक्तिर्यस्य भविष्यति स भव्यः, यस्य तु न भविष्यति सोऽभव्यः। (स. सि. ८–६)। २. भव्वा जिणेहिं भणिया इह खलु जे सिद्धिगमणजोग्गा हु। ते पुण अणाइपरिणामभावओ हुंति णायव्वा ॥ विवरीया उ अभव्वा न कयाइ भवन्नवस्स ते पारं। गच्छिसु जंति व तहा तत्तु च्चिय भावओ नवरं ॥ (श्रा. प्र. गा. ६६–६७)। ३. तद्विपरीतोऽभव्यः। यो न तथा (सम्यग्दर्शन-ज्ञान-चारित्रपरिणामेन) भविष्यत्यसावभव्य इत्युच्यते। (त. वा. २, ७, ८); सम्यक्त्वादिव्यक्तिभावाभावाभ्यां भव्याभव्यत्वमिति विकल्पः कनकेतरपाषाणवत् ॥ (त. वा. ८, ६, ६)। ४. अश्रद्दधाना ये धर्मं जिनप्रोक्तं कदाचन। अलब्धतत्त्वविज्ञाना मिथ्याज्ञानपरायणाः ॥ अनाद्यनिधना सर्वे मग्नाः संसारसागरे। अभव्यास्ते विनिर्दिष्टा अन्धपाषाणसन्निभाः ॥ (वराङ्ग. २६, ८–६)। ५. निर्वाणपुरस्कृतो भव्यः, ××× तद्विपरीतोऽभव्यः। (धव. पु. १, पृ. १५०–५१); भविया सिद्धी जेसिं जीवाणं ते भवंति भवसिद्धा। तव्विवरीदाऽभव्वा संसारादो ण सिज्झंति ॥ (धव. पु. १, पृ. ३६४ उद्धृत; गो. जी. ५५६); सिद्धिपुरक्कदा भविया णाम, तव्विवरीया अभविया णाम। (धव. पु. ७, पृ. २४२)। ६. अभव्यस्तद्विपक्षः स्यादन्धपाषाणसन्निभः। मुक्तिकारणसामग्री न तस्यास्ति कदाचन ॥ (म. पु. २४–२६)। ७. अभव्यः सिद्धिगमनायोग्यः कदाचिदपि यो न सेत्स्यति। (त. भा. सिद्ध. वृत्ति २–७)। ८. भव्याः सिद्धत्वयोग्याः स्युः विपरीतास्तथाऽपरे। (त. सा. २–६०)। ६. रयणत्तयसिद्धीए ऽणंतचउट्ठयसरूवगो भविदुं। जुग्गो जीवो भव्वो तव्विवरीओ अभव्वो दु ॥ (भा. त्रि. १४)। १०. सम्यग्दर्शनादि-पर्यायाविर्भावशक्तिर्यस्यास्ति स भव्यः, तद्विपरीतलक्षणः पुनरभव्यः। (त. सुखबो. वृ. २–७ व ८–६)। ११. अभव्याः अनादिपारिणामिकाभव्यभावयुक्ताः। (नन्दी हरि. वृ. पृ. ११४)। १२. भविष्यत्सिद्धिको भव्यः सुवर्णोपलसन्निभः ॥ अभव्यस्तु विपक्षः स्यादन्धपाषाणसन्निभः। (जम्बू. च. ३, २६–३०)।

१ भविष्य में जो सम्यग्दर्शनादि पर्याय से कभी भी परिणत नहीं हो सकते हैं वे अभव्य कहलाते हैं।

अभव्यसिद्धिकप्रायोग्य— भवसिद्धियाणमभवसिद्धियाणं च जत्थ ट्ठिदि-अणुभागकंडयादिपरिणामा सरिसा होदूण गच्छंति, सो अभवसिद्धियपाओग्गविसओ त्ति भण्णदे। (जयध.—क. पा. पृ. ८३८ का टि. १)।

जिस स्थान पर भव्य और अभव्य जीवों के स्थिति और अनुभाग बन्ध आदि कराने वाले परिणाम समान होकर प्रवृत्त होते हैं, उन्हें अभव्यसिद्धिक-प्रायोग्य परिणाम कहते हैं।

अभावप्रमाणता—प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते। साऽऽत्मनोऽपरिणामो वा विज्ञानं वाऽन्य-वस्तुनि ॥ प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते। वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ॥ (प्रमाल. ३८१–८२; प्र. क. मा. पृ. १८६ व १६५ उ.)।

प्रत्यक्षादि प्रमाणों की अनुत्पत्ति को, अथवा उक्त प्रत्यक्षादि प्रमाणरूप आत्मा के परिणत न होने को, अथवा अन्य वस्तु-विषयक विज्ञान को अभाव प्रमाण कहते हैं।

अभिगत—१. सम्मत्तम्मि अभिगओ विजाणओ वा वि अब्भुवगओ वा। (बृहत्क. भा. ७३४)। २. सम्यक्त्वे य आभिमुख्येन गतः प्रविष्टः सोऽभिगत उच्यते, यो वा जीवादिपदार्थानां 'विज्ञायकः' विशेषेण ज्ञाता सोऽभिगतः, यद्वा यः अभ्युपगतः—'यावज्जीवं मया गुरुपादमूलं न मोक्तव्यम्' इति कृताभ्युपगमः सोऽभिगतः। (बृहत्क. वृ. ७३४)।

जो सम्यक्त्व के अभिमुख हो चुका है, अथवा जीवादि पदार्थों का विशेषरूप से ज्ञाता है, अथवा जो यह प्रतिज्ञा कर चुका है कि मैं जीवन पर्यन्त गुरु के पादमूल को नहीं छोडूंगा, उसे अभिगत कहते हैं। यह उत्सारकल्पयोग्य के कुछ गुणों में से एक है।

अभिगतचारित्रार्य—देखो अधिगतचारित्रार्य।

अभिगमन—अभिगमनं सर्वबाह्यान्मण्डलादभ्यन्तर-प्रवेशनम्। (जीवाजी. मलय. वृ. ३–२, पृ. १७६; सूर्यप्र. वृ. १३–८१)।

बाहिरी मण्डल से भीतरी मण्डल में प्रवेश करने को अभिगमन कहते हैं।

अभिगमरुचि—१. सो होइ अभिगमरुई सुअणाणं जेण अत्थओ दिट्ठं। एक्कारसमंगाइं पइन्नगं दिट्ठिवाओ य। (उत्तरा. २८–२३, पृ. ३२०)। २. अर्थतः सकलसूत्रविषयिणी रुचिरभिगमरुचिः। (धर्मसं. स्वो. वृ. २, २२, पृ. ३८)।

जितने अर्थस्वरूप से ग्यारह अंग, प्रकीर्णक और दृष्टिवाद रूप सकल श्रुतज्ञान का अभ्यास किया है उसे अभिगमरुचि कहते हैं।

अभिगृहीत—१. अभिगहिदं यद्देशाभिमुख्येन गृहीतं स्वीकृतं अश्रद्धानम् अभिगृहीतमुच्यते। (भ. आ. विजयो. टी. ५६)। २. अभिगहिदं परोपदे-शादाभिमुख्येन स्वीकृतम्, परोपदेशजम् इत्यर्थः। (भ. आ. मूला. टी. ५६)। ३. अभि आभिमुख्येन तत्त्वबुद्ध्या, गृहीतं यथा भौत-भागवत-बौद्धादिभिः। (पंचसं. स्वो. वृ. ४–२)।

२ दूसरे के उपदेश से ग्रहण किये गये मिथ्यात्व को अभिगृहीत मिथ्यात्व कहते हैं।

अभिगृहीत दृष्टि—अभिमुखं गृहीता दृष्टिः, इद-मेव तत्त्वमिति बुद्धवचनं सांख्य-कणादादिवचनं वा। (त. भा. सिद्ध. वृ. ७–१८, पृ. १००)।

तत्त्व—यथार्थ वस्तुस्वरूप—यही है, इस प्रकार बुद्ध, सांख्य व कणाद आदि के वचनों पर श्रद्धा करने को अभिगृहीत दृष्टि कहते हैं।

अभिगृहीता (मिथ्यात्व) क्रिया—तत्राभिगृहीता त्रयाणां त्रिषष्टयधिकानां प्रवादिशतानाम्। (त. भा. सिद्ध. वृ. ६–६)।

तीन सौ तिरेसठ प्रवादियों के तत्त्व पर श्रद्धा रखने को अभिगृहीता क्रिया कहते हैं।

अभिगृहीता भाषा—१. जा पुण भासा अत्थं अभिगिज्झ भासिया सा अभिगहिया। (दशवै. चू. २८०, पृ. २३६)। २. अर्थमभिगृह्य योच्यते घटादि-वत्। (दशवै. नि. हरि. वृ. २७७, पृ. २१०)। ३. भाषा चाभिगृहे बोद्धव्या—अर्थमभिगृह्य या प्रोच्यते घटादिवदिति। (आव. ह. वृ. मल. हेम. टि. पृ. ८०)। ४. अभिगृहीता प्रतिनियतार्थावधारणम्। (प्रज्ञाप. मलय. वृ. ११–१६६)। ५. अभिगृहीता प्रतिनियतार्थावधारणरूपा यथेदमिदानीं कर्तव्यमिदं नेति। यद्वा ××× अभिगृहीता तु अर्थमभिगृह्य योच्यते घटादिवत्। (धर्मसं. मान. स्वो. वृ. ३-४१, पृ. १२३)। ६. अनेकेषु कार्येषु पृष्टेषु यदेकतरस्या-ववारणमिदमिदानीं कर्तव्यमिति सा अभिगृहीता ऽथवा घट इत्यादिप्रसिद्धप्रवृत्तिनिमित्तकपदाभि-धानं सेति द्रष्टव्यम्। (भाषार. टी. ७८)।

१ अर्थ को ग्रहण करके जो भाषा बोली जाती है—जैसे 'घट' आदि—वह अभिगृहीता भाषा कही जाती है। ६ अनेक कार्यों के पूछे जाने पर 'इस समय इसे करो' इस प्रकार किसी एक का निश्चय

करने वाली भाषा को अभिगृहीता भाषा कहते हैं। अथवा प्रवृत्तिनिमित्तक प्रसिद्ध पदों के कथन को अभिगृहीता भाषा कहते हैं।

अभिग्रहमतिक—अभिग्रहा द्रव्यादिषु नानारूपा नियमाः, तेषु स्व-परविषये मतिः तद्ग्रहण-ग्राहण-परिणामो यस्यासौ अभिग्रहमतिकः। (सम्बोधस. वृ. गा. १६, पृ. १७)।

द्रव्यादिकों के विषय में जो अनेक प्रकार के नियम हैं उन्हें अभिग्रह कहते हैं। उक्त नियमरूप अभिग्रहों में स्व और पर के विषय में ग्रहण करने कराने रूप जिसकी मति (परिणाम) हुआ करती है, उसे अभिग्रहमतिक कहते हैं।

अभिघातगति (क्रियाभेद)—जतुगोलक-कन्दु-दारुपिण्डादीनामभिघातगतिः। (त. वा. ५,२४,२१)।

लाख का गोला, गेंद और काष्ठपिण्ड आदि की अन्य से ताड़ित होने पर जो गति होती है उसे अभिघातगति कहते हैं।

अभिजातत्व—१. अभिजातत्वं वक्तुः प्रतिपाद्यस्य वा भूमिकानुसारिता। (समवा. अभय. वृ. सू. ३५, पृ. ६)। २. अभिजातत्वं यथाविवक्षितार्थाभिधानशीलता। (रायप. टी. पृ. १६)।

२ विवक्षित अर्थ के अनुसार कथन की शैली का नाम अभिजातत्व है। यह पैंतीस सत्यवचनातिशयों में अठारहवां है।

अभिज्ञा (प्रत्यभिज्ञा)—'तदेवेदम्' इति ज्ञानमभिज्ञा। (सिद्धिवि. टी. ४–१, पृ. २२६, पं. ५)।

'यह वही है' इस प्रकारका जो ज्ञान (प्रत्यभिज्ञान) होता है उसे अभिज्ञा कहते हैं।

अभिधान-नामनिबन्धन—जो णामसद्दो पवुत्तो संतो अप्पाणं चेव जाणावेदि तमभिहाणणिबंधणं णाम। (धवला पु. १५, पृ. २)।

जो नामशब्द प्रवृत्त होकर केवल अपना ही बोध कराता है, उसे अभिधान-नाम-निबन्धन कहते हैं। यह नामनिबन्धन के तीन भेदों में से दूसरा है।

अभिधानमल—अभिधानमलं तद्वाचकः शब्दः। (धव. पु. १, पृ. ३३)।

मल-वाचक शब्द को अभिधानमल कहते हैं।

अभिधायकविधि—तद्-(अभिधेयविधि-) ज्ञापकस्त्वभिधायकविधिः। (अष्टस. यशो. वृ. ३, ५०)।

विवक्षित अर्थ (अभिधेय) का ज्ञापन कराने वाली विधि को अभिधायक विधि कहते हैं।

अभिधेयविधि—यस्य बुद्धिः प्रवृत्तिजननीमिच्छां सूते सोऽभिधेयविधिः। (अष्टस. यशो. वृ. ३, ५०)।

जिसकी बुद्धि प्रवृत्ति की जनक इच्छा को उत्पन्न करे उसे अभिधेयविधि कहते हैं।

अभिध्या—सदा सत्त्वेष्वभिद्रोहानुध्यानम् अभिध्या। यथा—अस्मिन् मृते सुखं वसामः। (त. भा. सिद्ध. वृ. ६–१)।

प्राणियों के विषय में सदा अभिद्रोह के चिन्तवन करने को अभिध्या कहते हैं। जैसे—इसके मर जाने पर हम सुख से रह सकते हैं।

अभिनय—अभिनयः चतुर्भिराङ्गिक-वाचिक-सात्त्विकाहार्यभेदैः समुदितैरसमुदितैर्वाऽभिनेतव्यवस्तु-भावप्रकटनम्। (जम्बूद्वी. वृ. ५-१२१, पृ. ४१४)।

कायिक, वाचनिक, सात्त्विक और आहार्य इन चार भेदों के द्वारा, चाहे वे समुदाय रूप में हों या पृथक् पृथक्, अभिनेतव्य (जिस वृत्तान्त को नकल करके प्रगट किया जाय) वस्तु के भाव को प्रगट करना, इसका नाम अभिनय है।

अभिनवानुज्ञा—अभिनवानुज्ञा नाम यदा किलान्यो देवेन्द्रः समुत्पद्यते तदा तत्कालवर्तिभिः साधुभिर्यदसावभिनवोत्पन्नतयाऽवग्रहमनुज्ञाप्यते सा तेषां साधूनामभिनवानुज्ञा। (बृहत्क. वृ. ६७०)।

जब कोई नया देवेन्द्र उत्पन्न होता है तब वह तत्कालवर्ती साधुओं के द्वारा अवग्रह (उपाश्रय) के लिये अनुज्ञापित किया जाता है, यह उन साधुओं की अनुज्ञा अभिनवानुज्ञा कही जाती है।

अभिनिबोध— १. अभिनिबोधनमभिनिबोधः। (स. सि. १–१३)। २. आभिमुख्येन नियतं बोधनमभिनिबोधः। (त. वा. १, १३, ५)। ३. अत्थाभिमुहो णियतो बोधः (अभिनिबोधः), स एव स्वाधिकप्रत्ययोपादानादभिनिबोधकम्। (नन्दी. चू. पृ. १०)। ४. अत्थाभिमुहो नियओ बोहो जो सो मओ अभिनिबोहो। (विशेषा. भा. ८०, पृ. ३७)। ५. अर्थाऽभिमुखो नियतो बोधोऽभिनिबोधः। (आव. हरि. वृ. १, पृ. ७)। ६. अहिमुह-णियमिदट्ठे बु जो बोधो सो अहिणिबोधो। (धव. पु. ६, पृ. १५-१६)। ७. यत्तदावरणक्षयोपशमादिन्द्रियानिन्द्रियावलम्बनाच्च

मूर्तामूर्तद्रव्यं विकलं विशेषेणावबुध्यते तदभिनिवोधिकज्ञानम् । (पंचा. का. अमृत. वृ. ४१)। ८. अहिमुहणियमियवोहणमाभिणिवोहियमणिदिइंदियजं । (गो. जी. ३०६)। ९. स्थूलवाग्गोचरानन्तरार्थस्य स्थायिनश्चिरम्। प्रत्यक्षं नियतस्यैतद् वोधादभिनिवोधनम् ॥ श्रा. सा. ४–३२)। १०. अभिनिवोधो हेतोरन्यथानुपपत्तिनियमनिश्चयः । (लघी. अभय. वृत्ति ४–४, पृ. ४५)। ११. अभिमुखेषु नियमितेष्वर्थेषु यो बोधः स अभिनिवोधः, अभिनिवोध एवाभिनिवोधिकम् । (मूला. वृ. १२–१८७)। १२. अर्थाभिमुखोऽविपर्ययरूपत्वान्नियतो ऽसंशयरूपत्वाद् वोधः संवेदनमभिनिवोधः। स एव स्वार्थिकप्रत्ययोपादानादाभिनिवोधिकम् । (स्थानांग सू. ४६३, पृ. ३३०)। १३. अर्थाभिमुखो नियतः प्रतिनियतस्वरूपो वोधो बोधविशेषो ऽभिनिवोधः ××× । अथवा अभिनिवुध्यतेऽनेनाऽस्मात् अस्मिन् वेति अभिनिवोधः तदावरणकर्मक्षयोपशमः। (आव. मलय. वृ. १, पृ. १२; नन्दी. मलय. वृ. सू. १, पृ. ६५)। १४. अभिमुखो वस्तुयोग्यदेशावस्थानापेक्षी, नियत इन्द्रियाण्याश्रित्य स्व-स्वविषयापेक्षी वोधः अभिनिवोधः। (अनुयो. मल. हेम. वृ. १, पृ. २)। १५. अर्थाभिमुखो नियतो वोधोऽभिनिवोधः, ××× अभिनिवुध्यते वा अनेनास्मात् अस्मिन् वा अभिनिवोधः तदावरणकर्मक्षयोपशमः। (धर्मसं. मलय. वृ. ८१६, पृ. २९१)। १६. तत्र चायमाभिनिवोधिकज्ञानशब्दार्थः—अभि इत्याभिमुख्ये, नि इति नैयत्ये, ततश्च अभिमुखः वस्तुयोग्यदेशावस्थानापेक्षी, नियत इन्द्रियमनः समाश्रित्य स्व-स्वविषयापेक्षी वोधनं वोधो ऽभिनिवोधः। (कर्मवि. दे. स्वो. वृ. गा. ४, पृ. ६)। १७. लिङ्गाभिमुखस्य नियतस्य लिङ्गिनो वोधनं परिज्ञानमभिनिवोधः स्वार्थानुमानं भण्यते। (त. सुखवो. १–१३)। १८. धूमादिदर्शनादग्न्यादिप्रतीतिरनुमानमभिनिवोधः। (अन. ध. स्वो. टी. ३–४; त. वृ. श्रुत. १–१३)।

२ अर्थाभिमुख होकर जो नियत विषय का ज्ञान होता है वह अभिनिवोध कहलाता है। १६ वस्तु के योग्य देश में अवस्थान की अपेक्षा रख कर जो इन्द्रिय और मन के आश्रय से अपने नियत विषय का—जैसे चक्षु से रूप का—वोध होता है, उसे अभिनिवोध कहते हैं।

अभिनिवेश—अभिनिवेशश्च नीतिपथमनागतस्यापि पराभिभवपरिणामेन कार्यस्यारम्भः। स च नीचानां भवति। यदाह—दर्पः श्रमयति नीचान् निष्फल-नयविगुणदुष्कराररम्भैः। श्रोतोविलोमतरणव्यसनिभिरायास्यते मत्स्यैः॥ (योगशा. स्वो. वि. १–५३, पृ. १५६)।

नीतिमार्ग पर न चलते हुए भी दूसरे के अभिभव (तिरस्कार) के विचार से कार्य के प्रारम्भ करने को अभिनिवेश कहते हैं। यह नीच जनों के ही होता है। सो ही कहा है—नीच जन जो अभिमान के वशीभूत होकर निरर्थक व अनैतिक दुष्कर कार्यों को किया करते हैं उनका वह परिश्रम उन मछलियों के समान है जिनकी प्रवाह के विरुद्ध तैरने की आदत है।

अभिन्नदशपूर्वी—१. रोहिणिपहुदीण महाविज्जाणं देवदाओ पंचसया। अंगुट्ठपसेणाइं खुद्दयविज्जाण सत्तसया॥ एत्तूण पेसणाइं मग्गंते दसमपुव्वपढणम्मि। णेच्छंति संजमत्ता ताओ जे ते अभिण्णदसपुव्वी। (ति. प. ४, ९९८–९९)। २. एत्थ दसपुव्विणो भिण्णाभिण्णभेएण दुविहा होंति। तत्थ एक्कारसंगाणि पढिदूण पुणो ××× रोहिणिआदिपंचसयमहाविज्जाओ सत्तसयदहरविज्जाहि अणुगयाओ किं भयवं आणवेदि त्ति ढुक्कंति। एवं ढुक्कमाणाणं सव्वविज्जाणं जो लोभं गच्छदि सो भिण्णदसपुव्वी, जो पुण ण तासु लोभं करेदि कम्मक्खयत्थी सो अभिण्णदसपुव्वी णाम। (धव. पु. ९, पृ. ६८)। ३. दशपूर्वाण्यधीयमानस्य विद्यानुप्रवादस्था क्षुल्लकविद्या महाविद्याश्चाङ्गुष्ठप्रसेनाद्याः प्रज्ञप्त्यादयश्च तैं [ताभि] रागत्य रूपं प्रदर्श्य, सामर्थ्यं स्वकर्माऽऽभाष्य पुरः स्थित्वा आज्ञाप्यतां किमस्माभिः कर्तव्यमिति तिष्ठन्ति। तद्वचः श्रुत्वा न भवन्तीभिरस्माकं साध्यमस्तीति ये वदन्त्यविचलितचित्तास्ते अभिन्नदशपूर्विणः। (भ. आ. विजयो. टी. ३४)। ४. दशपूर्वाण्युत्पादपूर्वादिविद्यानुवादान्तान्येषां सन्तीति दशपूर्विणः। अभिन्ना विद्याभिरप्रच्यावितचारित्रास्ते च ते दशपूर्विणश्च, विद्यानुवादपाठे स्वयमागतद्वादशशतविद्याभिरचलितचारित्राः। (भ. आ. मूला. टीका ३४)।

१. रोहिणी आदि महाविद्याओं के पांच सौ तथा अंगुष्ठप्रसेनादि क्षुद्र विद्याओं के सात सौ देवता

आकर विद्यानुवाद नामक दसवें पूर्व के पढ़ते समय आज्ञा देने के लिए प्रार्थना करते हैं, फिर भी जो उन्हें स्वीकार नहीं करते ऐसे साधुओं को अभिन्न-दशपूर्वी कहते हैं।

अभिन्नाक्षरदशपूर्व — पुलाक-बकुश-प्रतिसेवनाकु-शीलेपु उत्कर्षेणाभिन्नाक्षरदशपूर्वाणि श्रुतं भवति। कोऽर्थः ? अभिन्नाक्षराणि एकेनाप्यक्षरेण अन्यूनानि दशपूर्वाणि भवन्तीत्यर्थः। (त. वृत्ति श्रुत. ९-४७)।

जो उत्पादपूर्वादि दस पूर्व एक अक्षर से भी कम न हों, ऐसे परिपूर्ण दस पूर्वों को अभिन्नाक्षरदशपूर्व कहा जाता है।

अभिन्नाचार—१. जात्योपजीवनादि परिहरत् अभिन्नाचारः। (व्यव. भा. मलय. वृ. ३–१६४, पृ. ३५)। २. न भिन्नो न केनचिदप्यतिचारविशे-पेण खण्डित आचारो ज्ञान-चारित्रादिको यस्यासा-वभिन्नाचारः। (अभि. रा १, पृ. ७२५)।

२ जिसका आचार किसी अतिचारविशेष के द्वारा खण्डित नहीं होता है उसे अभिन्नाचार कहा जाता है।

अभिमान— १. मानकषायादुत्पन्नोऽहङ्कारोऽभि-मानः। (स. सि. ४–२१)। २. मानकषायोदया-पादितोऽभिमानः। (त. वा. ४, २१, ४; त. सुख-बो. वृ. ४–२१; त. वृत्ति श्रुत. ४–२१)।

१ मान कषाय के उदय से जो अन्तःकरण में अहं-कारभाव उदित होता है उसका नाम अभिमान है।

अभिमुखार्थ—को अभिमुहत्थो ? इंदिय-णोइंदि-याणं गहणपाओग्गो। (धव. पु. १३, पृ. २०९)।

अभिमुख और नियमित अर्थ के ग्राहक ज्ञान का नाम आभिनिबोधिक है। इस लक्षण में प्रविष्ट 'अभिमुख अर्थ' का स्वरूप इस प्रकार निर्दिष्ट किया गया है—जो पदार्थ इन्द्रिय और मन के द्वारा ग्रहण के योग्य होता है उसे प्रकृत में अभि-मुखार्थ जानना चाहिए।

अभिरूढ—१. अभिरूढस्तु पर्यायैः × × × ॥ (लघी. ५–४४)। २. × × × अभिरूढोऽस्तु नयोऽभिरूढिविषयः पर्यायशब्दार्थभित्। (सिद्धिवि. ११–३१, पृ. ७३६)।

जो पर्यायवाची शब्दों की अपेक्षा अर्थ में भेद करे उसे अभिरूढ (समभिरूढ) कहते हैं। जैसे—एक ही इन्द्र व्यक्ति को इन्दन क्रिया की अपेक्षा इन्द्र व शकन क्रिया से शक्र भी कहा जाता है।

अभिलाप—अभिलप्यते येन यो वा असौ अभिलापः शब्दसामान्यम् अर्थसामान्यम् च। (सिद्धिवि. टी. १–८, पृ. ३८, पं. ५–६)।

जिस (शब्द) के द्वारा कहा जाता है वह शब्द तथा जो कुछ (अर्थ) कहा जाता है वह भी अभिलाप कहलाता है (बौद्धमतानुसार)।

अभिवर्द्धितमास—१. अभिवड्ढि इक्कतीसा चउ-वीसं भागसयं च तिगहीणं। भावे मूलाइजुओ पगयं पुण कम्ममासेणं॥ (बृहत्क. ११३०)। २. अभि-वड्ढिओ य मासो एकत्तीसं भवे अहोरत्ता। भाग-सयमेगवीसं चउवीस-सएण छेएणं॥ (ज्योतिष्क. २–३९)। ३. एकत्रिंशद् दिनानि एकविंशत्युत्तर-शतं चतुर्विंशत्युत्तरशतभागानाम् (३१$\frac{१२१}{१२४}$) अभिव-र्द्धितमासः। (त. भा. सिद्ध. वृ. ४–१५)। ४. अभि-वर्द्धितो नाम मुख्यतः त्रयोदश-चन्द्रमासप्रमाणः संव-त्सरः, परं तद्द्वादशभागप्रमाणो मासोऽप्यवयवे समु-दयोपचाराद् अभिवर्द्धितः। स चैकत्रिंशदहोरात्राणि चतुर्विंशत्युत्तरशतभागीकृतस्य चाहोरात्रस्य त्रिकहीन चतुर्विंशं शतं भागानां भवति। (बृहत्क. वृ. गा. ११३०)। ५. तथा हि—अभिवर्धितमासस्य दिन-परिमाणमेकत्रिंशदहोरात्रा एकविंशत्युत्तरं शतं भागानाम् अहोरात्राश्च × × ×। (व्यव. भा. मलय. वृ. २–१८, पृ. ७)।

२ इकतीस दिन-रात और एक दिन के एक सौ चौवीस भागों में से एक सौ इक्कीस भाग प्रमाण (३१$\frac{१२१}{१२४}$) कालको अभिवर्धित मास कहते हैं।

अभिवर्द्धित संवत्सर—१. अभिवर्धितो नाम मुख्यतः त्रयोदश-चन्द्रमासप्रमाणः संवत्सरः। (बृहत्क. वृ. ११३०)। २. तेरस य चंदमासा एसो अभिव-ड्ढिओ उ नायव्वो। (ज्योतिष्क. २–३६)। ३. आइच्च-तेय-तविया खण-लव-दिवसा 'उऊ' परिण-मंति। पूरेइ णिण्णथलए तमाहु अभिवड्ढियं जाण (णाम)। (सूर्यप्र. ५८)। ४. अभिवर्धितसंवत्सरे च एकैकस्मिन् अहोरात्राणां त्रीणि शतानि त्र्यशीत्यधि-कानि चतुश्चत्वारिंशच्च द्वाषष्टिभागा अहोरात्रस्य। (सूर्यप्र. वृ. १०, २०, ५६); तिण्णि अहोरत्त-सया तेसीई चेव होइ अभिवड्ढो। चोयालीसं भागा बावट्ठिकएण छेएण॥ (सूर्यप्र. वृ. १०, २०, ५७ उ.); [illegible]

चतुश्चत्वारिंशच्च द्वाषष्ठिभागा अहोरात्रस्य एतावदहोरात्रप्रमाणोऽभिवर्द्धितसंवत्सरः। × × × तथा यस्मिन् संवत्सरेऽधिकमाससम्भवेन त्रयोदश चन्द्रमासा भवन्ति सोऽभिवर्धितसंवत्सरः। (सूर्यप्र. वृ. सू. ५–७; पृ. १५४); यस्मिन् संवत्सरे क्षण-लव-दिवसा ऋतवः आदित्यतेजसा कृत्वाऽतीव तप्ता परिणमन्ति, यश्च सर्वाण्यपि निम्नस्थानानि स्थलानि च जलेन पूरयति तं संवत्सरं जानीहि, यथा तं संवत्सरमभिवर्धितमाहुः पूर्वर्षयः इति। (सूर्यप्र. वृ. ५८, पृ. १७३)। ५. एवंविधेन (अभिवर्द्धितेन) मासेन द्वादशमासप्रमाणोऽभिवर्धितसंवत्सरः। स चायं त्रीणि शतान्यह्नां त्र्यशीत्यधिकानि चतुश्चत्वारिंशच्च द्विषष्टिभागाः (३८३$\frac{४४}{६२}$)। (त. भा. सिद्ध. वृ. ४–१५)।

२ तेरह चान्द्रमास प्रमाण अभिवर्धित संवत्सर होता है।

अभिषव—१. द्रवो वृष्यो वाऽभिषवः। (स. सि. ७–३५)। २ द्रवो वृष्यं वाऽभिषवः द्रवः। सौवीरादिकः वृष्यं वा द्रव्यमभिषवः इत्यभिधीयते। (त. वा. ७, ३५, ५)। ३. द्रवो वृष्यं चाभिषवः। (त. श्लो. ७–३५)। ४. अभिषवाहार इति—सुरा-सौवीरक-मांसप्रकार-पर्णक्याद्यनेकद्रव्यसंघातनिष्पन्नः सुरा-सीधु-मधुवारादिरभिवृष्यवृक्षद्रव्योपयोगो वा। (त. भा. सिद्ध. वृ. ७–३०)। ५. सौवीरादिद्रवो वा वृष्यं वाऽभिषवाहारः। (चा. सा. पृ. १३)। ६. अभिषवोऽनेकद्रव्यसन्धाननिष्पन्नः। सुरा-सौवीरकादिः मांसप्रकारखण्डादिर्वा सुरामध्वाद्यभिष्यन्दिद्रव्योपयोगो वा। (योगशा. स्वो. विव. ३–९८, पृ. ५६५)। ७. अभिषवः सुरा-सौवीरकादिर्मांसप्रकारखण्डादिर्वा। सुरामध्वाद्यभिष्यन्दिवृष्यद्रव्योपयोगो वा। (धर्मसं. मान. स्वो. वृ. २–५०, पृ. १०९)। ८. द्रवो वृष्यश्चोभयोऽभिषवः। (त. वृत्ति श्रुत. ७–३५)।

२ द्रव (कांजी) अथवा वृष्य (गरिष्ठ) द्रव्य को अभिषव कहा जाता है। ४ मद्य, सौवीरक (कांजी), विशिष्ट अवस्थागत मांस और पर्णकी आदि अनेक द्रव्यों के समुदाय से निर्मित गरिष्ठ खाद्य को अभिषव कहते हैं।

अभिष्वङ्ग—१. अभिष्वङ्गो बाह्याभ्यन्तरोपकरणविषयसुखे राग आसक्तिः। (त. भा. सिद्ध. वृ. ८–१०)। २. 'पेज्जे' त्ति प्रियस्य भावः कर्म वा प्रेम, तच्चानभिव्यक्तमाया-लोभलक्षणभेदस्वभावमभिष्वङ्गमात्रमिति। (स्थानांग अभय. वृ. १–४८, पृ. २४)। ३. भावो नाम जीवस्य परिणामः, सोऽभिष्वङ्गोऽभिधीयते। × × × येन धन-धान्य-कलत्रादिगार्द्ध्यपरिणामेनास्य जन्तोरन्ते—आयत्यां नारकादिभवदुःखलक्षणं भयमुत्पद्यते स तथाभूतः परिणामोऽभिष्वङ्गः, न सर्वोऽपीति भावार्थः। (आव. हरि. वृ. मल. हेम. टि. पृ. १०६–७)।

१ बाह्य और अभ्यन्तर उपकरण युक्त विषय-सुख में जो राग या आसक्ति होती है उसे अभिष्वंग कहते हैं। यह लोभ का पर्याय नाम है।

अभिष्वष्कण—२. अभिष्वष्कणं तस्यैव विवक्षितकालस्य संवर्द्धनम्, परतः करणमित्यर्थः। (बृहत्क. वृ. १६७५)। २. अभिष्वष्कणं पश्चादपसरणम्। (आव. हरि. वृ. मल. हेम. टि. पृ. ८७)।

१ वसतिके विवक्षित विध्वंसादि काल को बढ़ाना—आगे करना, इसका नाम अभिष्वष्कण बादर प्राभृतिका है।

अभिहृत—१. एकदेशात् सर्वस्माद्वाऽऽगतमोदनादिकं अभिघटम् [अभिहृतम्]। (मूला. वृ. ६–१९)। २. स्यादायातमभिहृतं ग्रामवारगृहान्तरात्। (आचा. सा. ८–३२)। ३. त्रीन् सप्त वा गृहान् पङ्क्त्या स्थितान् मुक्त्वाऽन्यतोऽखिलात्। देशादयोग्यमायातमन्नाद्यभिहृतं यतेः। (अन. ध. ५-१६)। ४. ग्रामात् पाटकात् गृहान्तराद्यदायातं तदभिहृतम्। (भा. प्रा. टी. ९९)।

३ एक पंक्ति में स्थित तीन या सात घरों को छोड़कर उससे बाहिर के प्रदेश से आये हुए अयोग्य आहारके लेने पर अभिहृत (अभिघट) नामका उद्गम-दोष होता है।

अभीक्ष्णज्ञानोपयोग—१. जीवादिपदार्थस्वतत्त्वविषये सम्यग्ज्ञाने नित्यं युक्तताऽभीक्ष्णज्ञानोपयोगः। (स. सि. ६–२४)। २. ज्ञानभावनायां नित्ययुक्तता ज्ञानोपयोगः। मत्यादिविकल्पं ज्ञानं जीवादिपदार्थस्वतत्त्वविषयं प्रत्यक्ष-परोक्षलक्षणम् अज्ञाननिवृत्त्यव्यवहितफलं हिताहितानुभयप्राप्तिपरिहारोपेक्षाव्यवहितफलं यत्तस्य भावनायां नित्ययुक्तता ज्ञानोपयोगः। (त. वा. ६, २४, ४; चा. सा. पृ. २५; त. वृत्ति श्रुत. ६–२४; त. सुखबो. ६–२४)। ३. अभिक्ष्ण-

णाणोवजोगजुत्तदाए—अभिक्खणं णाम बहुवारमिदि भणिदं होदि। णाणोवजोगो त्ति भावसुदं दव्वसुदं वाऽवेक्खदे। तेसु मुहुम्मुहुं जुत्तदाए तित्थयरणामकम्मं बज्झइ, दंसणविसुज्झदादीहि विणा एदिस्से अणुववत्तीदो। (धव. पु. ८, पृ. ९१)। ४. संज्ञानभावनायां तु या नित्यमुपयुक्तता। ज्ञानोपयोग एवासौ तत्राभीक्ष्णं प्रशंसितः॥ (त. श्लो. वा. ६, २४, ६)। ५. अज्ञाननिवृत्तिफले प्रत्यक्ष-परोक्षलक्षणज्ञाने। नित्यमभियुक्ततोक्तस्तज्ज्ञैर्ज्ञानोपयोगस्तु॥ (ह. पु. ३४-१३५)। ६. अभीक्ष्णं ज्ञानोपयोग इति—अभीक्ष्णं मुहुर्मुहुः प्रतिक्षणं ज्ञानं द्वादशाङ्गं प्रवचनं प्रदीपाङ्कुरप्रासादप्लवस्थानीयं, तत्रोपयोगः प्रणिधानम्। सूत्रार्थोभयविषयं ह्यात्मनो व्यापारः, तत्परिणामितेति यावत्। (त. भा. सिद्ध. वृ. ६-२३)।

१ जीवादि पदार्थों के स्वकीय स्वरूप के जानने रूप सम्यग्ज्ञान में नित्य उपयुक्त रहने को अभीक्ष्ण-ज्ञानोपयोग कहते हैं।

अभेदप्राधान्य—अभेदप्राधान्यं द्रव्यार्थिकनयगृहीत-सत्ताद्यभिन्नानन्तधर्मात्मकवस्तुशक्तिकस्य सदादिपदस्य कालाद्यभेदविशेषप्रतिसन्धानेन पर्यायार्थिकनय-पर्यालोचनप्रादुर्भवच्छक्यार्थबाधप्रतिरोधः। (शास्त्रवा. यशो. टी. ७-२३, पृ. २५४)।

द्रव्यार्थिक नयके द्वारा ग्रहण की गई सत्ता आदि से अभिन्न अनन्त धर्मस्वरूप वस्तु के ग्रहण करने की शक्तिवाले सत्-असत् आदि पदों की, काल आदि के अभेद को लक्ष्य करके पर्यायार्थिक नयसे उत्पन्न होनेवाली शक्ति से अनन्तधर्मात्मक वस्तु के ग्रहण-रूप अर्थ में, बाधा को दूर करना; इसका नाम अभेद-प्राधान्य है।

अभेदोपचार—अभेदोपचारश्च पर्यायार्थिकनयगृहीतान्यापोहपर्यवसितसत्तादिमात्रशक्तिकस्य तात्पर्यानुपपत्त्या सदादिपदस्योक्तार्थे लक्षणा। (शास्त्रवा. यशो. टी. ७-२३, पृ. २५४)।

पर्यायार्थिक नयसे ग्रहण किये गये तथा अन्यापोह में जिनका पर्यवसान है ऐसे, केवल सत्-असत् आदि धर्मों के ग्रहण करने की शक्तिवाले 'सत्' आदि पदों की तात्पर्य के घटित न हो सकने से अनन्त-धर्मात्मक वस्तु के ग्रहण में जो लक्षणा की जाती है, इसका नाम अभेदोपचार है।

अभोज्यगृहप्रवेशन— × × × चाण्डालादिनिकेतने। प्रवेशो भ्रमतो भिक्षोरभोज्यगृहवेशनम्॥ (अन. ध. ५-५३)।

भिक्षार्थ भ्रमण करते हुए भिक्षुका चाण्डालादि अस्पृश्य शूद्र के घर में प्रवेश करने पर अभोज्य-गृहप्रवेशन नामक अन्तराय होता है।

अभ्यन्तर अवधि—यत् सोऽवधिः सर्वासु दिक्षु स्वद्योत्यं क्षेत्रं प्रकाशयति अवधिमता च सह सातत्येन ततः स्वद्योत्यं क्षेत्रं सम्बद्धः सोऽभ्यन्तरावधिः। (प्रज्ञाप. मलय. वृ. ३१७, पृ ५३६)।

जो अवधिज्ञान सर्व दिशाओं में अपने विषयभूत क्षेत्र को प्रकाशित करे और अपने स्वामी के साथ सदा अपने विषयभूत क्षेत्र में सम्बद्ध रहे उसे अभ्यन्तर-अवधि कहते हैं।

अभ्यन्तरा निर्वृत्ति—देखो आभ्यन्तरनिर्वृत्ति। १. उत्सेधाङ्गुलासंख्येयभागप्रमितानां विशुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानेनावस्थितानां वृत्तिरभ्यन्तरा निर्वृत्तिः। (स. सि. २-१७; त. वा. २, १७, ३; मूला. १-१६)। २. विशुद्धात्मप्रदेशवृत्तिराभ्यन्तरा। (त. श्लो. २-१७)। ३. नेत्रादीन्द्रियसंस्थानावस्थितानां हि वर्तनम्। विशुद्धात्मप्रदेशानां तत्र निर्वृत्तिरान्तरा॥ (त. सा. २-४१)। ४. अभ्यन्तरा चक्षुरादीन्द्रियज्ञानावरणकर्मक्षयोपशमविशिष्टोत्सेधाङ्गुलासंख्येयभागप्रमितात्मप्रदेशसंश्लिष्टसूक्ष्मपुद्गलसंस्थानरूपा। (त. सुखबो. वृ. २-१७)। ५. उत्सेधासंख्येयभागप्रमितानां शुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानेनावस्थिता या वृत्तिरभ्यन्तरा निर्वृत्तिः। (आचारा. वृत्ति २, १, ६४ पृ. ८४)। ६. बाह्यनिर्वृत्तीन्द्रियस्य खड्गोपमितस्य या। धारोपमान्तर्निर्वृत्तिरच्छपुद्गलात्मिका। (लोकप्र. ३-७५, पृ. ३६)। ७. × × × तद्गतस्वाभाविका या बाह्यनिर्वृत्तेः खड्गधारासमाना स्वच्छतरपुद्गलसमूहात्मिका अभ्यन्तरा निर्वृत्तिः × × ×। (नन्दी. मलय. वृ. सू. ३, पृ. ७५)। ८. उत्सेधाङ्गुलासंख्येयभागप्रमितानां शुद्धात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानेनावस्थितानां वृत्तिरभ्यन्तरा निर्वृत्तिः। (मूला. वृ. १-१६)। ९. मसूरिकाद्याकारसंस्थानापन्नाः उत्सेधाङ्गुलासंख्येयभागप्रमिताः शुद्धात्मप्रदेशा... [illegible]

चक्षुरादीन्द्रियसंस्थानेनाऽवस्थितानामात्मप्रदेशानां वृत्तिरभ्यन्तरनिर्वृत्तिः । (त. वृत्ति श्रुत. २–१७)।

१ उत्सेधाङ्गुल के असंख्यातवें भाग प्रमाण शुद्ध आत्मप्रदेशों की प्रतिनियत चक्षु आदि इन्द्रियों के आकाररूप से रचना होने को अभ्यन्तर निर्वृत्ति कहते हैं।

अभ्यन्तरोपधिव्युत्सर्ग—१. × × × अभ्यन्तरोपधित्यागश्चेति । × × × क्रोधादिरात्मभावोऽभ्यन्तरोपधिः, कायत्यागश्च नियतकालो यावज्जीवं वाऽभ्यन्तरोपधित्याग इत्युच्यते । (स. सि. ९–२६)। २. अभ्यन्तरः शरीरस्य कषायाणां चेति । (त. भा. ९–२६)। ३. क्रोधादिभावनिवृत्तिरभ्यन्तरोपधिव्युत्सर्गः । क्रोध-मान-माया-लोभ-मिथ्यात्व-हास्य-रत्यरति-शोक-भयादिदोषनिवृत्तिरभ्यन्तरोपधिव्युत्सर्ग इति निश्चीयते । कायत्यागश्च नियतकालो यावज्जीवं वा । कायत्यागश्चाभ्यन्तरोपधिव्युत्सर्ग इत्युच्यते । स पुनर्द्विविधः—नियतकालो यावज्जीवं चेति । (त. वा. ९, २६, ४–५)। ४. अभ्यन्तरः शरीरस्य कषायाणां चेति· शरीरस्य पर्यन्तकाले विज्ञायाकिंचित्करत्वं शरीरकं परित्यजति—उज्झति । यथोक्तम्—'जं पि य इमं सरीरं इट्ठं कंतं' इत्यादि । क्रोधादयः कषायाः संसारपरिभ्रमणहेतवः, तेषां व्युत्सर्गः परित्यागो मनोवाक्कायैः कृत-कारितानुमतिभिश्चेति । (त. भा. सिद्ध. वृ. ९–२६)।

३ क्रोध, मान, माया, लोभ, मिथ्यात्व, हास्य, रति, अरति, शोक व भय आदि दोषों के त्याग को तथा नियत काल तक या यावज्जीवन शरीर के त्याग को भी अभ्यन्तरोपधिव्युत्सर्ग कहते हैं।

अभ्याख्यान—१. हिंसादेः कर्मणः कर्तुर्विरतस्य विरताविरतस्य वा ऽयमस्य कर्तेत्यभिधानमभ्याख्यानम् । (त. वा. १, २०, १२, पृ. ७५)। २. अभ्याख्यानं तद्गुणशून्यत्वे ऽपि तद्गुणाभ्युपगमलक्षणम् । (श्रा. प्र. टी. १२३)। ३. अयमस्य कर्तेति अनिष्टकथनमभ्याख्यानम् । (धव. पु. ५, पृ. ११६)। ४. क्रोधमानमायालोभादिभिः परेष्वविद्यमानदोषोद्भावनमभ्याख्यानम् । (धव. पु. १२, पृ. २८५)। ५. हिंसाद्यकर्तुः कर्तुर्वा कर्तव्यमिति भाषणम् । अभ्याख्यानम् × × ×॥ (ह. पु. १०–९२)। ६. अभ्याख्यान प्रकटमसद्दोषारोपणम् । (स्थानांग अभय. वृ. १–४९, पृ. २४)। ७. अभ्याख्यानमसद्दोषारोपणम् । (प्रज्ञापना मलय. वृ. २२–२८०, पृ. ४३८)। ८. इणमणेण कियमिदि अणट्ठकहणमब्भक्खाणं णाम। (अङ्गपण्णत्ती पृ. २९२)। ९. अभ्याख्यानं मिथ्याकलङ्कदानम् । (कल्पसू. वृ. ११८)।

१ हिंसादि कार्य का करने वाला, चाहे वह विरत हो चाहे विरताविरत हो, 'यह उसका कर्ता है' इस प्रकार उसके सम्बन्ध में कहना; इसे अभ्याख्यान कहते हैं। २ अथवा जिसमें जो गुण नहीं है, उसमें उस गुणका सद्भाव बतलाने को अभ्याख्यान कहते हैं।

अभ्यास—यावत्प्रमाणो यो राशिर्भवेत् स्वरूपसंख्यया । स न्यस्य तावतो वारान् गुणितोऽभ्यास उच्यते ॥ (लोकप्र. १–१६५)।

विवक्षित राशि स्वरूप व संख्या से जितनी हो, उसे स्थापित कर उतने बार गुणा करने को अभ्यास कहते हैं। जैसे—५ × ५ × ५ × ५ × ५=३१२५।

अभ्यासवर्ती—१. गुरुणो य लाभकंखी अब्भासे वट्टते सया । साहू आगार-इंगिएहिं संदिट्ठो वत्ति काऊणं ॥ (व्यव. भा. १–७९, पृ. ३१)। २. गुरोरभ्यासे समीपे वर्तते इति शीलोऽभ्यासवर्ती गुरुपादपीठिकाप्रत्यासन्नवर्तीति भावः । (व्यव. भा. मलय. वृ. १–७८, पृ. ३१)।

जो साधु ज्ञान, दर्शन और संयम के लाभ की इच्छा से सदा गुरु के समीप रहता है तथा नेत्र व मुखादि के आकार और शरीर की चेष्टा से यदि कुछ संदेश दिया जाता है तो उसके करने में उद्यत रहता है, ऐसे साधु को अभ्यासवर्ती कहा जाता है। यह औपचारिक विनय के ७ भेदों में प्रथम है।

अभ्यासासन—देखो अभ्यासवर्ती । अभ्यासासनम् उपचरणीयस्यान्तिकेऽवस्थानम् । (समवा. अभय. वृ. ९१, पृ. ८९)।

उपचरणीय—आदर-सत्कार करने के योग्य गुरु आदि के—समीप में स्थित रहने को अभ्यासासन कहते हैं।

अभ्याहृत (आहारदोषभेद)—१. स्वग्रामादेः साधुनिमित्तमभिमुखमानीतमभ्याहृतम् । (दशवै. हरि. वृ. ३–२, पृ. ११६; धर्मसं. मान. स्वो. वृ. ३-२२, पृ. ४०)। २. गृह-ग्रामादेः साध्वर्थं यदानीतं तदभ्याहृतम् । (योगशा. स्वो. विव. १–३८, पृ. १३४)। ३. स्व-परग्रामात् साधुनिमित्तं य आनीयते सोऽभ्या-

हृतपिण्डः। (श्राव. ह. वृ. मल. हेम. टि. पृ. ८१)।
१ स्वकीय ग्राम आदि से साधु के निमित्त लाये हुये आहार को अभ्याहृत कहते हैं।

अभ्याहृत (वसतिकादोषभेद)—कुडयाद्यर्थं कुटीरक-कटादिकं स्वार्थं निष्पन्नमेव यत्संयतार्थमानीतं तदब्भाहिडम्। (भ. आ. विजयो. व मूला. टी. २३०; कार्तिके. टी. ४४६, पृ. ३३७-३८)।
अपनी कुटी (झोंपड़ी) के बनाने के लिए लाए गये कुटीरक और चटाई आदि यदि साधु के लिये दी जाती है तो वह उसके लिये अभ्याहृत नामका वसतिकादोष होता है।

अभ्युत्थान—१. अभ्युत्थानं गुर्वादीनां प्रवेश-निष्क्रमणयोः। (भ. आ. विजयो. टी. ११९)। २. गुर्वादीनां प्रवेश-निष्क्रमणयोः सम्मुखमुत्थानं अभ्युत्थानम्। (भ. आ. मूला. टी. ११९)। ३. अभ्युत्थानमासनत्यागः। (समवा. अभय. वृ. ९१, पृ. ९५)।
१ गुरु आदि के आने-जाने पर उनके सम्मान प्रदर्शनार्थ अपना आसन छोड़कर खड़े हो जाने को अभ्युत्थान कहते हैं।

अभ्युदय—१. पूजार्थाज्ञैश्वर्यैर्बल-परिजन-कामभोग-भूयिष्ठैः। अतिशयितभुवनमद्भुतमभ्युदयं फलति सद्धर्मः॥ (रत्नक. श्रा. १३५)। २. इन्द्रपदं तीर्थकरगर्भावतार-जन्माभिषेक-साम्राज्य - चक्रवर्तिपद-निःक्रमणकल्याण - महामण्डलेश्वरादिराज्यादिकं सर्वार्थसिद्धिपर्यन्तमहमिन्द्रपदं सर्वं सांसारिकं विशिष्टमविशिष्टं सुखमभ्युदयमित्युच्यते। (त. वृत्ति श्रुत. ७–२६)।
१ पूजा-प्रतिष्ठा, धन-सम्पत्ति, आज्ञा, ऐश्वर्य, बल, परिजन और कामभोग; इत्यादि की प्रचुरता से प्राप्ति होना, इसका नाम अभ्युदय है।

अभ्र—एवं बंधं पाविदूण से अब्भाणं वा अवारिमृ वा मेहा अब्भा णाम। (धव. पु. १४, पृ. ३५)।
वर्षा-विहीन मेघ अभ्र कहलाते हैं।

अभ्रावकाशशयन—अब्भावगाससयणं बहिर्निरावरणदेशे शयनम्। (भ. आ. विजयो. व मूला. टी. २२५)।
गृह आदि के बाहर निरावरण स्थान में सोने को अभ्रावकाशशयन कहते हैं।

अभ्रावकाशाऽतिचार—१. सचित्तायां भूमौ त्रससहितहरितसमुत्थितायां विवरवत्यां शयनम्, अकृतभूमि-शरीरप्रमार्जनस्य हस्त-पादसंकोच-प्रसारणम्, पार्श्वान्तिरसंचरणम्, कण्डूयनं वा, हिम-समीरणाभ्यां हतस्य कदैतदुपशमो भवतीति चिन्ता, वंशदलादिभिरुपरि निपतितहिमापकर्षणम्, अवश्यायघट्टना वा, प्रचुरवातातपदेशो ऽयमिति संक्लेशः अग्नि-प्रावरणादीनां स्मरणम्; अभ्रावकाशातिचारः। (भ. आ. विजयो. टी. ४८७)। २. अभ्रावकाशस्य हिमवाताभ्यामुपहतस्य कदैतदुपशमः स्यादिति चिन्ता, वंशदलादिभिरुपरि निपतितहिमस्यापकर्षणमवश्यायघट्टना वा, प्रभूतवातातपदेशोऽयमिति संक्लेशोऽग्नि-प्रावरणादीनां स्मरणमित्यादिकोऽभ्रावकाशातिचारः। (भ. आ. मूला. टी. ४८७)।
१ सचित्त, त्रसजीव-बहुल एवं सछिद्र भूमिपर सोना; भूमि व शरीर के प्रमार्जन के विना ही हाथ-पैर आदि को सकोड़ना व फैलाना, करवट बदलना, शरीर को खुजलाना तथा बर्फ व वायु से पीड़ित होने पर 'कब यह शान्त होता है' ऐसा चिन्तन करना, बांस के पत्तों आदि से ऊपर पड़ी ओसबिन्दुओं को हटाना; इत्यादि अभ्रावकाशशयन के अतिचार हैं।

अभ्रावकाशी—अभ्रेऽवकाशोऽस्ति येषां तेऽभ्रावकाशिनः, शीतकाले बहिःशायिनः। (योगिभ.टी.१२)।
शीतकाल में निरावरण प्रदेश में सोनेवाले साधु को अभ्रावकाशी कहते हैं।

अमध्यस्थ (अमज्झत्थ)—जे णवि वट्टइ रागे णवि दोसे दोण्ह मज्झयारम्मि। सो होइ उ मज्झत्थो सेसा सव्वे अमज्झत्था॥ (आव. नि. गा. ८०३)।
जो न तो राग में वर्तमान रहता है और न द्वेष में भी, किन्तु उनके मध्य में अवस्थित रहता है; वह मध्यस्थ होता है। शेष सबको अमध्यस्थ जानना चाहिये।

अमनस्क—१. न विद्यते मनो येषां तेऽमनस्काः। (स. सि. २–११; त. वा. २, ११, १; त. सुखबो. २–११)। २. मनसो द्रव्य-भावभेदस्य सन्निधानात् समनस्काः, तदसन्निधानादमनस्काः। × × × केचित् पुनरमनस्काः, [illegible] निर्णे- [illegible]। (त. श्लो. २–११)। ३. ये पुनर्भावमनसैवोपयोगमात्रेण [illegible] निरपेक्षेण [illegible] तेऽमनस्काः। (त. भा. सि. वृ. २–११)। ४. न विद्यते पूर्वोक्तं (द्रव्य-भावभेदं)

द्विप्रकारं मनो येषां तेऽमनस्काः। (त. वृत्ति श्रुत. २–११)।

२ द्रव्य-भाव स्वरूप मनसे रहित जीवों को अमनस्क कहते हैं।

अमनोज्ञ—१. अमनोज्ञं अप्रियं विष-कण्टक-शत्रु-शस्त्रादि, तद् बाधाकारणत्वादमनोज्ञम् इत्युच्यते। (स. सि. ६–३०)। २. अप्रियममनोज्ञं बाधाकारणत्वात्। यदप्रियं वस्तु विष-कण्टक-शत्रु-शस्त्रादि तद् बाधाकारणत्वादमनोज्ञमित्युच्यते। (त. वा. ६, ३०, १)। ३. अप्रियममनोज्ञम्, बाधाकारणत्वात्। (त. श्लो. ६–३०)।

१ विष, कण्टक और शत्रु आदि जो बाधा के कारण हैं, उन अप्रिय पदार्थों को अमनोज्ञ कहते हैं।

अमनोज्ञ-सम्प्रयोग-सम्प्रयुक्त आर्तध्यान (अमणुण्ण-संपओग-संपउत्त अट्टज्झाण)–१. अमणुण्णं णाम अप्पियं, समंतओ जोगो संपओगो तेण अप्पिएण समंतओ संपउत्तो तस्स विप्पयोगाभिकंखी सतिसमण्णागते यावि भवइ, सतिसमण्णागते णाम चित्तणिरोहो काउं झायइ जहा कहं णाम मम एतेसु अणिट्ठेसु विसएसु सह संजोगो न होज्जत्ति, तेसु अणिट्ठेसु विसयादिसु पओसं समावण्णो अप्पत्तेसु इट्ठेसु परमगिद्धिमावण्णो रागद्दोसवसगओ नियमा उदयकिलिन्न व्व पावकम्मरयं उवचिणाइ त्ति अट्टस्स पढमो भेदो मतो। (दशवै. चू.पृ २६-३०)। २. कदा ममाऽनेन ज्वर-शूल-शत्रु-रोगादिना वियोगो भविष्यतीत्येवं चिन्तनम् आर्तध्यानं प्रथमम्। (मूला. वृ. ५–१९८)। ३. अमनोज्ञानां शब्दादिविषयाणां तदाधारवस्तूनां च रासभादीनां संप्रयोगे तद्विप्रयोगचिन्तनमसंप्रयोगे प्रार्थना च प्रथमम्। (धर्मसं. मान. स्वो. वृ. ३, २७, पृ. ८०)। ४. अमणुन्नाणं सद्दाइविसयवत्थूण दोसमइलेस्सं। धणिअं विओगचितणमसपओगाणुसरणं च ॥६॥ (आव. ४ अ.—अभि. रा. १. पृ. २३५)।

१ अमनोज्ञ (अनिष्ट) वस्तुओं का संयोग होने पर उनके वियोग का अभिलाषी होकर जो यह विचार किया जाता है कि इन अनिष्ट विषयों के साथ मेरा संयोग कैसे नष्ट होगा, यह अमनोज्ञसम्प्रयोग नामका प्रथम आर्तध्यान है। इसके आश्रय से अनिष्ट विषयों में द्वेषभाव को प्राप्त होकर और अप्राप्त इष्ट पदार्थों में लोलुपता को प्राप्त होकर जीव राग-द्वेष के वशीभूत होता हुआ पाप कर्म का संचय करता है।

अमात्य (अमच्च)—१. सजणवयं पुरवरं चिंतंतो अत्थ (च्छ) इ नरवतिं च। ववहार-नीतिकुसलो अमच्च एयारिसो ××× ॥ (व्यव. भा. ३, पृ. १२६)। २. अमात्यः देशाधिकारीत्यर्थः। (त्रि. सा. टी. ६८३)। ३. यो व्यवहारकुशलो नीतिकुशलश्च सन् सजनपदं पुरवरं नरपतिं च चिन्तयन्नवतिष्ठते स एतादृशो भवति अमात्यः। अथवा यो राज्ञोऽपि शिक्षां प्रयच्छति। (व्यव. भा. मलय. वृ. ३, पृ. १२६); अमात्यो राजकार्यचिन्ताकृत्। (व्यव. भा. मलय. वृ. २–२३)। ४. अमात्याः सहजन्मानो मंत्रिणः। (कल्पसूत्र वृ. ३–६२)।

१ जो व्यवहारचतुर व नीतिकुशल होता हुआ जनपदों सहित श्रेष्ठ नगर और राजा की भी चिन्ता करता है वह अमात्य कहलाता है। २ देश का जो अधिकारी होता है उसे अमात्य कहा जाता है।

अमार्गदर्शन—चौरमार्गप्रयच्छकानां मार्गान्तरकथनेन तदज्ञापनम्। (श्रा. गु. वि. पृ. १०; प्रश्नव्या. वृ. पृ. १६३)।

चोरों का मार्ग पूछने वालों को दूसरा मार्ग बताकर उससे अनभिज्ञ रखना, इसे अमार्गदर्शन कहते हैं।

अमित्रक्रिया—१. अमित्रक्रियां द्वेपलक्षणा। (गु. गु. प. वृ. १५, पृ. ४१)। २. अमित्रक्रिया पित्रादिषु स्वल्पेऽप्यपराधे तीव्रतरदण्डकरणम्। (धर्मसं. मान. स्वो. वृ. ३, २७, पृ. ८२)।

२ पिता आदि के द्वारा अल्प भी अपराध के हो जाने पर तीव्र दण्ड देने को अमित्रक्रिया कहते हैं।

अमूढदृक्—अतत्त्वे तत्त्वश्रद्धानं मूढदृष्टिः स्वलक्षणात्। नास्ति सा यस्य जीवस्य विख्यातः सोऽस्त्यमूढदृक्॥ (लाटीसं. ४–१११; पंचाध्या. २–५८६)

जिस जीव की अतत्त्व में तत्त्वश्रद्धारूप मूढ दृष्टि नहीं रहती है वह अमूढदृक् कहलाता है।

अमूढदृष्टि—१. जो हवदि असंमूढो चेदा सव्वेसु कम्मभावेसु। सो खलु अमूढदिट्ठी सम्मादिट्ठी मुणेदव्वो ॥ (समयप्रा. २५०)। २. कापथे पथि दुःखानां कापथस्थेऽप्यसम्मतिः। असंपृक्तिरनुत्कीर्तिरमूढा दृष्टिरुच्यते ॥ (रत्नक. १४)। ३. बहुविधेषु दुर्नयदर्शनवर्त्मसु तत्त्ववदाभासमानेषु युक्त्यभावं

परीक्षा-चक्षुषा व्यवसाय्य अध्यवस्य विरहितमोहता अमूढदृष्टिता । (त. वा. ६, २४, १; चा. सा. पृ. ३; त. सुखवो. ६–२४; कार्तिके. टी. ३२६) । ४. अमूढदृष्टिश्च बालतपस्वितपोविद्यातिशयदर्शनैर्न मूढा स्वरूपान्न चलिता दृष्टिः सम्यग्दर्शनादिरूपा यस्याऽसावमूढदृष्टिः । (दशवै. हरि. वृ. पृ. १०२; व्यव. भा. मलय. वृ. १–६४, पृ. २७; धर्मवि. मु. वृ. २-११; धर्मसं. मान. स्वो. वृ. पृ. १६)। ५. भय-लज्जा-लाहादो हिंसाऽऽरंभो ण मण्णदे धम्मो । जो जिणवयणे लीणो अमूढदिट्ठी हवे सो दु ॥ (कार्तिके. वृ. ४१८) । ६. यतो हि सम्यग्दृष्टिः टंकोत्कीर्ण-ज्ञायकभावमयत्वेन सर्वेष्वपि भावेषु मोहाभावादमूढ-दृष्टिः । (समयप्रा. अमृत.वृ.२५०)। ७. लोके शास्त्रा-भासे समयाभासे च देवताऽऽभासे । नित्यमपि तत्त्व-रुचिना कर्तव्यमममूढदृष्टित्वम् ॥ (पु. सि. २६) । ८. देव-धर्म-समयेषु मूढता यस्य नास्ति हृदये कदा-चन । चित्तदोषकलितेषु सन्मतेः सोऽर्च्यते स्फुटम-मूढदृष्टिकः ॥ (अमित. श्रा. ३–७६) । ९. वीत-रागसर्वज्ञप्रणीतागमार्थाद् वहिर्भूतैः कुदृष्टिभिर्यत् प्रणीतं धातुवाद-खन्यवाद-हरमेखल-क्षुद्रविद्या-व्यन्तर-विकुर्वणादिकमज्ञानिजनचित्तचमत्कारोत्पादकं दृष्ट्वा श्रुत्वा च योऽसौ मूढभावेन धर्मवुद्ध्या तत्र रुचिं भक्तिं न कुरुते स एव व्यवहारोऽमूढदृष्टिरुच्यते । (वृ. द्रव्यसं. टी. ४१) । १०. मनो-वाक्-कायैर्मिथ्या-दर्शनादीनां तद्वतां चाप्रशंसाकरणम् अमूढं सम्यग्-दर्शनम् । (रत्नक. टी. १–१४) । ११. तदन्यज्ञान-विज्ञानप्रशंसाविस्मयोज्झिता । युक्तियुक्तजिनोक्तेर्या रुचिः सा ऽमूढदृष्टिता । (आचा. सा. ३–६०) । १२. न मूढा अमूढा, अमूढा दृष्टिः रुचिर्यस्यासाव-मूढदृष्टिस्तस्य भावो ऽमूढदृष्टिता, लौकिक-साम-यिक-वैदिकमिथ्याव्यवहाराऽपरिणामो ऽमूढदृष्टिता । (मूला. वृ. ५–४) । १३. णेगविहा इड्ढीओ पूयं परवादिणं च दट्ठूण । जस्स ण मुज्झइ दिट्ठी अमूढदिट्ठिं तयं विंति ॥ (व्यव. भा. मलय. वृ. १-६४, पृ. २७ उद्धृत)। १४. यो देव-लिङ्गि-समयेषु तमोमयेषु लोके गतानुगतिकेऽप्यपथैकपान्थे । न द्वेष्टि रज्यति न च प्रचरद्विचारः सोऽमूढदृष्टिरिह राजति रेवतीवत् ॥ (अन. ध. २–१०३); अमूढा पडनायतनत्यागादनभिभूता, दृष्टिः सम्यक्त्वं यस्या-सावमूढदृष्टिः । (अन. ध. स्वो. टी. २–१०३) । १५. अमूढा ऋद्धिमत्कुतीर्थिकदर्शने ऽप्यविगीतमस्मद्-दर्शनम् इति मोहरहितता, सा चाऽसौ दृष्टिश्च बुद्धि-रूपा अमूढदृष्टिः । (उत्तरा. ने. वृ. २८–३१) । १६. परवाइडंवरेहिं अमूढदिट्ठी उ सुलसाई । (गु. गु. ष. स्वो. वृ. ७, पृ. २७) । १७. दोषदुष्टेषु शास्त्रेषु तपस्वि-देवतादिषु । चित्तं न मुह्यते क्वापि तदमूढं निगद्यते । (भावसं. वाम. ४१३) । १८. परतत्त्वेषु मोहोज्झ-कत्वं अमूढदृष्टित्वम् । (भा. प्रा. टी. ७७) । १९. अनार्हतदृष्टतत्त्वेषु मोहरहितत्वममूढदृष्टिता । (त. वृत्ति श्रुत. ६-२४) । २०. देवे गुरौ तथा धर्मे दृष्टि-स्तत्त्वार्थदर्शिनी । ख्याता ऽप्यमूढदृष्टिः स्यादन्यथा मूढदृटिता ॥ (लाटीसं. ४–२७७; पंचाध्यायी २–७७३) ।

१ दुःखोंके कारणभूत कुमार्ग—मिथ्यादर्शनादि—और उसमें स्थित मिथ्यादृष्टि जीवों की भी मन-वचन-कायसे प्रशंसा न करना, इस का नाम अमूढदृष्टि है। ३ जो सन्मार्ग के समान प्रतीत होने वाले मिथ्या-मार्गों में परीक्षारूप नेत्र के द्वारा युक्ति के अभाव को देखकर—उन्हें युक्तिहीन जानकर—उनमें मुग्ध नहीं होता है उसे अमूढदृष्टि जानना चाहिए ।

अमूर्त—१. जे खलु इंदियगेज्झा विसया जीवेहिं हुंति ते मुत्ता । सेसं हवदि अमुत्तं × × ×॥ (पंचा. का. ९९) । २. स्पर्श-रस-गन्ध-वर्णाभावस्वभावम-मूर्तम् । (पंचा. का. अमृत. वृ. ९९) । ३. अमूर्ताः नाम-गोत्रकर्मक्षयाद् रूपादिसंनिवेशमयमूर्तिरहिताः । (शास्त्रवा. टी. ११–५४) ।

१ जीव जिन विषयों को इन्द्रियों से ग्रहण कर सकते हैं वे मूर्त होते हैं । उनसे भिन्न शेष सबको अमूर्त जानना चाहिए । ३ नाम व गोत्र कर्मों का क्षय हो जाने पर रूपादिमय मूर्ति—शरीर—से रहित मुक्त जीवों को भी अमूर्त जानना चाहिए ।

अमूर्तत्व—१. × × × अमूर्तत्वं विपर्ययात् । (द्रव्यानु. ११–५) । २. × × × अमूर्तत्वं गुणो मूर्तत्वाभावसमनि(न्वि)तत्वमिति । (द्रव्यानु. टी. ११–५) । ३. अमूर्तत्वं रूपादिरहितत्वम् । (नन्दि-तवि. पं. पृ. २५) ।

२ मूर्तता के अभावरूप गुण का नाम अमूर्तत्व है ।

अमूर्तद्रव्यभाव—[illegible] अमूर्तद्रव्यभावो ।

(धव. पु. १२, पृ. २)।
अवगाहन आदि को अमूर्त अचित्त द्रव्यभाव कहा जाता है।

अमृतस्रावी (अमडसवी)—१. येषां पाणिपुट-प्राप्तं भोजनं यत् किंचिदमृततामास्कन्दति, येषां वा व्याहृतानि प्राणिनाममृतवदनुग्राहकाणि भवन्ति तेऽमृतस्राविणः। (त. वा. ३–३६, पृ. २०४)। २. जेसिं हत्थपत्ताहारो अमडसादसरूवेण परिणमइ ते अमडसविणो जिणा। (धव. पु. ६, पृ. १०१)। ३. अमृतस्राविणो येषां पात्रपतितं कदन्नमप्यमृतरस-वीर्यविपाकं जायते, वचनं वा शारीर-मानसदुःख-प्राप्तानां देहिनां अमृतवत्सन्तर्पकं भवति तेऽमृत-स्राविणः। (योगशा. स्वो. विव. १–८)। ४. येषां पाणिपात्रगतमन्नं वचनं चामृतवद् भवति तेऽमृता-स्राविणः। (त. वृत्ति श्रुत. ३–३६)।

१ जिनके हाथ में रखा हुआ नीरस भी आहार अमृत के समान सरस बन जाय, तथा जिनके वचन अमृत के समान प्राणियों का अनुग्रह करने वाले हों, उन्हें अमृतस्रावी कहते हैं।

अमृतास्रवी ऋद्धि (अमियासवी रिद्धी)—मुणि-पाणि-संठियाणिं रुक्खाहाराऽऽदियाणि जीय खणे। पावंति अमियभावं एसा अमियासवी रिद्धी॥ अहवा दुःखादीणं महेसिवयणस्स सवणकालम्मि। णासंति जीए सिग्घं सा रिद्धी अमियआसवी णाम॥ (ति. प. ४, १०८४–८५)।

जिसके प्रभाव से साधु के हाथ में दिया गया रूक्ष भी आहार अमृत के समान स्वादिष्ट हो जाय; अथवा जिसके प्रभाव से मुख से निकले हुए वचन प्राणियों को अमृत के समान हितकारी होते हैं, वह अमृतास्रवी ऋद्धि कही जाती है।

अमेचक—परमार्थेन तु व्यक्तज्ञातृत्वज्योतिषैककः। सर्वभावान्तरध्वंसिस्वभावत्वादमेचकः॥ (नाटक स. क. १–१८)।

आत्मा चूंकि ज्ञातृत्वरूप ज्योति से एक होता हुआ अन्य सब भावों से रहित स्वभाव वाला है, अतएव उसे अमेचक–एक ज्ञायकस्वभाव—कहा जाता है।

अमेध्य—लेपोऽमेध्येन पादादेरमेध्यं × × × (अन. ध. ५–४४); अमेध्यं नामान्तरायो भोजनत्यागकरणं स्यात्। यः किम्? यो लेपः उपदेहः। कस्य? पादा-देश्चरण-जङ्घा-जान्वादेः। कस्य? साधोः स्थानान्तरं गच्छतः स्थितस्य वा। केन? अमेध्येनाशुभेन पुरीषा-दिद्रव्येण। (अन. ध. स्वो. टी. ५–४४)।

अपवित्र मल-मूत्रादि से साधु के पैर आदि के लिप्त हो जाने पर अमेध्य नामका भोजन-अन्तराय होता है।

अम्बधात्री दोष—स्वयं स्वापयति स्वापननिमित्तं विधानं चोपदिशति यस्मै दात्रे स दाता दानाय प्रवर्तते, तद्दानं यदि गृह्णाति तदा तस्याम्बधात्री नामोत्पादनदोषः। (मूला. वृ. ६–२८)।

यदि साधु दाता के बच्चों को स्वयं सुलाता है और उनके सुलाने का उपदेश भी देता है तो चूंकि इससे दाता दान में प्रवृत्त होता है; अतएव उस दाता के द्वारा दिये जाने वाले दान को यदि साधु ग्रहण करता है तो वह अम्बधात्री नामक उत्पादनदोष का भागी होता है।

अम्ल—१. आश्रवणक्लेदनकृदम्लः। (अनुयो. हरि. वृ. पृ. ६०; त. भा. सिद्ध. वृ. ५–२३)। २. जस्स कम्मस्स उदएण सरीरपोग्गला अंविलर-सेण परिणमंति तं अंविलं णामकम्मं। (धव. पु. ६, पृ. ७५)। ३. अग्निदीपनादिकृद् अम्लीकाद्याश्रितो अम्लः। यदभ्यदायि—अम्लोऽग्निदीप्तिकृतस्निग्धः शोफपित्तकफापहः। क्लेदनः पाचनो रुच्यो मूढवा-तानुलोमकः॥ यदुदयाज्जीवशरीरमम्लीकादिवद् अम्लं भवति तदम्लनाम। (कर्मवि. दे. स्वो. वृ. ४०, पृ. ५१)।

१ आश्रवण और क्लेदन को करने वाला रस अम्ल कहलाता है। २ जिस कर्म के उदय से शरीर के पुद्गल अम्ल रस से परिणत होते हैं, उसे अम्ल नामकर्म कहते हैं।

अयन—१. × × × उडुत्तिदयं। अयणं × × ×॥ (ति. प. ४–२८९)। २. तिण्णि उऊ अयणं। (अनुयो. १३७; जम्बूद्वी. सू. १८)। ३. तिन्नि य रियवो अयणमेगं॥ (जीवस. ११०)। ४. ते (ऋतवः) त्रयोऽयनम्। (त. भा. ४–१५)। ५. ऋतवस्त्रयोऽयनम्। (त. वा. ३-३८, पृ. २०६)। ६. × × × येषां त्रयं स्यादयनं तथैकम्। (वरांग. २७–६)। ७. तीहि उडूहि अयणं। (धव. पु. १३, पृ. ३००); दिणयरस्स दक्खिणुत्तरगमणमयणं। (धव. पु. १४, पृ. ३६)। ८. ऋतुत्रयमयनम्। (त. भा. सिद्ध. वृ. ४-१५; पंचा. का. जय. वृ. २५)।

६. ऋतूनां त्रितयं अयनम्। (ह. पु. ७-२२; त. सुखबो. ३-३८; नि. सा. टी. ३१; म. पु. २-२५)। १०. तिण्णि उडू अयणमेक्को दु॥ (जं. दी. प. १३-७)। ११. रिउतियभूयं अयणं। (भावसं. दे. ३१५)।

१ तीन ऋतुओं (२×३=६ मास) को अयन कहते हैं। ७ सूर्य के दक्षिण गमन और उत्तर गमन का नाम अयन है, जिसे क्रम से दक्षिणायन और उत्तरायण कहा जाता है।

अयशःकीर्ति—१. तत् (पुण्यगुणख्यापनकारणं यशस्कीर्तिनाम) प्रत्यनीकफलमयशःकीर्तिनाम। (स. सि. ८-११; त. श्लो. ८-११)। २. तद्-(यशोनिवर्तकयशोनाम-) विपरीतमयशोनाम। (त. भा. ८-१२)। ३. तत्प्रत्यनीकफलमयशस्कीर्तिनाम। पापगुणख्यापनकारणम् अयशःकीर्तिनाम वेदितव्यम्। (त. वा. ८, ११, ३६; भ. आ. मूला. टी. २१२४)। ४. अयशःकीर्तिनामोदयादुदास्यजनैर्निन्दितस्वभावो भवति। (पंचसं. स्वो. वृ. ३-१२७)। ५. जस्स कम्मस्सुदएण संताणमसंताणं वा अवगुणाणमुब्भावणं जणेण कीरदि तस्स कम्मस्स अजसकित्तिसण्णा। (धव. पु. ६, पृ. ६६); जस्स कम्मस्सुदएण अजसो कित्तिज्जइ लोएण तं अजसकित्तिणाम। (धव. पु. १३, पृ. ३६६)। ६. तद्विपरीतमयशोनाम—दोपविपया प्रख्यातिरयशोनामेति। (त. भा. सिद्ध. वृ. ८-१३, पृ. १६३)। ७. तत्प्रत्यनीकमपरमयशस्कीर्तिनाम, यदुदयात् सद्भूतानामसद्भूतानां चाप्यगुणानां स्थापनं तदयशस्कीर्तिनाम। (मूला. वृ. १२-१६६)। ८. पापगुणख्यापनकारणमयशस्कीर्तिनाम। (त. सुखबो. ८, ११)। ९. यदुदयवशान्मध्यस्थस्यापि जनस्य अप्रशस्यो भवति, तदयशःकीर्तिनाम। (षष्ठ कर्म. मलय. वृ. ५; प्रज्ञाप. मलय. वृ. २९३, पृ. ४७५; पंचसं. वृ. ३-९; कर्मप्र. वृ. १-६)। १०. अयशःप्रधाना कीर्तिरयशःकीर्तिः यदुदयाज्जीवस्य लोका अवर्णवादादीन् गृह्णन्ति तदयशःकीर्तिनाम। (कर्मवि. परमा. ७५, पृ. ३३)। ११. यदुदयात् पूर्वप्रदर्शिते यशःकीर्तिः न भवति तदयश.कीर्तिनाम। (कर्मवि. दे. स्वो. वृ. ५०)। १२. पुण्ययशसः प्रत्यनीकफलमयशस्कीर्तिनाम। (गो. क. जी. प्र. टी. ३३)। १३. पापदोषप्रकटनकारणम् अयशःकीर्तिनाम। (त. वृत्ति श्रुत. ८-११)।

५ जिस कर्म के उदय से जनों के द्वारा सत् और असत् अवगुणों का उद्भावन किया जाता है उसे अयशस्कीर्ति नामकर्म कहते हैं।

अयुत—××× दशाहतं तद्धययुतं वदन्ति॥ (वरांग २७-७)।

दश से गुणित हजार (१०००×१०=१००००) को अयुत कहा जाता है।

अयोग—१. प्रदह्याघातिकर्माणि शुक्लध्यान-कृशानुना। अयोगो याति शैलेशो मोक्ष-लक्ष्मीं निरास्रवः॥ (पंचसं. अमित. १-५०)। २. अयोगो मनोवाक्कायव्यापारविकलः। (धर्मवि. वृ. ८-४८, पृ. १०१)।

जो शुक्लध्यानरूप अग्नि से घातिया कर्मों को नष्ट करके योगों से रहित हो जाता है उसे अयोग या अयोगकेवली कहते हैं।

अयोगकेवली—१. न विद्यते योगो यस्य स भवत्ययोगः, केवलमस्यास्तीति केवली, अयोगश्चासौ केवली च अयोगकेवली। (धव. पु. १, पृ. १९२)। २. योगानां तु क्षये जाते स एवायोगकेवली। (योगशा. १-१६)।

देखो अयोग।

अयोगव्यवच्छेद—१. विशेषणसंगतैवकारोऽयोगव्यवच्छेदबोधकः, उद्देश्यतावच्छेदकसमानाधिकरणाभावाप्रतियोगित्वम्॥ (सप्तभं. पृ. २५)। २. विशेषणेन सह उक्तः (एवकारः) अयोगं व्यवच्छिनत्ति। (सिद्धिवि. ३२-३३, पृ. ६४७)।

विशेषण के साथ प्रयुक्त एवकार (अवधारणार्थक अव्यय) को अयोगव्यवच्छेद कहते हैं। जैसे—शंख पाण्डुर ही होता है।

अयोगिकेवलिगुणस्थान—योगः पूर्वोक्तो विद्यते यस्यासौ योगी, न योगी अयोगी, अयोगी चासौ केवली च अयोगिकेवली, तस्य गुणस्थानमयोगिकेवलिगुणस्थानम्। (पंचसं मलय. वृ. १-१५, पृ. ३२)।

योग से रहित हुए अयोगिकेवली के गुणस्थान (१४) को अयोगिकेवलिगुणस्थान कहते हैं।

अयोगिकेवली—जदो कम्मेण णिरुद्धिय जोगणिरोहं काऊण अयोगिकेवली होदि। (धव. पु. १, पृ. २०३)

जो योगों का निरोध कर चुके हैं, ऐसे चौदहवें गुण

स्थानवर्ती जिन अयोगिकेवली कहलाते हैं।

अयोगिजिन—१. जेसिं ण संति जोगा सुहासुहा पुण्णपावसंजणया। ते होंति अजोइजिणा अणोवमाणंतवलकलिया ॥ (प्रा. पंचसं. १–१००; धव. पु. १, पृ. २८० उद्धृत; गो. जी. गा. २४२)। २. मनोवाक्कायवर्गणालम्बनकर्मादाननिमित्तात्मप्रदेशपरिस्पन्दलक्षणयोगरहिताश्चतुर्दशगुणस्थानवर्तिनो ऽयोगिजिना भवन्ति। (वृ. द्रव्यसं. टी. १३)।

१ जिनके पुण्य-पाप के जनक शुभ-अशुभ योग नहीं पाये जाते ऐसे अनुपम अनन्त वल से युक्त जिनेन्द्रों को अयोगिजिन कहते हैं।

अयोगिजिनगुणस्थानकाल—पञ्चलघ्वक्षरकालस्थितिकमयोगिजिनसंज्ञं चतुर्दशं गुणस्थानं वेदितव्यम्। (त. वृत्ति श्रुत. ९–१)।

जिस गुणस्थान की स्थिति अ, इ, उ, ऋ और लृ इन पांच ह्रस्व अक्षरों के उच्चारणकाल के वरावर है उसे (१४) अयोगिजिनगुणस्थान कहते हैं।

अयोगिभवस्थकेवलज्ञान—शैलेश्यवस्थायामयोगिभवस्थकेवलज्ञानम् (आव. नि. मलय. वृ. ७८, पृ. ८३) शैलेशी अवस्था में होने वाले अयोगिकेवली के केवलज्ञान को अयोगिभवस्थकेवलज्ञान कहते हैं।

अयोगी—न योगी अयोगी। (धव. पु. १, पृ. २८०)।

जो योगी—योगयुक्त—नहीं है, उसे अयोगी कहते हैं।

अरण्य—मनुष्यसंचारशून्यं वनस्पतिजातवल्लीगुल्मप्रभृतिभिः परिपूर्णमरण्यम्। (नि. सा. वृ. ५८)। मनुष्यों के आवागमन से शून्य और वृक्ष, वेलि, लता एवं गुल्मादि से परिपूर्ण स्थान को अरण्य कहते हैं।

अरति—१. यदुदयाद्देशादिषु औत्सुक्यं सा रतिः। अरतिस्तद्विपरीता। (स. सि. ८–९; त. वा. ८, ९, ४; त. सुखबो. ८–९)। २. एतेष्वेव (वाह्याभ्यन्तरेषु वस्तुषु) अप्रीतिररतिः। (श्रा. प्र. टी. १८) ३. दव्व-खेत्त-कालभावेसु जेसिमुदएण जीवस्स अरई समुप्पज्जइ तेसिमरदि त्ति सण्णा। (धव. पु. ६, पृ. ४७); नप्तृ-पुत्र-कलत्रादिषु रमणं रतिः। तत्प्रतिपक्षा अरतिः। (धव. पु. १२, पृ. २८५); जस्स कम्मस्स उदएण दव्व-खेत्त-काल-भावेसु अरई समुप्पज्जदि तं कम्मं अरई णाम। (धव. पु. १३, पृ. ३६१)। ४. रमणं रतिः संयमविषया धृतिः, तद्विपरीता त्वरतिः। (उत्तरा. नि. शा. वृ. ८६, पृ. ८२)। ५. अरतिश्च तन्मोहनीयोदयजनितश्चित्तविकारः उद्वेगलक्षणः। (स्थानांग अभय. वृ. १–४८, पृ. २४)। ६. अरतिमोहनीयोदयाच्चित्तोद्वेगः। (औपपा. अभय. वृ. ३४, पृ. ७६)। ७. अरतिर्मानसो विकारः। (समवा. अभय. वृ. २२, पृ. ३९)। ८. सच्चित्ताचित्तेसु य वाहिरदव्वेसु जस्स उदएणं। अरई होइ हु जीये सो उ विवागो अरइमोहे। (कर्मवि. गर्ग म. ५७, पृ. २७)। ९. यदुदयवशात् पुनर्वाह्याभ्यन्तरेषु वस्तुषु अप्रीतिं करोति तदरतिमोहनीयम्। (धर्मसं. मलय. वृ. ६१५, पृ. २३१; प्रज्ञाप. मलय. वृ. २३-२९३, पृ. ४६९; पंचसं. वृ. ३-५)। १०. अरतिरुद्वेगः अशुभपरिणामः। (मूला. वृ. ११, १०); न रमते न रम्यते वा यया साऽरतिर्यस्य पुद्गलस्कन्धस्योदयेन द्रव्यादिष्वरतिर्जायते तस्यारतिरिति संज्ञा। (मूला. वृ. १२–१९२)। ११. यदुदयात् संनिमित्तमनिमित्तं वा जीवस्य वाह्याभ्यन्तरेषु वस्तुष्वरतिः अप्रीतिर्भवति तत् अरतिमोहनीयम्। (कर्मवि. दे. स्वो. वृ. २१, पृ. ३७–३८)। १२. तथा यदमनोज्ञेषु शब्दादिविषयेषु संयमे वा जीवस्य चित्तोद्वेगः सा अरतिः। (वृहत्क. क्षे. वृ. २२, पृ. ४१)। १३. यदुदयाद् देश-पुर-ग्राम-मन्दिरादिषु तिष्ठन् जीवः रतिं लभते, परदेशादिगमने चौत्सुक्यं करोति सा रतिः। रतेर्विपरीताऽरतिः। (त. वृत्ति श्रुत. ८–९)।

१ जिसके उदय से देशादि के विषय में अनुत्सुकता होती है उसे अरति (नोकषाय) कहते हैं। ३ पुत्र-पौत्रादिकों में जो प्रीति का अभाव होता है उसका नाम अरति है।

अरतिपरीषहजय — १. संयतस्येन्द्रियेष्टविषयसम्बन्धं प्रति निरुत्सुकस्य गीत-नृत्य-वादित्रादिविरहितेषु शून्यागार-देवकुल-तरुकोटर-शिला-गुहादिषु स्वाध्याय-ध्यान-भावनारतिमास्कन्दतो दृष्ट-श्रुतानुभूतरति-स्मरण-तत्कथाश्रवण - कामशरप्रवेशनिर्विवरहृदयस्य प्राणिषु सदा सदयस्यारतिपरीषहजयोऽवसेयः। (स. सि. ९–९)। २. संयमे रतिभावादरतिपरीषहजयः। संयतस्य ××× अरतिं प्रादुष्यतीं धृतिविशेषान्निवारयतः संयमरतिभावनात् विषयसुखरतिर्विषाहारसेवेव विपाककटुकेति चिन्तयतः रतिपरिवाधाभावादरतिपरीषहजय इति

निश्चीयते । (त. वा. ६, ६, ११; चा. सा. पृ. ५१) । ३. दुर्वारेन्द्रियवृन्दरोगनिकरक्रूरादिवाधोत्करैः प्रोद्भूतामरतिं व्रतोत्करपरित्राणे गुणोत्पोषणे। मंक्षु क्षीणतरां करोत्यरतिजिद् वीरः स वन्द्यः सतां यो दण्डत्रयदण्डनाहितमतिः सत्यप्रतिज्ञो व्रती ।। (आचा. सा. ७–१५) । ४. लोकापवादभय-सद्व्रतरक्षणाक्षरोवक्षुदादिभिरसह्यमुदीर्यमाणाम् । स्वात्मोन्मुखो धृतिविशेषहृतेन्द्रियार्थतृष्णः शृणात्वरतिमाश्रितसंयमश्रीः ।। (अन. ध. ६–९५) ।

१ महाव्रतों का परिपालन करने वाले संयत के अभीष्ट विषयों के प्रति उत्सुकता न रहने से जो वह गीत, नृत्य और वादित्रादि से विहीन शून्य (निर्जन) गृहादि में रहता हुआ स्वाध्याय व ध्यान में अनुरक्त रह कर कामकथादि के श्रवण आदि से विरहित होता है, यह उसका अरतिपरीषहजय है ।

अरतिरति–अरतिः अरतिमोहनीयोदयाच्चित्तोद्वेगः, तत्फला रतिः विषयेषु मोहनीयाच्चित्ताभिरतिः अरतिरतिः । (औपपा. अभय. वृ. ३४, पृ. ७९) ।

अरतिमोहनीय के उदय से होने वाली चित्तोद्वेगरूप रति के फलस्वरूप जो विषयों में मन को अनुराग होता है उसे अरतिरति कहा जाता है ।

अरतिवाक्—१. तेषु (शब्दादिविषय-देशादिषु) एवारत्युत्पादिका अरतिवाक् । (त. वा. १, २०, १२, पृ. ७५; धव. पु. १, पृ. ११७) । २. तेसु (इंदियविसयेसु) अरइउप्पाइया अरदिवाया । (अंगपण्णत्ती पृ. २९२) ।

इन्द्रियविषयों में अरति उत्पन्न करने वाले वचनों को अरतिवाक् कहते हैं ।

अरहस्–अरह त्ति अर्हन् अशोकादिमहापूजार्हत्वात्, अविद्यमानं वा रहः एकान्तं प्रच्छन्नं सर्वज्ञत्वाद् यस्य सोऽरहाः । (औपपा. अभय. वृ. १०, पृ. १५) ।

अशोकादि पूजा के जो योग्य हैं वे अर्हन् कहलाते हैं । अथवा रहस् शब्द का अर्थ एकान्त या गुप्त होता है, सर्वज्ञ हो जाने से जिनके लिए कोई भी पदार्थ रहस् (गुप्त) नहीं रहा है, अर्थात् जिनके सर्वगत ज्ञान से कुछ भी बचा नहीं है, वे अरहस् (अरहंत जिन या केवली) कहलाते हैं ।

अरहस्कर्म—रहः अन्तरम्, अरहः अनन्तरम्, अरहः कर्म अरहस्कर्म । (धव. पु. १३, पृ. ३५०) ।

रहस् शब्द का अर्थ अन्तर और अरहस् शब्द का अर्थ अनन्तर—अन्तर से रहित (अनादि)—होता है, अरहस् अर्थात् अन्तर से रहित जो अनादि कर्म है, वह अरहस्कर्म कहलाता है ।

अरिष्ट—न विद्यते ऽरिष्टम् अकल्याणं येषां ते अरिष्टाः । (त. वृत्ति श्रुत. ४–२५) ।

जिनके अकल्याण-जनक कोई वस्तु न पाई जावे उन लौकान्तिक देवों को अरिष्ट कहते हैं । यह लौकान्तिक देवों का एक भेद है ।

अरुण—अरुणः उद्यद्भास्करः, तद्वत्तेजोविराजमानाः अरुणाः । (त. वृत्ति श्रुत. ४–२५) ।

जो उदित होते हुए सूर्य के समान तेज से सुशोभित होते हैं, वे अरुण नामक लौकान्तिक देव कहलाते हैं ।

अरुहा—न रोहन्ति न भवाङ्कुरोदयमासयन्ति, कर्मबीजाभावादिति अरुहाः । (पंचसूत्र व्याख्या २)।

कर्मरूपी बीज के विनष्ट हो जाने से जो संसाररूपी अंकुर की उत्पत्ति का आश्रय नहीं लेते, अर्थात् जिनका संसार सदा के लिए नष्ट हो चुका है, उन्हें अरुह (अरहंत) कहा जाता है ।

अरूप ध्यान—१. अरूपं ध्यायति ध्यानं परं संवेदनात्मकम् । सिद्धरूपस्य लाभाय नीरूपस्य निरेनसः । (अमित. श्रा. १५–५६) । २. व्योमाकारमनाकारं निष्पन्नं शान्तमच्युतम् । चरमाङ्गात् कियन्न्यूनं स्वप्रदेशैर्घनैः स्थितम् ।। लोकाग्रशिखरासीनं शिवीभूतमनामयम् । पुरुषाकारमापन्नमप्यमूर्तं च चिन्तयेत् ।। निष्कलस्य विशुद्धस्य निष्पन्नस्य जगद्गुरोः । चिदानन्दमयस्योच्चैः कथं स्यात् पुरुषाकृतिः ।। विनिर्गतमधूच्छिष्टप्रतिमे मूषिकोदरे । यादृग्गगनसंस्थानं तदाकारं स्मरेद् विभुम् ।। (ज्ञानार्णव ४०, २२–२५) ।

१ रूपरहित (अमूर्तिक) निर्मल सिद्धस्वरूप की प्राप्ति के लिए रूपादि से रहित और पाप-पंक से वियुक्त हुए सिद्ध के स्वरूप का जो संवेदनात्मक ध्यान किया जाता है, उसे अरूप (रूपातीत) धर्म ध्यान कहते हैं ।

अरूपी—१. न विद्यते रूपमेषामित्यरूपाणि । रूपप्रतिषेधे तत्सहचारिणां रसादीनामपि प्रतिषेधः । तेन अरूपाण्यमूर्तानीत्यर्थः । (स. सि. ५–४) । २. रूवा-[illegible] समाणा जे [illegible] ... ते अरूविणो णाम, जिणम्मि पोग्गला कम्मइया णाम । (धव. पु. १४, पृ. ३१–३२) । ३. रूप-

रूप-रस-स्पर्श-गन्धात्यन्तव्युदासतः। पञ्च द्रव्याण्यरूपाणि ××× ॥ (त. सा. ३–१६)।

२ जो स्निग्ध-रूक्ष पुद्गल गुणाविभागप्रतिच्छेदों से समान होते हैं वे रूपी और उनसे भिन्न अरूपी कहलाते हैं। ३ जो पांच द्रव्य शब्द, रूप, रस, गन्ध और स्पर्श से रहित हैं उन्हें अरूपी कहते हैं।

अरूप्यालम्बनी—सः (स्वरूपानन्दपिपासितः) एव अर्हत्सिद्धस्वरूपं ज्ञान-दर्शन-चारित्राद्यनन्तपर्यायविशुद्धशुद्धाध्यात्मधर्मम् अवलम्बते इति अरूप्यालम्बनी। (ज्ञा. सा. वृ. २७–६)।

आत्मस्वरूप आनन्दामृत-पान के इच्छुक पुरुष के द्वारा अर्हन्त व सिद्ध परमेष्ठी के स्वरूप का तथा ज्ञान-दर्शन-चारित्रादि अनन्त पर्यायों से विशुद्ध शुद्ध आत्मा का आलम्बन करके जो ध्यान किया जाता है, उसे अरूप्यालम्बनी वृत्ति कहते हैं।

अर्चना (अच्चणा)— चरु-वलि-पुप्फ-फल-गन्ध-धूव-दीवादीहिं सगभत्तिपगासो अच्चणा। (धव. पु. ८, पृ. ९२)।

चरु, वलि (नैवेद्य), पुष्प, फल, गन्ध, धूप और दीप आदि के द्वारा अपनी भक्ति के प्रकाशित करने को अर्चना कहते हैं।

अर्चा—अर्चा—तथा क्षालिताङ्घ्रेः संयतस्य गन्धाक्षतादिभिः पादपूजनम्। (सा. ध. टी. ५–४५)।

साधु का पादप्रक्षालन करके जो उसकी गन्ध व अक्षत आदि से पादपूजा की जाती है, इसका नाम अर्चा है।

अर्चि (अच्ची)—१. अच्ची णाम आगासाणुगआ परिच्छिण्णा अग्गिसिहा। (दशवै. चू. पृ. १५६)। २. दाह्यप्रतिवद्धो ज्वालाविशेषोऽर्चिः। (आचारांग शी. वृ. १, १, ३, गा. ११८, पृ. ४४)।

अग्नि की ऊपर उठती हुई ज्वाला या शिखा को अर्चि कहते हैं।

अर्थ (ज्ञेय)–१. अर्यते इत्यर्थः, निश्चीयते इति यावत् (स. सि. १–२)। २. तत्र अर्यन्ते इत्यर्थाः, अर्यन्ते गम्यन्ते परिच्छिद्यन्ते इति यावत्। ते च रूपादयः। (आव. नि. हरि. व मलय. वृ. ३)। ३. अर्यते परिच्छिद्यते गम्यते इत्यर्थो द्वादशांगविषयः। (धव. पु. ६, पृ. २५९)। ४. अर्यते गम्यते ज्ञायते निश्चीयते इत्यर्थः। (त. वृत्ति श्रुत. १–२)। ५. ××× अर्थः स्व-परगोचरः। (लाटीसं. ३–४६)।

१ जिसका निश्चय किया जाता है अर्थात् जो ज्ञान के द्वारा जाना जाता है उसे अर्थ कहते हैं।

अर्थ (द्रव्य)—१. दव्वाणि गुणा तेसिं पज्जाया अट्ठसण्णिया भणिया। (प्रव. सा. १-८७)। २. प्रतिक्षणं स्थित्युदय-व्ययात्मतत्त्वव्यवस्थं सदिहार्थरूपम्। (युक्त्यनु. ४६)। ३. परापरपर्यायावाप्ति-परिहार-स्थितिलक्षणोऽर्थः। (प्रमाणसं. स्वो. वृ. ७-६६, पृ. १२१, पं. २२–२३)। ४. तद्द्रव्यपर्यायात्मार्थो वहिरन्तश्च तत्त्वतः। (लघीय. ७)। ५. अनेकपर्यायकलापभाजोऽर्थाः। (त. भा. सिद्ध. वृ. ९–६); अर्थः परमाण्वादिः। (त. भा. सिद्ध. वृ. ९–४६)। ६. अर्थः अर्थक्रियासमर्थः प्रमाणगोचरो भावः द्रव्य-पर्यायात्मकः। (न्यायकु. २–७, पृ. २१३, पं. २२–२३)। ७. मानेनार्थ्यते इत्यर्थस्तत्त्वं चार्थः स्वरूपतः॥ स्थित्युपत्तिव्ययात्मा द्रवति द्रोष्यत्यदुद्रुवत्। स्वपर्यायानिति द्रव्यमर्थास्तान् विवक्षितान्॥ (आचा. सा. ३, ६–७)। ८. द्रव्याणि च गुणाश्च पर्यायाश्च अभिधेयभेदेऽप्यभिधानभेदेन अर्थाः। तत्र गुण-पर्यायान् प्रति गुण-पर्यायैरर्यन्त इति वा अर्थाः द्रव्याणि, द्रव्याण्याश्रयत्वेन प्रतिद्रव्यैराश्रयभूतैरर्यन्त इति वा अर्था गुणाः, द्रव्याणि क्रमपरिणामेनेति द्रव्यैः क्रमपरिणामेनार्यंते इति वा अर्थाः पर्यायाः। (प्रव. सा. अमृत. वृ. १–८७)। ९. अनन्तज्ञान-सुखादिगुणान् तथैवामूर्तत्वातीन्द्रियत्वसिद्धत्वादिपर्यायांश्च इयर्ति गच्छति परिणमति आश्रयति येन कारणेन तस्मादर्थो भण्यते। (प्रव. सा. जय. वृ. १–८७)। १०. अर्थो ध्येयो ध्यानीयो ध्यातव्यः परार्थः द्रव्यं पर्यायो वा। (कार्तिके. टी. ४८७)।

३ जो एक (नवीन) पर्याय की प्राप्ति (उत्पाद), पूर्व पर्याय का विनाश (व्यय) और स्थिति (ध्रौव्य) से सहित होता है वह अर्थ (द्रव्य) कहलाता है।

अर्थ (अभिधेय)—१. अर्थो वाक्यस्य भावार्थः। (ज्ञा. सा. वृ. २७–५)। २. अर्थः शब्दस्याभिधेयम्। (षोडशक वृ. १३–४)।

शब्द या वाक्य के वाच्य को अर्थ कहा जाता है।

अर्थ (पुरुषार्थ)—१. यतः सर्वप्रयोजनसिद्धिः सोऽर्थः। (नीतिवा. २–१; योगशा. वृ. १–५२, पृ. १५४; श्रा. गु. वि. पृ. ४; धर्मसं. मान. स्वो. वृ. १, १४, पृ. ९)। २. अर्थो वेश्यादिव्यसनव्यावर्तनेन

निष्प्रत्यूहमर्थस्योपार्जनादुपार्जितस्य च रक्षणाद्ररक्षितस्य च वर्द्धनाद् यथाभाग्यं ग्रामसुवर्णादिसम्पत्तिः । (सा. ध. स्वो. टी. २–५६) ।

१ समस्त प्रयोजन के साधनभूत धन का नाम अर्थ है ।

अर्थ (अभिलपनीय)—१. अर्थ्यतेऽभिलष्यते प्रयोजनार्थिभिरित्यर्थो हेय उपादेयश्च । (प्र. क. मा. पृ. ४, पं. २२–२३) । २. अर्थः व्यवहारिणा हेयत्वेन उपादेयत्वेन वा प्रार्थ्यमानो भावः । (न्यायकु. १–५, पृ. ११६) ।

१ प्रयोजनार्थी के लिए जो वस्तु अभीष्ट होती है उसे अर्थ कहा जाता है ।

अर्थ (सम्यक्त्वभेद)—१. संजातार्थात् कुतश्चित् प्रवचनवचनान्यन्तरेणार्थदृष्टिः । (आत्मानु. १४) । २. प्रवचनविषये स्वप्रत्ययसमर्थोऽर्थः (उपासका. पृ. ११४; अन. ध. स्वो. टी. २–६२) ।

१ आगमवचनों के बिना किसी अर्थविशेष के आश्रय से जो तत्त्वश्रद्धान होता है उसे अर्थ सम्यक्त्व कहते हैं ।

अर्थकथा–१. विज्जा-सिप्पमुवाओ अणिवेओ संचओ य दक्खत्तं । सामं दण्डो भेओ उवप्पयाणं च अत्थकहा ॥ (दशवै. नि. १८६, पृ. १०६) । २. अत्थकहा नाम जा अत्थनिमित्तं कहा कहिज्जइ सा अत्थकहा । (दशवै. चू. पृ. १०२)। ३. विद्यादिरर्थस्तत्प्रधाना कथाऽर्थकथा । (दशवै. हरि. वृ. पृ. १०७) । ४. अर्थस्य कथा अर्थार्जनोपायकथनप्रबन्धाः सेवया वाणिज्येन लेखवृत्त्या कृषिकर्मणा समुद्रप्रवेशेन धातुवादेन मंत्रतंत्रप्रयोगेण वा इत्येवमाद्यर्थार्जननिमित्तवचनान्यर्थकथाः । (मूला. वृ. ९–८६) । ५. सामादि-धातुवादादि-कृष्यादिप्रतिपादिका । अर्थोपादानपरमा कथार्थस्य प्रकीर्तिता ॥ (गु. गु. ष. स्वो. वृ. २, पृ. ५) ।

४ सेवा, कृषि व वाणिज्य आदि के द्वारा धन के उपार्जन करने के कारणभूत वचनप्रबन्ध को अर्थकथा कहते हैं ।

अर्थकरण — अर्थाभिनिर्वर्तकमदिकरण्यादि येन द्रम्मादि निष्पाद्यते, अर्थार्थं वा करणमर्थकरणं यत्र यत्र राजोऽर्थादिचिन्त्यन्ते, अर्थ एव वा तैस्तैरुपायैः क्रियत इत्यर्थकरणम् । (उत्तरा. नि. शा. वृ. ४, १८४, पृ. १६५) ।

जिसके द्वारा द्रम्मों—सोना व चांदी आदि के सिक्कों—आदि का उत्पादन होता है, अथवा धनार्जन के लिए जो कुछ किया जाता है उसे अर्थकरण कहते हैं । अथवा विविध उपायों से अर्थ-उपार्जन करने को अर्थकरण कहते हैं ।

अर्थकर्त्ता—तेसिमणेयाणं वीजपदाणं दुवालसंगप्पयाणमट्ठारस-सत्तसय-भास-कुभासरूवाणं परूवओ अत्थकत्तारो णाम । (धव. पु. ९, पृ. १२७) ।

अठारह भाषा व सात सौ कुभाषा रूप द्वादशांगस्वरूप अनेक वीजपदों की प्ररूपणा करने वाला अर्थकर्त्ता कहलाता है ।

अर्थकल्पिक—अत्थस्स कप्पितो खलु आवासगमादि जाव सूयगडं । मोत्तूणं छेयसुयं जं जेणऽहियं तदट्ठस्स । (वृहत्क. ४०८) ।

जिसने आवश्यक सूत्र से लगाकर सूत्रकृतांग तक के सूत्रों के अर्थ का अध्ययन किया है, तथा सूत्रकृतांग सूत्र से ऊपर भी छेदसूत्र को छोड़ कर समस्त सूत्रों के अर्थों को पढ़ा है, ऐसे साधु को अर्थकल्पिक कहते हैं ।

अर्थक्रिया—१. तत्र त्रिलक्षणाभावतः अवस्तुनि परिच्छेदलक्षणार्थक्रियाभावात् । (धव. पु. ९, पृ. १४२)। २. अर्थक्रिया—अर्थस्य ज्ञानस्य अन्यस्य वा क्रिया करणम् । (न्यायकु. २-८, पृ. ३७२) । ३. अर्थक्रिया—अर्थस्य कार्यस्य क्रिया करणं निष्पत्तिः । (लघीय. अभय. वृ. २–१, पृ. २२)। ४. तत्रार्थक्रिया ऽर्थदण्डरूपा । (गु. गु. षट्. स्वो. वृ. १५, पृ. ४१)।

१ वस्तु का ज्ञान का विषय होना, यही उसकी अर्थक्रिया है । ३ अथवा अर्थ शब्द का अर्थ कार्य है, उस कार्य का करना, यह वस्तु की अर्थक्रिया है । ४ प्रयोजनसिद्धि के लिए जो प्राणिपीडनात्मक क्रिया की जाती है वह अर्थक्रिया कही जाती है ।

अर्थक्रियाकारिता—पूर्वाकारपरिहारोत्तराकारस्वीकारावस्थानस्वरूपलक्षणपरिणामेन वस्तूनामर्थक्रियाकारिता । (स्या. रह. पृ. ८) ।

पूर्व आकार के परित्याग (व्यय), उत्तर आकार के ग्रहण (उत्पाद) और अवस्थान (ध्रौव्य) स्वरूप परिणाम से वस्तुओं के अर्थक्रियाकारिता हुआ करती है ।

अर्थचर—अर्थेषु [illegible] [illegible] अर्थचराः [illegible]

नियुक्ताः कनकाध्यक्षादिसदृशाः। (त. वृत्ति श्रुत. ४-४)।
जो अर्थ के विषय में पर्यटनशील रहते हैं, ऐसे कार्य में नियुक्त सुवर्णाध्यक्ष आदि के सदृश अर्थचर कहलाते हैं।

अर्थज—देखो अर्थ (सम्यक्त्व)। १. वाग्विस्तरपरित्यागादुपदेष्टुर्महायतेः। अर्थमात्रसमादानसमुत्था रुचिरर्थजा॥ (म. पु. ७४-४४७)। २. अङ्गबाह्यश्रुतोक्तात् कुतश्चिदर्थादङ्गबाह्यश्रुतं विनापि यत्प्रभवति तत्सम्यक्त्वं अर्थसम्यक्त्वं निगद्यते। (दर्शनप्रा. टी. १२)।
१ उपदेष्टा के वचनविस्तार के विना ही अर्थ मात्र के ग्रहण से उत्पन्न हुए सम्यग्दर्शन को अर्थज सम्यग्दर्शन कहते हैं।

अर्थदण्ड—१. अर्थः प्रयोजनं गृहस्थस्य क्षेत्र-वास्तु-धन-शरीर-परिजनादिविषयम्, तदर्थम् आरम्भो भूतोपमर्दो ऽर्थदण्डः, दण्डो निग्रहो यातना विनाश इति पर्यायाः। अर्थेन प्रयोजनेन दण्डोऽर्थदण्डः, स चैव भूतविषयः उपमर्दनलक्षणो दण्डः क्षेत्रादिप्रयोजनमपेक्षमाणोऽर्थदण्ड उच्यते। (आव. हरि. वृ. ६, पृ. ८३०)। २. दण्डः प्राणातिपातादिः, स चार्थाय इन्द्रियादिप्रयोजनाय यः सोऽर्थदण्डः। (स्थानांग अभय. वृ. सू. ६९, पृ. ४४)। ३. यः स्व-स्वीय-स्वजनादिनिमित्तं विधीयमानो भूतोपमर्दः सोऽर्थदण्डः, सप्रयोजन इति यावत्। प्रयोजनं च येन विना गार्हस्थ्यं प्रतिपालयितुं न शक्यते, सोऽर्थदण्डः। ××× यदाह—जं इंदिय-सयणाई पडुच्च पावं करेज्ज सो होई। अत्थो दण्डो इत्तो अन्नो उ अणत्थदंडो त्ति॥ (धर्मसं. मान. स्वो. वृ. २-३५, पृ. ८१)।
१ क्षेत्र, वास्तु, धन, शरीर व परिजन आदि विषयक जो गृहस्थ का प्रयोजन है उसको सिद्ध करने के लिए जो प्राणिपीडाजनक आरम्भ किया जाता है उसका नाम अर्थदण्ड है।

अर्थदूषण (व्यसनभेद)—१. अतिव्ययोऽपात्रव्ययश्चार्थस्य दूषणं। (नीतिवा. १६-१६, पृ. १७८)। २. अर्थोत्पत्तिहेतवो ये सामाद्युपायचतुष्टयप्रभृतयः प्रकारास्तेषां यद् दूषणं तदर्थदूषणव्यसनम्। (वृहत्क. वृ. ६४०)।
१ अत्यधिक व्यय और अयोग्य पात्र के लिए किये गये अनर्थक व्यय का नाम अर्थदूषण है। यह एक राजा को नष्ट करने वाला व्यसन है। २ धन कमाने के जो साम आदि चार उपाय हैं उनमें दूषण लगाने को अर्थदूषण व्यसन कहते हैं।

अर्थनय—१. अर्थ-व्यञ्जनपर्यायैर्विभिन्नलिङ्ग-संख्या-काल-कारक-पुरुषोपग्रहभेदैरभिन्नं वर्तमानमात्रं वस्त्वव्यवस्यन्तोऽर्थनयाः, न शब्दभेदेनार्थभेद इत्यर्थः। (धव. पु. १, पृ. ८६); क्रिया-गुणाद्यर्थगतभेदेनार्थभेदनात् संग्रह-व्यवहारर्जुसूत्राः अर्थनयाः। (धव. पु. ६, पृ. १८१)। २. वस्तुनः स्वरूपं स्वधर्मभेदेन भिन्दानोऽर्थनयः, अभेदको वा। अभेदरूपेण सर्वं वस्तु इयर्ति एति गच्छति इत्यर्थनयः। (जयध. १, पृ. २२३); सद्दत्थणिरवेक्खा अत्थणया। (जयध. १, पृ. २२३)। ३. अर्थनयाः अर्थमेव प्राधान्येन शब्दोपसर्जनमिच्छन्ति। (सूत्रकृ. शी. वृ. २, ७, ८१, पृ. १८७)। ४. अर्थप्रधानो नयः अर्थनयः। (अष्टस. वृ.१६, पृ. २१२)।
१ जो नय अर्थ और व्यञ्जन पर्यायों के साथ विविध लिंग, संख्या, काल, कारक, पुरुष और उपग्रह के भेद से अभिन्न वर्तमान मात्र वस्तु को विषय किया करते हैं उन्हें अर्थनय कहते हैं।

अर्थनिर्यापणा—अर्थः सूत्राभिधेयं वस्तु, तस्य निरिति भृशं यापना निर्वाहणा पूर्वापरसाङ्गत्येन स्वयं ज्ञानतोऽन्येषां च कथनतो निर्गमना निर्यापणा। (उत्तरा. नि. शा. वृ. १-५८, पृ. ३९)।
सूत्रार्थ का पूर्वापर संगति के साथ अपने लिये ज्ञान से तथा अन्यों के लिए वचनों से निर्वाह करना, इसका नाम अर्थनिर्यापणा है। यह वाचनासम्पत् का चतुर्थ भेद है।

अर्थपद—१. जेत्तिएहि अक्खरेहि अत्थोवलद्धी होदि, तं अत्थपदं। (धव. पु. ६, पृ. १९६; पु. १३, पृ. २६६)। २. जत्तिएहि अक्खरेहि अत्थोवलद्धी होदि, तेसिं अक्खराणं कलावो अत्थपदं णाम। (जयध. १, पृ. ९१); तत्थ जेहि अक्खरेहि अत्थोवलद्धी होदि तमत्थपदं। वाक्यमर्थपदमित्यनर्थान्तरम्। (जयध. २, पृ. १७); जत्तो सोदाराणं पयदत्थविसए सम्ममवगमो समुप्पज्जइ तमट्ठस्स वाचयं पदमट्ठपदमिदि भण्णदे। (जयध. पत्र ६८४)।
२ जितने अक्षरों के द्वारा अर्थका परिज्ञान हो जाता है उनके समुदायरूप पद का नाम अर्थपद है।

अर्थपर्याय—१. अगुरुलघुकगुणषड्वृद्धि-हानिरूपेण प्रतिक्षणं प्रवर्तमाना अर्थपर्यायाः। (प्रव. सा. जय. वृ. १–८०); प्रतिसमयपरिणतिरूपा अर्थपर्याया भण्यन्ते। (प्रव. सा. जय. वृ. २–३७)। २. सूक्ष्मोऽवाग्गोचरो वेद्यः केवलज्ञानिनां स्वयम्। प्रतिक्षणं विनाशी स्यात्पर्यायो ह्यर्थसंज्ञकः। (भावसं. वाम. ३७६)। ३. अर्थपर्यायो भूतत्व-भविष्यत्वसंस्पर्श-रहितशुद्धवर्तमानकालावच्छिन्नं वस्तुस्वरूपम्। (न्या. दी. पृ. १२०)। ४. प्रतिव्यक्त्यनुगतं सत्त्वं चार्थ-पर्यायः। (स्या. रह. पत्र १०)।

१ अगुरुलघु गुण के निमित्त से छह प्रकारकी वृद्धि एवं हानिरूप से जो प्रतिक्षण पर्यायें उत्पन्न होती हैं, उन्हें अर्थपर्याय कहते हैं।

अर्थपर्यायनैगम—अर्थपर्याययोस्तावद् गुण-मुख्यस्व-भावतः। क्वचिद्वस्तुन्यभिप्रायः प्रतिपत्तुः प्रजायते॥ यथा प्रतिक्षणध्वंसि सुखसंविच्छरीरिणः। (त. श्लो. १, ३३, २८–२९, पृ. २७०)।

दो अर्थपर्यायों में एक की गौणता और दूसरे की मुख्यता करके विवक्षित वस्तु के विषय में जो ज्ञाता का अभिप्राय होता है उसे अर्थपर्याय-नैगम कहते हैं। जैसे—शरीरधारी आत्मा का सुख-संवेदन प्रतिक्षण विनाश को प्राप्त हो रहा है। यहां पर उत्पाद-व्यय-ध्रौव्ययुक्त सत्तारूप अर्थपर्याय तो विशेषण होने से गौण है और संवेदनरूप अर्थपर्याय विशेष्य होने के कारण मुख्य है।

अर्थपर्यायाशुद्धद्रव्यनैगम—क्षणमेकं सुखी जीवो विषयीति विनिश्चयः। विनिर्दिष्टोऽर्थपर्यायाशुद्ध-द्रव्यगनैगमः॥ (त. श्लो. १, ३३, ४२ पृ. २७०)।

अर्थपर्यायको गौणरूपसे और अशुद्ध द्रव्य को प्रधान रूप से विषय करने वाले नय को अर्थपर्यायाशुद्ध-द्रव्यनैगमनय कहते हैं। जैसे—विषयी जीव एक क्षण मात्र सुखी है। यहां पर सुखरूप अर्थपर्याय तो गौण है और संसारी जीवरूप अशुद्ध द्रव्य मुख्य है।

अर्थरुचि—देखो अर्थ (सम्यक्त्व)। वचनविस्तार-विरहितार्थग्रहणजनितप्रसादा अर्थरुचयः। (त. वा. ३, ३६, २)।

वचनविस्तार से रहित अर्थ के ग्रहण से ही जिनके प्रसन्नता—तत्त्वरुचि—प्रादुर्भूत हुई है वे अर्थरुचि दर्शन-आर्य कहलाते हैं।

अर्थविज्ञान—अर्थविज्ञानमूहापोहयोगान्मोह-सन्देह-विपर्यासव्युदासेन ज्ञानम्। (योगशा. स्वो. विव. १, ५१; श्रा. गु. वि. पृ. ३७)।

ऊहापोहपूर्वक वस्तु-गत संशय, विपर्यास और मोह (अनध्यवसाय) को दूर करके यथार्थ जानने को अर्थविज्ञान कहते हैं।

अर्थविनय—१. अब्भासवित्ति-छंदाणुवत्तणं देस-कालदाणं च। अब्भुट्ठाणं अंजलि-आसणदाणं च अत्थ-कए॥ (दशवै. नि. ९–३१२; उत्तरा. नि. शा. वृ. १–२९, पृ. १६ उद्धृत)। २. अर्थप्राप्तिहेतोरीश्वरा-द्यनुवर्तनमर्थविनयः। (उत्तरा. नि. शा. वृ. १–२९, पृ. १७)।

१ राजा आदि के समीप में स्थित रहना, उनके अभि-प्राय के अनुसार कार्य करना, देश-काल के अनुसार प्रस्ताव उपस्थित करना तथा उठकर खड़े हो जाना व उन्हें आसन देना इत्यादि जो अर्थ की प्राप्ति के लिये विनय की जाती है वह सब अर्थविनय कह-लाता है।

अर्थ-व्यञ्जनपर्यायार्थनैगम— १. अर्थ-व्यञ्जन-पर्यायौ गोचरीकुरुते परः। धार्मिके सुखजीवित्व-मित्येवमनुरोधतः॥ (त. श्लो. १, ३३, ३५ पृ. २७०)। २. तत्र सूक्ष्मः क्षणक्षयोऽवाग्गोचरोऽर्थप-र्यायार्थो वस्तुनो धर्मः। स्थूलः कालान्तरस्थायी वाग्गोचरो व्यञ्जनपर्यायोऽर्थधर्मः। एतद्धर्मद्वयास्ति-त्वावलम्बी अर्थव्यञ्जनपर्यायार्थनैगमो भवति। (त. सुखबो. १–३३)।

१ जो अर्थपर्याय और व्यञ्जनपर्याय इन दोनों को एक साथ विषय करे, उसे अर्थ-व्यञ्जनपर्यायार्थ नैगमनय कहते हैं। जैसे—धर्मात्मा सुखजीवी होता है।

अर्थशुद्धि—१. व्यञ्जनशब्दस्य सान्निध्यादर्थशब्दः शब्दाभिधेये वर्तते। तेन सूत्रार्थोऽर्थ इति गृह्यते। तस्य का शुद्धिः? विपरीतरूपेण सूत्रार्थनिरूपणा-न्याम् अर्थाधारत्वान्निरूपणाया अर्थपरीतस्य अर्थ-शुद्धिरित्युच्यते। (भ. आ. विजयो. टी. ११३)। २. अर्थशुद्धिः सम्यक्सूत्रार्थनिरूपणा। (भ. आ. मूला. टी. ११३)।

२ सूत्र के अर्थ के सम्यक् प्रतिपादन को अर्थशुद्धि कहते हैं।

अर्थश्रावणविनय—प्रयत्नेन शिष्यमर्थं श्रावयति एषोऽर्थश्रावणविनयः। (व्यव. भा. मलय. वृ. १०, ३१३)।

शिष्य के लिए प्रयत्नपूर्वक सूत्र का अर्थ सुनाने को अर्थश्रावणविनय कहते हैं।

अर्थसम—अर्यते परिच्छिद्यते गम्यते इत्यर्थो द्वादशांगविषयः, तेण अत्थेण समं सह वट्टदि त्ति अत्थसमं। दव्वसुदाइरिये अप्पवेक्खिय संजमजणिदसुदणाणावरणक्खओवसमसमुप्पणवहिरंगसुदं सयंबुद्धाधारमत्थसमं इदि वुत्तं होदि। (धव. पु. ६, पृ. २५६); कारकभेदेन (पठनं) अर्थसमम्। (धव. पु. ६, पृ. २६१); गंथ-बीजपदेहि विणा संजमवलेण केवलणाणं व सयंबुद्धेसुप्पण्ण-कदि-अणियोगो अत्थेण सह वुत्तीदो अत्थसमं णाम। (धव. पु. ६, पृ. २६८); अत्थो गणहरदेवो, आगमसुत्तेण विणा सयलसुदणाणपज्जाएणं परिणदत्तादो। तेण समं सुदणाणं अत्थसमं। अथवा अत्थो बीजपदं, तत्तो उप्पण्णं सयलसुदणाणं अत्थसमं। (धव. पु. १४, पृ. ८)।

जो द्वादशांग के विषयभूत अर्थ के साथ रहता है, वह आगम का अर्थसम नामक अधिकार कहलाता है। तात्पर्य यह कि द्रव्यश्रुत के धारक आचार्यों की अपेक्षा न कर संयम से प्रादुर्भूत श्रुतज्ञानावरण के क्षयोपशम से जो श्रुत स्वयंबुद्धों के आश्रित होता है, वह अर्थसम कहलाता है।

अर्थसमय—१. तेषाम् (पञ्चास्तिकायानाम्) एवाभिधान-प्रत्ययपरिच्छिन्नानां वस्तुरूपेण समवायः संघातोऽर्थसमयः, सर्वपदार्थसार्थ इति यावत्। (पंचा. का. अमृत. वृ. ३)। २. तेन द्रव्यागमरूपशब्दसमयेन वाच्यो भावश्रुतरूपज्ञानसमयेन परिच्छेद्यः पञ्चानामस्तिकायानां समूहोऽर्थसमय इति भण्यते। (पंचा. का. जय. वृ. ३)।

२ द्रव्यागमरूप शब्दसमय के द्वारा कहे गये और भावश्रुतरूप ज्ञानसमय के द्वारा जाने गये पांच अस्तिकायरूप पदार्थों के समुदाय को अर्थसमय कहते हैं।

अर्थसंक्रान्ति—१. द्रव्यं विहाय पर्यायमुपैति, पर्यायं त्यक्त्वा द्रव्यमित्यर्थसंक्रान्तिः। (स. सि. ९–४४; त. वा. ९–४४, पं. ११)। २. द्रव्यं हित्वा पर्याये, तं त्यक्त्वा द्रव्ये संक्रमणं अर्थसंक्रान्तिः। (त. श्लो. ९, ४४, १)। ३. प्राक् शब्दस्ततस्तत्त्वालम्बनमिदमस्य स्वरूपम्, अयमस्य पर्यायः, ततस्तदर्थचिन्तनं साकल्येन, ततः शब्दार्थयोः स्वरूपविशेषचिन्ताप्रतिबन्धः प्रणिधानमर्थसंक्रान्तिः। (त. भा. सिद्ध. वृ. ९–४६)। ४. अर्थादर्थान्तरापत्तिरर्थसंक्रान्तिरिष्यते। (ज्ञानार्णव ४२–१६)। ५. द्रव्यात् पर्यायार्थे पर्यायाच्च द्रव्यार्थे संक्रमणमर्थसंक्रान्तिः। (त. सुखबो. ९–४४)। ६. द्रव्यं विमुच्य पर्यायं गच्छति, पर्यायं विहाय द्रव्यमुपैति इति अर्थसंक्रान्तिः। (भावप्रा. टी. ७८)। ७. द्रव्यं ध्यायति, द्रव्यं त्यक्त्वा पर्यायं ध्यायति, पर्यायं च परिहाय पुनर्द्रव्यं ध्यायति इत्येवं पुनः पुनः संक्रमणमर्थसंक्रान्तिः। (कार्तिके. टी. ४८७; त. वृत्ति श्रुत. ९–४४)।

१ ध्यानावस्था में द्रव्य का चिन्तवन करते हुए पर्याय का और पर्याय का चिन्तवन करते हुए द्रव्य का चिन्तवन करने लगना, यह अर्थसंक्रान्ति है।

अर्थसिद्ध—××× पउरत्थो अत्थपरो व मम्मणो अत्थसिद्धत्ति ॥ (आव. नि. ९३५)।

राजगृहनिवासी मम्मण के समान जो प्रचुर अर्थ (धन) के संग्रह में तत्पर रहता है वह अर्थसिद्ध कहलाता है।

अर्थाचार — अर्थोऽभिधेयोऽनेकान्तात्मकस्तेन सह पाठादिः अर्थाचारः। (मूला. वृ. ५–७२)।

अनेकान्तात्मक अर्थ के साथ—नयाश्रित अभिप्रायपूर्वक—शास्त्र का पाठ आदि करने को अर्थाचार कहते हैं।

अर्थापत्ति—१. अर्थापत्तिरियं चिन्ता मेयान्यापोहनोहनम्। (सिद्धिवि. ३–६, पृ. १८२)। २. प्रमाणषट्कविज्ञातो यच्चालुः (योऽर्थः) साध्याभावे नियमेनाभवन् यत्रादृष्टमर्थं कल्पयेत् सा अर्थापत्तिः। (सिद्धिवि. टी. ३–६, पृ. १८२)। ३. अर्थापत्तिरपि दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यते इत्यदृष्टार्थकल्पना। ××× प्रत्यक्षादिभिः षड्भिः प्रमाणैः प्रसिद्धो योऽर्थः स येन विना नोपपद्यते तस्यार्थस्य कल्पनमर्थापत्तिः। (प्र. क. मा. पृ. १८७)। ४. याऽसौ "प्रमाणषट्कविज्ञातो यत्रार्थोऽन्यथाभवन्। अदृष्टं कल्पयेदन्यं सार्थापत्तिरुदाहृता॥" इत्येतल्लक्षणलक्षिता मीमांसकैः परिकल्पितार्थापत्तिः सा ×××। (न्यायकु. ६–२१, पृ. ५०५)।

३ प्रत्यक्षादि छह प्रमाणों के द्वारा जाना गया अर्थ

जिस अदृष्ट पदार्थ के विना सम्भव नहीं है, उसकी कल्पना जिस प्रमाण में की जाती है, उसका नाम अर्थापत्ति है। जैसे—नीचे जलप्रवाह को देखकर ऊपर संजात अदृष्ट वृष्टि की कल्पना।

अर्थापत्तिदोष—अर्थापत्तिदोषो यत्रार्थादनिष्टापत्तिः। यथा—'ब्राह्मणो न हन्तव्यः' इत्यर्थादब्राह्मणघातापत्तिः। (आव. हरि. व मलय. वृ. नि. ८८३)।

जहां पर अभीष्ट अर्थ से अनिष्ट की आपत्ति आवे उसे अर्थापत्तिदोष कहते हैं। जैसे—'ब्राह्मण की हत्या नहीं करना चाहिए' इस अभीष्ट अर्थसे अब्राह्मणघात की आपत्ति। यह ३२ सूत्रदोषों में से एक है।

अर्थाय क्रिया—अत्रानिर्वाहे ग्लानादौ वाऽनेषणीयग्रहणमर्थाय क्रिया। (धर्मसं. मान. स्वो. वृ. ३–२७, पृ. ८२)।

निर्वाह न होने पर या रोगादि से पीड़ित होने पर अनेषणीय (नहीं लेने योग्य) भी आहार के ग्रहण करने को अर्थाय क्रिया कहते हैं। यह पाप के हेतुभूत १३ क्रियास्थानों में प्रथम है।

अर्थावग्रह—१. व्यक्तग्रहणमर्थावग्रहः। (स. सि. १–१८; त. वा. १, १८,२; त. सुखबो. १–१८)। २. व्यञ्जनाऽवग्रहचरमसमयोपात्तशब्दाद्यर्थविग्रहणलक्षणोऽर्थावग्रहः। (आव. नि. हरि. वृ.३, पृ. १०)। ३. अत्थस्स ओग्गहो अत्थोग्गहो, सो य वंजणावग्गहातो चरमसमयाणंतरं एकसमयं अविसव्विदिय-[अविसिट्ठिदिय-] गेण्हतो अत्थावग्गहो भवति, चक्खिदियस्स मणसो य वंजणाभावे पढमं चेव जं अविसिट्ठमत्थग्गहणकाले यो एगसमयं सो अत्थोग्गहो भाणियव्वो। (नन्दी. चू. पृ. २६)। ४. अप्राप्तार्थग्रहणमर्थावग्रहः। (धव. पु. १, पृ. ३५४); अपत्तत्थग्गहणमत्थावग्गहो। (धव. पु. ६, पृ. १६; पु. ६, पृ. १५६; पु. १३, पृ. २२०)। ५. दूरेण य जं गहणं इंदिय-णोइंदिएहिं अत्थिपक्कं। अत्थावग्गहणाणं णायव्वं तं समासेण॥ मण-चक्खूविसयाणं णिद्दिट्ठा सव्वभावदरसीहिं। अत्थावग्गहबुद्धी णायव्वा होदि एक्का दु। (जं. दी. प. १३–६६ व ६८)। ६. प्राप्ताप्राप्तार्थबोधावग्रहौ व्यंजनार्थयोः (अप्राप्तार्थबोधोऽर्थस्यावग्रहः)। (आचा. सा. ४–११)। ७. अर्यते इत्यर्थः, अर्थस्यावग्रहणम् अर्थावग्रहः, सकलरूपादिविशेषनिरपेक्षाऽनिर्देश्यसामान्यमात्ररूपार्थग्रहणम् एकसामयिकम् इत्यर्थः। (नन्दी. मलय. वृ. २७, पृ. १६८)। ८. तत्र अवग्रहणमवग्रहः, अर्थस्यावग्रहोऽर्थावग्रहः, अनिर्देश्यसामान्यरूपाद्यर्थग्रहणमिति भावः। आह च नन्द्यध्ययनचूर्णिकृत्—सामन्नस्स रूवाइविसेसणरहियस्स अनिद्देस्सस्सवग्गहणं अवग्गह इति। (प्रज्ञाप. मलय. वृ. १५–२००, पृ. ३१०)। ९. व्यंजनावग्रहचरमसमयोपात्तशब्दाद्यर्थविग्रहलक्षणोऽर्थावग्रहः सामान्यमात्रानिर्देश्यग्रहणमेकसामयिकमर्थावग्रह इति भावः। (आव. मलय. वृ. ३, पृ. २५)। १०. अर्थावग्रहस्तु किमपीदमित्येतावन्मात्रो मनःषष्ठैः पञ्चभिरिन्द्रियैर्वस्त्ववबोधः। (कर्मस्तव गो. वृ. ९–१०, पृ. ८१)। ११. अर्थस्यावग्रहणमवग्रहोऽर्थपरिच्छेदः। (कर्मवि. व्या. गा. १३)। १२. अर्यत इत्यर्थः, तस्य शब्द-रूपादिभेदानामन्यतरेणापि भेदेनानिर्धारितस्य सामान्यरूपस्यावग्रहणमर्थावग्रहः, किमपीदमित्यव्यक्तज्ञानमित्यर्थः। (कर्मवि. दे. स्वो. वृ. ५, पृ. १२; प्रव. सारो. वृ. १२५३)। १३. शब्दादेर्यः परिच्छेदो मनाक् स्पष्टतरो भवेत्। किंचिदित्यात्मकः सोऽयमर्थावग्रह उच्यते॥ (लोकप्र. ३–७०९)।

१ व्यक्त पदार्थ के अवग्रह को अर्थावग्रह कहते हैं। २ व्यंजनावग्रह के अन्तिम समय में गृहीत शब्दादि अर्थ के अवग्रहण का नाम अर्थावग्रह है। ४. अप्राप्त पदार्थ के ग्रहण को अर्थावग्रह कहते हैं।

अर्धमागधी भाषा—१. मगहद्धविसयभासाणिबद्धं अद्धमागहं अट्ठारसदेसीभासाणियतं वा अद्धमागहं। (निशीथचूर्णि—पाइयसद्दमहण्णओ प्रस्ता. पृ. २१, सन् १९२८)। २. प्राकृतादीनां षण्णां भाषाविशेषाणां मध्ये या मागधी नाम भाषा 'रसोर्लशौ मागध्याम्' इत्यादिलक्षणवती सा असमाश्रितस्वकीयसमग्रलक्षणाऽर्धमागधीत्युच्यते। (समवा. अभय. वृ. ३४, पृ. ५९)।

१ जो भाषा आधे मगध देश में बोली जाती थी, अथवा जो अट्ठारह देशी भाषाओं में नियत थी, उसका नाम अर्धमागधी है।

अर्पित—१. अनेकान्तात्मकस्य वस्तुनः प्रयोजनवशाद्यस्य कस्यचिद्धर्मस्य विवक्षया प्रापितं प्राधान्यमर्पितमुपनीतमिति यावत्। (स. सि. ५–३२; त. सुखबो. ५–३२)। २. धर्मान्तरविवक्षाप्रापितप्राधा-

न्यमर्पितम् । अनेकान्तात्मकस्य वस्तुनः प्रयोजनवशात् यस्य कस्यचिद् धर्मस्य विवक्षया प्रापितप्राधान्यम् अर्थरूपमर्पितमुपनीतमिति यावत्। (त. वा. ५, ३२, १)। ३. अर्पितं निर्दर्शितमुपात्तं विवक्षितमित्यनर्थान्तरम् । (त. भा. हरि. वृ. ५–३१)। ४. अर्पितं निर्दर्शितमुपात्तम् । (त. भा. सिद्ध. वृ. ५–३१)। ५. वस्तु तावदनेकान्तात्मकं वर्तते । तस्य वस्तुनः कार्यवशात् यस्य कस्यचित् स्वभावस्य प्रापितमर्पितं प्राधान्यम् उपनीतं विवक्षितामिति यावत्। (त. वृत्ति श्रुत. ५–३२)।

१ प्रयोजन के वश अनेकान्तात्मक वस्तु के जिस किसी धर्म को विवक्षावश जो मुख्यता प्राप्त होती है उसे अर्पित कहते हैं।

अर्हद्भाव—सम्मद्दंसणि पस्सइ जाणइ णाणेण दव्व-पज्जाया । सम्मत्तगुणविसुद्धो भावो अरुहस्स णायव्वो ॥ बोधप्रा. ४१)।

सम्यक्त्व गुण से विशुद्ध होकर जो दर्शन से द्रव्यों और उनकी पर्यायों को देखता है, तथा ज्ञान से उन्हें जानता है, यह अर्हन्त का स्वरूप है।

अर्हद्वर्णजनन— १. अर्हदादीनां यशोजननं विदुषां परिषदि अन्येषामविश्ववेदिनां दृष्टेष्टविरुद्धवचनताप्रदर्शनेन निवेद्य तत्संवादिवचनतया महत्ताप्रख्यापनं भगवतां वर्णजननम् ॥ (भ. आ. विजयो. ४७)। २. सुगतादीनां दृष्टेष्टविरुद्धवचनताप्रकाशनेनासर्वज्ञत्वं प्रज्ञाप्य तत्संवादिवचनतया महत्त्वप्रख्यापनमर्हतां वर्णजननम् । (भ. आ. मूला. ४७)।

सर्वज्ञता से रहित अन्य— बुद्ध, कपिल व कणाद आदि के— वचनों में प्रत्यक्ष व अनुमान से विरोध दिखला कर भगवान् अर्हन्त के वचनों में विसंवाद रहित होने से महत्त्व को प्रकट करना, इसका नाम अर्हद्वर्ण जनन है।

अर्हन्—१. अरिहंति णमोक्कारं अरिहा पूजा सुरुत्तमा लोए। रजहंता अरिहंति य अरहंता तेण उच्चंते ॥ हंता अरिं च जम्मं अरहंता तेण वुच्चंति ॥ अरिहंति वंदण-णमंसणाणि अरिहंति पूय-सक्कारं। अरिहंति सिद्धिगमणं अरहंता तेण उच्चंति ॥ (मूला. ७–४ व ७,६४–६५)। २. घणघाइकम्मरहिया केवलणाणाइपरमगुणसहिया । चोत्तीसातिसयजुदा अरिहंता एरिसा होंति ॥ (नि. सा. ७१)। ३. तेरहमे गुणठाणे सजोइकेवलिय होइ अरिहंतो। चउतीसअइसयगुणा होंति हु तस्सट्ठपडिहारा ॥ (बोधप्रा. ३२) ४. देवासुर-मणुएसुं अरिहा पूआ सुरुत्तमा जम्हा। अरिणो हंता रयं हंता अरिहंता तेण वुच्चंति ॥ (आव. नि. ९२२)। ५. वंदणा-णमंसणा-पूयणादि अरहंतीति अरहंता, अरिणो वा हंता अरिहंता । (नन्दी. चू. पृ. ३८)। ६. अशोकाद्यष्टमहाप्रातिहार्यादिरूपां पूजामर्हन्तीत्यर्हन्तः, तीर्थंकरा इत्यर्थः। (श्रा. प्र. टी. १, नन्दी. मलय. वृ. सू. ४०, पृ. १९२; पंचसूत्र व्या. ४; ललितवि. पृ. ७६ व ८६; आव. हरि. वृ. नि. ७०, पृ. ४८; नि. १७९, पृ. ११९; नि. ४१७, पृ. १६६)। ७. अरिहन्ति, अर्हन् अशोकादिमहापूजार्हत्वात्, अविद्यमानं वा रहः एकान्तं प्रच्छन्नं सर्वज्ञत्वाद् यस्य सोऽरहाः। (औपपा. अभय. वृ. १०, पृ. १५; दशवै. नि. हरि. वृ. १–९०, पृ. ६२; आव. नि. मलय. वृ. ७० व १७६, पृ. ७९ व १९१)। ८. अतिशयपूजार्हत्वाद्वार्हन्तः । स्वर्गावतरण-जन्माभिषेक - परिनिष्क्रमण-केवलज्ञानोत्पत्तिपरिनिर्वाणेषु देवकृतानां पूजानां देवासुर-मानवप्राप्तपूजाभ्योऽधिकत्वादतिशयानामर्हत्वात् योग्यत्वात् अर्हन्तः। (धव. पु. १, पृ. ४४)।

१ भगवान् अरहंत चूंकि नमस्कार व पूजा के योग्य होते हुए देवों में सर्वश्रेष्ठ हैं, तथा ज्ञानावरण और दर्शनावरण रूप रज एवं मोह और अन्तराय रूप अरि के विघातक हैं; अतएव वे 'अर्हन्' इस सार्थक नाम से प्रसिद्ध हैं।

अलङ्कृत—१. अन्यान्यस्वरविशेषकरणेन यदलंकृतमिव गीयते तदलङ्कृतम् । (रायप. पृ. १३१)। २. अलङ्कृतमुपमाद्यलङ्कारोपेतम् । (व्यव. भा. मलय. वृ. ७–१९०)। ३. अन्योऽन्यस्फुटशुभस्वरविशेषाणां करणादलङ्कृतम् । (जम्बूद्वी. वृ. १–६)।

१ विविध स्वरविशेषोंके करनेसे जो अलंकृतके समान गाया जाता है उसे अलंकृत कहा जाता है। २ उपमा आदि अलंकारों से युक्त होने के कारण जिनवचन को अलंकृत—अलंकार गुण युक्त—माना जाता है।

अलात—अलायं नाम उम्मुआहियं पंजर-(पज्ज.)-लियं। (दशवै. चू. पृ. १५६)।

उल्मुक—अर्धदग्ध—जलते हुए काष्ठका नाम अलात है।

अलाभ—इच्छिदट्ठोवलद्धी लाहो णाम, तव्विवरीयो अलाहो। (धव. पु. १३, पृ. ३३४)।
इच्छित पदार्थ की प्राप्तिरूप लाभ से विपरीत अलाभ कहलाता है।

अलाभविजय—१. वायुवदसंगादनेकदेशचारिणोऽभ्युपगतैककालसम्भोजनस्य वाचंयमस्य तत्समितस्य वा सकृत्स्वतनुदर्शनमात्रतंत्रस्य पाणिपुटमात्रपात्रस्य वहुपु दिवसेपु वहुपु च गृहेपु भिक्षामनवाप्याऽप्यसंक्लिष्टचेतसो दातृविशेषपरीक्षानिरुत्सुकस्य लाभादप्यलाभो मे परमं तप इति सन्तुष्टस्यालाभविजयोऽवसेयः। (स. सि. ९–९; त. वृत्ति श्रुत. ९–९)। २. अलाभेऽपि लाभवत्सन्तुष्टस्यालाभविजयः। वायुवदनेकदेशचारिणः, अप्रकाशितवीर्यस्याभ्युपगतैककालभोजनस्य, सकृन्मूर्तिसंदर्शनव्रतकालस्य 'देहि' इति असभ्यवाक्प्रयोगादुपरतस्य अनुपात्तविग्रहप्रतिक्रियस्य, अद्येदं श्वश्चेदम् इति व्यपेतसङ्कल्पस्य, एकस्मिन् ग्रामे अलब्ध्वा ग्रामान्तरान्वेषणनिरुत्सुकस्य, पाणिपुटमात्रपात्रस्य, वहुपु दिवसेपु वहुपु च गृहेपु भिक्षामनवाप्याऽप्यसंक्लिष्टचेतसः, नायं दाता तत्रान्यो वदान्योऽस्तीति व्यपगतपरीक्षस्य, लाभादप्यलाभो मे परमं तपः इति सन्तुष्टस्य अलाभविजयोऽवसेयः। (त. वा. ९, ९, २०। ३. अलाभेऽपि लाभादलाभो मे परं तपोवृद्धिरिति संकल्पेनालाभपरीषहसहनम्। (भ. आ. विजयो. टी. ११६)।
१ जो वायु के समान परिग्रह से रहित होकर अनेक देशों में गमन करता है, जिसने दिन में एक ही वार भोजन लेने का नियम स्वीकार किया है, जो मौन के साथ समितियों का पालन करता है, वचन से किसी प्रकारकी याचना न करके जो केवल शरीर को दिखलाता है, हाथ ही जिसके पात्र हैं, तथा वहुत दिन व वहुत घरों में घूमकर भी भिक्षा के न प्राप्त होने पर संक्लेश से रहित होता हुआ लाभ से अलाभ को ही श्रेष्ठ समझ कर सन्तुष्ट रहता है, ऐसा साधु अलाभविजयी होता है

अलाभपरीषहजय—देखो अलाभविजय। १. अलाभः अन्तरायकर्मोदयादाहाराद्यलाभकृतपीडा, [तस्य परिषहनम् अलाभपरीषहजयो भवति]। (मूला. वृ. ५–५८)। २. अलाभस्तु याचिते सति प्रत्याख्यानं विद्यमानमविद्यमानं वा न ददाति, यस्य स्वं तत्कदाचिद् वा दत्ते यत्किञ्चित्, अन्तरायतिरोभो न यच्छति सति? × × × अलाभेऽपि समचेतसैव अविकृतस्वान्तेनैव भवितव्यमित्यलाभपरीषहजयः। (त. भा. सिद्ध वृ. ९–९)। ३. हं हो देह सहायतां नव समुद्दिश्यैव पोष्यो मया पूर्तो मत्तपसो गृहाविविमतो भ्रान्त्वाऽप्यनाप्तेऽशने। दोषः कोऽपि न विद्यते मम पुनर्लाभादलाभक्षमा तां पूर्ति प्रतनोत्यतः प्रियतमैवेत्यलाभक्षमा॥ (आचा. सा. ७–१४)। नानादेशविहारिणो विभवमपेक्ष्य वहूच्चनीचगृहेपु भिक्षामनवाप्याऽप्यसंक्लिष्टचेतसो दातृविशेषपरीक्षानिरुत्सुकस्य 'अलाभो मे परमं तपः' इत्येवमधिकगुणमलाभं मन्यमानस्य यदलाभपीडासहनं सोऽलाभपरीषहजयः। (पंचसं. मलय. वृ. ४-२२)। ५. निःसंगो वहुदेशचार्यनिलवन्मौनी विकायप्रतीकारोऽद्येदमिदं श्व इत्यविमृशन् ग्रामेऽस्तभिक्षः परे। वह्वोकस्वपि वह्वहं मम परं लाभादलाभस्तपः स्यादित्यात्तधृतिः पुरो स्मरयति स्मार्तानिलाभं सहन्॥ (अन. ध. ६–१०३)। ६. यो मुनिरङ्गीकृतैकवारनिर्दोपभोजनः चरण्युरिवानेकदेशचारी मौनवान् वाचंयमः समो वा सकृत् निजशरीरदर्शनमात्रतंत्रः करयुगलमात्राऽमत्रः वहुभिर्दिवसैरप्यनेकमन्दिरेपु भोजनमलब्ध्वापि अनार्त-रौद्रचेताः दाम्यदातृपरीक्षणपराङ्मुखो लाभादलाभो वरं तपोवृद्धिहेतुः परमं तप इति सन्तुष्टचेताः भवति स मुनिरलाभविजयी वेदितव्यः। (त. वृत्ति श्रुत. ९–९)।
देखो अलाभविजय।

अलीक—तत्रालीकं साधुमसाधुं ब्रवीति, असाधु साधुमित्यादि। (बृहत्क. वृ. ७५३)।
जो यथार्थ साधु को असाधु और असाधु को साधु कहता है वह अलीकरूप असत् वचन का भाषी होता है। यह भाषाचपल के चार भेदों में असत्प्रलापी नामक प्रथम भेद है।

अलेवड—१. अलेवडं यच्च हस्ते न सज्जति। (भ. आ. विजयो. २२०)। २. अलेवडं हस्तालेपकारि मथितादिकम् (भ. आ. मूला. टी. २२०)।
जो हाथ में लिप्त न हो ऐसे छांछ आदि को अलेवड आहार कहते हैं।

अलेश्य (अलेस्सिग्र) — १. किण्हादिलेस्सरहिया संसारविणिग्गया अणंतसुहा। सिद्धिपुरीसंपत्ता अलेस्सिया ते मुणेयव्वा॥ (प्रा. पंचसं. १-१५३; धव. पु. १, पृ. ३९० उ.)। २. षड्लेश्याभावेऽलेश्याः (पंच.

पु. १, पृ. ३६०); लेस्साए कारणकम्माणं खए-णुप्पण्णजीवपरिणामो खइया लद्धी, तीए अलेस्सिओ होदि। (धव. पु. ७, पृ. १०६)।

१ कृष्णादि छहों लेश्याओं से रहित जीवों को—अयोगिकेवली और सिद्धों को—अलेश्य कहते हैं।

आचारविनय—तत्राचारविनयः स्वस्य परस्य वा संयमतपोगण[गुण-]प्रतिमाविहारादिसामाचारीसाधनलक्षणः। (गु. गु. षट्. स्वो. वृ. ३७, पृ. ८६)। संयम, तपोगुण, प्रतिमा (श्रावक के स्थानभेद) एवं विहारादिरूप समाचारी के सिद्ध करने का नाम आचारविनय है।

आचाराङ्ग—देखो आचार। १. कथं चरे कथं चिट्ठे कथमासे कथं सए। कथं भुंजेज्ज भासेज्ज कथं पावं ण वज्झदि ॥ जदं चरे जदं चिट्ठे जदमासे जदं सये। जदं भुंजेज्ज भासेज्ज एवं पावं ण वज्झइ ॥ (मूला. १०–१२१, १२२)। २. एत्थायारंगमट्ठारहपदसहस्सेहि १८००० "कधं चरे कधं चिट्ठे........." एवमादियं मुणीणमायारं वण्णेदि। (धव. पु. १, पृ. ९९; जयध. १, पृ. १२२)। ३. अष्टादशपदसहस्रपरिमाणं गुप्ति-समितियत्याचारसूचकमाचाराङ्गम् १८०००। (श्रुतभ. टी. ७, पृ. १७२)। ४. यत्याचारसूचकं अष्टादशसहस्रपदप्रमाणमाचाराङ्गम्। (त. वृत्ति श्रुत. १–२०)। ५. आयारं पढमंगं तत्थट्ठारससहस्सपयमेत्तं। यत्थायरंति भव्वा मोक्खपहं तेण तं णाम ॥ कहं चरे कहं तिट्ठे कहमासे कहं सये। कहं भासे कहं भुंजे कहं पावं ण वंधइ। जदं चरे जदं तिट्ठे जदमासे जदं सये। जदं भासे जदं भुंजे एवं पावं ण वंधइ ॥ महव्वयाणि पंचेव समिदीओऽक्खरोहणं। लोओ आवासयाछक्कमवच्छण्हभूसया ॥ अदंतवणमेगभत्ती ठिदिभोयणमेव हि। यदीणं यं समायारं वित्यरेवं[णं]परूवए ॥ (अंगपण्णत्ती १, १५–१९)।

१ जिसमें कैसे चला जाय, कैसे खड़ा हुआ जाय, और कैसे बैठा जाय, इत्यादि मुनियों के आचार का वर्णन किया जाता है उसे आचारांग कहते हैं।

आचार्य (आयरिय)–१. सदा आयारविद्दण्हू सदा आयरियं चरे। आयारमायारवंतो आयरिओ तेण उच्चदे ॥ जम्हा पंचविहाचारं आचरंतो पभासदि। आयरियाणि देसंतो आयरिओ तेण वुच्चदे ॥ (मूला. ७, ८–९)। २. पंचाचारसमग्गा पंचिंदिय-दंतिदप्पणिद्दलणा। धीरा गुणगंभीरा आयरिया एरिसा होंति ॥ (नि. सा. ७३)। ३. पंचमहव्वयतुंगा तक्कालिय-स-परसमयसुदधारा। णाणागुणगणभरिया आइरिया मम पसीयंतु ॥ (ति. प. १-३)। ४. मंदर-रवि-ससि-उवही वसुहाणिलघरणिकमलगयणसमा। णिययं आयारवरा आयरिया ××× ॥ (पउमचरिय ८९–२०)। ५. आचरन्ति तस्माद् व्रतानीत्याचार्याः। (स. सि. ९–२४; त. श्लो. ९–२४; त. सुखबो. ९–२४; त. वृत्ति श्रुत. ९–२४)। ६. पंचविहं आयारं आयरमाणा तहा पभासंता। आयारं दंसंता आयरिया तेण वुच्चंति ॥ (आव. नि. ९९४)। ७. आचरन्ति यस्माद् व्रतानीत्याचार्यः। यस्मात् सम्यग्ज्ञानादिगुणाधारादाहृत्य व्रतानि स्वर्गापवर्गसुखामृतबीजानि भव्या हितार्थमाचरन्ति स आचार्यः। (त. वा. ९, २४, ३)। ८. पंचविधमाचारं चरन्ति चारयन्तीत्याचार्याः चतुर्दशविद्यास्थानपारगाः एकादशाङ्गधराः। आचाराङ्गधरो वा तात्कालिकस्वसमय-परसमयपारगो वा मेरुरिव निश्चलः, क्षितिरिव सहिष्णुः, सागर इव बहिःक्षिप्तमलः, सप्तभयविप्रमुक्त आचार्यः। (धव. पु. १, पृ. ४८); पवयण-जलहि-जलोयर-ण्हायामल-वुद्धि-सुद्ध-छावासो। मेरु व्व णिप्पकंपो सूरो पंचाणणो वज्जो ॥ देस-कुल-जाइसुद्धो सोमंगो संग-भंग-उम्मुक्को। गयण व्व णिरुवलेवो आइरियो एरिसो होई ॥ संगह-णिग्गहकुसलो सुत्तत्थ-विसारओ पहियकित्ती। सारण-वारण-साहण-किरियुज्जत्तो हु आइरियो ॥ (धव. पु. १, पृ. ४९ उद्धृत)। ९. पञ्चस्वचारेषु ये वर्तन्ते परांश्च वर्तयन्ति ते आचार्याः। (भ. आ. विजयो. तथा मूला. टी. ४४४)। १०. [आचारं] पञ्चप्रकारं स्वयमाचरन्ति तेभ्योऽन्ये चागत्याचरन्ति इत्याचार्याः। (प्रायश्चित्तवि. वृ. २५१)। ११. विचार्य सर्वमैतिह्यमाचार्यकमुपेयुषा। आचार्यवर्यानर्चामि संचार्य हृदयाम्बुजे ॥ (उपासका. ४८७)। १२. यस्मात् सम्यग्ज्ञानादिपञ्चाचाराधारादाहृत्य व्रतानि स्वर्गापवर्गसुखकल्पकुजबीजानि भव्या आत्महितार्थमाचरन्ति स आचार्यः। (चा. सा. पृ. ६६)। १३. पंचाचारसमग्गे पंचिंदयणिज्जिदे विगयमोहे। पंचमहव्वयणिलये पंचमगइणायगायरिए ॥ (जं. दी.

प. १-३)। १४. ये चारयन्त्याचरितं विचित्रं स्वयं चरन्तो जनमर्चनीयाः। आचार्यवर्या विचरन्तु ते मे प्रमोदमाने हृदयारविन्दे ॥ (अमित. श्रा. १-३)। १५. आचार्यः अनुयोगधरः। (आचा. शी. वृ. २, १, २७६, पृ. ३२२)। १६. सङ्ग्रहानुग्रहप्रौढो रूढः श्रुत-चरित्रयोः। यः पञ्चविधमाचारमाचारयति योगिनः ॥ वहिःक्षिप्तमलः सत्त्वगाम्भीर्यातिप्रसादवान्। गुणरत्नाकरः सोऽयमाचार्योऽवार्यधैर्यवान् ॥ (आचा. सा. २, ३२-३३)। १७. छत्तीसगुणसमग्गे पंचविहाचारकरणसंदरिसे। सिस्साणुग्गहकुसले धम्माइरिए सदा वंदे ॥ (लघु आ. भक्ति पृ. ३०५)। १८. पञ्चधाचारं स्वयमाचरन्ति शिष्यांश्चाचारयन्तीत्याचार्याः। (सा. ध.—क्रियाक. टी. पृ. १४२; कार्तिके. टी. ४५६); पञ्चधा चरन्त्याचारं शिष्यानाचारयन्ति च। सर्वशास्त्रविदो धीरास्ते आचार्याः प्रकीर्तिताः ॥ (क्रियाक. टी. पृ. १४३)। १९. दंसण-णाणपहाणे वीरिय-चारित्त-वरतवायारे। अप्पं परं च जुंजइ सो आइरियो मुणी भेओ ॥ (द्रव्यसं. ५२)। २०. आचाराराधनादि-चरणशास्त्रविस्तीर्णवहिरङ्गसहकारिकारणभूते व्यवहारपञ्चाचारे च स्वं परं च योजयत्यनुष्ठानेन सम्बन्धं करोति स आचार्यो भवति। (वृ. द्रव्यसं. ५२, पृ. १९२)। २१. आङित्यभिव्याप्त्या मर्यादया वा स्वयं पञ्चविधाचारं चरति आचारयति वा परान् आचार्यते वा मुक्त्यर्थिभिः आसेव्यते इति आचार्यः। (उत्तरा. नि. शा. वृ. १-५७, पृ. ३७; योगशा. स्वो. विव. ४-९०)। २२. आचार्योऽनुयोगाचार्यादिकः। (व्यव. भा. मलय. वृ. २-३४); आचार्यो गच्छाधिपतिः। (व्यव. भा. मलय. वृ. २-९४)। २३. पञ्चाचाररतो नित्यं मूलाचारविदग्रणीः। चातुर्वर्ण्यस्य सङ्घस्य यः स आचार्य इष्यते ॥ (नीतिसार १५)। २४. आचाराद्या गुणा अष्टौ तपो द्वादशधा दश। स्थितिकल्पः षडावश्यमाचार्योऽमीभिरन्वितः। (धर्मसं. श्रा. १०-११६)। २५. आचार्योऽनादितो रूढे योगादपि निरुच्यते। पञ्चाचारं परेभ्यः स आचारयति संयमी ॥ (लाटीसं. ४-१६७; पञ्चाध्यायी २-६४५)। २६. पडिरूवो तेयस्सी जुगप्पहाणागमो महुरवक्को। गंभीरो धीमंतो उवएसपरो अ आयरिओ ॥ (आ. दि. पृ. ११३ उ.)।

५ जिनसे भव्य जीव व्रतों का आचरण किया करते हैं वे आचार्य कहलाते हैं।

आचार्यपदायोग्य—हत्थे पाए कन्ने नासा उट्ठे विवज्जिया चेव। वामणग-वडभ-खुज्जा पंगुल-टुंटा य काणा य ॥ पच्छावि हुंति विगला आयरियत्तं न कप्पए तेसिं। सीसो ठावेअव्वो काणगमहिसो व नन्नम्मि ॥ (आ. दि. उद्धृत, पृ. ११३); पंचाचारविनिर्मुक्तः क्रूरः परुषभाषणः। कुरूपः खण्डिताङ्गश्च दुष्टदेशसमुद्भवः ॥ हीनजाति-कुलो मानी निर्विद्यश्चाविशेषवित्। विकत्थनश्च सासूयो वाह्यदृष्टिश्चलेन्द्रियः ॥ जनद्वेष्यः कातरश्च निर्गुणो निष्कलः खलः। इत्यादिदोषभाग् साधुर्नाचार्यपदमर्हति ॥ (आ. दि. पृ. ११३)।

जो दर्शनाचार आदि पाँच प्रकार के आचार से रहित हो, क्रूर हो, कठोर भाषण करने वाला हो, कुरूप हो, विकृत अंग हो, दुष्ट देश में उत्पन्न हुआ हो, जाति-कुल से हीन हो, अभिमानी हो, विद्याविहीन हो, विशेषज्ञ न हो, आत्मप्रशंसक हो, ईर्ष्यालु हो, वाह्य शरीरादि में दृष्टि रखने वाला हो, इन्द्रियों की चंचलता से युक्त हो, जनों से द्वेष रखने वाला हो, कातर हो, गुणहीन हो, कलाओं से शून्य हो, और दुष्ट हो; ऐसा साधु आचार्य पदके अयोग्य होता है।

आचार्यभक्ति—१. अर्हदाचार्येषु वहुश्रुतेषु प्रवचने च भावविशुद्धियुक्तोऽनुरागो भक्तिः (आचार्येषु भावविशुद्धियुक्तोऽनुराग आचार्यभक्तिः)। (स. सि. ६, २४; त. वा. ६, २४, १०)। २. आचार्येषु श्रुतज्ञान-दिव्यनयनेषु परहितकरप्रवृत्तिषु स्व-परसमयविस्तरनिश्चयज्ञेषु भावविशुद्धियुक्तोऽनुरागो भक्तिस्त्रिधा कल्प्यते। (चा. सा. पृ. २६)। ३. आचार्येषु अनुरागो भक्तिः। (भा. प्रा. टी. ७७)। ४. आचार्याणाम् अपूर्वोपकरणदानं सन्मुखगमनं संभ्रमविधानं पादपूजनं दान-सन्मानादिविधानं मनःशुद्धियुक्तोऽनुराग आचार्यभक्तिरुच्यते। (त. वृत्ति श्रुत. ६-२४)।

१ आचार्यों में भावविशुद्धियुक्त अनुराग रखने को आचार्यभक्ति कहते हैं।

आचार्यवर्णजनन—१. मुक्ताहार-पयोधर-निशाकर-वासराधीश्वर-कल्पमहीरुहादय इव प्रत्युपकारानपेक्षानुग्रहव्यापृताः, निर्वाणपुरप्रापणक्षमे मार्गे निर्गते स्थिताः, परानपि विनतान् विनेयान् प्रवर्तयन्तः,

आयतातिधवलज्ञानपृथुलदर्शनपक्ष्मलेक्षणाः, कुलीना विनता विभया विमाना विरागा विशल्या विमोहा वचसि तपसि महसि वा ऽद्वितीया इव भूषणं सूरय इति सूरिवर्णजननम् ।। (भ. आ. विजयो. टी. ४७)। २. पञ्चधाचारं स्वयमाचरन्ति शिष्यानाचारयन्ति इति आचार्याः । प्रत्युपकारनिरपेक्षपरोपकाराः, सुरभूधरवद्धीराः सर्वशास्त्रपारदृश्वानः स्वयं श्रेयःपथे स्थिताः, विनीतविनेयांस्तत्र स्थापयन्तः शुद्धदेश-कुल-जातयो विनयसिद्धाः मानमर्माविधो विगतराग-द्वेष-मोहाः शल्यव्यपेतास्तपसि तेजसि यशसि तरसि वचसि च निरौपम्या इति गुणग्रहणं सूरीणां वर्णजननम् । (भ. आ. मूला. टी. ४७) ।

१ आचार्य मुक्ताहार, मेघ, चन्द्रमा, सूर्य और कल्पवृक्ष आदि के समान प्रत्युपकार से निरपेक्ष होते हैं; स्वयं मोक्षमार्ग पर चलते हुए वे अन्य विनम्र शिष्यों को भी उस पर चलाते हैं; सर्व शास्त्रों के पारगामी होते हैं; राग, द्वेष, व मोह से रहित होते हैं; तथा निःशल्य, निर्भय, एवं निरभिमानी होते हैं; इस प्रकार से आचार्यों की प्रशंसा करने को आचार्यवर्णजनन कहते हैं ।

आचीर्ण (आचिण्ण)—देखो अभिहृत दोष । १. उजु तिहिं सत्तहिं वा घरेहिं जदि आगदं दु आचिण्णं । (मूला. ६-२०) । २. ऋजुवृत्त्या पङ्क्तिस्वरूपेण यानि त्रीणि सप्त गृहाणि वा व्यवस्थितानि तेभ्यस्त्रिभ्यः सप्तभ्यो वा गृहेभ्यो यद्यागतमोदनादिकं वाचिन्नं ग्रहणयोग्यम्, दोषाभावात् । (मूला. वृ. ६-२०) ।

सीधी पंक्ति में स्थित तीन या सात घरों से लाये गये आहार को आचीर्ण कहते हैं। ऐसा आहार साधु के लिए ग्राह्य होता है ।

आचेलक्य (अच्चेलक्क)—१. वत्थाजिण-वक्केण य अहवा पत्ताइणा असंवरणं । णिब्भूसण णिग्गंथं अच्चेलक्कं जगदि पूज्जं ।। (मूला. १-३०) । २. सकलपरिग्रहत्याग आचेलक्यम् । (भ. आ. विजयो. टी. ४२१) । ३. अविद्यमानं चेलं वस्त्रं यस्यासावचेलकस्तद्भावः आचेलक्यम् । (जीतक. चू. वि. व्या. पृ. ५३) । ४. चेलानां वस्त्राणां बहुधन-नवीनावदात-सुप्रमाणानां सर्वेषां वाऽभावः अचेलत्वमित्यर्थः । (समवा. अभय. वृ. २२, पृ. ३६) । ५. वल्कलाजिनवस्त्राद्यैरंगासंवरणं वरम् । आचेलक्यमलंकारानंगसंगविवर्जितम् ।। (आचा. सा. १-४२) । ६. नग्नता नाग्न्यमाचेलक्यमित्यर्थः, तदपि चाचेलक्यमिह श्रुतोपदेशेनान्यथा धारणं परिजीर्णाल्पमूल्यखण्डितासर्वतनुप्रावरणत्वं च, तत्रापि लोके नाग्न्यव्यपदेशप्रवृत्तिदर्शनात् । (पञ्चसं. मलय. वृ. ४-२३, पृ. १६०) । ७. आचेलक्कं वस्त्रादिपरिग्रहाभावो नग्नत्वमात्रं वा । (भ. आ. मूला. टी. ४२१) । ८. न विद्यते चेलं वस्त्रं यस्य सः अचेलकस्तस्य भावः आचेलक्यम्, विगतवस्त्रमित्यर्थः । (कल्पसूत्र वृ. १) ।

१ वस्त्र, चमड़ा, वक्कल अथवा पत्ता आदि में किसी से भी शरीर को आच्छादित नहीं करना; इस प्रकार समस्त परिग्रह के परित्याग का नाम आचेलक्य है । ६ जीर्ण, अल्प मूल्य वाले और खण्डित वस्त्र के धारण करने पर भी आचेक्य माना गया है ।

आच्छेद्य दोष—१. राया-चोरादीहिं य संजदभिक्खासमं तु दट्ठूण । बीहेदूण णिजुज्जं अच्छिज्जं होदि णादव्वं ।। (मूला. ६-२४) । २. अच्छेज्जं चाछिदिय जं सामी भिच्चमाईणं ।। (पंचाशक ६०८) । ३. भृत्यादेराच्छिद्य यद्दीयते तदाच्छेद्यम् । (आचाराङ्ग शी. वृ. २, १, सू. २६६, पृ. ३१७) । ४. राजामात्यादिभिर्भयमुपदर्श्य परकीयं यद्दीयते तदुच्यते अच्छेज्जं । (भ. आ. विजयो. व मूला. २३०; कार्तिके. टी. ४४९) । ५. अच्छेज्जं तिविहं—पहुअच्छेज्जं सामिअच्छेज्जं तेणअच्छेज्जं । (जीतक. चू. पृ. १५, पं. २०) । ६. प्रभुर्गृहादिनायकः, अन्येषां दरिद्रकौटुम्बिकानां बलाद् दातुमनीप्सितामपि यद् देयं ददाति तत् प्रभु-आच्छेद्यम् । स्वामी ग्रामादिनायकः स यदा साधून् दृष्ट्वा कलहेनेतरथा वा कौटुम्बिकेभ्योऽशनाद्युदाल्य ददाति तदा स्वाम्याच्छेद्यम् । स्तेनाश्चौराः ते सार्थकेभ्यो बलादाच्छिद्य यत् पाथेयादि साधुभ्यो दद्युस्तत् स्तेनविषयाच्छेद्यम् । (जीतक. चू. वि. व्या. पृ. ४६) । ७. नृप-तस्करभीत्यादेर्दत्तमाच्छेद्यमुच्यते ।(आचा. सा. ८-३४) । ८. यदाच्छिद्य परकीयं हठात् गृहीत्वा स्वामी प्रभुश्चौरो वा ददाति तदाच्छेद्यम् । (योगशा. स्वो. विव. १-३८, पृ. १३४) । ९. ××× आच्छेद्यं देयं राजादिभिर्भीषितैः । (अन. ध. ५, १७); यदा हि संयतानां भिक्षाश्रमं दृष्ट्वा याजा

तत्तुल्यो वा चौरादिर्वा कुटुम्बिकान् 'यदि संयतानामागतानां भिक्षादानं न करिष्यथ तदा युष्माकं द्रव्यमपहरिष्यामो ग्रामाद्वा निर्वासयिष्यामः' इति भीषयित्वा दापयति तदा दीयमानमाच्छेद्यनामा दोषः स्यात्। (अन. ध. टी. ५-१७)। १०. आच्छेद्यं यत् भृतकादिलभ्यमाच्छिद्य दीयते। (व्यव. भा. वृ. ३, पृ. ३५)। ११. यद्बलात् कस्मादपि उद्दाल्य गृही दत्ते तदाच्छेद्यम्। (गु. गु. षट्. स्वो. वृ. २०, पृ. ४९)। १२. राजभयाच्चौरभयाद्यद्दीयते तदाच्छेद्यम्। (भा. प्रा. टी. ९९)।

१ संयतों के भिक्षाश्रम को देख कर राजा, अमात्य अथवा चोर आदि के द्वारा भयभीत करके जो दान की योजना की जाती है; यह आच्छेद्य नामका दोष है।

आजीव—१. जाई कुल गण कम्मे सिप्पे आजीवणा उ पंचविहा। सूयाए असूयाए व अप्पाण कहेहि एक्केक्के॥ (पिण्डनि. ४३७)। २. आजीवे जाइ-कुलादिभिन्ने॥ (जीतक. चू. पृ. १५, पं. २६)। ३. अतीताद्यर्थसूचकं निमित्तं जाति-कुल-गण-कर्म-शिल्पानां कथनादिना आजीवनम्। (जीतक. चू. वि. व्या. पृ. ४६, १५-२५)।

१ जाति, कुल, गण, कर्म और शिल्पके भेद से आजीव पांच प्रकार का है। अपनी उक्त जाति आदि को सूचा से—अप्रगट रूप में—अथवा असूचा से—प्रगट रूप में—कह कर भोजन प्राप्त करना, यह आजीव नामका उत्पादन दोष है।

आजीवकुशील—आत्मनो जातिं कुलं वा प्रकाश्य यो भिक्षादिकमुत्पादयति स आजीवकुशीलः। केनचिदुपद्रुतः परं शरणं प्रविशति, अनाथशालां वा प्रविश्यात्मनश्चिकित्सां करोति स वाऽऽजीवकुश[शी]लः। (भ. आ. विजयो. टी. १९५०)।

अपनी जाति या कुल को प्रकट करके भिक्षादिक के उत्पन्न करने वाले साधु को आजीवकुशील कहते हैं। तथा किसी के द्वारा उपद्रव किये जाने पर दूसरे की शरण में जाने वाले और अनाथशाला में जाकर अपनी चिकित्सा कराने वाले साधु को भी आजीवकुश[शी]ल कहते हैं।

आजीव दोष—देखो आजीव। १. जादी कुलं च सिप्पं तवकम्मं ईसरत्त आजीवं। तेहि पुण उप्पादो आजीवदोसो हवदि एसो॥ (मूला. ६-३१)। २. आत्मनो जातिं कुलं च निर्दिश्य शिल्पकर्म तपः-कर्मेश्वरत्वं च निर्दिश्याजीवनं करोति यतोऽतः आजीववचनान्येतानि, तेभ्यो जातिकथनादिभ्यः पुनरुत्पाद आहारस्य योऽयं स आजीवदोषो भवत्येषः, वीर्यगूहन-दीनत्वादिदोषदर्शनादिति। (मूला. वृ. ६-३१)।

जाति, कुल, शिल्प, तप और ऐश्वर्यादि को प्रगट करके भिक्षा एवं वसति आदि को उत्पन्न करना; यह आजीव दोष है।

आजीवदोषदुष्टा वसति—१. आत्मनो जातिं कुलं ऐश्वर्यं वाभिधाय स्वमाहात्म्यप्रकटनेनोत्पादिता वसतिराजीवशब्देनोच्यते। (भ. आ. विजयो. २३०)। २. स्वस्य जातिं कुलमैश्वर्यमभिधाय माहात्म्यप्रकाशनेनोत्पादिता (वसतिः) आजीवदोषदुष्टा। (भ. आ. मूला. टी. २३०; कार्तिके. टी. ४४९-५०)।

अपनी जाति, कुल अथवा ऐश्वर्य के कथन द्वारा अपना माहात्म्य प्रगट करके वसति को प्राप्त करना; यह आजीव नामका वसतिदोष है। ऐसी वसति आजीवदोष से दूषित कही जाती है।

आजीवन—देखो आजीव। आजीवनं यदाहार-शय्यादिकं जात्याद्याजीवनेनोत्पादितम्। (व्यव. भा. मलय. वृ. ३-१६४, पृ. ३५)।

देखो आजीवदोष और आजीवदोषदुष्टा वसति।

आजीवना दोष—पिण्डार्थं दातुः स्वकजात्यादि स्वस्य प्रकाशयतः आजीवनादोषः। (गु. गु. ष. स्वो. वृ. २०, पृ. ४९)।

देखो आजीवदोष और आजीवदोषदुष्टा वसति।

आजीव (आजीविका) पिण्ड—१. जात्याद्याजीवनादवाप्त आजीविकापिण्ड.। (आचारा. शी. वृ. २, १, २७३, पृ. ३२०)। २. जाति-कुल-गण-कर्म-शिल्पादिप्रधानेभ्य आत्मनस्तद्गुणत्वारोपणं भिक्षार्थमाजीवपिण्डः। (योगशा. स्वो. विव. १-३८; धर्मसं. मान. स्वो. वृ. ३, २२, पृ. ४१)।

देखो आजीवदोष।

आजीवभय—आजीवो दर्शनोपादकस्तस्मिन् परेणोत्पाद्यमाने भयमाजीवभयम्। (ललितवि. मु. पंजिका पृ. ३८)।

देखो आजीविकाभय।

आजीविकाभय—१. आजीविकाभयं दुर्जीविकाभयम्। (आव. भा. हरि. वृ. १८४, पृ. ५७३)।

२. आजीविका आजीवनम्, तस्या उच्छेदेन भयमाजीविकाभयम् । (आव. भा. मलय. वृ. १८४, पृ. ५७३)। ३. आजीविका जीवनवृत्तिः, तदुपायचिन्ताजनितमाजीविकाभयम् । (गु. गु. ष. स्वो. वृ. ६, पृ. २५)।

२ आजीविका के नष्ट होने से जो भय उत्पन्न होता है उसे आजीविकाभय कहते हैं ।

आज्ञा (आणा)—१. आणा णाम आगमो सिद्धंतो जिणवयणमिदि एयट्ठो । एत्थ गाहाओ—सुणिउणमणाइणिहणं भूदहिदं भूदभावणमणग्घं । अमिदमजिदं महत्थं महाणुभावं महाविसयं ।। ज्झाएज्जो णिरवज्जं जिणाणमाणं जगप्पईयाणं । अणिउणजणदुण्णेयं णयभंगपमाणमगहणं ।। एसा आणा । (धव. पु. १३, पृ. ७०–७१); आणा सिद्धंतो आगमो इदि एयट्ठो । (धव. पु. १४, पृ. ३२६) । २. आज्ञाप्यते इत्याज्ञा—हिताहितप्राप्ति-परिहाररूपतया सर्वज्ञोपदेशः । (आचारा. शी. वृ. २, २, ७४, पृ. १०२)। ३. आज्ञा स्यादाप्तवचनम् । (त्रि. श. पु. च. २, ३, ४४१) । ४. उल्लंघने क्रोधादिभयजनिकेच्छाऽऽज्ञा । (शास्त्रवा. टी. ३–३) ।

१ आज्ञा से अभिप्राय आगम, सिद्धान्त अथवा जिनवाणी का है—ये सब शब्द समानार्थक हैं । २ वह महाप्रभावशालिनी जिन-आज्ञा जगत के जीवों को सन्मार्ग दिखलाने के लिए उत्तम दीपक के समान होकर उनके लिये हित की प्राप्ति और अहित के परिहार में समर्थ है ।

आज्ञाकनिष्ठता (आणाकणिट्ठदा)—१. आणा सिद्धंतो आगमो इदि एयट्ठो । तिस्से कणिट्ठदा सगखेत्ते थोवत्तं आणाकणिट्ठदा णाम । (धव. पु. १४, पृ. ३२६) ।

आज्ञा से आगम अभिप्रेत है । उस आगम की कनिष्ठता—हीनता या श्रुत की अल्पता—का नाम आगमकनिष्ठता है । यह आहार शरीर की उत्पत्ति में कारण होती है ।

आज्ञापनी (आणवणी)—१. आणवणी णाम जो जस्स आणत्तियं देइ सा आणवणी भवति । जहा गच्छ पच पठ कुरु भुङ्क्ष्व एवमादि । (दशवै. चू. ७, पृ. २३६) । २. स्वाध्यायं कुरुत, विरमतासंयमात् इत्यादिकानुशासनवाणी आणवणी । (भ. आ. विजयो. टी. ११९५) । ३. आज्ञाप्यतेऽनयेत्याज्ञापना[नी], आज्ञां तवाहं ददामीत्येवमादिवचनमाज्ञापनी भाषा । (मूला. वृ. ५–११८) । ४. 'इदं कुरु' इत्यादिका आज्ञापनी । (भ. आ. मूला. टी. ११९५) । ५. आज्ञापनं प्रभुत्वेनाऽऽदेशो यः स्वोक्तकारिणा । तत्किंचिदाशु कर्तव्यं यन्मयादिश्यते तव ।। (आचा. सा. ५–८६) । ६. आज्ञापनी कार्यनियोजनभाषा । यथा इदं कुर्याः इत्यादिः । (गो. जी. म. प्र. टी. २२५) । ७. इदं कुरु इत्यादिकार्यनियोजनभाषा आज्ञापनी । (गो. जी. जी. प्र. २२५) । ८. आज्ञापनी कार्ये परस्य यथेदं कुर्विति । (धर्मसं. मान. स्वो. वृ. ३–४१, पृ. १२३) । ९. आणावयणेण जुआ आणवणी पुव्वभणिअ भासाओ । करणाकरणाणियमा दुट्ठविवक्खाइ सा भिण्णा ।। (भाषार. ७३) ।

२ स्वाध्याय करो व असंयम से विरत होवो इत्यादि अनुशासनात्मक भाषा को आज्ञापनी भाषा कहते हैं ।

आज्ञारुचि (आणारुई)—१. रागो दोसो मोहो अन्नाणं जस्स अवगयं होइ । आणाए रोयंतो सो खलु आणारुई नाम ।। (उत्तरा. २८–२०; प्रव. सारो. ९५३) । २. भगवदर्हत्प्रणीताज्ञामात्रनिमित्तश्रद्धाना आज्ञारुचयः । (त. वा. ३, ३६, २) । ३. सर्वज्ञाज्ञानिमित्तेन षड्द्रव्यादिषु या रुचिः । साऽऽज्ञा ××× ।। (म. पु. ७४–४४१) । ४. राग-द्वेषरहितस्य पुंसः आज्ञयैव धर्मानुष्ठानगता रुचिराज्ञारुचिः । (धर्मसं. मान. स्वो. वृ. २, २२, पृ. ३७) । ५. आज्ञा सर्वज्ञवचनात्मिका, तया रुचिर्यस्य सः । (उत्तरा. नि. वृ. २८–१६) । ६. जिणआणं मन्नंतो जीवो आणारुई मुणेयव्वो । (गु. गु. ष. स्वो. वृ. १४, पृ. ३९) ।

२ भगवत् अर्हत्सर्वज्ञप्रणीत आगम मात्र के निमित्त से होने वाले श्रद्धान और श्रद्धावान् जीवों को भी आज्ञारुचि कहा जाता है ।

आज्ञाविचय — १. पंचत्थिकाय-छज्जीवणिकाये कालदव्वमण्णे य । आणागेज्झे भावे आणाविचयेण विचिणादि ।। (मूला. ५-२०२; भ. आ. १७११; धव. पु. १३, पृ. ७१ उद्.) । २. उपदेष्टुरभावान्मन्दबुद्धित्वात् कर्मोदयात् सूक्ष्मत्वाच्च पदार्थानां हेतुदृष्टान्तोपरमे सति सर्वज्ञप्रणीतमागमं प्रमाणीकृत्य 'इत्थमेवेदं नान्यथावादिनो जिनाः' इति गहनपदार्थश्रद्धानादर्थावधारणमाज्ञाविचयः । (स. सि. ९-३६; त. वा. ९, ३६, ४; भ. आ. मूला. टी. १७०८;

त. वृत्ति श्रुत. ९–३६); अथवा—स्वयं विदितपदार्थतत्त्वस्य सतः परं प्रति पिपादयिषोः स्वसिद्धान्ताविरोधेन तत्त्वसमर्थनार्थं तर्क-नय-प्रमाणप्रयोजनपरः स्मृतिसमन्वाहारः सर्वज्ञाज्ञाप्रकाशनार्थत्वादाज्ञाविचयः इत्युच्यते। (स. सि. ९–३६; भ. आ. मूला. टी. १७०८; त. वृत्ति श्रुत. ९–३६)। ३. आज्ञाप्रकाशनार्थो वा। अथवा सम्यग्दर्शनविशुद्धपरिणामस्य विदितस्व-परसमयपदार्थनिर्णयस्य सर्वज्ञप्रणीतानाहितसौक्ष्म्यानस्तिकायादीनर्थानवधार्य 'एवमेते' इत्यन्यं पिपादयिषतः कथामार्गे श्रुतज्ञानसामर्थ्यात् स्वसिद्धान्ताविरोधेन हेतु-नय-प्रमाणविमर्दकर्मणा ग्रहणसहिष्णून् कृत्वा प्रभापयतः तत्समर्थनार्थस्तर्क-नय-प्रमाणयोजनपरः स्मृतिसमन्वाहारः सर्वज्ञाज्ञाप्रकाशनार्थत्वादाज्ञाविचय इत्युच्यते। (त. वा. ९, ३६, ५)। ४. आणाविजए णाम—तत्थ आणा णाम आगमेति वा सुत्तं ति वा वीतरागादेसो वा एगट्ठा। विजओ णाम मग्गणा। कहं? जहा जे सुहुमा भावा अणिंदियगिज्झा अवज्झा चक्खुविसयातीया केवलनाणीपच्चक्खा ते वीयरागवयणं ति काऊण सद्दहइ। भणितं च—पंचत्थिकाए आणाए जीवे आणाए छव्विहे। सद्दहे जिणपण्णत्ते धम्मज्झाणं झियायइ॥ तहा—तमेव सच्चं नीसंकं जं जिणेहि पवेदितं। भणितं च—वीयरागो हि सव्वण्णू मिच्छं णेव उ भासइ। जम्हा तम्हा वई तस्स तच्चा भूतत्थदरसिणी॥ एवं आणाविजयं। (दशवै. चू. १, पृ. ३२)। ५. आप्तवचनं प्रवचनं चाज्ञाविचयस्तदर्थनिर्णयनम्। (प्रशमर. २४८)। ६. एदीए आणाए पच्चक्खाणुमाणादिपमाणाणमगोयरत्थाणं जं झाणं सो आणाविचओ णाम ज्झाणं। (धव. पु. १३, पृ. ७१)। ७. तत्थ य मइदोव्वलेणं तव्विहाऽऽरियविरहओ वा वि। णेयगहणत्तणेण य णाणावरणोदएणं च॥ हेऊदाहरणासंभवे य सइ सुट्ठु जं न बुज्झेज्जा। सव्वण्णुमयमवितहं तहावि तं चितए मइमं॥ अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा। जियराग-दोस-मोहा य णण्णहावादिणो तेणं। (ध्यानश. ४७–४९ [आव. हरि. वृ. पृ. ५९७]; धव. पु. १३, पृ. ७१ पर कुछ पाठभेदों के साथ उद्धृत)। ८. जैनी प्रमाणमन्नाज्ञां योगी योगविदांवरः। ध्यायेद् धर्मास्तिकायादीन् भावान्

सूक्ष्मान् यथागमम्॥ आज्ञाविचय एष स्यात् × × ×॥ (म. पु. २१, १४४-१)। ९. अतीन्द्रियेषु भावेषु बन्ध-मोक्षादिषु स्फुटम्। जिनाज्ञानिश्चयध्यानमाज्ञाविचयमीरितम्॥ (ह. पु. ५६–४९)। १०. कर्माणि मूलोत्तरप्रकृतीनि, तेषां चतुर्विधो बन्धपर्यायः, उदयफलविकल्पो जीवद्रव्यं मुक्त्यवस्थेत्येवमादीनामतीन्द्रियत्वात् श्रुतज्ञानावरणक्षयोपशमप्रकर्षाभावाद् बुद्ध्यतिशयेऽसति दुरवबोधं यदि नाम वस्तुतत्त्वं तथापि सर्वज्ञज्ञानप्रामाण्यादागमविषयतत्त्वं तथैव, नान्यथेति निश्चयः सम्यग्दर्शनस्वभावत्वान्मोक्षहेतुरित्याज्ञाविचारनिश्चयज्ञानमाज्ञाविचयाख्यं धर्मध्यानम्। अन्ये तु वदन्ति स्वयमविगतपदार्थतत्त्वस्य परं प्रतिपादयितुं सिद्धान्तनिरूपिनार्थप्रतिपत्तिहेतुभूतयुक्तिगवेषणावहितचित्ता सर्वज्ञज्ञानप्रकाशनपरा अनया युक्त्या इयं सर्वविदामाज्ञावबोधयितुं शक्येति प्रवर्तमानत्वादाज्ञाविचय इत्युच्यत इति। (भ. आ. विजयो. टी. १७०८)। ११. तत्राज्ञा सर्वज्ञप्रणीतागमः। तामाज्ञामित्थं विचिनुयात् पर्यालोचयेत्। × × × तत्र प्रज्ञायाः परिदुर्बलत्वादुपयुक्तोऽपि सूक्ष्मया शेमुष्या यदि नावैति भूतमर्थं सावरणज्ञानत्वात्। × × × तथाऽप्येवं विचिन्वतोऽवितथवादिनः क्षीणरागद्वेषमोहाः सर्वज्ञाः नान्यथाव्यवस्थापितमन्यथा वयन्ति भाषन्ते वा ऽनृतकारणाभावात्। अतः सत्यमिदं शासनमित्याज्ञायां स्मृतिसमन्वाहारः। (त. भा. सिद्ध. वृ. ९–३७)। १२. प्रमाणीकृत्य सार्वज्ञीमाज्ञामर्थावधारणम्। गहनानां पदार्थानामाज्ञाविचय उच्यते॥ (त. सा. ७–४०)। १३. आ अभिविधिना ज्ञायन्तेऽर्था यया साऽऽज्ञा प्रवचनम्, सा विचीयते निर्णीयते पर्यालोच्यते वा यस्मिंस्तदाज्ञाविचयं धर्मध्यानमिति, प्राकृतत्वेन विजयमिति; आज्ञया विजीयते अधिगमद्वारेण परिचिता क्रियते यस्मिन्नित्याज्ञाविजयम्। (स्थाना. अभय. वृ. ४, १, २४७)। १४. आज्ञाविचयमतीन्द्रियज्ञानविषयं विज्ञातुं चतुर्षु ज्ञानेषु बुद्धिसामर्थ्याभावात् परलोक-बन्ध-मोक्ष-लोकालोकसदसद्विवेकवृद्धिप्रभाव-धर्माधर्म-कालद्रव्यादिपदार्थेषु सर्वज्ञप्रामाण्यात्तत्प्रणीतागमकथितमवितथं नान्यथेति सम्यग्दर्शनस्वभावत्वान्निश्चयचिन्तनं सद्धर्म्यम्। (चा. सा. पृ. ६०)। १५. तत्त्वार्थं स्व-सिद्धान्तप्रसिद्धं यत्र चिन्तयेत्। सर्वज्ञाज्ञाभियोगेन

तदाज्ञाविचयो मतः ॥ (ज्ञानार्णव ३३–६) । १६. स्वयं मन्दबुद्धित्वेऽपि विशिष्टोपाध्यायाभावेऽपि शुद्धजीवादिपदार्थानां सूक्ष्मत्वेऽपि सति 'सूक्ष्मं जिनोदितं वाक्यं हेतुभिर्यन्न गम्यते । आज्ञासिद्धं तु तद् ग्राह्यं नान्यथावादिनो जिनाः ॥' इति श्लोककथितक्रमेण पदार्थनिश्चयकरणमाज्ञाविचयध्यानं भण्यते । (बृ. द्रव्यसं. ४८, पृ. १७७; कार्तिके. टी. ४८२, पृ. ३६७) । १७. आज्ञा जिनप्रवचनम्, तस्या विचयो निर्णयो यत्र तदाज्ञाविचयम् । प्राकृतत्वादाणाविजयं आज्ञागुणानुचिन्तनमित्यर्थः । (औपपा. अभय. वृ. २०, पृ. ४४) । १८. विज्ञातुं न तु शक्यमावृतियुताऽध्यक्षानुमानादिनात्यक्षानन्तविवर्तवर्तिसकलं वस्त्वस्तदोषार्हताम् । आज्ञावाग्विचयस्तयोक्तमनृतं नैवेति तद्वस्तुनश्चिन्ताऽऽज्ञाविचयो विदुर्नयचयः संज्ञानपुण्योदयः ॥ (आचा. सा. १०–२६) । १६. एते पदार्थाः सर्वज्ञनाथेन वीतरागेण प्रत्यक्षेण दृष्टा न कदाचिद् व्यभिचरन्तीत्यास्तिक्यबुद्धचा तेषां पृथक् पृथग्विवेचनेनाऽऽज्ञाविचयः । यद्यप्यात्मनः प्रत्यक्षबलेन हेतुबलेन वा न स्पृष्टा तथापि सर्वज्ञाज्ञानिर्देशेन गृह्णाति, 'नान्यथावादिनो जिनाः' यत इति । (मूला. वृ. ५–२०२) । २०. आज्ञां यत्र पुरस्कृत्य सर्वज्ञानामबाधिताम् । तत्त्वतश्चिन्तयेदर्थान् तदाज्ञाध्यानमुच्यते ॥ (योगशा. १०–८; गु. गु. षट्. स्वो.वृ. २, पृ. १०; गुण. क्रमा. २८) । २१. इमामाज्ञां समालम्ब्य स्याद्वादन्याययोगतः । द्रव्य-पर्यायरूपेण नित्यानित्येषु वस्तुषु ॥ स्वरूप-पररूपाभ्यां सदसद्रूपशालिषु । यः स्थिरप्रत्ययो ध्यानं तदाज्ञाविचयाह्वयम् ॥ (त्रि. श. पु. च. २, २, ४४८–४६) । २२. छद्दव्व णवपयत्था सत्त वि तच्चाइं जिणवराणाए । चिंतइ विसयविरत्तो आणाविचयं तु तं भणियं ॥ (भावसं. दे. ३६७) । २३. सर्वज्ञानयाऽत्यन्तपरोक्षार्थावधारणार्थमित्थमेव सर्वज्ञाज्ञासम्प्रदाय इति विचारणमाज्ञाविचयः । (त. सुखबो. ६–३६) । २४. आज्ञाया निर्द्धारः सम्यग्दर्शनम्, आज्ञाया अनन्त[न्तत]त्वपूर्वापराविरोधित्वादिस्वरूपे चमत्कारपूर्वकचित्तविश्रामः आज्ञाविचय धर्म्यध्यानम् । (ज्ञा. सा. दे. वृ. ६–४, पृ. २३) । २५. सत्तैका द्विविधो नयः शिवपथस्त्रेधा चतुर्धा गतिः, कायाः पञ्च षडङ्गिनां च निचयाः सा सप्तभङ्गीति च । अष्टौ सिद्धगुणा पदार्थनवकं धर्मं दशाङ्गं जिनः, प्राहैकादश देशसंयतदशाः सद्द्वादशाङ्गं तपः ॥ सम्यक्प्रेक्षा चक्षुषा वीक्षमाणः, यद् यादृक्षं सर्ववेद्याचचक्षे । तत्तादृक्षं चिन्तयन् वस्तु यायादाज्ञाधर्म्यध्यानमुद्रां मुनीन्द्रः ॥ (आत्मप्र. ८६, ६०) । २६. धर्म्यमपि ज्ञान-दर्शन-चारित्र-वैराग्यभावनाभिः कृताभ्यासस्य नयादिभिरतिगहनं न बुध्यते तुच्छमतिना, परं सर्वज्ञमतं सत्यमेवेति चिन्तनं आज्ञाविचयः । (धर्मसं. मान.स्वो. वृ. ३–२७, पृ. ८०) । २७. स्वसिद्धान्तोक्तमार्गेण तत्त्वानां चिन्तनं यथा । आज्ञया जिननाथस्य तदाज्ञाविचयं मतम् ॥ (भावसं. वाम. ६३७) । २८. आज्ञाविचयसंज्ञं स्यात् श्रुतार्थश्चिन्तनात्मकम् । (लोकप्र. ३०–४५७) ।

१ जीवादि पांच अस्तिकाय, पृथिवीकायिक आदि छह जीवनिकाय और कालद्रव्य; ये जो जिनाज्ञा के अनुसार ग्रहण योग्य पदार्थ हैं उनका उसी प्रकार से—जिनागम के अनुसार—विचार करना, यह आज्ञाविचय धर्मध्यान है।

आज्ञाव्यवहार— १. आणाववहारो—गीयायरिया आसेवियसत्थत्था खीणजंघाबला दो वि जणा पगिट्ठदेसंतरनिवासिणो अन्नोन्नसमीवमसमत्था गन्तुं जया, तया मइधारणाकुशलं अगीयत्थसीसं गूढत्थेहिं अइयारपयासेवणेहिं पेसेइ ति । (जीतक. चू. पृ. २, पं. ३२) । २. देसंतरट्ठिआणं गूढपयालोअणा आणा । (गु. गु. षट्. स्वो.वृ.३, पृ. १३) । ३. तथा आज्ञायत आदिश्यत इत्याज्ञा । तद्रूपव्यवहारस्तु केनापि शिष्येण निजातिचारालोचकेन आलोचनाचार्यः सन्निहितोऽप्राप्तः, दूरे त्वसौ तिष्ठति । ततः केनचित्कारणेन स्वय तावत् तत्र गन्तुं न शक्नोति । अगीतार्थस्तु कश्चित्तत्र गन्ता विद्यते । तस्य हस्ते आगमभाषया गूढानि अपराधपदानि लिखित्वा यदा शिष्यं प्रस्थापयति; गुरुरपि तथैव गूढपदैः प्रायश्चित्तं लिखित्वा प्रेषयति तदासौ आज्ञालक्षणस्तृतीयो व्यवहारः । (जीतक. चू. वि. व्या. पृ. ३३) ।

३ देशान्तर-स्थित गुरु को अपने दोषों की आलोचना कर लेने के लिए किसी अगीतार्थ के द्वारा आगमभाषा में पत्र लिखकर भेजने तथा गुरु के द्वारा भी उसी प्रकार गूढ़ पदों में ही प्रायश्चित्त लिखकर भेजने को आज्ञाव्यवहार प्रायश्चित्त कहते हैं।

आज्ञाव्यापादिकी क्रिया—१. यथोक्तामाज्ञामावश्य-

कादिषु चारित्रमोहोदयात् कर्तुमशक्नुवतोऽन्यथा प्ररूपणादाज्ञाव्यापादिकी क्रिया । (स. सि. ६–५; त. वा. ६, ५, १०) । २. यथोक्ताज्ञानसक्तस्य कर्तुमावश्यकादिषु । प्ररूपणाऽन्यथा मोहादाज्ञाव्यापादिकी क्रिया ।। (ह. पु. ५८–७७) । ३. आवश्यकादिषु ख्यातामर्हदाज्ञामुपासितुम् । अशक्तस्यान्यथाख्यानादाज्ञाव्यादिकी क्रिया ।। (त. श्लो. ६, ५, २०) । ४. जिनेन्द्राज्ञां स्वयमनुष्ठातुमसमर्थस्यान्यथार्थसमर्थनेन तद्व्यापादनमाज्ञाव्यापादनक्रिया । (त. सुखबो. ६–५) । ५. चारित्रमोहोदयात् जिनोक्तावश्यकादिविधानासमर्थस्य अन्यथाकथनमाज्ञाव्यापादनक्रिया । (त. वृत्ति श्रुत. ६–५) ।

१ चारित्रमोह के उदय से जिनोक्त आवश्यकादि क्रियाओं के पालन करने में स्वयं असमर्थ होने के कारण जिनाज्ञा से विपरीत कथन करने को आज्ञाव्यापादिकी क्रिया कहते हैं ।

आज्ञासम्यक्त्व — देखो आज्ञारुचि । १. आज्ञासम्यक्त्वमुक्तं यदुत विरुचितं वीतरागाज्ञयैव त्यक्तग्रन्थप्रपञ्चं शिवममृतपथं श्रद्दधन्मोहशान्तेः । (आत्मानु. १२) । २. भगवदर्हत्सर्वज्ञप्रणीतागमानुज्ञासंज्ञा आज्ञा । (उपासका. पृ. ११४) । ४. देवोऽर्हन्नेव तस्यैव वचस्तथ्यं शिवप्रदः । धर्मस्तदुक्त एवेति निर्बन्धः साधयेद् दृशम् । (अन. ध. २-६३) । ५. आप्तागम-यतीशानां तत्त्वानामल्पबुद्धितः । जिनाज्ञयैव विश्वासो भवत्याज्ञा हि सा परा ।। (भावसं. वाम. ३२७) । ६. तत्राज्ञा जिनोक्तागमानुज्ञा । (अन. ध. स्वो. टी. २–६२) । ७. जिनसर्वज्ञवीतरागवचनमेव प्रमाणं क्रियते तदाज्ञासम्यक्त्वं कथ्यते ।। (द. प्रा. टी. १२) ।

देखो आज्ञारुचि ।

आढक—१. चतुःप्रस्थमाढकम् । (त. वा. ३, ३८, ३, पृ. २०६) । २. प्रस्थैश्चतुर्भिरेकः स्यादाढकः प्रथितो जने । (लोकप्र. २८–२७४) ।

१ चार प्रस्थ (एक प्राचीन मापविशेष) प्रमाण माप को आढक कहते हैं ।

आतङ्क—आतङ्कः सद्योघाती रोगः । (पञ्चसू. टी. पृ. १५) ।

शीघ्र प्राणघातक रोग को आतङ्क कहते हैं ।

आतङ्कसम्प्रयोगसम्प्रयुक्त — आयंकसंपयोगसंपउत्तो तस्स विप्पयोगाभिकंखी सतिसमन्नागते । तत्थ आतंको णाम आसुकारी, तं जरो अतिसारो सू(सा)स सज्जहूओ एवमादि । आतंकगहणेण रोगोवि सूइओ चेव । सो य दीहकालिओ भवइ । तं गंडी अदुवा कोढी एवमादि । तत्थ वेदणानिमित्तं आयंकरोगेसु पदोसमावण्णो आरुग्गभिकंखी राग-दोसवसगओ णेहाणुगओ निवसंतो असुभकम्मरयमलं उवचिणोति । अट्टज्झाणस्स तइओ भेदो गओ । (दश-वै. चू. १, पृ. ३०) ।

आशुघाती रोग का नाम आतंक है । ऐसे ज्वर व अतिसार आदि रोग के उपस्थित होने पर उसके विनाश का बार-बार स्मरण करना, यह तृतीय (आतंकसंप्रयोगसंप्रयुक्त) आर्तध्यान है ।

आतप—१. आदित्यादिनिमित्त उष्णप्रकाशलक्षणः । स. सि. ५–२४; त. श्लो. ५–२४) । २. आतप उष्णप्रकाशलक्षणः । आतपः आदित्यनिमित्तः उष्णप्रकाशलक्षणः पुद्गलपरिणामः । (त. वा. ५, २४, १८) । ३. को आदवो णाम ? सोष्णः प्रकाशः आतपः । (धव. पु. ६, पृ. ६०) । ४. आतपोऽपि पुद्गलपरिणामः, तापकत्वात् स्वेदहेतुत्वात् उष्णत्वात् अग्निवत् । (त. भा. सिद्ध. वृ. ५–२४, पृ. ३६३) । ५. आ समन्तात् तपति सन्तापयति जगदिति आतपः । (उत्तरा. नि. शा. वृ. १–५७, पृ. ३८) । ६. उष्णप्रकाशलक्षणः सूर्यवह्निप्रभृतिनिमित्तमातपः । (त. वृत्ति श्रुत. ५–२४) ।

१ सूर्य आदि के निमित्त से जो उष्ण प्रकाश होता है उसे आतप कहते हैं ।

आतपनाम—१. यदुदयान्निर्वृत्तमातपनं तदातपनाम । तदादित्ये वर्तते । (स. सि. ८–११; त. वा. ८, ११, १५) । २. आतपति येन, आतपनम्, आतपतीति वातपः । तस्य निर्वर्तकं कर्म आतपनाम, तदादित्ये वर्तते । (त. वा. ८, ११, १५; त. श्लो. ८–११) । ३. आतपसामर्थ्यजनकमातपनाम । (त. भा. ८–१२) । ४. आतपनाम यदुदयादातपवान् भवति । (श्रा. प्र. टी. २२; श्राव. नि. हरि. वृ. १२२) । ५. सूर्यविमानरत्नपृथिवीजीवजनितस्तापो [illegible]पनाम । (पंचसं. स्वो. वृ. ३–१२७, पृ. ३८) । ६. आतपनमातपः । जस्स कम्मस्स उदएण जीवसरीरे आतवो होज्ज तस्स कम्मस्स आदवो त्ति सण्णा । (धव. पु. ६, पृ. ६०) । ७. [illegible]-

तपः, आतप्यते वाऽनेनेति आतपः। तस्यातपस्य सामर्थ्यं शक्तिरतिशयो येन कर्मणोदितेन जन्यते तदापनाम। आङो मर्यादावचनत्वात्। (त. भा. सिद्ध. वृ. ८–१२)। ८. जस्सुदएणं जीवे होइ सरीरं तु ताविलं इत्थ। सो आयवे विवागो जह रविबिंबे तहा जाण॥ (कर्मवि. गर्ग. गा. १२५, पृ. ५१)। ९. यदुदयाज्जीवस्तापवच्छरीरो भवति तदातपनाम। (समवा. अभय. वृ. ४२, पृ. ६७)। १०. यस्य कर्मण उदयाज्जीवस्य शरीरं तापवदुष्णप्रकाशकारि भवति स आतपस्य विपाकः। (कर्मवि. परमा. व्या. १२५, पृ. ५२)। ११. यदुदयाज्जन्तुशरीराणि स्वरूपेणानुष्णान्यपि उष्णप्रकाशलक्षणमातपं कुर्वन्ति तदातपनाम। (कर्मस्त. गो वृ. ९–१०, पृ. ८८; शतक. मल. हेम. वृ. ३७–३८, पृ. ५१; प्रव. सारो. वृ. १२६४; कर्मवि. दे. स्वो. वृ. ४४; कर्मप्र. यशो. टी. १, पृ. ६)। १२. यदुदयवशाज्जन्तुशरीराणि भानुमण्डलगतपृथिवीकायिकरूपाणि स्वरूपेणानुष्णान्यपि उष्णप्रकाशलक्षणमातपं कुर्वन्ति तदातपनाम। (षष्ठ कर्म. मलय. वृ. ६, पृ. १२६; प्रज्ञाप. २३–२९३, पृ. ४७३; पंचसं. मलय. वृ. ३–७; कर्मप्र. टी. १, पृ. ६)। १३. आतपनाम यदुदयाज्जन्तुशरीरं स्वयमनुष्णं सत् आतपं करोति। (धर्मसं. मलय. वृ. ६१९)। १४. यदुदयादातपनं निष्पद्यते तदातपनाम। (भ. आ. मूला. टी. २०९५)। १५. यदुदयेन आदित्यवदातापो भवति तदातपनाम। (त. वृत्ति श्रुत. ८–११)।

२ जिस कर्म के उदय से शरीर में आतप हो अथवा जो आतप का निर्वर्तक हो उसे आतपनामकर्म कहते हैं।

आताप—देखो आतप। १. मूलोष्णवती प्रभा तेजः, सर्वाङ्गव्याप्युष्णवती प्रभा आतापः, उष्णरहिता प्रभोद्योतः इति तिण्हं भेदोवलंभादो। (धव. पु. ८, पृ. २००)।

सर्वांगव्यापिनी उष्णतायुक्त प्रभा को आताप कहा जाता है।

आतापनाम—देखो आतपनाम। १. जस्स कम्मस्सुदएण सरीरे आदावो होदि तं आदावणाम। सोष्णप्रभा आतापः। (धव. पु. १३, पृ. ३६५)। २. यस्य कर्मस्कन्धस्योदयेन जीवशरीरे आतपो भवति तदातापनाम। (मूला. वृ. १२–१९२)।

देखो आतपनाम।

आत्मकैवल्य—कर्मणोऽपि वैकल्यमात्मकैवल्यमस्त्येव। (अष्टशती ४)।

कर्म की भी विकलता को आत्मकैवल्य कहा जाता है।

आत्मज्ञप्ति—नन्वहंप्रत्ययोत्पत्तिरात्मज्ञप्तिर्निगद्यते। (त. श्लो. १–२०२, पृ. ४१)।

'मैं हूं' इस प्रकार की प्रतीति के उत्पन्न होने को आत्मज्ञप्ति कहते हैं।

आत्मज्ञान—आत्मज्ञानं वादादिव्यापारकाले किममुं प्रतिवादिनं जेतुं मम शक्तिरस्ति न वा इत्यालोचनम्। (उत्तरा. नि. शा. वृ. १–५८, पृ. ३९)।

क्या इस प्रतिवादी को जीतने की मेरी शक्ति है या नहीं, इस प्रकार (शास्त्रार्थ) आदि व्यापार के समय विचार करना; इसका नाम आत्मज्ञान है। यह चार प्रकार की प्रयोगसम्पत्ति का प्रथम भेद है।

आत्मतत्त्व—१. अविक्षिप्तं मनस्तत्त्वं विक्षिप्तं भ्रान्तिरात्मनः। (समाधि. ३६)। २. अविक्षिप्तं रागाद्यपरिणतं देहादिनाऽऽत्मनोऽभेदाध्यवसायपरिहारेण स्वस्वरूप एव निश्चलतां गतम्, इत्थंभूतं मनस्तत्त्वं वास्तवं रूपमात्मनः। (समाधि. टी. ३६)।

मन की विक्षेप-रहित अवस्था का नाम ही आत्मतत्त्व—आत्मा का स्वरूप है।

आत्मदमन—१. आत्मनो दमनम् आहारे सुखे च योऽनुरागस्तस्य प्रशमनात्। (भ. आ. विजयो. टी. २४०)। २. आत्मनो दमनमाहारे सुखे वानुरागप्रशमनाद्दर्पखण्डनम्। (भ. आ. मूला. टी. २४०)।

आहार और इन्द्रियसुख में अनुराग को शान्त करके जो अभिमान को नष्ट किया जाता है उसे आत्मदमन कहते हैं।

आत्मप्रभावना—मोहारातिक्षतेः शुद्धः शुद्धाच्छुद्धतरस्ततः। जीवः शुद्धतमः कश्चिदस्तीत्यात्मप्रभावना॥ (लाटीसं. ४–३.१८; पंचाध्यायी २-८१३)।

मोहकर्म का उत्तरोत्तर विनाश करते हुए आत्मा को शुद्ध से शुद्धतर और शुद्धतर से शुद्धतम बनाने को आत्मप्रभावना कहते हैं।

आत्मप्रवाद — १. यत्रात्मनोऽस्तित्व-नास्तित्व-नित्यत्वानित्यत्व-कर्तृत्व-भोक्तृत्वादयो धर्माः षड्जीवनिकायभेदाश्च युक्तितो निर्दिष्टाः तदात्मप्रवादम्। (त. वा. १, २०, १२, पृ. ७६)। २. आत्म-

प्रवादपूर्वं यत्रात्मनः संसारि-मुक्ताद्यनेकभेदभिन्नस्य प्रवदनम्। (दशवै. नि. हरि. वृ. १-१६)। ३. आद-पवादं सोलसण्हं वत्थूणं १६ वीसुत्तर-तिसयपाहुडाणं ३२० छव्वीसकोडिपदेहिं २६०००००० आदं वण्णेदि वेदो त्ति वा विण्हु त्ति वा भोत्ते त्ति वा इच्चा-दिसरूवेण। (धव. पु. १, पृ. ११८); यत्रात्मनो-ऽस्तित्व-नास्तित्वादयो धर्माः षड्जीवनिकायभेदाश्च युक्तितो निर्दिष्टास्तदात्मप्रवादम्। (धव. पु. ६, पृ. २१६)। ४. आदपवादो णाणाविहदुण्णए जीव-विसए णिराकरिय जीवसिद्धि कुणइ। अत्थि जीवो तिलक्खणो सरीरमेत्तो स-परप्पयासओ सुहुमो अमुत्तो भोत्ता कत्ता अणाइबंधणबद्धो णाण-दंसणलक्खणो उड्ढगमणसहावो एवमाइसरूवेण जीवं साहेदि त्ति वुत्तं होदि। सव्वदव्वाणमादं सरूवं वण्णेदि आदपवादो त्ति के वि आयरिया भणंति। (जयध. १, पृ. १४२)। ५. आत्मप्रवादं सप्तमम्—आय त्ति आत्मा, सोऽनेकधा यत्र नयदर्शनैर्वर्ण्यते तदात्मप्रवा-दम्। (समवा. अभय. वृ. १४७, पृ. १२१)। ६. षड्विंशतिकोटिपदं जीवस्य ज्ञान-सुखादिमयत्व-कर्तृत्वादिधर्मप्रतिपादकमात्मप्रवादम्। (श्रुतभक्ति टी. ११, पृ. १७५; त. वृत्ति श्रुत. १-२०)। ७. अप्पपवादं भणियं अप्पसरूवप्परूवयं पुव्वं। छव्वीसकोडिपयगयमेवं जाणंति सुपयत्था॥ (अंग-पण्णत्ती २-८५, पृ. २६४)।

१ आत्मा के अस्तित्व-नास्तित्व, नित्यत्व-अनित्यत्व, और कर्तृत्व-भोक्तृत्व आदि धर्म एवं छह जीवनि-कायोंके प्रतिपादन करने वाले पूर्व को आत्मप्रवाद कहते हैं।

आत्मप्रशंसा—स्वस्य भूताभूतगुणस्तुतिरात्मप्रशंसा। (नि. सा. वृ. ६२)।

अपने विद्यमान या अविद्यमान गुणोंकी स्तुति करने को आत्मप्रशंसा कहते हैं।

आत्मभूत (लक्षण)—१. तत्र आत्मभूतमग्नेरौ-ष्ण्यम्। (त. वा. २, ८, ३)। २. यद्वस्तुस्वरूपानु-प्रविष्टं तदात्मभूतम्। यथाग्नेरौष्ण्यम्। (न्या. दी. पृ. ६)।

जो लक्षण अग्नि की उष्णता के समान वस्तु के स्वरूप में प्रविष्ट—तन्मय—हो उसे आत्मभूत लक्षण कहते हैं।

आत्मभूत (हेतु)—तत्र आत्मना सम्बन्धमापन्न-विशिष्टनामकर्मोपात्तपरिच्छिन्नस्थान-परिमाणनिर्मा-णश्चक्षुरादिकरणग्राम आत्मभूतः [बाह्यो हेतुः]। ××× तन्निमित्तो (द्रव्योगनिमित्तो) भावयोगो वीर्यान्तराय-ज्ञान-दर्शनावरणक्षय-क्षयोपशमनिमित्त आत्मनः प्रसादश्चात्मभूतः [आभ्यन्तरः] इत्याख्या-मर्हति। (त. वा. २, ८, १)।

आत्मा से सम्बद्ध विशिष्ट नामकर्म के निमित्त से स्थान व परिमाण निर्माण के अनुसार जो चक्षु आदि इन्द्रियों का समूह उत्पन्न होता है वह चैतन्या-नुविधायी उपयोग का बाह्य आत्मभूत हेतु होता है। तथा द्रव्ययोग के निमित्त से जो भावयोग और वीर्यान्तराय, ज्ञानावरण एवं दर्शनावरण के क्षय व क्षयोपशम के अनुसार जो आत्मा की प्रसन्नता भी होती है, यह उक्त उपयोग का आभ्यन्तर आत्मभूत हेतु होता है।

आत्मभ्रान्ति—१. ××× विक्षिप्तं भ्रान्तिरा-त्मनः। (समाधितं. ३६)। २. रागादिपरिणतं देहा-दिना आत्मनोऽभेदाध्यवसायेन स्वस्वरूप एव अस्थि-रतां गतं मनः आत्मनो भ्रान्तिः आत्मस्वरूपं न भवतीति। (समाधितं. टी. ३६)।

शरीर को आत्मा मानकर रागादि से परिणत हुआ मन जो आत्मस्वरूप में अस्थिरता को प्राप्त होता है, इसका नाम आत्मभ्रान्ति है।

आत्मयोगी—तथाऽऽत्मयोगी — आत्मनो योगः कुशलमनःप्रवृत्तिरूपः आत्मयोगः, स यस्यास्ति स तथा, सदा धर्मध्यानावस्थित इत्यर्थः। (सूत्रकृ. शी. वृ. २, २, ४२, पृ. ८६)।

निर्मल मन की प्रवृत्तिरूप आत्मयोग से युक्त आत्म-ज्ञानी को आत्मयोगी कहते हैं।

आत्मरक्ष—१. आत्मरक्षाः शिरोरक्षोपमाः। (स. सि. ४-४; त. वा. ४-४)। २. आत्मरक्षाः शिरो-रक्षस्थानीयाः। (त. भा. ४-४)। ३. आत्मरक्षाः शिरोरक्षोपमाः। आत्मानं रक्षन्तीति आत्मरक्षाः, ते शिरोरक्षोपमाः। आवृतावरणाः प्रहरणोद्यता रौद्राः पृष्ठतोऽवस्थायिनः। (त. वा. ४, ४, ५)। ४. आ-त्मानं रक्षन्तीत्यात्मरक्षास्ते शिरोरक्षोपमाः। (त. श्लो. ४-४)। ५. आत्मरक्षाः शिरोरक्षसमानाः प्रोद्यताऽसयः। विभवायैव पर्यन्तात् पर्यटन्त्यमरेशि-नाम्॥ (म. पु. २२-२७)। ६. आत्मरक्षास्तु रक्षकाः। (त्रि. श. पु. च. २, ३, ७७३)। ७.

इन्द्राणामात्मानं रक्षन्तीत्यात्मरक्षाः, "कर्मणोऽण्"। ते ह्यपायाभावेऽपि स्थितिपरिपालनाय प्रीत्युत्पत्तये चेन्द्राणां परितो दृढनिबद्धसुभटोचितपरिकरा धनुरादिप्रहरणव्यग्रपाणयः स्व-स्वस्वामिन्यस्तनिश्चलदृष्टयः परेषां क्षोभमापादयन्तोऽङ्गरक्षका इव तिष्ठन्ति। (संग्रहणी दे. वृ. १)। ८. आत्मन इन्द्रस्य रक्षा येभ्यस्ते आत्मरक्षा अङ्गरक्षाः शिरोरक्षसदृशाः। (त. वृत्ति श्रुत. ४-४)।

१ शिरोरक्ष—अङ्गरक्षक के समान—इन्द्र की रक्षा करने वाले—उसके पास में अवस्थित रहने वाले—देवों को आत्मरक्ष कहते हैं।

आत्मरक्षी—विषयाभिलाषविगमान्निर्निदानः सन् आत्मानं रक्षत्यपायेभ्यः कुगतिगमनादिभ्यः इत्येवंशील आत्मरक्षी। यद्वाऽऽदीयते स्वीक्रियते आत्महितमनेनेत्यादानः संयमः, तद्रक्षी। (उत्तरा. सू. शा. वृ. ४-१०, पृ. २२५)।

जो इन्द्रियविषयों की अभिलाषा के नष्ट हो जाने से निदान से रहित होता हुआ कुगति में ले जाने वाले अपायों से अपने आत्मा की रक्षा करता है उसे आत्मरक्षी कहते हैं।

आत्मवाद—एक्को चेव महप्पा पुरिसो देवो य सव्ववावी य। सव्वंगणिगूढो वि य सचेयणो णिग्गुणो परमो॥ (गो. क. ८८१)।

संसार में सर्वत्र व्यापक एक ही महान् आत्मा है, वही पुरुष है, वही देव है, तथा वही सर्वांगों से प्रच्छन्न होकर चेतन, निर्गुण और सर्वोत्कृष्ट है; इस प्रकार के मन्तव्य को आत्मवाद कहते हैं।

आत्मसंकल्प—आत्मसंकल्पः शरीर-कर्म-राग-द्वेष-मोहादिदुःखपरिणामरहितोऽयं ममात्मा वर्तते, शरीरे तिष्ठन्नशुद्धनिश्चयनयेन शरीरं न स्पृशति, कर्मबन्धनबद्धो ऽपि सन् कर्मबन्धनैर्बद्धो न भवति नलिनीदलस्थितजलवदितीदृशं भेदज्ञानमात्मसंकल्प उच्यते। (मोक्षप्रा. टी. ५)।

मेरा आत्मा शरीर, कर्म, राग, द्वेष और मोहादि सर्व दुःख परिणामों से रहित है; वह शरीर में रहते हुए भी अशुद्ध निश्चयनय से शरीर से अस्पृष्ट है, और कर्म-बन्धनों से बद्ध होने पर भी अबद्ध है —जैसे कमलपत्र जल में रहते हुए भी जल से अलिप्त रहता है; इस प्रकार के भेदविज्ञान को आत्मसंकल्प (अन्तरात्मता) कहते हैं।

आत्मसंयोग—१. ओवसमिए य खइए खओवसमिए य पारिणामे अ। एसो चउव्विहो खलु नायव्वो अत्तसंजोगो॥ जो सन्निवाइओ खलु भावो उदएण वज्जिओ होइ। इक्कारससंजोगो एसो चि य अत्तसंजोगो॥ (उत्तरा. नि. १, ५०-५१)। २. आत्मसंयोगः प्राग्वदात्मार्पित (तत्रार्पितो नाम क्षायिकादिभविः स्वाधारे भाववति ज्ञाताऽयमित्यादिरूपेण ज्ञानमस्येत्यादिरूपेण वा वचनव्यापारेण वक्त्रा स्थापितः—शा. वृ. नि. ४९) सम्बन्धनसंयोगः। (उत्तरा. नि. शा. वृ. १, ५० व ५१)।

औपशमिक, क्षायिक, क्षायोपशमिक और पारिणामिक भावों के साथ आत्मा का जो संयोग है उसे आत्मसंयोग कहते हैं। औदयिक को छोड़कर इन भावों के परस्पर संयोग से जो ग्यारह (द्वि. सं. ६+त्रि. सं. ४+च. सं. १ = ११) संयोगज भंग होते हैं इस सबको आत्मसंयोग कहा जाता है।

आत्मशरीरसंवेजनी — आयसरीरसंवेयणी जहा जमेयं अम्हच्चयं सरीरयं एवं सुक्क-सोणिय-मंस-वसा-मेद-मज्जट्ठि-ण्हारु-चम्म-केस-रोम-णह-दंत-अंतादिसंघायणिप्फण्णत्तणेण मुत्त-पुरीसभायणत्तणेण य असुइ त्ति कहेमाणो सोयारस्स संवेगं उप्पाएइ, एसा आयसरीरसंवेयणी। (दशवै. नि. हरि. वृ. ३, १९९ उ.)।

यह हमारा शरीर शुक्र, शोणित, मांस, वसा, मेदा, मज्जा, अस्थि, स्नायु, चर्म, केश, रोम, नख, दांत और आंतों आदि के समुदाय से बना है; इसलिए तथा मूत्र-पुरीष (मल) आदि से भरा होने के कारण अशुचि है। शरीरविषयक यह कथन चूंकि श्रोता के लिए संवेग को उत्पन्न करता है, अत एव उसे आत्मसंवेजनी कथा कहते हैं।

आत्मा (आदा, अप्पा)—१. एगो मे सासदो अप्पा णाण-दंसणलक्खणो। (नि. सा. १०२)। २. स्वसंवेदनसुव्यक्तस्तनुमात्रो निरत्ययः। अनन्तसौख्यवानात्मा लोकालोकविलोकनः॥ (इष्टोप. २१)। ३. सोऽस्त्यात्मा सोपयोगोऽयं क्रमाद्धेतुफलावहः। यो ग्राह्योऽग्राह्यनाद्यन्तः स्थित्युत्पत्ति-व्ययात्मकः॥ प्रमेयत्वादिभिर्धर्मैरचिदात्मा चिदात्मकः। ज्ञान-दर्शनतस्तस्माच्चेतनाचेतनात्मकः॥ ज्ञानाद् भिन्नो न चाभिन्नो भिन्नाभिन्नः कथंचन। ज्ञानं पूर्वापरीभूतं सोऽयमात्मेति कीर्तितः॥ (स्वरूपसं. २-४)। ४. एवं

चैतन्यवानात्मा सिद्धः सततभावतः । (शास्त्रवा. १–७८) । ५. अजातोऽनश्वरो मूर्तः कर्ता भोक्ता सुखी बुधः । देहमात्रो मलैर्मुक्तो गत्वोर्ध्वमचलः प्रभुः । (आत्मानु. २६६) । ६. दंसण-णाणपहाणो असंखदेसो हु मुत्तिपरिहीणो । स-गहियदेहपमाणो णायव्वो एरिसो अप्पा ।। (तत्त्वसार १७) । ७. आत्मा हि स्व-परप्रकाशादिरूपः । (न्यायवि. १-४)। ८. आत्मा हि ज्ञान-दृक्सौख्यलक्षणो विमलः परः । सर्वाशुचिनिदानेभ्यो देहादिभ्य इतीरितः ।। (जी. चंपू ७–२२) । ९. अतति सन्ततं गच्छति शुद्धि-संक्लेशात्मकपरिणामान्तराणीत्यात्मा । (उत्तरा. सू. शा. वृ. १–१५) । १०. अतति सततमेव अपरापरपर्यायान् गच्छतीति आत्मा जीवः । (धर्मवि. मु. वृ. १–१, पृ. १) । ११. आत्मा ज्ञान-दर्शनोपयोगगुणद्वयलक्षणः । (ज्ञा. सा. वृ. १३–३, पृ. ४६) । १२. 'अत' धातुः सातत्यगमनेऽर्थे वर्तते । गमनशब्देनात्र ज्ञानं भण्यते । तेन कारणेन यथासम्भवं ज्ञान-सुखादिगुणेषु आ समन्तात् अतति वर्तते यः स आत्मा, ××× शुभाशुभमनोवचनकायव्यापारैर्यथासम्भवं तीव्र-मन्दादिरूपेण आ समन्तात् अतति वर्तते यः स आत्मा । ××× उत्पाद-व्यय-ध्रौव्यैरा समन्तादतति वर्तते यः स आत्मा । (बृ. द्रव्यसं. टी. ५७) । १३. आत्मा तावदुपयोगलक्षणः । (स्या. मं. टी. १७) ।

१ ज्ञान-दर्शनस्वरूप जीवको आत्मा कहा जाता है ।

आत्माङ्गुल—१. जस्सि जस्सि काले भरहेरावदमहीसु जे मणुवा । तस्सि तस्सि ताणं अंगुलमादंगुलं णाम ।। (ति. प. १–१०६) । २. से किं तं आयंगुले ? जे णं जया मणुस्सा भवंति तेसिं णं तया अप्पणो अंगुलेणं ××× (अनुयो. सू. १३३) । ३. जे जम्मि जुगे पुरिसा अट्ठसयंगुलसमूसिया हुंति । तेसिं सयमंगुलं जं तयं तु आयंगुलं होइ ।। (जीवस. १०३) । ४. जम्हि य जम्हि य काले भरहेरावएसु होंति जे मणुया । तेसिं तु अंगुलाइं आदंगुल णामदो होइ ।। (जं. दी. प. १३–२७) । ५. यस्मिन् काले पुमांसो ये स्वकीयाङ्गुलमानतः । अष्टोत्तरशतोत्तुङ्गा आत्माङ्गुलं तदङ्गुलम् । (लोकप्र. १–४०) । ६. तत्र ये यस्मिन् काले भरत-सगरादयो मनुष्याः प्रमाणयुक्ता भवन्ति तेषां यदात्मीयमङ्गुलं तदात्माङ्गुलम् । (संग्रहणी दे. वृ. २४४) ।

१ भरत-ऐरावत क्षेत्रों में उत्पन्न विभिन्न कालवर्ती मनुष्यों के अंगुल को उस-उस समय आत्मांगुल कहा जाता है ।

आत्माङ्गुलाभास— एतत्प्रमाणतो (अष्टोत्तरशतोत्तुङ्गप्रमाणतो) न्यूनाधिकानां तु यदङ्गुलम् । तत्स्यादात्माङ्गुलाभासं न पुनः पारमार्थिकम् ।। (लोकप्र. १–४१) ।

एक सौ आठ अंगुल प्रमाण ऊँचाई से हीन या अधिक प्रमाण वाले मनुष्यों का अंगुल आत्मांगुल न होकर आत्मांगुलाभास है ।

आत्माधीन क्रियाकर्म (आदाहीण) — तत्थ किरियाकम्मे कीरमाणे अप्पायत्तत्तं अपरवसत्तं आदाहीणं णाम । (धव. पु. १३, पृ. ८८) ।

क्रियाकर्म करते समय परवश न होकर स्वाधीन रहना, इसे आत्माधीन क्रियाकर्म कहते हैं ।

आत्माराम—आत्मारामस्य—आत्मैवाराम उद्यानं रतिस्थानं यस्य, अन्यत्र गतिप्रतिबन्धकत्वात् । ×××अथवा आत्मनोऽपि सकाशादारामो निवृत्तिर्यस्येत्याराम इति ग्राह्यम्, वस्तुतः स्वात्मन्यपि रतेः रागरूपतया मोक्षप्रतिबन्धकत्वेन मुमुक्षुभिरनादरणीयत्वात् । (अन. ध. स्वो. टी. ८–२४) ।

जो विवेकी जीव आत्मा को ही आराम—रति का स्थानभूत उद्यान—मान कर विषय-भोगादि से पराङ्मुख होता हुआ उसी में रमण करता है वह आत्माराम कहलाता है । अथवा आत्मा की ओर से भी जो आराम—निवृत्ति—को प्राप्त होकर निर्विकल्पक दशा को प्राप्त हो जाता है वह आत्माराम कहलाता है ।

आत्मोत्कर्ष—आत्मन उत्कर्ष आत्मोकर्षः—अहमेव जात्यादिभिरुत्कृष्टो न मत्तः परतरोऽन्योऽस्तीत्यध्यवसायः । (जयध. प. ७७७) ।

जाति-कुलादि में मेरे से बड़ा और कोई नहीं है, इस प्रकार से अपने उत्कर्ष के प्रगट करने को आत्मोत्कर्ष कहते हैं ।

आत्यन्तिकमरण—१. आत्यन्तिकं अवधिमरणविपर्यासाद्धि आदियंतियमरणं भवति । तं जहा—यानि द्रव्याणि सांप्रतं मरति, मुंचतीत्यर्थः, न ह्यसौ पुनस्तानि मरिष्यति । (उत्तरा. चू. ५, पृ. १२८) । २. आत्यन्तिकमरणं यानि नारकाद्यायुष्कतया कर्मदलिकान्यनुभूय म्रियते मृतश्च, न पुनस्तान्यनुभूय

मरिष्यति; एवं यन्मरणं तद् द्रव्यापेक्षया अत्यन्तभावितत्वात् आत्यन्तिकमिति। (समवा. अभय. वृ. १७)।

२ जीव नारक आदि आयुस्वरूप जिन कर्मप्रदेशों का अनुभव करके मरता है—उन्हें छोड़ता है, अथवा मर चुका है—उन्हें छोड़ चुका है—वह भविष्य में उनका अनुभव करके मरने वाला नहीं है—उन्हें पुनः छोड़ने वाला नहीं है—अतः इस प्रकार के द्रव्याश्रित मरण को आत्यन्तिकमरण कहा जाता है।

आदाननिक्षेपणसमिति— १. पोत्थइ-कमंडलाइं गहण-विसग्गेसु पयतपरिणामो। आदावण-णिक्खेवण-समिदी होदि त्ति णिद्दिट्ठा॥ (नि. सा. ६४)। २. णाणुवहिं संजुमुवहिं सउचुवहिं अण्णमप्पमुवहिं वा। पयदं गह-णिक्खेवो समिदी आदाणणिक्खेवा॥ (मूला. १-१४); आदाणे णिक्खेवे पडिलेहिय चक्खुणा पमज्जेज्जो। दव्वं च दव्वठाणं संजमलद्धीय सो भिक्खू॥ (मूला. ५-१२२); सहसाणाभोइय-दुप्पमज्जिद-अप्पच्चुवेक्खणा दोसा। परिहरमाणस्स हवे समिदी आदाणणिक्खेवा॥ (मूला. ५-१२३; भ. आ. ११९८)। ३. रजोहरण-पात्र-चीवरादीनां पीठफलकादीनां चावश्यकार्थं निरीक्ष्य प्रमृज्य चादान-निक्षेपौ आदान-निक्षेपणसमितिः। (त. भा. ९-५)। ४. आदानं ग्रहणम्, निक्षेपणं मोक्षणमौघिकोपग्रहिक-भेदस्योपधेरादान-निक्षेपणयोः समितिरागमानुसारेण प्रत्युवेक्षण-प्रमार्जना। (त. भा. हरि. व सिद्ध. वृ. ७-३)। ५. आदानं ग्रहणम्, निक्षेपो न्यासः स्थापनम्, तयोः समितिः प्रावचनेन विधिना अनुगता आदान-निक्षेपणा समितिः। ××× आदान-निक्षेपसमितिस्वरूपविवक्षया प्राह—'रजोहरणादि' रजोहरणादिपात्र-चीवरादीनामिति चतुर्दशविधोपधेर्ग्रहणं द्वादशविधोपधिग्रहणं च पंचविंशतिविधोपधिग्रहश्च, पीठफलकादीनामिति चाशेपौपग्राहिकोपकरणम् आवश्यकार्थमित्यवश्यंतया वर्षासु पीठफलकादिग्रहः, कदाचिद्धेमन्त-ग्रीष्मयोरपि, क्वचिदनूपविषये जलकणिकाकुलायां भूमौ, एवं द्विविधमप्युपधि स्थिरतरमभिसमीक्ष्य प्रमृज्य च रजोहृत्याऽऽदान-निक्षेपौ कर्त्तव्यावित्यादान-निक्षेपणा समितिः। (त. भा. हरि. व सिद्ध. वृ. ९-५)। ६. धर्मोपकरणानां ग्रहण-विसर्जनं प्रति यतनमादाननिक्षेपणसमितिः। (त. वा. ९, ५, ७; त. श्लो. ९-५)। ७. पुव्विं चक्खुपरिक्खिय पमज्जिउं जो ठवेइ गिण्हइ वा। आयाणभंडनिक्खेवणाइसमिओ मुणी होइ॥ (उपदेशमाला २९९; गु. गु. षट्. स्वो. वृ. ३, पृ. १४)। ८. निक्षेपणं यदादानमीक्षित्वा योग्यवस्तुनः। समितिः सा तु विज्ञेया निक्षेपादाननामिका॥ (ह. पु. २, १२५)। ९. सहसा दृष्टदुर्मृष्टप्रत्यवेक्षणदूषणम्। त्यजतः समितिर्ज्ञेयादान-निक्षेपगोचरा॥ (त. सा. ६-१०)। १०. शय्यासनोपधानानि शास्त्रोपकरणानि च। पूर्वं सम्यक् समालोच्य प्रतिलिख्य पुनः पुनः॥ गृह्णतोऽस्य प्रयत्नेन क्षिपतो वा धरातले। भवत्यविकला साधोरादानसमितिः स्फुटम्॥ (ज्ञानार्णव १८, १२-१३)। ११. धर्माविरोधिनां परानुपरोधिनां द्रव्याणां ज्ञानादिसाधनानां ग्रहणे विसर्जने च निरीक्ष्य प्रमृज्य प्रवर्तनमादान-निक्षेपणसमितिः। (चा. सा. पृ. ३२)। १२. निक्षेपादानयोः समितिर्निक्षेपादानसमितिश्चक्षुःपिच्छकप्रतिलेखनपूर्वकसयत्नग्रहण-निक्षेपादिः। (मूला. वृ. १-१०)। १३. ज्ञानोपधि-संयमोपधि-शौचोपधीनामन्यस्य चोपधेर्यत्नेन यौ ग्रहण-निक्षेपौ प्रतिलेखनपूर्वकौ सा आदाननिक्षेपणा समितिर्भवति। (मूला. वृ. १-१४)। १४. ज्ञानोपकरणादीनामादानं स्थापनं च यत्। यत्नेनादान-निक्षेपसमितिः करुणापरा॥ (आचा. सा. १-२५); विहायादान-निक्षेपौ सहसाऽनवलोक्य च। दुःप्रमार्जनमप्रत्यवेक्षणं चार्द्रमानसः॥ विधायोपाधितद्देशवीक्षणं प्रतिलेखनैः। लब्धस्वेदरजःसूक्ष्मलतातिमृदुभिः पुनः॥ तौ प्रमृज्योपधेर्यत्नान्निक्षेपादानयोः कृतिः। यतेरादाननिक्षेपसमितिः परिकीर्तिता॥ (आचा. सा. ५, १३०-३२)। १५. आदानग्रहणेन निक्षेप उपलक्ष्यते। तेन पीठादेर्ग्रहणे स्थापने च या समितिः। (योगशा. स्वो. विव. १-२६)। १६. आसनादीनि संवीक्ष्य प्रतिलिख्य च यत्नतः। गृह्णीयान्निक्षिपेद्वा यत् सादानसमितिः स्मृता॥ (योगशा. १-३९)। १७. सुदृष्टमृष्टं स्थिरमाददीत स्थाने त्यजेत्तादृशि पुस्तकादि। कालेन भूयः कियतापि पश्येदादाननिक्षेपसमित्यपेक्षः॥ (अन. ध. ४-१६८)। १८. पुस्तकाद्युपधिं वीक्ष्य प्रतिलेख्य च गृह्णतः। मुञ्चतो दान-निक्षेपसमितिः स्याद्यतेरियम्॥ (धर्मसं. श्रा. ९-७)। १९. यत्पुस्तक-कमण्डलुप्रभृतिकं गृह्यते तत्पूर्वं निरीक्ष्यते, पश्चान्मृदुना मयूरपिच्छेन प्रतिलिख्यते, पश्चाद् गृह्यते, चतुर्थी समितिर्भवति।

(चा. प्रा. टी. ३६)। २०. धर्मोपकरणग्रहण-विसर्जने सम्यगालोक्य मयूरबर्हेण प्रतिलिख्य तदभावे वस्त्रादिना प्रतिलिख्य स्वीकरणं विसर्जनं च सम्यगादान निक्षेपणसमितिर्भवति। (त. वृत्ति श्रुत. ९–५)। २१. ग्राह्यं मोच्यं च धर्मोपकरणं प्रत्युवेक्ष्य यत्। प्रमार्ज्य चेयमादान-निक्षेपसमितिः स्मृता ॥ (लोकप्र. ३०–७४७)। २२. आसन-संस्तारक-पीठफलक-वस्त्र-पात्र-दण्डादिकं चक्षुषा निरीक्ष्य प्रतिलिख्य च सम्यगुपयोगपूर्वं रजोहरणादिना यद् गृह्णीयाद्यच्च निरीक्षित-प्रतिलेखितभूमौ निक्षिपेत् सा आदान-निक्षेपणसमितिः। (धर्मसं. मान. स्वो. वृ. ३–४७, पृ. १३१)। २३. धर्माविरोधिनां परानुपरोधिनां द्रव्याणां ज्ञानादिसाधनानां पुस्तकादीनां ग्रहणे विसर्जने च निरीक्ष्य मयूरपिच्छेन प्रमृज्य प्रवर्तनमादान-निक्षेपणसमितिः। (कार्तिके. टी. ३९९, पृ. ३००)। २४. अस्ति चादान-निक्षेपस्वरूपा समितिः स्फुटम्। वस्त्राभरण-पात्रादिनिखिलोपधिगोचरा ॥ यावन्त्युपकरणानि गृहकर्मोचितानि च। तेषामादान-निक्षेपौ कर्तव्यौ प्रतिलेख्य च ॥ (लाटीसं. ५, २५३–५४)।

२. ज्ञान, संयम और शौच के साधनभूत पुस्तक, पिच्छी व कमण्डलु तथा अन्य उपधि को भी सावधानीपूर्वक देख-शोध करके उठाने और रखने को आदान-निक्षेपणसमिति कहते हैं।

आदानपद—१. आवंती चाउरंगिज्जं असंखयं अहातत्थिज्जं अद्दइज्जं जण्णइज्जं पुरिसइज्जं (उसुकारिज्जं) एलइज्जं वीरीयं धम्मो मग्गो समोसरणं जंमइअं से तं आयाणपएणं। (अनुयो. १३०, पृ. १४१)। २. आदानपदं नाम आत्तद्रव्यनिबन्धनम्। ××× वधूरन्तर्वत्नीत्यादीनि आत्तभर्तृ-धृतापत्य-निबन्धनत्वात्। (धव. पु. १, पृ. ७५–७६); छत्ती मउली गब्भिणी अइहवा इच्चाईणि आदाणपदाणि, इदमेदस्स अत्थि त्ति विवक्खाए उप्पण्णत्तादो। (धव. पु. ९, पृ. १३५–३६)। ३. दंडी छत्ती मोली गब्भिणी अइहवा इच्चादिसण्णाओ आदाणपदाओ, इदमेदस्स अत्थि त्ति संबंधणिबंधणत्तादो। (जयध. १, पृ. ३१–३२)। ४. दव्व-खेत्त-काल-भावसंजोयपदाणि रायासि-धणुहर-सुरलोयणयर-भारहय-अइरावय-सारय-वासंतय-कोहि-माणिइच्चाईणि णामाणि वि आदाणपदे चेव णिवदंति। (जयध. १, पृ. ३४)।

१ आगम का विवक्षित अध्ययन व उद्देश्य आदि सर्वप्रथम जिस पद के उच्चारण से प्रारम्भ होता है उसे आदानपद कहते हैं। जैसे—आवंती (आचारांग का पांचवां अध्ययन), चाउरंगिज्जं (उत्तराध्ययनों में तीसरा) और असंखयं (उत्तराध्ययनों में चौथा अध्ययन) इत्यादि पद। २. 'यह इसके है' इस विवक्षा में जो पद निष्पन्न होते हैं उन्हें आदानपद समझना चाहिए। जैसे—छत्री, मौली, गर्भिणी और अविधवा आदि।

आदानभय—१. किञ्चन द्रव्यजातमादानम् तस्य नाश हरणादिभ्यो भयमादानभयम्। (आव. भा. हरि. व मलय. वृ. १८४, पृ. ४७३ व ५७३)। २. धनादिग्रहणाद् भयमादानभयम्। (कल्पसूत्र वि. वृ. १–१५, पृ. ३०)। ३. आदीयत इत्यादानम्, तदर्थं चौरादिभ्यो यद्भयं तदादानभयम्। (ललितवि. मु. पंजि. पृ. ३८)।

३ जो 'आदीयते' अर्थात् ग्रहण किया जाता है, इस निरुक्ति के अनुसार ग्रहण की जाने वाली वस्तु आदान कहलाती है। उसके लिए जो चोर आदि से भय होता है उसे आदानभय कहते हैं।

आदित्य—१. आदौ भव आदित्यो बहुलवचनात् त्य-प्रत्ययः इति व्युत्पत्तेः। (सूर्यप्र. वृ. २०–१०५, १०६)। २. अदितेर्देवमातुरपत्यानि आदित्याः। (त. वृत्ति श्रुत. ४–२५)।

१ आदि में होने वाले का नाम आदित्य है। २ अदिति—देवमाता—की सन्तानों को आदित्य (लौकान्तिक देवविशेष) कहा जाता है।

आदित्यमास—१. आइच्चो खलु मासो तीसं अद्धं च होइ दिवसाणं। (ज्योतिष्क. ३७)। २. स चैकस्य दक्षिणायनस्योत्तरायणस्य वा त्र्यशीत्यधिक-दिनशतप्रमाणस्य षष्ठभागमानः। यदि वा आदित्य-चारनिष्पन्नत्वादुपचारतो मासोऽप्यादित्यः। (व्यव. भा. मलय. वृ. २–१५, पृ. ७)। ३. आदित्यमासस्त्रिंशदहोरात्राणि रात्रिन्दिवस्य चार्द्धम्, दक्षिणायनस्योत्तरायणस्य वा षष्ठभागमानः इत्यर्थः। (बृहत्क. वृ. ११३०)।

१ साढ़े तीस ($30\frac{1}{2}$) दिन-रात प्रमाण काल को आदित्यमास कहते हैं। २ यह आदित्यमास उत्तरायण अथवा दक्षिणायन के छठे भाग प्रमाण होता

है (१८३÷६=३०१/२)। अथवा सूर्य के संचार से उत्पन्न होने के कारण इस मास को भी आदित्य कहा जाता है।

आदित्यसंवत्सर—१. छप्पि उऊपरियट्टा एसो संवच्छरो उ आइच्चो। (ज्योतिष्क. ३४)। २. तथा यावता कालेन षडपि प्रावृडादयः ऋतवः परिपूर्णाः प्रावृत्ता भवन्ति तावान् कालविशेष आदित्यसंवत्सरः। (सूर्यप्र. मलय. वृ. १०, २०, ५)।

१ जितने काल में परिपूर्ण छह ऋतुओं का परिवर्तन होता है उतने काल का नाम आदित्यसंवत्सर है (एक ऋतु ६१ दिन, ६१×६=३६६ दिन)।

आदिमान् वैस्रसिक बन्ध—तत्रादिमान् स्निग्ध-रूक्षगुणनिमित्तः विद्युदुल्काजलधाराग्नीन्द्रधनुरादि-विषयः। (त. वा. ५, २४, ७)।

स्निग्ध और रूक्ष गुण के निमित्त से बिजली, उल्का, जलधारा, अग्नि और इन्द्रधनुष आदिरूप जो पुद्गलों का बन्ध होता है वह आदिमान् वैस्रसिक बन्ध कहलाता है।

आदिमोक्ष—१. इत्थिओ जे ण सेवंति आइमोक्खा हि ते जणा इति। (सूत्रकृ. १-५)। २. आदिः संसारस्तस्मात् मोक्ष आदिमोक्षः (त) संसारविमुक्ति यावदिति। धर्मकारणानां वा ऽऽदिभूतं शरीरम्, तद्विमुक्ति यावत्, यावज्जीवमित्यर्थः। (सूत्रकृ. शी. वृ. १, ७, २२)।

१ जो स्त्रियों का सेवन नहीं करते हैं, ऐसे पुरुषों को आदिमोक्ष कहते हैं।

आदेयनाम—१. प्रभोपेतशरीरकारणमादेयनाम। (स. सि. ८-११; भ. आ. मूला. टी. २१२१)। २. आदेयभावनिर्वर्तकं आदेयनाम। (त. भा. ८, १२)। ३. प्रभोपेतशरीरताकरणमादेयनाम। यस्योदयात् प्रभोपेतशरीरं दृष्टेष्टमुपजायते तदादेयनाम। (त. वा. ८, ११, ३६; त. श्लो. ८-११)। ४. आदेयनाम यदुदयादादेयो भवति, यच्चेष्टते भाषते वा तत्सर्वं लोकः प्रमाणीकरोति। (श्रा. प्र. टी. २४; धर्मसं. मलय. वृ. ६२१, पृ. २३३)। ५. गृहीतवाक्यत्वादादरोपजननहेतुतां प्रतिपद्यते उदयावलिकं प्रविष्टं सत्। एतदुक्तं भवति—यस्यादेयनामकर्मोदयस्तेनोक्तं प्रमाणं क्रियते यत् किञ्चिदपि, दर्शनसमनन्तरमेव चाभ्युत्थानादि लोकः समाचरतीत्येवंविधविपाकमादेयनामेति ××× अथवा आदेयता श्रद्धेयता दर्शनादेव यस्य भवति, स च शरीरगुणो यस्य विपाकाद् भवति तदादेयनाम। (त. भा. हरि. व सिद्ध. वृ. ८-१२)। ६. आदेयता ग्रहणीयता बहुमान्यता इत्यर्थः। जस्स कम्मस्स उदएण जीवस्स आदेयत्तमुप्पज्जदि तं कम्ममादेयं णाम। (धव. पु. ६, पृ. ६५); जस्स कम्मस्सुदएण जीवो आदेज्जो होदि तमादेज्जणामं। (धव. पु. १३, पृ. ३६६)। ७. यस्य कर्मण उदयेनादेयत्वं प्रभोपेतशरीरं भवति तदादेयनाम। अथवा यदुदयादादेयवाच्यं(क्यं) तदादेयम्। (मूला. वृ. १२-१९५)। ८. यदुदयाज्जीवः सर्वस्यादेयो भवति ग्राह्यवाक्यो भवति तदादेयनाम। (कर्मवि. गर्ग. पू. व्या. ७५, पृ. ३३)। ९. यदुदयेन यत्किञ्चिदपि ब्रुवाणः सर्वस्योपादेयवचनो भवति तदादेयनाम। (कर्मस्त. गो. ९-१०, पृ. ८७; प्रव. सारो. वृ. १२६६; शतक. मल. हेम. वृ. ३७-३८, पृ. ५१; धर्मसं. मलय. वृ. ६२१)। १०. तथा यदुदयवशात् यच्चेष्टते भाषते वा तत्सर्वं लोकः प्रमाणीकरोति, दर्शनसमनन्तरमेव जनोऽभ्युत्थानादि समाचरति तदादेयनाम। (प्रज्ञाप. मलय. वृ. २३, २९३; पंचसं. मलय. वृ. ३-८; पृ. ११७; कर्मप्र. यशो. टी. १, पृ. ६)। ११. आदेयनामकर्मोदयात ग्राह्यवाक्यो भवति। (पंचसं. स्वो. वृ. ३-९, पृ. ११९)। १२. प्रभायुक्तशरीरकारकमादेयनाम। (त. वृत्ति श्रुत. ८-११)।

१ जिस कर्म के उदय से प्रभा (कान्ति) युक्त शरीर हो उसे आदेयनामकर्म कहते हैं। ४ जिसके उदय से प्राणी आदेय—ग्राह्य या बहुमान्य—होता है, वह जो भी व्यवहार करता है या बोलता है उसे लोग प्रमाण मानते हैं, उसे आदेय नामकर्म कहा जाता है।

आदेयवचनता—आदेयवचनता सकलजनग्राह्यवाक्यता। (उत्तरा. नि. शा. वृ. १-५८, पृ. ३९)।

सर्व लोगों के द्वारा वचनोंकी ग्राह्यता या उपादेयता को आदेयवचनता कहते हैं। यह आचार्य के ३६ गुणों के अन्तर्गत चार प्रकार की वचनसम्पत् में प्रथम है।

आदेश—अपरः (निर्देशः) आदेशेन भेदेन विशेषेण प्ररूपणमिति। (धव. पु. १, पृ. १६०)।

आदेश से अभिप्राय भेद या विशेष का है। अर्थात चौदह मार्गणारूप भेदों के आश्रय से जो विवक्षित वस्तुका कथन किया जाता है वह आदेश कहलाता है।

आदेशकषाय—१. आदेसकसाएण जहा चित्तकम्मे लिहिदो कोहो रूसिदो तिवलिदणिडालो भिउडिं काऊण। (कसायपा. चू. पृ. २४)। २. आदेशकषायः कैतवकृतभृकुटिभङ्गुराकारः, तस्य हि कषायमन्तरेणापि तथादेशदर्शनात्। (आव. नि. हरि. वृ. ९१८, पृ. ३९०)। ३. भिउडिं काऊण भृकुटिं कृत्वा, तिवलिदनिडालो त्रिवलितनिटलः, भृकुटिहेतोः त्रिवलितनिटलः इत्यर्थः। एवं चित्रकर्मणि लिखितः क्रोधः आदेशकषायः। ××× सब्भावट्ठवणा कसायपरूवणा कसायवुद्धी च आदेसकसाओ। (जयध. १, पृ. ३०१)।

१ जिसकी भौंहें चढ़ी हुई हैं तथा मस्तक पर त्रिवली—चर्मगत तीन रेखायें—पड़ी हुई हैं, इस प्रकार से चित्र में अंकित क्रोध कषाय को आदेशकषाय कहा जाता है।

आदेशभव—आदेशभवो णाम चत्तारि गइणामाणि, तेहि जणिदजीवपरिणामो वा। (धव. पु. १६, पृ. ५१२)।

चार गतिनामकर्मों को अथवा उनसे जनित जीवपरिणाम को आदेशभव कहते हैं।

आदोलकरण—देखो अश्वकर्णकरण। १. संपहि आदोलनकरणसण्णाए अत्थो वुच्चदे—आदोलं नाम हिंदोलम्, आदोलमिव करणमादोलकरणम्। यथा हिंदोलत्थंभस्स वरत्ताए च अंतराले तिकोणं होऊण कण्णायारेण दीसइ एवमेत्थ वि कोहादिसंजलणाणमणुभागसंणिवेसो कमेण हीयमाणो दीसइ त्ति एदेण कारणेण अस्सकण्णकरणस्स आदोलकरणसण्णा जादा। एवमोवट्टणमुव्वट्टणकरणे त्ति एसो वि पज्जायसद्दो अणुगयट्ठो दट्ठव्वो, कोहादिसंजलणाणमणुभागविण्णासस्स हाणि-वड्ढिसरूवेणावट्ठाणं पेक्खियूण तत्थ ओवट्टणमुव्वट्टणसण्णाए पुव्वाइरिएहि पयट्टाविदत्तादो। (जयध.—धव. पु. ६, पृ. ३६४, टि. ५)। २. से काले ओवट्टणि-उव्वट्टण अस्सकण्ण आदोलं। करणं तियसण्णगयं संजलणरसेसु वट्टिहिदि॥ (लब्धि. ४५९)।

१ आदोल नाम हिंडोले (झूले) का है। हिंडोले के समान जो करण—परिणाम—क्रम से उत्तरोत्तर हीयमान होते हुए चले जाते हैं, इसे आदोलकरण कहते हैं। अपवर्तन-उद्वर्तन और अश्वकर्ण करण इसी के नामान्तर हैं।

आद्यन्तमरण—१. साम्प्रतेन मरणेनासादृश्यभावि यदि मरणमाद्यन्तमरणमुच्यते, आदिशब्देन साम्प्रतिकं प्राथमिकं मरणमुच्यते, तस्य अन्तो विनाशभावो यस्मिन्नुत्तरमरणे तदेतदाद्यन्तमरणमभिधीयते। प्रकृति-स्थित्यनुभव-प्रदेशैर्यथाभूतैः साम्प्रतमुपैति मृतिं तथाभूतां यदि सर्वतो देशतो वा नोपैति तदाद्यन्तमरणम्। (भ. आ. विजयो. २५)। २. प्रकृतिस्थित्यनुभव-प्रदेशैर्देशतः सर्वतो वान्यादृशैर्मरणमाद्यन्तमरणम्, आदेः प्रथममरणस्यान्तो विनाशो यस्मिन्नुत्तरमरण इति व्युत्पत्तेः। (भ. आ. मूला. टी. २५)।

वर्तमान मरण से आगामी मरण के विलक्षण होने को आद्यन्तमरण कहते हैं। अर्थात् प्रकृति, स्थिति, अनुभाग और प्रदेशों की अपेक्षा कर्मों की बन्धउदयादि अवस्था जैसी वर्तमान मरण के समय है वैसी वह अगले मरण के समय देशतः या सर्वतोभावेन न हो, इसका नाम आद्यन्तमरण है।

आधाकर्म—१. जं तमाधाकम्मं णाम। तं ओद्दावण विद्दावण-परिद्दावण-आरंभकदणिप्पण्णं तं सव्वं आधाकम्मं णाम। (षट्खं. ५, ४, २१-२२—पु. १३, ४६)। २. छज्जीवणिकायाणं विराहणोद्दावणादिणिप्पण्णं। आधाकम्मं णेयं सय-परकदमादसंपण्णं॥ (मूला. ६–५)। ३. आहा अहे य कम्मे आयाहम्मे य अत्तकम्मे य। पडिसेवण पडिसुणणा संवासऽणुमोयणा चेव॥ ओरालसरीराणं उद्दवण-तिवायणं च जस्सट्ठा। मणमाहित्ता कीरइ आहाकम्मं तयं वेंति॥ (पिण्डनि. ९५ व ९७)। ४. जीवस्य उपद्रवणं ओद्दावणं णाम। अङ्गच्छेदनादिव्यापारः विद्रावणं णाम। संतापजननं परिदावणं णाम। प्राणिप्राणवियोजनं आरम्भो णाम। ओद्दावण-विद्दावण-परिद्दावण-आरंभकज्जभावेण णिप्फण्णमोरालियशरीरं तं सव्वं आधाकम्मं णाम। जम्हि सरीरे ट्ठिदाणं जीवाणं ओद्दावण-विद्दावण-परिद्दावण-आरंभा अण्णेहितो होंति तं शरीरमाधाकम्मं त्ति भणिदं होदि। (धव. पु. १३, पृ. ४६)। ५. ओरालग्गहणेणं तिरिक्ख-मणुयाऽहवा सुहुमवज्जा। उद्दवणं पुण जाणसु अइवायविवज्जियं पीडं॥ काय-वइ-मणो तिन्नि उ अहवा देहाउ-इंदियप्पाणा। सामित्तावायाणे होइ तिवाओ य करणेसु॥ हिययम्मि समाहेउं एगमणेगं च गाहगं जो उ। वहणं करेइ दाया कायेण

तमाह कम्मं ति ।। (पिण्डनि. भा. २५-२७, पृ. ३८)। ६. आहाकम्म-द्धाणकप्पाइयं वा वहु अइयारं करेज्जा। दीहगिलाणकप्पस्स वा अवसाणे आहाकम्मसन्निहिसेवणं वा कयं होज्जा। (जीतक. चू. पृ. २०, पं. ५-६)। ७. वृक्षच्छेदस्तदानयनं इष्टकापाकः भूमिखननं पाषाणसिकतादिभिः पूरणं धरायाः कुट्टनं कर्दमकरणं कीलानां करणं अग्निनायस्तापनं (कार्ति. —अग्निना लोहतापनं) कृत्वा प्रताडच ककचैः काष्ठपाटनं वासीभिस्तक्षणं, (कार्ति.—'वासीभिस्तक्षणं' नास्ति) परशुभिश्छेदनं इत्येवमादिव्यापारेण षण्णां जीवनिकायानां बाधां कृत्वा स्वेन वा उत्पादिता अन्येन वा कारिता वसतिराधाकर्म-शब्देनोच्यते। (भ. आ. विजयो. टी. २३०; कार्तिके. टी. ४४९)। ८. साध्वर्थं यत्सचित्तमचित्ती क्रियते अचित्तं वा पच्यते तदाधाकर्म। (आचारांग शी. वृ. २, १, २६६, पृ. ३१६)। ९. आधाय विकल्प्य यतिं मनसि कृत्वा सचित्तस्याचित्तीकरणमचित्तस्य वा पाको निरुक्तादाधाकर्म। (योगशा. स्वो. विव. १-३८)। १०. आधाकर्म अध्वानकल्पादिकं वा शुष्ककदलीफलादिधरणतः। दीर्घग्लानेन वा सता यदाधाकर्मरसादिकारणतः। सन्निधिसेवनं वा चरितम्। (जीतक. चू. वि. व्या. पृ. ५१, २०-४)। ११: वृक्षच्छेदेष्टकापाक-कर्दमकरणादिव्यापारेण षण्णां जीवनिकायानां बाधां कृत्वा स्वेनोत्पादिता अन्येन वा कारिता क्रियमाणा वानुमोदिता वसतिराधाकर्म-शब्देनोच्यते। (भ. आ. मूला. टी. २३०)। १२. आधानम् आधा ××× साधुनिमित्तं चेतसः प्रणिधानम्, यथा अमुकस्य साधोः कारणेन मया भक्तादि पचनीयमिति, आधया कर्म पाकादिक्रिया आधाकर्म, तद्योगाद् भक्ताद्यपि आधाकर्म। ××× यद्वा आधाय—साधुं चेतसि प्रणिधाय—यत् क्रियते भक्तादि तदाधाकर्म। (पिण्डनि. मलय. वृ. ९२); अधःकर्मेति अधोगतिनिबन्धनं कर्म अधःकर्म। ××× आत्मानं दुर्गतिप्रपातकारणतया हन्ति विनाशयतीत्यात्मघ्नम्। तथा यत् पाचकादिसम्बन्धि कर्म पाकादिलक्षणं ज्ञानावरणीयादिलक्षणं वा तदात्मनः सम्बन्धि क्रियते अनेनेति आत्मकर्म। एतानि (आधाकर्म, अधःकर्म, आत्मघ्नकर्म, आत्मकर्म) च नामान्याधाकर्मणो मुख्यानि। (पिण्डनि. मलय. वृ. ९५)। १३. यत् षट्कायविराधनया यतिन आधाय संकल्पेनाशनादिकरणं तदाधाकर्म। (गु. गु. षट्. स्वो. वृ. २०, पृ. ४८)। १४. साधुं चेतसि आधाय प्रणिधाय, साधुनिमित्तमित्यर्थः, कर्म—सचित्ताचित्तीकरणमचित्तस्य वा पाको निरुक्तादाधाकर्म। (धर्मसं. मान. स्वो. वृ. ३, २२, पृ. ३८)।

३. जिस एक या अनेक साधुओं के निमित्त मन को आहित—प्रवर्तित—करके औदारिकशरीरधारी तिर्यंच व मनुष्यों का अपद्रावण—अतिपात (मरण) रहित पीडन—और त्रिपात—मन-वचन-काय—अथवा देह, आयु और इन्द्रिय प्राण इन तीनों का विनाश किया जाता है उसे आधाकर्म या अधःकर्म कहते हैं। इसके आधाकर्म, अधःकर्म, आत्मघ्नकर्म और आत्मकर्म ये नामान्तर हैं। ४ उपद्रावण, विद्रावण, परिद्रावण और आरम्भकार्य के द्वारा निष्पन्न औदारिक शरीर को आधाकर्म कहते हैं। अभिप्राय यह कि जिस शरीर में स्थित प्राणियों के अन्य प्राणियों के निमित्त से उपद्रावण आदि होते हैं उस शरीर को आधाकर्म कहते हैं। ७ वृक्षों के छेदने, ईंटों के पकाने एवं भूमि के खोदने आदि रूप व्यापार से छह काय के प्राणियों को बाधा पहुँचा कर स्वयं या अन्य के द्वारा वसतिका के उत्पादन को भी आधाकर्म कहा जाता है।

आधाकर्मिक—देखो आधाकर्म। आधाकर्मिकं यन्मूलत एव साधूनां कृते कृतम्। (व्यव. भा. मलय. वृ. ३-१६४, पृ. ३५)।

साधुओं के लिए बनाये गये आहार को आधाकर्मिक कहते हैं।

आधाकर्मिका—देखो आधाकर्म। आधाकर्मिका साधूनामेवार्थाय कारिता। (बृहत्क. वृ. १७५३)।

साधुओं के लिए बनवाई गई वसतिका को आधाकर्मिका कहते हैं।

आधिकरणिकी क्रिया—देखो अधिकरणक्रिया। हिंसोपकरणादानादधिकरणिकी क्रिया। (स. सि. ६-५; त. वा. ६, ५, ८)।

हिंसा के उपकरण—खड्ग व भाला आदि—के ग्रहण करने को आधिकरणिकी क्रिया कहते हैं।

आध्यात्मिक धर्म्यध्यान — स्वसंवेद्यमाध्यात्मिकम्। (चा. सा. पृ. ७६)।

स्वसंवेद्य—स्वसंवेदनगोचर—धर्म्यध्यान को आध्यात्मिक धर्म्यध्यान कहते हैं।

आध्यान—आध्यानं स्यादनुध्यानमनित्यत्वादिचिन्तनैः। (म. पु. २१–२८)।
संसार, देह व भोगादि की अनित्यतादि के वार-वार चिन्तन को आध्यान कहते हैं।

आन—सङ्ख्येया आवलिका आनः, एक उच्छ्वास इत्यर्थः। (षडशीति दे. स्वो. वृ. ६९, पृ. १९५)।
सङ्ख्यात आवली प्रमाण काल को आन (उच्छ्वास) कहते हैं।

आनति—तथा पूजितसंयतस्य पञ्चाङ्गप्रणामकरणम् आनतिः। (सा. ध. ५–४५)।
दो हाथ, दो जानु और मस्तक इन पांच अंगों से प्रणाम करने को आनति कहते हैं।

आन-पानपर्याप्ति—देखो उच्छ्वास-निःश्वासपर्याप्ति। उच्छ्वास-निःसरणशक्तेर्निष्पत्तिरानपानपर्याप्तिः। (मूला. वृ. १२–१९५)।
उच्छ्वास के निकलने की शक्ति की उत्पत्ति का नाम आन-पानपर्याप्ति है।

आन-पानप्राण—१. उच्छ्वासपरावर्तोत्पन्नखेदरहितविशुद्धचित्प्राणाद्विपरीतसदृश आन-पानप्राणः। (बृ. द्रव्यसं. टी. ३)। २. उच्छ्वास-निःश्वासनामकर्मोदयसहितदेहोदये सत्युच्छ्वास-निःश्वासप्रवृत्तिकारणशक्तिरूप आन-पानप्राणः। (गो. जी. म. प्र. व जी. प्र. टी. १३१)।
२ उच्छ्वास-निःश्वास नामकर्म के साथ शरीर नाम कर्म का उदय होने पर उच्छ्वास-निःश्वास प्रवृत्ति की कारणभूत शक्ति को आनपानप्राण कहते हैं।

आनप्राण—१. असंख्येया आवलिका एक आनप्राणः, द्विपञ्चाशदधिकत्रिचत्वारिंशच्छतसंख्यावलिकाप्रमाण एक आनप्राण इति वृद्धसम्प्रदायः। तथा चोक्तम्—एगो आणापाणू तेयालीसं सया उ वावन्ना। आवलियपमाणेणं अणंतनाणीहिं णिद्दिट्ठो॥ (सूर्यप्र. मलय. वृ. २०, १०५–१०६)। २. आनप्राणौ उच्छ्वास-निःश्वासकालः। (कल्पसूत्र विनय. वृ. ६–११८, पृ. १७३)।
असंख्यात आवलियों का एक आन-प्राण होता है। वृद्धसम्प्रदाय के अनुसार तेतालीस सौ वावन आवली प्रमाण आनप्राण होता है।

आनप्राणकाल—हृष्टस्य नीरोगस्य श्रम-बुभुक्षादिना निरुपक्लिष्टस्य यावता कालेनैतावुच्छ्वास-निःश्वासौ भवतः तावान् कालः आनप्राणः। (जीवाजी. मलय. वृ. ३, २, १७८, पृ. ३४४)।
देखो आनप्राण।

आनप्राणद्रव्यवर्गणा—आणपाणुदव्ववग्गणा णाम आणपाणुदव्वाणि घेत्तूण आणपाणुत्ताए परिणामेंति जीवा। (कर्मप्र. चू. बं. क. गा. १९, पृ. ४१)।
जिन पुद्गलवर्गणाओं को ग्रहण कर जीव उन्हें श्वासोच्छवास के रूप में परिणमित करता है उन्हें आनप्राणद्रव्यवर्गणा कहते हैं।

आनप्राणपर्याप्ति— देखो आनपानपर्याप्ति व उच्छ्वासपर्याप्ति। आनप्राणपर्याप्तिः उच्छ्वास-निःश्वासयोग्यान् पुद्गलान् गृहीत्वा तथा परिणमय्याऽऽनप्राणतया विसर्जनशक्तिः। (स्थाना. अभय. वृ. २, १७, ३, पृ. ५०)।
उच्छ्वास-निःश्वास के योग्य पुद्गलों को ग्रहण कर और उनको उच्छ्वास-निःश्वास रूप से परिणमाकर आनप्राणरूप से विसर्जन की शक्ति का नाम आनप्राणपर्याप्ति है।

आनयन—१. आत्मना संकल्पिते देशे स्थितस्य प्रयोजनवशाद्यत्किञ्चिदानयेत्याज्ञापनमानयनम्। (स. सि. ७–३१; त. वा. ७, ३१, १; चा. सा. पृ. ९)। २. अन्यमानयेत्याज्ञापनमानयनम्। (त. श्लो. ७, ३१)। ३. आनयनं विवक्षितक्षेत्राद् वहिः स्थितस्य सचेतनादिद्रव्यस्य विवक्षितक्षेत्रे प्रापणम्, सामर्थ्यात् प्रेष्येण, स्वयं गमने हि व्रतभङ्गः स्यात्, परेण तु आनयने न व्रतभङ्गः स्यादिति वुद्धया प्रेष्येण यदाऽऽनाययति सचेतनादिद्रव्यं तदाऽतिचारः। (योगशा. स्वो. विव. ३–११७)। ४. तद्देशाद् वहिः प्रयोजनवशादिदमानयेत्याज्ञापनमानयनम्। (रत्नक. टी. ४–६)। ५. आनयनं सीमवहिर्देशादिष्टवस्तुनः प्रेष्येण विवक्षितक्षेत्रे प्रापणम्। च-शब्देन सीमवहिर्देशे स्थितं प्रेष्यं प्रति इदं कुर्वित्याज्ञापनं वा। (सा. ध. स्वो. टी. ५–२७)। ६. आनयनं विवक्षितक्षेत्राद् वहिः स्थितस्य सचेतनादिद्रव्यस्य विवक्षितक्षेत्रे प्रापणम्। (धर्मसं. मान. स्वो. वृ. २–५६, पृ. ११५)। ७. आत्मसंकल्पितदेशस्थितेऽपि प्रतिषिद्धदेशस्थितानि वस्तूनि कार्यवशात्तद्वस्तुस्वामिनं कथयित्वा निजदेशमध्ये आनाय्य क्रय-विक्रयादिकं यत्करोति तदानयनम्। (त. वृत्ति श्रुत. ७–३१)। ८. आत्मसंकल्पिताद्देशाद् वहिः स्थितस्य वस्तुनः।

आनयेतीङ्गितैः किञ्चिद् ज्ञापनानयनं मतम् ॥ (लाटीसं. ६–१२९)।

१ प्रतिज्ञात देश में स्थित रहते हुए प्रयोजन के वश मर्यादित क्षेत्र के बाहर से जिस किसी वस्तु के मंगाने को आनयन कहते हैं।

आनयनप्रयोग—देखो आनयन। १. विशिष्टावधिके भूप्रदेशाभिग्रहे परतो गमनासंभवात् सतो यदन्योऽवधिकृतदेशाद् बहिर्वर्तिनः सचित्तादिद्रव्यस्यानयनाय प्रयुज्यते 'त्वयेदमानेयम्' सन्देशकप्रदानादिना आनयनप्रयोगः। आनायनप्रयोग इत्यपरे पठन्ति। (त. भा. हरि. व सिद्ध. वृ. ७–२६; श्राव. हरि. वृ. ६, पृ. ८३५; श्रा. प्र. टी. ३२०)। २. आनयने विवक्षितक्षेत्राद् बहिर्वर्तमानस्य सचेतनादिद्रव्यस्य विवक्षितक्षेत्रप्रापणे प्रयोगः, स्वयं गमने व्रतभङ्गभयादन्यस्य स्वयमेव वा गच्छतः सन्देशादिना व्यापारणमानयनप्रयोगः। (धर्मबि. वृ. ३–३२)।

देखो आनयन।

आनापानपर्याप्ति — देखो आनपानपर्याप्ति। उच्छ्वासनिस्सरणशक्तेर्निष्पत्तिनिमित्तपुद्गलप्रचयावाप्तिरानापानपर्याप्तिः। (धव. पु. १, पृ. २५५)।

देखो आनपानपर्याप्ति।

आनुगामिक अवधि—देखो अनुगामी। १. आनुगामिकं यत्रक्वचिदुत्पन्नं क्षेत्रान्तरगतस्यापि न प्रतिपतति भास्करवत् घटरक्तभाववच्च। (त. भा. १–२३)। २. अनुगमनशीलम् आनुगामिकम्, अवधिज्ञानिनं लोचनवद् गच्छन्तमनुगच्छतीति भावार्थः। (नन्दी. हरि. वृ. १५, पृ. २३)। ३. अनुगमनशील आनुगामिकः लोचनवत्। (आव. नि. हरि. वृ. ५६, पृ. ४२)। ४. तथा गच्छन्तं पुरुषमा समन्तादनुगच्छतीत्येवंशीलमानुगामि आनुगाम्येव वाऽऽनुगामिकः। स्वार्थे कः प्रत्ययः। अथवा अनुगमः प्रयोजनं यस्य स आनुगामिकः लोचनवत् गच्छन्तमनुगच्छति सोऽवधिरानुगामिक इति भावः। (प्रज्ञाप. मलय. वृ. ३३–३१७, पृ. ५३९)। ५. उत्पत्तिक्षेत्रादन्यत्राप्यनुवर्तमानमानुगामिकम्। (जैनत. ११, पृ. ७)।

देखो अनुगामी अवधि।

आनुपूर्वी—१. गतावुत्पत्तुकामस्यान्तर्गतौ वर्तमानस्य तदभिमुखमानुपूर्व्या तत्प्रापणसमर्थमानुपूर्वी नामेति। निर्माणनिर्मितानां शरीराङ्गोपाङ्गानां विनिवेशक्रमनियामकमानुपूर्वी नामेत्यपरे। (त. भा. ८, १२)। २. आनुपूर्वी नाम यदुदयादपान्तरालगतो नियतदेशमनुश्रेणिगमनम्। (श्रा. प्र. टी. २१)। ३. आनुपूर्वी—वृषभनासिकान्यस्तरज्जूसंस्थानीया, यया कर्मपुद्गलसंहत्या विशिष्टं स्थानं प्राप्यतेऽसौ, यया वोर्ध्वोत्तमाङ्गाधश्चरणादिरूपो नियमतः शरीरविशेषो भवति साऽऽनुपूर्वीति। (आव. नि. हरि. वृ. १२२, पृ. ८४)। ४. भवाद् भवं नयत्यानुपूर्व्या यया साऽऽनुपूर्वी वृषभाकर्षणरज्जुकल्पा। (पंचसं. च. स्वो. वृ. ३–१२७, पृ. ३८)। ५. पुव्वुत्तरसरीराणमन्तरे-एग-दो-तिण्णिसमए वट्टमाणजीवस्स जस्स कम्मस्स उदएण जीवपदेसाण विसिट्ठो संठाणविसेसो होदि तस्स आणुपुव्वि त्ति सण्णा। (धव. पु. ६, पृ. ५६); मुक्कपुव्वसरीरस्स अगहिदुत्तरसरीरस्स जीवस्स अट्ठकम्मक्खंधेहि एयत्तमुवगयस्स हंसधवलविस्सासोवचएहि उवचियपंचवण्णकम्मक्खंधंतस्स विसिट्ठमुहागारेण जीवपदेसाणं अणु परिवाडीए परिणामो आणुपुव्वी णाम। (धव. पु. १३, पृ. ३७१)। ६. आनुपूर्वी च क्षेत्रसन्निवेशक्रमः, यत्कर्मोदयादतिशयेन तद्गमनानुगुण्यं स्यात् तदप्यानुपूर्वीशब्दवाच्यम्। (त. भा. सिद्ध. वृ. ८–१२)। ७. यदुदयादन्तरालगतौ जीवो याति तदानुपूर्वी नाम। (समवा. अभय. वृ. ४२, पृ. ६७)। ८. द्विसमयादिना विग्रहेण भवान्तरोत्पत्तिस्थानं गच्छतो जीवस्यानुश्रेणिनियता गमनपरिपाटीहानुपूर्वीत्युच्यते, तद्विपाकवेद्या कर्मप्रकृतिरपि आनुपूर्वी। (कर्मस्त. गो. वृ. ९–१०, पृ. ८६)। ९. नारय-तिरिय-नरामरभवेसु जंतस्स अंतरगईए। अणुपुव्वीए उदओ सा चउहा सुणसु जह होइ॥ (कर्मवि. गर्ग. १२१, पृ. ५०)। १०. आनुपूर्वी नरकादिका, यदुदये जीवो नरकादौ गच्छति, नरकादिनयने कारणं रज्जुवद् वृषभस्य। (कर्मवि. पू. व्या. ७५, पृ. ३३)। ११. तथा कूर्पर-लांगल-गोमूत्रिकाकाररूपेण यथाक्रमं द्वि-त्रि-चतुःसमयप्रमाणेन विग्रहेण भवान्तरोत्पत्तिस्थानं गच्छतो जीवस्यानुश्रेणिगमनं आनुपूर्वी, तन्निबन्धनं नाम आनुपूर्वीनाम। (सप्ततिका मलय. वृ. ५, पृ. १५२)। १२. आनुपूर्वी नाम यदुदयादन्तरालगतौ नियतदेशमनुसृत्य अनुश्रेणिगमनं भवति। नियत एवाङ्गविन्यास इत्यन्ये। (धर्मसं. मलय. वृ. ६१८)। १३. कूर्पर-लाङ्गल-गोमूत्रिकाकाररूपेण यथाक्रमं द्वि

त्रि-चतु:समयप्रमाणेन विग्रहेण भवान्तरोत्पत्तिस्थानं गच्छतो जीवस्यानुश्रेणिनियता गमनपरिपाटी आनुपूर्वी। तद्विपाकवेद्या कर्मप्रकृतिरपि कारणे कार्योपचारात् आनुपूर्वी। (पंचसं. मलय. वृ. ३–६, पृ. ११५; प्रज्ञाप. मलय. वृ. २३–२९०, पृ. ६८०; प्रव. सारो. वृ. १२६३)। १४. गत्यभिधानव्यपदेश्यमानुपूर्वीनाम। (कर्मवि. दे स्वो. वृ. ४२)। १५. विग्रहेण भवान्तरोत्पत्तिस्थानं गच्छतो जीवस्यानुश्रेणिनियता गमनपरिपाट्यानुपूर्वी। तद्विपाकवेद्या कर्मप्रकृतिरप्यानुपूर्वी। (कर्मप्र. यशो. टी. १, पृ. ५)।

१ जो जीव विवक्षित गति में उत्पन्न होने का इच्छुक होकर अन्तर्गति—विग्रहगति—में वर्तमान है वह जिस कर्म के उदय से श्रेणि के—आकाशप्रदेशपंक्ति के—अनुसार जाकर अभीष्ट स्थान को प्राप्त करता है उसका नाम आनुपूर्वी है। अन्य कितने ही आचार्य यह भी कहते हैं कि जो कर्म निर्माण नामकर्म के द्वारा निर्मित शरीर के अंग और उपांगों की रचनाविशेष के क्रम का नियामक होता है वह आनुपूर्वी नामकर्म कहलाता है।

आनपूर्वीसंक्रम — कोह-माण-माया-लोभा एसा परिवाडी आणुपुव्वीसंकमो णाम। (कसायपा. चू. पृ. ७६४)।

क्रोध, मान, माया और लोभ का क्रम से एक का दूसरे में संक्रमण होने को अर्थात् क्रोधसंज्वलन का मानसंज्वलन में, मानसंज्वलन का मायासंज्वलन में और मायासंज्वलन का लोभसंज्वलन में संक्रमण होने को आनुपूर्वीसंक्रम कहते हैं।

आनुपूर्व्यनाम—देखो आनुपूर्वी। १. पूर्वशरीराकाराविनाशो यस्योदयाद् भवति तदानुपूर्व्यं नाम। (स. सि. ८–११)। २. यदुदयात् पूर्वशरीराकाराविनाशस्तदानुपूर्व्यं नाम। यत्पूर्वशरीराकाराविनाश: यस्योदयात् भवति तदानुपूर्व्यं नाम॥ (त. वा. ८, ११, ११)। ३. यदुदयात् पूर्वशरीराकाराविनाशस्तदानुपूर्व्यं नाम। (त. श्लो. ८–११)। ४. पूर्वोत्तरशरीरयोरन्तराले एक-द्वि-त्रिसमयेषु वर्तमानस्य यस्य कर्मस्कन्धस्योदयेन जीवप्रदेशानां विशिष्टसंस्थानविशेषो भवति तदानुपूर्व्यं नाम। (मूला. वृ. १२, १९८)। ५. यदुदयेन पूर्वशरीराकार[रा]नाशो भवति तदानुपूर्व्यम्। (त. वृत्ति श्रुत. ८–११)।

१ जिस नामकर्म के उदय से विग्रहगति में जीव के पूर्वशरीर के आकार का विनाश नहीं होता है उसे आनुपूर्व्य नामकर्म कहते हैं।

आन्तर तप—देखो आभ्यन्तर तप। अन्तरव्यापारभूयस्त्वादन्यतीर्थविशेषत:। बाह्यद्रव्यानपेक्षत्वादान्तरं तप उच्यते॥ (त. भा. सिद्ध. वृ. ९-२० उद्.)। प्रायश्चित्तादिरूप छह प्रकार के तप को चूंकि लौकिक जन देख नहीं सकते हैं, विधर्मी जन भाव से उसका आराधन नहीं कर सकते, तथा मुक्तिप्राप्ति का अन्तरङ्ग कारण भी वह है; अतएव उसे आन्तर या आभ्यन्तर तप कहते हैं।

आपृच्छा—१. आदावणादिगहणे सण्णाउब्भामगादिगमणे वा। विणयेणायरियादिसु आपुच्छा होदि कायव्वा॥ (मूला. ४–१४)। २. आप्रच्छनमापृच्छा, स च कर्तुमभीष्टे कार्ये प्रवर्तमानेन गुरो: कार्या 'अहमिदं करोमीति'। (आव. नि. हरि. वृ. ६९७)। ३. आपृच्छा प्रतिप्रश्न: किमयमस्माभिरनुगृहीतव्यो न वेति संघप्रश्न:। (भ. आ. विजयो. टी. ६९); आपृच्छा किमयमस्माभिरनुगृहीतव्यो न वेति संघं प्रति प्रश्न:। (भ. आ. मूला. टी. ६९)। ४. आपृच्छनमापृच्छा, विहार-भूमिगमनादिषु प्रयोजनेषु गुरो: कार्या। च-शब्द: पूर्ववत्। इहोक्तम्—आपुच्छणा उ कज्जे गुरुणो तस्संमयस्स वा नियमा। एवं खु तयं सेयं जायइ सह निज्जराहेऊ॥ इति। (स्थाना. अभय. वृ. १०, १, ७५०, पृ. ४७५)। ५. आपुच्छा—आपृच्छा स्वकार्यं प्रति गुर्वाद्यभिप्रायग्रहणम्। (मूला. वृ. ४–४)।

१ वृक्ष के मूल में अथवा खुले आकाश में कायोत्सर्ग आदि के ग्रहणरूप आतापनयोगादि के विषय में तथा आहार या अन्य किसी निमित्त से दूसरे ग्राम के लिए जाने आदि कार्य के विषय में विनयपूर्वक आचार्य आदि से पूछना, इसका नाम आपृच्छा है।

आप्रच्छन—ग्रन्थारम्भ-कचोल्लोच-कायशुद्धिक्रियादिषु। प्रश्न: सूर्यादिपूज्यानां भवत्याप्रच्छनं मुनौ॥ (आचा. सा. २–१३)।

ग्रन्थ के आरम्भ में, केशलुंच करने के समय और कायशुद्धि आदि क्रियाओं को करते हुए आचार्य आदि पूज्य पुरुषों से पूछने को आप्रच्छन कहते हैं।

आप्रच्छना—देखो आपृच्छा। १. आपुच्छणा उ कज्जे ×××। (आव. नि. ६९७)। २. आउ-

च्छणा उ कज्जे गुरुणो गुरुसम्मयस्स वा णियमा। एवं खु तयं सेयं जायति सति णिज्जराहेऊ ।। (पंचाशक १२–५७०)। ३. इदं करोमीति प्रच्छनं आप्रच्छना। (अनुयो. हरि. वृ. पृ. ५८)।

देखो आपृच्छा।

आपृच्छनावच, आप्रच्छनी भाषा—१. कथ्यतां यन्मया पृष्टं तदित्याप्रच्छनावचः ।। (आचा. सा. ५, ८७)। २. किमेतदित्यादिप्रश्नभाषा आप्रच्छनी। (गो. जी. जी. प्र. टी. २२५)।

१ जो मैंने पूछा है उसे कहिए—मेरे प्रश्न का उत्तर कहें, इत्यादि प्रकार के वचनों को आप्रच्छनावचन या आप्रच्छनी भाषा कहते हैं।

आपेक्षिक सौक्ष्म्य—आपेक्षिकं (सौक्ष्म्यं) विल्वामलक-वदरादीनाम्। (स. सि. ५–२४; त. वा. ५, २४, १०; त. सुखबो. ५–२४)।

दो या दो से अधिक वस्तुओं में जो अपेक्षाकृत सूक्ष्मता (छोटापन) दिखती है उसे आपेक्षिक सौक्ष्म्य कहते हैं। जैसे—बेल की अपेक्षा आंवला छोटा है।

आपेक्षिक स्थौल्य—आपेक्षिकं (स्थौल्यं) वदरामलक-विल्व-तालादिषु। (स. सि. ५–२४; त. वा. ५, २४, ११; त. सुखबो. ५–२४)।

दो या दो से अधिक वस्तुओं में जो एक-दूसरे की अपेक्षा स्थूलता (बड़ापन) दिखती है उसे आपेक्षिक स्थौल्य कहते हैं। जैसे—आंवले की अपेक्षा बेल बड़ा है।

आप्त (अत्त)—१. ववगयअसेसदोसो सयलगुणप्पा हवे अत्तो। (नि. सा. १–५)। २. णाणमादीणि अत्ताणि जेण अत्तो उ सो भवे। रागद्दोसपहीणो वा जे व इट्ठा विसोधीए ।। (व्यव. भा. १०–२३५, पृ. ३५)। ३. आप्तेनोत्सन्नदोषेण सर्वज्ञेनाऽऽगमेशिना। भवितव्यं नियोगेन नान्यथा ह्याप्तता भवेत्। (रत्नक. ५)। ४. ये दर्शन-ज्ञान-विशुद्धलेश्या जितेन्द्रियाः शान्तमदा दमेशाः। तपोभिरुद्भासितचारुदेहा आप्ता गुणैराप्ततमा भवन्ति ।। निद्रा-श्रम क्लेश-विषाद-चिन्ता-क्षुत्तृड्-जरा-व्याधि-भयैर्विहीनाः। अविस्मयाः स्वेदमलैरपेता आप्ता भवन्त्यप्रतिमस्वभावाः ।। द्वेषश्च रागश्च विमूढता च दोषाशयास्ते जगति प्ररूढाः। न सन्ति तेषां गतकल्मषाणां तानर्हतस्त्वाप्ततमान् वदन्ति ।। (वरांग. २५, ८६–८८)। ५. यो यत्राऽविसंवादकः स तत्राऽऽप्तः। (अष्टशती ७८)। ६. आप्तो रागादिरहितः। (दशवै. भा. हरि. वृ. ४–३५, पृ. १२८; सूत्रकृ. शी. वृ. सू. १, ६, ३३, पृ. १८५)। ७. आगमो ह्याप्तवचनमाप्तं दोषक्षयाद् विदुः। वीतरागोऽनृतं वाक्यं न ब्रूयाद्धेत्वसम्भवात् ।। (ललितवि. पृ. ६६; धव. पु. ३, पृ. १२ उ.)। ८. आप्तागमः प्रमाणं स्याद्यथावद्वस्तुसूचकः। यस्तु दोषैर्विनिर्मुक्तः सोऽयमाप्तो निरञ्जनः ।। (आप्तस्वरूप १)। ९. सर्वज्ञं सर्वलोकेशं सर्वदोषविवर्जितम्। सर्वसत्त्वहितं प्राहुराप्तमाप्तमतोचिताः ।। (उपासका. ४६)। १०. यथानुभूताऽनुमितश्रुतार्थाविसंवादिवचनः पुमानाप्तः। (नीतिवा. १५–१५)। ११. अत्तो दोसविमुक्को × × ×। छुह तण्हा भय दोसो रागो मोहो जरा रुजा चिन्ता। मच्चू खेओ सेओ अरइ मओ विभओ जम्मं ।। णिद्दा तहा विसाओ दोसा एदेहिं वज्जियो अत्तो। (वसु. श्रा. ७–६)। १२. अभिधेयं वस्तु यथावस्थितं यो जानीते यथाज्ञातं चाभिधत्ते स आप्तः। (प्र. न. त. ४–४; षड्द. स. टी. पृ. २११)। १३. आप्तास्त एव ये दोषैरष्टादशभिरुज्झिताः। (धर्मश. २१, १२८)। १४. व्यपेताऽशेषदोषो यः शरीरी तत्त्वदेशकः। समस्तवस्तुतत्त्वज्ञः स स्यादाप्तः सतां पतिः ।। (आचा. सा. ३–४)। १५. यथार्थदर्शनः निर्मूलकोपापगमादिगुणयुक्तश्च पुरुष इहाऽऽप्तः। (धर्मसं. मलय. वृ. ३२)। १६. आप्तः शंकारहितः। (नि. सा. वृ. १–५)। १७. मुक्तोऽष्टादशभिर्दोषैर्युक्तः सार्वज्ञ्य-सम्पदा। शास्ति मुक्तिपथं भव्यान् योऽसावाप्तो जगत्पतिः ।। (अन. ध. २–१४)। १८. आप्यते प्रोक्तोऽर्थो यस्मादित्याप्तः; यद्वा आप्ती रागादिदोषक्षयः, सा विद्यते यस्येत्यर्शआदित्वादिति आप्तः। × × × अक्षरविलेखनद्वारेण अङ्गोपदर्शनमुखेन करपल्लव्यादिचेष्टाविशेषवशेन वा शब्दस्मरणाद् यः परोक्षार्थविषयं विज्ञानं परस्योत्पादयति सोऽप्याप्त इत्युक्तं भवति। (रत्नाकरा. ४–४, पृ. ३७)। १९. घातिकर्मक्षयोद्भूतकेवलज्ञानरश्मिभिः। प्रकाशकः पदार्थानां त्रैलोक्योदरवर्तिनाम् ।। सर्वज्ञः सर्वतो व्यापी त्यक्तदोषो ह्यवंचकः। देवदेवेन्द्रवन्द्यांघ्रिराप्तोऽसौ परिकीर्तितः ।। (भावसं. वाम. ३२८, ३२९)। २०. आप्तः प्रत्यक्षप्रमितसकलपदार्थत्वे सति परमहितोपदेशकः। (न्या. दी. पृ. ११३)।

२१. आप्तोऽष्टादशभिर्दोषैर्निर्मुक्तः शान्तरूपवान् । (पू. उपासकाचार ३)। २२. क्षुत्पिपासे भय-द्वेषौ मोह-रागौ स्मृतिर्जरा । रुग्मृती स्वेद-खेदौ च मदः स्वापो रतिर्जनिः ।। विषादविस्मयावेतौ दोषा अष्टादशेरिताः। एभिर्मुक्तो भवेदाप्तो निरञ्जनपदाश्रितः ।। (धर्मसं. श्रा. ४, ७-८)। २३. यथास्थितार्थपरिज्ञानपूर्वकहितोपदेशप्रवण आप्तः । (जैन तर्क. पृ. १६) ।

३ वीतराग, सर्वज्ञ और आगम के ईश (हितोपदेशी) पुरुष को आप्त कहते हैं ।

आबाधा—देखो अवाधा । १. न वाधा अवाधा, अवाधा चेव आवाधा । (धव. पु. ६, पृ. १४८) । २. कम्मसरूवेणागयदव्वं ण य एदि उदयरूवेण । रूवेणुदीरणस्स व आवाहा जाव ताव हवे ।। (गो. क. १५५) ।

२ कर्मरूप से बन्ध को प्राप्त हुआ द्रव्य जितने समय तक उदय या उदीरणा को प्राप्त नहीं होता, उतने काल का नाम अबाधा या आबाधाकाल है ।

आबाधाकाण्डक—उक्कस्सावाधं विरलिय उक्कस्सट्ठिदिं समखंडं करिय दिण्णे रूवं पडि आवाधाकंडयपमाणं पावेदि । (धव. पु. ६, पृ. १४६) ।

विवक्षित कर्म की उत्कृष्ट स्थिति में उसी के उत्कृष्ट आबाधाकाल का भाग देने पर जो लब्ध हो उतना आबाधाकाण्डक का प्रमाण होता है, अर्थात् उतने स्थितिविकल्पों का आबाधाकाण्डक होता है ।

आभिग्रहिक—१. आभिग्रहिकं येन वोटिकादिकुदर्शनानामन्यतमदभिगृह्णाति । (कर्मस्त. गो. वृ. ६-१०, पृ. ८३) । २. तत्राभिग्रहिकं पाखण्डिनां स्व-स्वशास्त्रनियंत्रितविवेकालोकानां परपक्षप्रतिक्षेपदक्षाणां भवति । (योगशा. स्वो. विव. २-३) । ३. तत्राभिग्रहेण इदमेव दर्शनं शोभनं नान्यद् इत्येवं रूपेण कुदर्शनविपयेण निर्वृत्तमाभिग्रहिकम्, यद्वशाद् वोटिकादिकुदर्शनानामन्यतमं दर्शनं गृह्णाति । (षडशीति मलय. वृ. ७५-७६; षडशीति दे. स्वो. वृ. ५१; सम्बोधस. वृ. ४७, पृ. ३२; पंचसं. मलय. वृ. ४-२) । ४. अभिग्रहेण निर्वृत्तं तत्राभिग्रहिकं स्मृतम् । (लोकप्र. ३-६९०) ।

३ यही दर्शन (सम्प्रदाय) ठीक है, अन्य कोई भी दर्शन ठीक नहीं है; इस प्रकार के कदाग्रह से निर्मित मिथ्यात्व का नाम आभिग्रहिक है ।

आभिनिवोधिक—१. ईहा अपोह मीमंसा मग्गणा य गवेसणा । सण्णा सई मई पण्णा सव्वं आभिणिवोहियं ।। (नन्दी. गा. ७७; विशेषा. ३९६) । २. अत्थाभिमुहो णियतो वोधो अभिनिवोधः । स एव स्वार्थिकप्रत्ययोपादानादाभिनिवोधिकम् । अहवा अभिनिवोधे भवं, तेण निव्वत्तं, तम्मतं तप्पयोयणं वाऽऽभिणिवोधिकम् । अहवा आता तदभिनिवुज्झए, तेण वाऽभिणिवुज्झते, तम्हा वा [ऽभिणि]वुज्झते, तम्हि वाभिनिवुज्झए इत्ततो आभिनिवोधिकः । स एवाऽभिणिवोधिकोपयोगतो अनन्यत्वादाभिनिवोधिकम् । (नन्दीसुत्त चू. सू. ७, पृ. १३) । ३. पच्चक्ख परोक्खं वा जं अत्थं ऊहिऊण णिद्दिसइ । तं होइ अभिणिवोहं अभिमुहमत्थं न विवरीयं । (बृहत्क. १, ३६) । ४. होइ अपोहोऽवाओ सई धिई सव्वमेव मइपण्णा । ईसा सेसा सव्वं इदमाभिणिवोहियं जाण ।। (विशेषा. ३९७) । ५. आ अर्थाभिमुखो नियतो वोधः अभिनिवोधः । अभिनिवोध एव आभिनिवोधिकम् × × ×। अभिनिवोधे वा भवम्, तेन वा निर्वृत्तम्, तन्मयं तत्प्रयोजनं वा, अथवा अभिनिवुध्यते तद् इत्याभिनिवोधिकम्, अवग्रहादिरूपं मतिज्ञानमेव, तस्य स्वसंविदितरूपत्वात् भेदोपचारात् इत्यर्थः । अभिनिवुध्यते वाऽनेनेत्याभिनिवोधिकः, तदावरणकर्मक्षयोपशमः इति भावार्थः । अभिनिवुध्यतेऽस्मादिति वाभिनिवोधिकम्, तदावरणक्षयोपशम एव । अभिनिवुध्यतेऽस्मिन्निति वा क्षयोपशमे सत्याभिनिवोधिकम् । आत्मैव वा अभिनिवोधोपयोगपरिणामाननन्यत्वात् अभिनिवुध्यते इति आभिनिवोधिकम् । (नन्दी. हरि. वृ. पृ. २४-२५; आव. नि. हरि. वृ. १, पृ. ७) । ६. जमवग्गहादिरूवं पच्चुप्पन्नत्थगाहगं लोए । इंदिय-मणोणिमित्तं तं आभिणिवोहिगं वेंति ।। (धर्मसं. हरि. ८२३) । ७. अहिमुहणियमियवोहणमाभिणिवोहियमणिदिइंदियजं । वहुउग्गहाइणा खलु कयछत्तीसा तिसयभेयं । (प्रा. पंचसं. १-१२१; धव. पु. १, पृ. ३५९ उद्.; गो. जी. ३०६) । ८. तत्थ आभिणिवोहियणाणं णाम पंचिंदिय-णोइंदिएहि मदिणाणावरणक्खओवसमेण य जणिदोऽवग्गहेहावायधारणाओ सद्द-परिसरूव-रस-गंध-दिट्ठ-सुदाणुभूदविसयाओ । वहु-वहुविह-

खिप्पाऽणिस्सिदाणुत्त-धुवेदरभेदेण तिसयछत्तीसाओ। (धव. पु. १, पृ. ६३); अहिमुह-णियमियअत्थावबोहो आभिणिबोहो, थूल-वट्टमाण-अणंतरिदअत्था अहिमुहा। चक्खिदिए रूवं णियमिदं, सोदिंदिए सद्दो, घाणिंदिए गंधो, जिब्भिदिए रसो, फासिंदिए फासो, णोइंदिए दिट्ठ-सुदाणुभूदऽत्था णियमिदा। अहिमुह-णियमिदऽट्ठेसु जो बोहो सो अहिणिबोहो। अहिणिबोध एव आहिणिबोधियं णाणं। (धव. पु. ६, पृ. १५-१६); तत्थ अहिमुहणियमिदत्थस्स बोहणं आभिणिबोहियं णाम णाणं। को अहिमुहत्थो? इंदिय-णोइंदियाणं गहणपाओग्गो। कुदो तस्स णियमो? अण्णत्थ अप्पवुत्तीदो। अत्थिंदियालोगुवजोगेहिंतो चेव माणुसेसु रूवणाणुप्पत्ती। अत्थिदिय-उवजोगेहिंतो चेव रस-गंध-सद्द-फासणाणुप्पत्ती। दिट्ठ-सुदाणुभूदट्ठ-मणेहिंतो णोइंदियणाणुप्पत्ती। एसो एत्थ णियमो। एदेण णियमेण अभिमुहत्थेसु जमुप्पज्जदि णाणं तमाभिणिबोहियणाणं णाम। (धव. पु. १३, पृ. २०६-१०)। ९. अभिमुखो निश्चितो यो विषयपरिच्छेदः सर्वैरेव एभिः प्रकारैः तदाभिनिबोधिकम्। (त. भा. सिद्ध. वृ. १-१३)। १०. अभिमुखं योग्यदेशावस्थितं नियतमर्थमिन्द्रिय-मनोद्वारेणात्मा येन परिणामविशेषेणावबुध्यते स परिणामविशेषो ज्ञानापरपर्यायः आभिनिबोधिकम्। (आव. नि. मलय. वृ. १, पृ. २०)। ११. अर्थाभिमुखो नियतः प्रतिस्वरूपको बोधो बोधविशेषोऽभिनिबोधोऽभिनिबोध एव आभिनिबोधिकम् × × ×। अथवा अभिनिबुध्यते अस्मादस्मिन् वेति अभिनिबोधस्तदावरणक्षयोपशमस्तेन निर्वृत्तमाभिनिबोधिकम्। तच्च तत् ज्ञानं चाभिनिबोधिकज्ञानम्। इन्द्रिय-मनोनिमित्तो योग्यप्रदेशावस्थितवस्तुविषयः स्फुटः प्रतिलाभो बोधविशेष इत्यर्थः। (प्रज्ञाप. मलय. वृ. २९-३१२, पृ. ५२६)। १२. स्थूल-वर्तमानयोग्यदेशावस्थितोऽर्थः अभिमुखः, अस्येन्द्रियस्यायमर्थ इत्यवधारितो नियमितः। अभिमुखश्चासौ नियमितश्चासौ अभिमुखनियमितः, तस्यार्थस्य बोधनं ज्ञानम्, आभिनिबोधिकं मतिज्ञानम्। (गो. जी. म. प्र. व जी. प्र. टी. ३०६)।

८ अभिमुख और नियमित पदार्थ के इन्द्रिय और मन के द्वारा जानने को आभिनिबोधिक ज्ञान कहते हैं। यह मतिज्ञान का नामान्तर है।

आभिनिवेशिक—१. अभिनिवेशे भवं आभिनिवेशिकम्। अर्हत्प्ररूपितप्रोद्दलनं गोष्ठामाहिलस्येव। (पंचसं. च. स्वो. वृ. ४-२, पृ. १५६)। २. आभिनिवेशिकं जानतोऽपि यथास्थितं वस्तु दुरभिनिवेशलेशविप्लावितधियो जमालेरिव भवति। (योगशा. स्वो. विव. २-३)। ३. आभिनिवेशिकं यदभिनिवेशेन निर्वृत्तम्, यथा गोष्ठामाहिलादीनाम्। (सम्बोधस. वृ ४७, पृ. ३२; पंचसं. मलय. वृ. ४-२, पृ. १५६)। ४. यतो गोष्ठामाहिलादिवदात्मीयकुदर्शने। भवत्यभिनिवेशस्तत्प्रोक्तमाभिनिवेशिकम्॥ (लोकप्र. ३-६९३)।

२ वस्तु के यथार्थ स्वरूप को जानते हुए भी दुराग्रह के वश से जमालि के समान जिनप्ररूपित तत्त्व के अन्यथा प्रतिपादन करने को आभिनिवेशिक मिथ्यात्व कहते हैं।

आभियोगिक—देखो आभियोग्य। अभियोगः पारवश्यम्, स प्रयोजनं येषां ते आभियोगिकाः। (विपाकसूत्र अभय. वृ. २-१४, पृ. २९)।

अभियोग का अर्थ पराधीनता है वह, पराधीनता ही जिनका प्रयोजन है, अर्थात् जो दूसरों के आधीन रहकर उनकी आज्ञानुसार सेवाकार्य किया करते हैं उन्हें आभियोगिक देव कहते हैं।

आभियोगिकभावना—१. कोउअ भूई पसिणे पसिणापसिणे निमित्तमाजीवी। इड्ढि-रस-सायगुरुओ अभिओगं भावणं कुणइ॥ (बृहत्क. भा. १३०८)। २. कोऊय-भूइकम्मे पसिणापसिणे निमित्तमाएसी। इड्ढि-रस-सायगुरुओ अभिओगं भावणं कुणइ॥ (गु. गु. षट्. स्वो. वृ. ४, पृ. १८ उ.)।

१ कौतुक दिखाकर, भूतिकर्म बताकर, प्रश्नों के उत्तर देकर और शरीरगत चिह्नादिकों के शुभाशुभ फल बताकर आजीविका करने को तथा ऋद्धि, रस और सात गौरवमय प्रवृत्तियों के रखने को आभियोगिकभावना कहते हैं।

आभियोगिकी, आभियोगी—१. आ समन्तात् आभिमुख्येन[वा] युज्यन्ते प्रेष्यकर्मणि व्यापार्यन्त इत्याभियोग्याः किंकरस्थानीया देवविशेषास्तेषामियमाभियोगी। (बृहत्क. वृ. १२९३)। २. आभियोगाः किंकरस्थानीया देवविशेषास्तेषामियं आभियोगिकी। (धर्मसं. मान. स्वो. वृ. ३-८१, पृ. १७८)।

१ जो देव इन्द्रादि के सेवाकार्य में नियुक्त रहते हैं वे

आभियोग्य कहलाते हैं। उनसे सम्बन्धित भावना का नाम आभियोगिकी या आभियोगी है।

आभियोग्य—१. आभियोग्या दाससमाना वाहनादिकर्मणि प्रवृत्ताः। (स. सि. ४-४)। २. आभियोग्या दासस्थानीयाः। (त. भा. ४-४)। ३. आभियोग्या दाससमानाः। यथेह दासा वाहनादिव्यापारं कुर्वन्ति तथा तत्राभियोग्या वाहनादिभावेनोपकुर्वन्ति। आभिमुख्येन योगोऽभियोगः, अभियोगे भवा आभियोग्याः। ××× अथवा अभियोगे साधवः आभियोग्याः, अभियोगमर्हन्तीति वा। (त. वा. ४, ४, ९)। ४. वाहनादिभावेनाभिमुख्येन योगोऽभियोगस्तत्र भवा अभियोग्यास्त एव आभियोग्याः इति। ××× अथवा अभियोगे साधवः आभियोग्याः, अभियोगमर्हन्तीति वा आभियोग्यास्ते च दाससमानाः। (त. श्लो. ४-४)। ५. अभियुज्यन्त इत्याभियोग्याः वाहनादौ कुत्सिते कर्मणि नियुज्यमानाः, वाहनदेवा इत्यर्थः। (जयध. पत्र ७९४)। ६. भवेयुराभियोग्याख्या दासकर्मकरोपमाः॥ (म. पु. २२, २९)। ७. दासप्राया आभियोग्याः। (त्रि. श. पु. च. २, ३, ७७४)। ८. आ समन्तादभियुज्यन्ते प्रेष्यकर्मणि व्यापार्यन्त इत्याभियोग्या दासप्रायाः। (संग्रहणी दे. वृ. १; बृहत्सं. मलय. वृ. २)। ९. अभियोगे कर्मणि भवा आभियोग्या दासकर्मकरकल्पाः। (त. वृत्ति श्रुत. ४-४)।

१ सवारी आदि में काम आने वाले दास समान देवों को आभियोग्य कहते हैं।

आभियोग्यभावना—देखो आभियोगिकी। १. मंताभिओग-कोदुग-भूदीयम्मं पउंजदे जो हु। इड्ढि-रस-सादहेदुं अभिओगं भावणं कुणइ॥ (भ. आ. ३, २८२)। २. जे भूदिकम्म-मंताभियोग-कोदूहलाइ-संजुत्ता। जणवण्णे य पअट्टा वाहणदेवेसु ते होंति॥ (ति. प. ३-२०३)।

१ ऋद्धि, रस और सात गारव के हेतुभूत मंत्राभियोग (भूतावेशकरण), कुतूहलोपदर्शन (अकालवृष्टि आदि दर्शन) और भूतिकर्म का करने वाला अभियोग्य-भावना को करता है।

आभोग—१. आभोगो उवओगो। (प्रत्या. स्व. गा. ५५)। २. आभोगनमाभोगः, 'भुज-पालनाभ्यवहारयोः' मर्यादयाऽभिविधिना वा भोगनं पालनमाभोगः। (ओघनि. वृ. ४, पृ. २६)। ३. ज्ञात्वाप्यकार्यसेवनमाभोगः। (आव. ह. वृ. मल. हे. टि. पृ. ९०)।

३ जान करके भी अकार्य के सेवन करने को आभोग कहते हैं।

आभोगनिर्वर्तित कोप—यदा परस्यापराधं सम्यगवबुध्य कोपकारणं च व्यवहारतः पुष्टमवलम्ब्य नान्यथाऽस्य शिक्षोपजायते इत्याभोग्य कोपं विधत्ते तदा स कोप आभोगनिर्वर्तितः। (प्रज्ञाप. मलय. वृ. १४-१९०, पृ. २९१)।

दूसरे के अपराध को भलीभांति जान करके तथा व्यवहार से पुष्ट कोप के कारण का आश्रय लेकर 'अन्य प्रकार से इसे शिक्षा नहीं मिल सकती है' यह देखकर जब क्रोध करता है तब उसके इस क्रोध को आभोगनिर्वर्तित कोप कहते हैं।

आभोगनिर्वर्तिताहार—आभोगनमाभोगः आलोचनम्, अभिसन्धिरित्यर्थः। आभोगेन निर्वर्तितः उत्पादित आभोगनिर्वर्तितः, आहारयामीतीच्छापूर्वं निर्मापितः इति यावत्। (प्रज्ञाप. मलय. वृ. २८, ३०४, पृ. ५००)।

अभिप्रायपूर्वक बनवाया गया आहार आभोगनिर्वर्तिताहार है। यह नारकियों का आहार है।

आभोगबकुश—१. संचित्यकारी आभोगबकुशः। (त. भा. सिद्ध. वृ. ९-४९)। २. द्विविध-(शरीरोपकरण-) भूषणमकृत्यमित्येवंभूतं ज्ञानम्, तत्प्रधानो बकुश आभोगबकुशः। (धर्मसं. मान. स्वो. वृ. ३-५९, पृ. १५२)। ३. आभोगः साधूनामकृत्यमेतच्छरीरोपकरणविभूषणमित्येवंभूतं ज्ञानम्। तत्प्रधानो बकुश आभोगबकुशः। (प्रव. सारो. वृ. ७२४)।

१ जो साधु विचारपूर्वक करता है—शरीर व उपकरणों को विभूषित रखता है—उसे आभोगबकुश कहते हैं।

आभ्यन्तर आत्मभूतहेतु—तन्निमित्तो (द्रव्ययोगनिमित्तो) भावयोगो वीर्यान्तराय-ज्ञान-दर्शनावरण-क्षय-क्षयोपशमनिमित्त आत्मनः प्रसादश्चात्मभूत इत्याख्यामर्हति। (त. वा. २, ८, १)।

द्रव्ययोगनिमित्तक भावयोग और वीर्यान्तराय तथा ज्ञानावरण व दर्शनावरण कर्म के क्षय-क्षयोपशम-निमित्तक आत्मा के प्रसाद को आभ्यन्तर आत्मभूत हेतु कहते हैं।

आभ्यन्तर तप—१. कथमस्याभ्यन्तरत्वम् ? मनोनियमनार्थत्वात् । (स. सि. ९–२०) । २. अन्तःकरणव्यापारात् । प्रायश्चित्तादितपः अन्तःकरणव्यापारालम्बनम्, ततोऽस्याभ्यन्तरत्वम् । बाह्यद्रव्यानपेक्षत्वाच्च । न हि बाह्यद्रव्यमपेक्ष्य वर्तते प्रायश्चित्तादि ततश्चास्याभ्यन्तरत्वमवसेयम् । (त. वा. ९, २०, २–३; चा. सा. पृ. ६०) । ३. इदं प्रायश्चित्तादिव्युत्सर्गान्तमनुष्ठानं लौकिकैरनभिलक्ष्यत्वात् तंत्रान्तरीयैश्च भावतोऽनासेव्यत्वान्मोक्षप्राप्त्यन्तरङ्गत्वाच्चाभ्यन्तरं तपो भवति । (दशवै. नि. हरि. वृ. १–४८, पृ. ३२) । ४. इदं चाभ्यन्तरस्य कर्मणस्तापकत्वात्, अभ्यन्तरैरेवान्तमुखैर्भगवद्भिर्ज्ञायमानत्वाच्चाभ्यन्तरत्वम् । (योगशा. स्वो. विव. ४–९०)। ५. इच्छानिरोधनं यत्र तदाभ्यन्तरमीरितम् । (धर्मसं. श्रा. ९–१६६) ।

२ जो प्रायश्चित्तादि तप बाह्य द्रव्य की अपेक्षा न कर अन्तःकरण के व्यापार के आश्रित होते हैं वे आभ्यन्तर तप कहलाते हैं ।

आभ्यन्तर द्रव्यमल—१. पुणु दिढजीवपदेसे णिबद्धरूवाइं पयडि-ठिदिआइं ॥ अणुभागपदेसाइं चउहि पत्तेक्कभेज्जमाणं तु । णाणावरणप्पहुदी अट्ठविहं कम्ममखिलपावरयं ॥ अब्भंतरदव्वमलं जीवपदेसे निबद्धमिदि हेदो । (ति. प. १, ११–१३) । २. घनकठिनजीवप्रदेशनिबद्धप्रकृति-स्थित्यनुभागप्रदेशविभक्तज्ञानावरणाद्यष्टविधकर्माभ्यन्तरद्रव्यमलम् । (धव. पु. १, पृ. ३२) ।

२ सघन व कठिन जीवप्रदेशों से जो प्रकृति, स्थिति, अनुभाग और प्रदेश बन्ध रूप से ज्ञानावरणादि आठ प्रकार के कर्मपुद्गल सम्बद्ध रहते हैं उन्हें आभ्यन्तर द्रव्यमल कहते हैं ।

आभ्यन्तरनिर्वृत्ति—१. उत्सेधाङ्गुलासंख्येयभागप्रमितानां शुद्धात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रीयसंस्थानेनावस्थितानां वृत्तिराभ्यन्तरा निर्वृत्तिः । (स. सि. २–१७) । २. विशुद्धात्मप्रदेशवृत्तिराभ्यन्तरा । उत्सेधाङ्गुलासंख्येयभागप्रमितानां विशुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानमानावमानावस्थितानां वृत्तिराभ्यन्तरा निर्वृत्तिः । (त. वा. २, १७, ३) । ३. लोकप्रमितानां विशुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादीन्द्रियसंस्थानेनावस्थितानामुत्सेधाङ्गुलस्यासंख्येयभागप्रमितानां वा वृत्तिराभ्यन्तरा निर्वृत्तिः । (धव. पु. १, पृ. २३२) ।

१ प्रतिनियत चक्षु आदि इन्द्रियों के आकार से अवस्थित उत्सेधाङ्गुल के असंख्यातवें भाग प्रमाण विशुद्ध आत्मप्रदेशों के अवस्थान को आभ्यन्तर निर्वृत्ति (द्रव्येन्द्रिय) कहते हैं ।

आभ्यन्तर प्रत्यय—तत्थ अब्भंतरो कोधादिदव्वकम्मक्खंधा अणंताणंतपरमाणुसमुदयसमागमसमुप्पण्णा जीवपदेसेहि एयत्तमुवगया पयडि-ट्ठिदि-अणुभागभेयभिण्णा । (जयध. १, पृ. २८४) ।

अनन्तानन्त परमाणुओं के समुदाय के आगमन से उत्पन्न जो क्रोधादि कषायरूप द्रव्य कर्मस्कन्ध प्रकृति, स्थिति और अनुभाग में विभक्त होकर जीवप्रदेशों के साथ एकता को प्राप्त होते हैं उन्हें आभ्यन्तर प्रत्यय कहते हैं ।

आमन्त्रण—आमच्चणं कामचारानुज्ञा । (अष्टस. यशो. वृ. ३, पृ. ५८) ।

इच्छानुसार काम करने की अनुज्ञा देने को आमंत्रण कहते हैं ।

आमन्त्रणी भाषा—१. यया वाचा परोऽभिमुखीक्रियते सा आमंत्रणी । (भ. आ. विजयो. ११९५)। २. गृहीतवाच्य-वाचकसम्बन्धो व्यापारान्तरं प्रत्यभिमुखीक्रियते यया सामंत्रणी भाषा । (मूला. वृ. ५, ११८) । ३. तत्रामन्त्रणमन्यस्य परत्रासक्तचेतसः । आभिमुख्यकरो हंहो नरेन्द्रेत्यादिकं वचः ॥ (आचा. सा. ५–८५) । ४. 'आगच्छ भो देवदत्त' इत्याद्याह्वानभाषा आमन्त्रणी । (गो. जी. जी. प्र. २२५) । ५. संबोहणजुत्ता जा अवहाणं होइ जं च सोऊणं । आमंतणी य एसा पण्णत्ता तत्तदंसीहिं ॥ (भाषार. ७२) । ६. या सम्बोधनैः हे-अये-भोप्रभृतिपदैर्युक्ता सम्बद्धा, यां च श्रुत्वा अवधानं श्रोतॄणां श्रवणाभिमुख्यम्, सम्बोधनमात्रेणोपरमे किमामन्त्रयसीति प्रश्नहेतुजिज्ञासाफलकं भवति । एषा तत्त्वदर्शिभिरामन्त्रणी प्रज्ञप्ता । (भाषार. टी. ७२) ।

१ जिस भाषा के द्वारा दूसरे को अभिमुख किया जावे उसे आमन्त्रणी भाषा कहते हैं ।

आमरणान्त दोष—मरणमेवान्तो मरणान्तः, आ मरणान्तात् आमरणान्तम्, असञ्जातानुतापस्य कालसौकरिकादेरिव या हिंसादिषु प्रवृत्तिः सैव दोषः आमरणान्तदोषः । (औपपा. वृ. २०, पृ. ४४) ।

मरण होने तक बिना किसी प्रकार के पश्चात्ताप के कालसौकरिक (एक कषायी) आदि के समान जो हिंसादि पापों में प्रवृत्ति होती है उसे आमरणान्त दोष कहते हैं।

आमर्जन—आमर्जनं मृदुगोमयादिना लिम्पनम्। (व्यव. भा. मलय. वृ. ४–२७, पृ. ६)।

मृदु गोबर आदि से लीपने को आमर्जन कहते हैं।

आमर्शन—१. क्षपकस्य शरीरैकदेशस्य स्पर्शनम् आमर्शनम्। (भ. आ. विजयो. ६४६)। २. शरीरैकदेशस्पर्शनम्। (भ. आ. मूला. टी. ६४६)।

समाधिमरण करने वाले साधु के शरीर के एकदेश का स्पर्श करने को आमर्शन कहते हैं।

आमर्शलब्धि—देखो आमर्शौषधि ऋद्धि। तत्र आमर्शनमामर्शः, संस्पर्शनमित्यर्थः। स एव औषधिर्यस्यासावामर्शौषधिः साधुरेव, संस्पर्शनमात्रादेव व्याध्यपनयनसमर्थ इत्यर्थः, लब्धि-लब्धिमतोरभेदात्। स एवामर्शलब्धिरिति। (आव. नि. हरि. व मलय. वृ. ६९; प्रव. सारो. वृ. १४९६)।

जो साधु स्पर्श मात्र से ही रोग के दूर करने में समर्थ होता है उसे अभेद विवक्षा से आमर्शलब्धि—आमर्श ऋद्धि का धारक—कहा जाता है।

आमर्शौषधि ऋद्धि—देखो आमर्शलब्धि। रिसिकर-चरणादीणं अल्लियमेत्तम्मि जीए पासम्मि। जीवा होंति णिरोगा सा अम्मरिसोसही रिद्धी॥ (ति. प. १०६८)।

जिस ऋद्धि के प्रभाव से साधु के स्पर्श मात्र से रोगियों के रोग दूर हो जाते हैं उसे आमर्शौषधि ऋद्धि कहते हैं।

आमर्शौषधिप्राप्त—१. आमर्शः संस्पर्शः, यदीयहस्त-पादाद्यामर्श औषधिप्राप्तो यैस्ते आमर्शौषधिप्राप्ता। (त. वा. ३, ३६, ३, पृ. २०३)। २. आमर्षः-औषधत्वं प्राप्तो येषां ते आमर्षौषधप्राप्ताः। ××× तवोमाहप्पेण जेसि फासो सयलोसहसरूवत्तं पत्तो तेसिमामोसहिपत्ता त्ति सण्णा। (धव. पु. ९, पृ. ९५–९६)। ३. आमर्शः संस्पर्शो हस्त-पादाद्यामर्शः सकलौषधि प्राप्तो येषां त आमर्शौषधिप्राप्ताः। (चा. सा. पृ. ९९)।

आमर्श का अर्थ स्पर्श होता है, जिन महर्षियों के हाथ-पांव आदि का स्पर्श औषधि को प्राप्त हो गया है—रोगियों के दुःसाध्य रोगों के दूर करने में औषधि का काम करता है—वे महर्षि आमर्शौषधिप्राप्त—आमर्शौषधिऋद्धि के धारक—कहे जाते हैं।

आमुण्डा—आमुण्ड्यते संकोच्यते वितर्कितोऽर्थ अनया इति आमुण्डा। (धव. पु. १३, पृ. २४३)।

जिसके द्वारा विमर्शित पदार्थ का संकोच किया जाय उसे आमुण्डा बुद्धि (अवाय) कहते हैं।

आमर्षौषधप्राप्त—देखो आमर्शौषधिप्राप्त।

आम्नाय—१. घोषशुद्धं परिवर्तनमाम्नायः। (स. सि. ९–२५; त. श्लो. ९–२५)। २. आम्नायो घोषविशुद्धं परिवर्तनं गुणनम्, रूपादानमित्यर्थ। (त. भा. ९–२५; योगशा. स्वो. वि. ४–९०)। ३. घोषविशुद्धपरिवर्तनमाम्नायः। व्रतिनो वेदितसमाचारस्यैहलौकिकफलनिरपेक्षस्य द्रुत-विलम्बितादिघोषविशुद्धं परिवर्तनमाम्नाय इत्युपदिश्यते। (त. वा. ९, २५, ४)। ४. आम्नायोऽपि परिवर्तनम्, उदात्तादिपरिशुद्धमनुश्रावणीयमभ्यासविशेषः। गुणनं संख्यानं पदाक्षरद्वारेण, रूपादानमेकरूपम् एका परिपाटी द्वे रूपे त्रीणि रूपाणीत्यादि। (त. भा. हरि. व सिद्ध. वृ. ९–२५)। ५. आम्नायो गुणना। (भ. आ. विजयो. १०४); घोषविशुद्ध-श्रुतपरावर्त्यमानमाम्नायः स्वाध्यायो भवत्येव। (भ. आ. विजयो. १३९)। ६. आम्नायः कथ्यते घोषो विशुद्धं परिवर्तनम्। (त. सा. ७–१९)। ७. व्रतिनो विदितसमाचारस्यैहलौकिकफलनिरपेक्षस्य द्रुत-विलम्बितपदाक्षरच्युतादिघोषदोषविशुद्धं परिवर्तनमाम्नायः। (चा. सा. पृ. ६७)। ८. परिवर्तनमाम्नायो घोषदोषविवर्जितम्। (आचा. सा. ४–९१)। ९. आम्नायो घोषशुद्धं यद् वृत्तस्य परिवर्तनम्। (अन. ध. ७, ८७)। १०. अष्टस्थानोच्चारविशेषेण यत् शुद्धं घोषणं पुनः पुनः परिवर्तनं स आम्नायः। (त. वृत्ति श्रुत. ९–२५); कार्तिके. टी. ४६६)।

३ आचारशास्त्र का ज्ञाता व्रती जो ऐहिक फल की अपेक्षा न कर द्रुत-विलम्बित आदि घोष से विशुद्ध—इन दोषों से रहित—पाठ का परिशीलन करता है, यह आम्नाय स्वाध्याय कहलाता है।

आम्नायार्थवाचक—१. आम्नायः आगमः, यस्योत्सर्गापवादलक्षणोऽर्थः, तं वक्तीत्याम्नायार्थवाचकः पारम्पर्यप्रवचनार्थकथनेनानुग्राहकोऽङ्गनिषद्यानुज्ञायी पञ्चम आचार्यः। (त. भा. सिद्ध. वृ. ९–६, पृ. २०८)। २. आम्नायमुत्सर्गापवादलक्षणमर्थं वक्ति

यः स प्रवचनार्थकथनेनानुग्राहकोऽक्षनिपद्याद्यनुज्ञायी आम्नायार्थवाचकः, आचारगोचरविषयं स्वाध्यायं वा। (योगशा. स्वो. विव. ४-९०)।

१ आम्नाय के अनुसार आगम के उत्सर्ग और अपवादरूप अर्थ के प्रतिपादन करने वाले आचार्य को आम्नायार्थवाचक कहते हैं। वह परमर्षिप्रोक्त परमागम के अर्थ का व्याख्यान करके शिष्यों का अनुग्रह किया करता है। यह प्रव्राजक आदि पांच आचार्यभेदों में अन्तिम है।

आय—आयः सम्यग्दर्शनाद्यवाप्तिलक्षणः × × ×। (समवा. अभय. वृ. ३३)।

सम्यग्दर्शनादि गुणों की प्राप्ति को आय कहते हैं।

आयतन—सम्यक्त्वादिगुणानामायतनं गृहमावास आश्रय आधारकरणं निमित्तमायतनं भण्यते। (वृ. द्रव्यसं. टी. ४१, पृ. १४८)।

सम्यग्दर्शनादि गुणों के आधार, आश्रय या निमित्त को आयतन कहते हैं।

आयास—आयासो दुःखहेतुश्चेष्टाविशेषः, प्रहरणसहायान्वेषणं संरम्भावेशारुणविलोचन-स्वेदद्रवप्रवाह-प्रहारवेदनादिकः। (त. भा. सि. वृ. ९-६, पृ. १९२)।

दुःख के कारणभूत चेष्टाविशेष को आयास कहते हैं।

आयु कर्म—१. एति अनेन नारकादिभवमिति आयुः। (स. सि. ८-४; त. वृत्ति श्रुत. ८-४; त. सुखबो. ८-४)। २. चतुष्प्रकारमायुष्कं × × × स्थितिसत्कारणं स्मृतम्॥ (वरांग. ४-३३)। ३. यद्भावाभावयोर्जीवित-मरणं तदायुः। यस्य भावात् आत्मनः जीवितं भवति, यस्य चाभावात् मृत इत्युच्यते तद् भवधारणमायुरित्युच्यते। (त. वा. ८, १०, २)। ४. नारक-तिर्यग्योनी-सुर-मनुष्य-[योनि-मनुष्य-] देवानां भवनशरीरस्थितिकारणमायुष्कम्। (अनुयो. हरि. वृ. पृ. ६३)। ५. एति याति चेत्यायुः, अनुभूतमेति अननुभूतं च याति। (श्रा. प्र. टी. ११; धर्मसं. मलय. ६०८)। ६. आयुरिति अवस्थिति-हेतवः कर्मपुद्गलाः। (आचारा. शी. वृ. २, १, पृ. ९२)। ७. यद्भावाभावयोर्जीवित-मरणं तदायुः। (त. श्लो. ८-१०)। ८. एति भवधारणं प्रति इत्यायुः। जे पोग्गला मिच्छत्तादिकारणेहि णिरयादिभवधारण-सत्तिपरिणदा जीवणिविट्ठा ते आउअसण्णिदा होंति। (धव. पु. ६, पृ. १२); भवधारणमेदि कुणदि त्ति आउअं। (धव. पु. १३, पृ. २०९); एति भवधारणं प्रतीति आयुः। (धव. पु. १३, पृ. ३६२)। ९. भवधारणसहावं आउअं। (जयध. २, पृ. २१)। १०. चतुर्गतिसमापन्नः प्राणी स्थानात् स्थानान्तरमेति यद्वशात् तदायुः। (पंचसं. स्वो. वृ. ३-१, पृ. १०७)। ११. नृ-तिर्यङ्-नारकामर्त्यभेदादायुश्चतुर्विधम्। स्व-स्वजन्मनि जन्तूनां धारकं गुप्तिसन्निभम्॥ (त्रि. श. पु. च. २, ३, ४७२)। १२. आयुर्नरकादिगतिस्थितिकारणपुद्गलप्रचयः। (मूला. वृ. १२-२); नारक-तिर्यङ्-मनुष्य-देवभव-धारणहेतुः कर्मपुद्गलपिण्ड आयुः, औदारिक-तन्मिश्र-वैक्रियिक-तन्मिश्रशरीरधारणलक्षणं वा आयुः। (मूला. वृ. १२-६४)। १३. आयुःकर्म पञ्चमं, जीवस्य चतुर्गतिष्ववस्थितिकारणम्। (कर्मवि. पू. व्या. ६, पृ. ५)। १४. एति गच्छति प्रतिबन्धकतां नारकादिकुगतेर्निष्क्रामितुमनसो जन्तोरित्यायुः। (कर्मवि. पर. व्या. ६, पृ. ६)। १५. एति आगच्छति प्रतिबन्धकतां स्वकृतकर्मबद्धनरकादिगतेर्निष्क्रमितुमनसो जन्तोः इत्यायुः। (प्रज्ञाव. मलय. वृ. २३-२८८, पृ. ४५४; पंचसं. मलय. वृ. ३-१, पृ. १०७; प्रव. सारो. वृ. १२५०; कर्मप्र. यशो. वृ. १, १, पृ. २)। १६. एति गच्छति अनेन गत्यन्तरमित्यायुः, यद्वा एति आगच्छति प्रतिबन्धकतां स्वकृतकर्मावाप्तनरकादिदुर्गतेर्निर्गन्तुमनसोऽपि जन्तोरित्यायुः, × × × यद्वा आयाति भवाद् भवान्तरं संक्रामतां जन्तूनां निश्चयेनोदयमागच्छति × × × इत्यायुःशब्दसिद्धिः। × × × अथवा आयान्त्युपभोगाय तस्मिन्नुदिते सति तद्भवप्रायोग्याणि सर्वाण्यपि शेषकर्माणीत्यायुः। (कर्मवि. दे. स्वो वृ. ३, पृ. ५)।

१ नारक आदि भव को प्राप्त कराने वाले कर्म को आयु कहते हैं।

आयुर्बन्धप्रायोग्य काल—सगजीविदतिभागस्स पढमसमयप्पहुदि जाव विस्समणकालअणंतरहेट्ठिमसमओ त्ति आउअबंधपाओग्गकालो। (धव. पु. १०, पृ. ४२२)।

अपने जीवित—भुज्यमान आयु—के त्रिभाग के प्रथम समय से लेकर विश्रामकाल के अनन्तर (अव्यवहित) अधस्तन समय तक का काल नवीन आयु के बन्ध के योग्य होता है।

आयोजिकाकरण—१. अपरे 'आउज्जियाकरणं'

पठन्ति। तत्रैवं शब्दसंस्कारमाचक्षते—आयोजिकाकरणमिति। अयं चात्रान्वयार्थः—आङ् मर्यादायाम्, आ मर्यादया केवलिदृष्टया शुभानां योगानां व्यापारणमायोजिका, भावे वुञ्, तस्याः करणमायोजिकाकरणम्। (प्रज्ञाप. मलय. वृ. ३६, पृ. ६०४; पंचसं. मलय. वृ. १–१५, पृ. २८)। २. आयोजिकाकरणं नाम केवलिसमुद्घातादर्वाग्भवति, तत्राङ् मर्यादायाम्, आ मर्यादया केवलिदृष्टया योजनं व्यापारणमायोजनम्, तच्चातिशुभयोगानामवसेयम्, आयोजनमायोजिका, तस्याः करणमायोजिकाकरणम्। (पंचसं. उदी. क. मलय. वृ. ७६, पृ. १४७)।

केवलिसमुद्घात के पूर्व जो अतिशय शुभ योगों का आयोजन (व्यापार) किया जाता है उसे आयोजिकाकरण कहते हैं। इसे दूसरे नामों से आवर्जितकरण और आवर्जीकरण भी कहा जाता है।

आरभटा—१. वितहकरणम्मि तुरिअं अण्णं अण्णं व गिण्ह आरभडा। (पंचव. २४६); आरभडा प्रत्युपेक्षणेति अविधिक्रिया। (पंचव. हरि. वृ. २४५); वितथकरणे वा प्रस्फोटनाद्यन्यथासेवने वा आरभटा, त्वरितं वा द्रुतं वा सर्वमारभमाणस्य, अन्यदर्द्धप्रत्युपेक्षितमेव मुक्त्वा कल्पमन्यद्वा गृह्णतः आरभडेति। (पञ्चव. हरि. वृ. २४६)। २. वितहकरणेण तुरियं, अन्नन्नागिन्हणे व आरभडा। (गु. गु. षट्. स्वो. वृ. २८, पृ. ६१)।

१ झाड़ने आदिके अन्यथा सेवन में, अथवा शीघ्रता से आरम्भ करते हुए, अथवा अर्ध प्रत्युपेक्षित को छोड़ कर अन्य कल्प को ग्रहण करते हुए आरभटा नामक दोष (प्रतिलेखनादोष) होता है।

आरम्भ—१. प्रक्रम आरम्भः। (स. सि. ६–८; आरम्भः प्राणिपीडाहेतुर्व्यापारः। (स. सि. ६–१५)। २. प्राणिवधस्त्वारम्भः। (त. भा. ६–९)। ३. आरम्भो हैंस्रं कर्म। हिंसनशीला हिंस्राः, तेषां कर्म हैंस्रमारम्भ इत्युच्यते। (त. वा. ६, १५, २)। ४. आरंभो उद्दवओ × × ×। (व्यव. सू. भा. १, ४६, पृ. १८; प्रव. सारो. १०६०)। ५. प्राणातिपातादिक्रियावृत्तिरारम्भः। (त. भा. हरि. वृ. ६–९)। ६. कृष्यादिकस्त्वारम्भः। (श्रा. प्र. टी. १०७)। ७. प्राणातिपातादिक्रियानिवृत्तिरारम्भः। (त. भा. सिद्ध. वृ. ६–९)। ८. प्राणि-प्राणवियोजनमारम्भो णाम। (धव. पु. १३, पृ. ४६)। ९. सचित्तहिंसाद्युपकरणस्याद्यः प्रक्रम आरम्भः। (भ. आ. विजयो. ८११; अन. ध. स्वो. टी. ४–२७); पृथिव्यादिविषयो व्यापार आरम्भः। (भ. आ. विजयो. ८२०)। १०. आदौ क्रमः प्रक्रम आरम्भः। (चा. सा. पृ. ३९)। ११. आरभ्यन्ते विनाश्यन्त इति आरम्भाः जीवाः, अथवा आरम्भः कृष्यादिव्यापारः, अथवा आरम्भो जीवानामुपद्रवणम्। (प्रश्नव्या. वृ. ११)। १२. × × × अंगि[अग्नि-]वातादिः स्यादारम्भो दयोज्झितः॥ (आचा. सा. ५–१३)। १३. अपद्रावयतो जीवितात्परं व्यपरोपयतो व्यापार आरम्भः। (व्यव. भा. मलय. वृ. १–४६; प्रव. सारो. वृ. १०६०)। १४. प्राणिनः प्राणव्यपरोप आरम्भः। (भा. प्रा. टी. ९९)। १५. प्राणव्यपरोपणादीनां प्रथमारम्भ एव आरम्भः। (त. वृत्ति श्रुत. ६–८); आरभ्यत इत्यारम्भः प्राणिपीडाहेतुर्व्यापारः। (त. वृत्ति श्रुत. ६–१५)।

१ कार्य के प्रारम्भ कर देने को आरम्भ कहा जाता है। जीवों को पीड़ा पहुँचाने वाला जो व्यापार (प्रवृत्ति) होता है वह भी आरम्भ कहलाता है।

आरम्भकथा — तित्तिरादीनामियतां तत्रोपयोग इत्यारम्भकथा। (स्थाना. अभय. वृ. ४, २, ४८२, पृ. १९९)।

वहां इतने तीतर आदि का उपयोग होना चाहिये, इत्यादि प्रकार की प्राणिविघात से सम्बद्ध कथा का नाम आरम्भकथा है।

आरम्भकोपदेश—१. आरम्भकेभ्यः कृषीवलादिभ्यः क्षित्युदक-ज्वलन-पवन-वनस्पत्यारम्भोऽनेनोपायेन कर्तव्य इत्याख्यानमारम्भकोपदेशः। (त. वा. ७, २१, २१; चा. सा. पृ. ९)। २. पामरादीनामग्रे एवं कथयति—भूरेवं कृष्यते, उदकमेवं निष्काश्यते, वनदाह एवं क्रियते, क्षुपादय एवं चिकित्स्यन्ते, इत्याद्यारम्भ अनेनोपायेन क्रियते इत्यादिकथनं आरम्भोपदेशनामा चतुर्थः पापोपदेशो भवति। (त. वृत्ति श्रुत. ७–२१)।

१ कृषि आदि आरम्भके करने वाले मनुष्योंको भूमि खोदने, जल सींचने और वनस्पति काटने आदिरूप हिंसामय आरम्भ का उपदेश देने को आरम्भकोपदेश (अनर्थदण्ड) कहते हैं।

आरम्भक्रिया—१. छेदन-भेदन-विशस-(विस्रंस—त. वा.) नादिक्रियापरत्वमन्येन वा आरम्भे क्रिय-

माणे प्रहर्षः प्रारम्भक्रिया। (स. सि. ६–५; त. वा. ६, ५, ११; त. वृत्ति श्रुत. ६–५)। २. आरम्भे क्रियमाणेऽन्यैः स्वयं हर्ष-प्रमादिनः। सा प्रारम्भक्रियात्यन्तं तात्पर्य वाञ्छितादिषु॥ (ह. पु. ५८, ७९)। ३. छेदनादिक्रियासक्तचित्तत्वं स्वस्य यद् भवेत्। परेण तत्कृतौ हर्षः सेहारम्भक्रिया मता॥ (त. श्लो. ६, ५, २३)। ४. भूम्यादिकायोपघातलक्षणा शुष्कतृणादिछेदलेखनादिका वाऽप्यारम्भक्रिया। (त. भा. सिद्ध. वृ. ६–६)।

१ प्राणियों के छेदन-भेदन आदि क्रियाओं में स्वयं प्रवृत्त होने को, तथा अन्य को प्रवृत्त देखकर हर्षित होने को आरम्भक्रिया कहते हैं।

आरम्भभक्तकथा—ग्राम-नगराद्याश्रयाश्छाग-महिष्यादयः, आरण्यका आटविकास्तित्तिर-कुरङ्ग-लावकादयः एतावन्तोऽमुकस्य रसवत्यां हत्वा संस्क्रियन्त इत्येवंरूपा। (आव. ह. वृ. मल. हे. टि. पृ. ९२)।

अमुक के यहां भोज में ग्राम-नगरादि के आश्रित रहने वाले बकरे वा भैंसा आदि इतनी संख्यामें तथा जंगल में रहने वाले तीतर व हिरण आदि इतनी संख्या में मार कर पकाए जाने वाले हैं, इत्यादि प्रकार की कथावार्ता को आरम्भभक्तकथा कहते हैं।

आरम्भिकी क्रिया—देखो आरम्भक्रिया। आरम्भः पृथिव्याद्युपमर्दः, उक्तं च—आरंभो उद्दवतो सुद्धनयाणं तु सव्वेसिं॥ आरम्भः प्रयोजनं कारणं यस्याः सा आरम्भिकी। (प्रज्ञाप. मलय. वृ. २२–२८४, पृ. ४४७)।

पृथिवीकायादि जीवों के संहाररूप आरम्भ ही जिस क्रिया का प्रयोजन हो उसे आरम्भिकी क्रिया कहते हैं।

आरम्भ-प्रेषोद्दिष्टवर्जक—१. वज्जे सावज्जमारंभं अट्ठमि पडिवण्णओ॥६॥ अवरेणावि आरंभं णवमी नो करावए। दसमी पुण उद्दिट्ठं फासुयं पि ण भुंजए॥७॥ (गु. गु. पट्. स्वो. वृ. १५)। २. आरम्भश्च स्वयं कृष्यादिकरणम् प्रेषश्च प्रेषणं परेषां पापकर्मसु व्यापारणम्, उद्दिष्टं च तमेव श्रावकमुद्दिश्य सचेतनमचेतनीकृतं पक्वं वा यो वर्जयति परिहरति स आरम्भ-प्रेषोद्दिष्टवर्जकः। (सम्बोध. स. वृ. ६१, पृ. ४५)।

२ जो श्रावक कृषि आदि करने रूप आरम्भ को, दूसरों को पापकार्यों में प्रवृत्त कराने रूप प्रेषण को, तथा अपने उद्देश्य से अचित्त किये गये अथवा पकाए गए सचेतन उद्दिष्ट (भोज्य पदार्थ) को छोड़ देता है उसे आरम्भ-प्रेष-उद्दिष्टवर्जक (आठवीं, नौवीं और दसवीं इन तीन प्रतिमाओं का परिपालक) कहा जाता है।

आरम्भविरत—१. सेवा-कृषि-वाणिज्यप्रमुखादारम्भतो व्युपारमति। प्राणातिपातहेतोर्योऽसावारम्भविनिवृत्तः॥ (रत्नक. १४५)। २. जो आरंभं ण कुणदि अण्णं ण कारयदि णेव अणुमण्णे। हिंसासंतट्ठमणो चत्तारंभो हवे सो हु॥ (कार्तिके. ३८५)। ३. एवं चिय आरंभं वज्जइ सावज्जमट्ठमासं व। तप्पडिमा ××× ॥ (श्रा. प्र. वि. १०–१४)। ४. आरम्भविनिवृत्तो ऽसि-मसि-कृषि-वाणिज्यप्रमुखादारम्भात् प्राणातिपातहेतोर्विरतो भवति। (चा. सा. पृ. १९)। ५. सर्वप्राणिध्वंसहेतुं विदित्वा यो नाऽऽरम्भं धर्मवित् तत्करोति। मन्दीभूतद्वेषरागादिवृत्तिः सोऽनारम्भः कथ्यते तत्त्वबोधैः॥ (धर्मप. २०-६०)। ६. निरारम्भः स विज्ञेयो मुनीन्द्रैर्हतकल्मषैः। कृपालुः सर्वजीवानां नारम्भं विदधाति यः॥ (सुभा. सं. ८४०)। ७. विलोक्य षड्जीववधं तमुच्चैरारम्भमत्यस्यति यो विवेकी। आरम्भमुक्तः स मतो मुनीन्द्रैर्विरागिकः संयम-वृक्षसेकी॥ (अमित. श्रा. ७, ७४)। ८. जं किंचि गिहारंभं बहु थोगं वा सया विवज्जेइ। आरभणियत्तमई सो अट्ठमु सावओ भणिओ॥ (वसु. श्रा. २९८)। ९. अष्टौ मासान् (पूर्वप्रतिमानुष्ठानसहितः) स्वयमारम्भं न करोतीत्यष्टमी। ××× वज्जे सावज्जमारंभं अट्ठमि पडिवन्नओ॥५॥ (योगशा. स्वो. विव. ३–१४८, पृ. २७२)। १०. निरूढसप्तनिष्ठोऽङ्गिघाताङ्गत्वात्करोति न। न कारयति कृष्यादीनारम्भविरतस्त्रिधा॥ (सा. ध. ७–२१)। ११. यः सेवा-कृषि-वाणिज्यव्यापारत्यजनं भजेत्। प्राण्यभिघातसंत्यागादारम्भविरतो भवेत्॥ (भावसं. वाम. ५४०)। १२. निर्व्यूढसप्तधर्मोऽङ्गिवधहेतून् करोति न। न कारयति कृष्यादीनारम्भरहितस्त्रिधा॥ (धर्मसं. श्रा. ८–३६)। १३. सर्वतो देशतश्चापि यत्रारम्भस्य वर्जनम्। अष्टमी प्रतिमा सा ×××॥ (लाटीसं. ७–३१)।

१ हिंसा के कारणभूत सेवा, कृषि व वाणिज्य आदि आरम्भों का परित्याग करने वाले श्रावक को

आरम्भविरत (अष्टम प्रतिमा धारक) कहते हैं। ८ पूर्व प्रतिमाओं के साथ आठ मास तक स्वयं आरम्भ न करने वाले श्रावक को आरम्भविरत कहा जाता है।

आरम्भ-समारम्भ—आरम्भसमारम्भो त्ति आरम्यन्ते विनाश्यन्त इति आरम्भा जीवास्तेषां समारम्भ उपमर्दः। अथवा आरम्भः कृष्यादिव्यापारस्तेन समारम्भो जीवोपमर्दः। अथवा आरम्भो जीवानामुपद्रवणम्, तेन सह समारम्भः परितापनमित्यारम्भ-समारम्भः, प्राणवधस्य पर्याय इति। अथवेहारम्भ-समारम्भशब्दयोरेकतर एव गणनीयो वहुसमरूपत्वादिति। (प्रश्नव्या. वृ. ११)।

परखेत्ते संवित्ते जिण-जिणघरवंदणट्ठं च ।। उत्तमअंगम्हि हवे धादुविहीणं सुहं असंहणणं । सुहसंठाणं धवलं हत्थपमाणं पसत्थुदयं ।। अव्वाघादी अंतोमुहूत्तकालट्ठिदी जहण्णिदरे । पज्जत्तीसंपुण्णे मरणं पि कदाचि संभवइ ।। (गो. जी. २३४-३७) । १०. आहारकाः—विशिष्टतरपुद्गलाः, तन्निष्पन्नमाहारकम्, अयं (आहारककाययोगः) च चतुर्दशपूर्वधरस्य समुत्पन्नविशिष्टप्रयोजनस्य कृताहारकशरीरस्य भवतीति । (औपपा. अभय. वृ. ४२, पृ. १११) । ११. अर्थानाहरते सूक्ष्मान् गत्वा केवलिनोऽन्तिकम् । संशये सति लब्धर्द्धेरसंयमजिहासया ।। यः प्रमत्तस्य मूर्घोत्थो धवलो धातुवर्जितः । अन्तर्मुहूर्तस्थितिकः सर्वव्याघातविच्युतः ।। पवित्रोत्तमसंस्थानो हस्तमात्रोऽनघद्युतिः । आहारकः स वोद्धव्यो × × × ।। (पंचसं. अमित. १, १७५-७७, पृ. २४)। १२. चतुर्दशपूर्वविदा तीर्थकरस्फातिदर्शनादिकतथाविधप्रयोजनोत्पत्तौ सत्यां विशिष्टलब्धिवशादाह्रियते निर्वर्त्यते इत्याहारकम् । × × × उक्तं च —कज्जंमि समुप्पण्णे सुयकेवलिणा विसिट्ठलद्धीए । जं एत्थ आहरिज्जइ भणियं आहारयं तं तु ।। कार्यं चेदम्—पाणिदय-रिद्धिदंसण सुहुमपयत्थावगहणहेउं वा । संसयवोच्छेयत्थं गमणं जिणपायमूलंमि ।। (प्रज्ञाप. मलय. वृ. २१-२६७, पृ. ४०६) । १३. चतुर्दशपूर्वविदा तीर्थकरस्फातिदर्शनादिकतथाविधप्रयोजनोत्पत्तौ सत्यां विशिष्टलब्धिवशादाह्रियते निर्वर्त्यते इत्याहारकम् । (सप्ततिका च. मलय. वृ. ५, पृ. १५०; षष्ठ कर्म. दे. स्वो. वृ. ६, पृ. १२३) । १४. चतुर्दशपूर्वविदा तथाविधकार्योत्पत्तौ विशिष्टलब्धिवशादाह्रियते निर्वर्त्यते इत्याहारकम् । अथवा आह्रियन्ते गृह्यन्ते तीर्थककरादिसमीपे सूक्ष्मा जीवावयः पदार्था अनेन इत्याहारकम् । (शतक मल. हेम. वृ. २-३, पृ. ५; षडशीति हरि. व्या. ३४) । १५. आकाशस्फटिकस्वच्छं श्रुतकेवलिना कृतम् । अनुत्तरामरेभ्योऽपि कान्तमाहारकं भवेत् ।। (लोकप्र. ३-९६) ।

२ सूक्ष्म पदार्थों के निर्धारण के लिए अथवा असंयम के परिहार की इच्छा से प्रसत्तसंयत के द्वारा जो शरीर रचा जाता है वह आहारक कहलाता है ।

आहारक (जीव)—१. आहरदि सरीराणं तिण्हं एयदरवग्गणाओ य । भासा-मणस्स णियदं तम्हा आहारओ भणियो । (प्रा. पंचसं. १-१७६; धव. पु. १, पृ. १५२ उ., गो. जी. ६६४) । २. शेषा उक्तविलक्षणा आहारका जीवाः ओज-लोम-प्रक्षेपाहाराणां यथासम्भवं येन केनचिदाहारेण । (श्रा. प्र. टी. ६८) । ३. उदयावण्णसरीरोदएण तद्देह-वयणचित्ताणं । णोकम्मवग्गणाणं गहणं आहारयं णाम ।। (गो. जी. ६६३) । ४. गृह्णाति देहपर्याप्तियोग्यान् यः खलु पुद्गलान् । आहारकः स विज्ञेयः × × × ।। (त. सा. २-९४) । ५. षट् चाहार-शरीरेन्द्रियानप्राण-भाषा मनःसंज्ञिकाः पर्याप्तीः यथासम्भवमाहरतीत्याहारकः । (त. सुखवो. २-३०) । ६. आहारयति ओज-लोम-प्रक्षेपाहाराणामन्यतममाहारमित्याहारकः । (षडशीति मलय. वृ. १२, पृ. १३४; पंचसं. मलय. वृ. ८, पृ. १४; षडशीति दे. स्वो. वृ. १-१४) । ७. आहारकः आहारकशरीरलब्धिमान् । (व्यव. भा. मलय. वृ. १०-६९९, पृ. ९१) ।

१ जो औदारिकादि तीन शरीरवर्गणाओं में से किसी एक वर्गणा को तथा भाषावर्गणा और मनोवर्गणाको नियमसे ग्रहण करता है वह आहारक कहलाता है । २ ओज, लोम और प्रक्षेप आहार में से किसी एक प्रकार के आहार के ग्रहण करने वाले जीव को आहारक कहते हैं । ७. आहारक शरीरलब्धि से संयुक्त जीव को आहारक कहते हैं ।

आहारक-आहारकबन्धन—देखो आहारकाहारकबन्धन । यथाऽऽहारकपुद्गलानामाहारकपुद्गलैरेवाहारकाहारकबन्धनम् × × × (कर्मवि. ग. पू. व्या. १०४) ।

आहारकशरीरपुद्गलों का अन्य आहारकशरीरपुद्गलों के साथ वन्धन कराने वाले कर्म को आहारक-आहारक वन्धन नामकर्म कहा जाता है ।

आहारक-कार्मणवन्धन—१. आहारग-कम्मवंधणं तह य । (कर्मवि. ग. १०४, पृ. ४३)। २. × × × तथाऽऽहारक-कार्मणवन्धनं च तृतीयम् । (कर्मवि. ग. पू. व्या. १०४, पृ. ४३) । ३. तेषामेवाहारकपुद्गलानां पूर्वगृहीतानां गृह्यमाणानां च कार्मणपुद्गलैर्गृह्यमाणैः पूर्वगृहीतैश्च सह सम्बन्ध आहारककार्मणवन्धनम् । (पंचसं. मलय. वृ. ३-११, पृ. १२१; कर्मप्र. यशो. टी. १, पृ. ७) ।

जो नामकर्म आहारक और कार्मण पुद्गलों को लाख के समान परस्पर में सम्वन्ध के योग्य करता है उसे आहारक-कार्मणवन्धन नामकर्म कहते हैं ।

आहारक-तैजस-कार्मणबन्धन—आहारक-तैजस-कार्मणबन्धननामाप्येवमेव (आहारकपुद्गलानामाहारक-तैजस-कार्मणपुद्गलैरेव बन्धनम् आहारक-तैजस-कार्मणबन्धनम्)। (कर्मवि. पू. व्या. १०४, पृ. ४३)।

जो कर्म आहारक, तैजस और कार्मण पुद्गलों को परस्पर सम्बन्ध के योग्य करता है उसे आहारक-तैजस-कार्मणबन्धन नामकर्म कहते हैं।

आहारक-तैजसबन्धन—१. यथाऽऽहारकपुद्गलानामाहारकपुद्गलैरेवाहारकाहारकबन्धनं तथाऽऽहारक-तैजसपुद्गलैरेवाहारक-तैजसबन्धनं द्रष्टव्यं द्वितीयम्। (कर्मवि. पू. व्या. १०४)। २. तेषामेवाहारकपुद्गलानां पूर्वगृहीतानां गृह्यमाणानां च तैजसपुद्गलैर्गृह्यमाणैः पूर्वगृहीतैश्च सह सम्बन्धः आहारक-तैजसबन्धनम्। (पंचसं. मलय. वृ. ३-११, पृ. १२१; कर्मप्र. यशो. टी. १, पृ. ७)।

जो कर्म आहारक और तैजस पुद्गलों को परस्पर में लाख के समान सम्बन्ध के योग्य करता है उसे आहारक-तैजसबन्धन नामकर्म कहते हैं।

आहारकद्रव्यवर्गणा—देखो आहारद्रव्यवर्गणा। आहारगदव्ववग्गणा णाम ओरालिय-वेउव्विय-आहारगाणं तिण्हं सरीराणं गहणं पवत्तति। (कर्मप्र. चू. १-१८, पृ. ४०)।

जिस वर्गणा के पुद्गलस्कन्धों को ग्रहण कर औदारिकादि तीन शरीरों की उत्पत्ति प्रवर्तित होती है उसे आहारकद्रव्यवर्गणा कहते हैं।

आहारकबन्धन—१. तेसिं जं संवंधं अवरोप्पर पुग्गलाणमिह कुणइ। तं जउसरिसं जाणसु आहारगवंधणं पढमं॥ (कर्मवि. ग. १०३, पृ. ४३)। २. यदुदयादाहारकशरीरपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं तैजस-कार्मणपुद्गलैश्च सह सम्बन्धस्तदाहारकबन्धनम्। (प्रज्ञाप. मलय. वृ. २२, २१३, पृ. ४७०)।

१ जो कर्म बद्ध और बध्यमान आहारक शरीर के योग्य पुद्गलों को लाख के समान परस्पर में सम्बन्ध के योग्य करता है उसे आहारकबन्धन नामकर्म कहते हैं। २ जिस कर्मके उदय से गृहीत और गृह्यमाण आहारक शरीर के पुद्गलोंका परस्पर में तथा तैजस और कार्मण शरीर के पुद्गलों के साथ भी सम्बन्ध हो उसे आहारकबन्धन कहते हैं।

आहारक योग—आहरदि अणेण मुणी सुहुमे अत्थे सयस्स संदेहे। गत्ता केवलिपासं तम्हा आहारगो जोगो। (धव. पु. १, पृ. २९४ उ.; गो. जी. २३८)।

जिसके द्वारा मुनि सूक्ष्म तत्त्व के विषय में सन्देह होने पर केवली के पास जाकर उसका निर्णय करते हैं उसे आहारक योग कहते हैं।

आहारकवर्गणा—तदनन्तरं (वैक्रियवर्गणानन्तरं) द्रव्यतो वृद्धानां परिणामं त्वाश्रित्य सूक्ष्मतराणामेकोत्तरवृद्धिमतामेव स्कन्धानां समुदायरूपा आहारकशरीरनिष्पत्तिहेतुभूता अनन्ता आहारकवर्गणाः। (शतक. मल. हेम. वृ. ८७-८८, पृ. १०४)।

वैक्रियिकवर्गणा के अनन्तर द्रव्य की अपेक्षा वृद्धि को प्राप्त, परन्तु परिणाम के आश्रय से अत्यन्त सूक्ष्म, एकोत्तर वृद्धियुक्त स्कन्धों के समुदाय रूप होकर आहारकशरीर की निष्पत्ति की कारणभूत अनन्त वर्गणायें आहारकवर्गणा कहलाती हैं।

आहारकशरीरनाम—यदुदयादाहारवर्गणापुद्गलस्कन्धाः सर्वशुभावयवाहारशरीरस्वरूपेण परिणमन्ति तदाहारकशरीरं नामकर्म। (मूला. वृ. १२-१९३)।

जिस कर्म के उदय से आहारवर्गणा के पुद्गल स्कन्ध समस्त शुभ अवयवों वाले आहारकशरीररूप से परिणत होते हैं उसे आहारकशरीर नामकर्म कहते हैं।

आहारकशरीरबन्धननाम—देखो आहारक-आहारकबन्धन और आहारकबन्धन। पूर्वगृहीतैराहारकशरीरपुद्गलैः सह परस्परं गृह्यमाणान् आहारकपुद्गलान् उदितेन येन कर्मणा बध्नाति आत्माऽन्योऽन्यसंयुक्तान् करोति तद् जतुसममाहारकशरीरबन्धननाम। (कर्मवि. दे. स्वो. वृ. ३४, पृ. ४६)।

जिस कर्म के उदय से पूर्वगृहीत आहारकशरीर के पुद्गलों के साथ वर्तमान में गृह्यमाण आहारकशरीर के पुद्गल परस्पर में मिलकर एकरूपता को प्राप्त हों उसे आहारकशरीरबन्धन नामकर्म कहते हैं।

आहारकशरीराङ्गोपाङ्ग—देखो आहारकाङ्गोपाङ्ग। जस्स कम्मस्स उदएण आहारसरीरस्स अङ्गोवङ्ग-पच्चंगाणि उप्पज्जंति तं आहारयसरीरंगोवंगं णाम। (धव. पु. ६, पृ. ७३)।

जिस कर्म के उदय से आहारक शरीर के अंग, उपांग

और प्रत्यंग उत्पन्न होते हैं उसे आहारकशरीरांगोपांग नामकर्म कहते हैं।

आहारकसमुद्घात—१. अथोक्तविधिना अल्पसावद्य-सूक्ष्मार्थग्रहणप्रयोजनाहारकशरीरनिर्वृत्त्यर्थं आहारकसमुद्घातः। (त. वा. १, २०, १२, पृ. ७७)। २. आहारके प्रारभ्यमाणे समुद्घात आहारकसमुद्घातः। स च आहारकशरीरनामकर्माश्रयः। (जीवाजी. मलय. वृ. १–१३, पृ. १७; पंचसं. मलय. वृ. २–१७, पृ. ६४)।

१ अल्प पाप और सूक्ष्म तत्त्वों के अवधारण रूप प्रयोजन को सिद्ध करने वाले आहारक शरीर की रचना के लिए जो समुद्घात (आत्मप्रदेशवहिर्गमन) होता है उसे आहारकसमुद्घात कहते हैं।

आहारकसंघातननाम—यदुदयात् आहारकशरीरस्वपरिणतान् पुद्गलानात्मा सङ्घातयति अन्योऽन्यसन्निधानेन व्यवस्थापयति तद् आहारकसंघातननाम। (कर्मवि. दे. स्वो. वृ. ३५, पृ. ४७)।

जिस कर्म के उदय से आहारक शरीररूप से परिणत हुए पुद्गल परमाणुओं को आत्मा संघातित करता है—परस्पर के संनिधान (समीपता) से व्यवस्थापित करता है—उसे आहारकसंघातन नामकर्म कहते हैं।

आहारकाङ्गोपाङ्गनाम—देखो आहारशरीरांगोपांग। यदुदयाद् आहारकशरीरत्वेन परिणतानां पुद्गलानामाङ्गोपाङ्गविभागपरिणतिरुपजायते तद् आहारकाङ्गोपाङ्गनाम। (कर्मवि. दे. स्वो. वृ. ३३, पृ. ४६)।

जिस कर्म के उदय से आहारकशरीररूप से परिणत हुए पुद्गल परमाणुओं का अंग-उपांग के विभाग से परिणमन होता है उसे आहारकाङ्गोपाङ्ग नामकर्म कहते हैं।

आहारकाययोग— आहरति आत्मसात् करोति सूक्ष्मानर्थाननेनेति आहारः। तेन आहारकायेन योगः आहारकाययोगः। (धव. पु. १, पृ. २९२)।

सूक्ष्म पदार्थोंको आत्मसात् करने वाले आहारकाय से जो योग होता है उसे आहारकाययोग कहते हैं।

आहारकार्मणशरीरवन्ध–आहार-कम्मइयशरीरवंधो (आहार-कम्मइयसरीरक्खंधाणं एक्कम्हि जीवे णिविट्ठाणं जो अण्णोण्णेण वंधो सो आहार-कम्मइयसरीरवंधो णाम—देखो सू. ४८ की धवला)। (षट्खं. ५, ६, ५५—पु. १४, पृ. ४३)।

आहारक और कार्मण शरीर सम्बन्धी पुद्गलस्कन्धों का जो एक जीवमें परस्पर वन्ध होता है उसे आहार-कार्मणशरीरवन्ध कहते हैं।

आहारकाहारकवन्धन—देखो आहारक-आहारकवन्धन। पूर्वगृहीतानामाहारकपुद्गलानां स्वैरेवाहारकपुद्गलैर्गृह्यमाणैः सह यः सम्बन्धः स आहारकाहारकवन्धनम्। (पंचसं. मलय. वृ. ३–११, पृ. १२१; कर्मप्र. यशो. टी. १, पृ. ७)।

पूर्वगृहीत आहारकपुद्गलों का गृह्यमाण आहारकपुद्गलों के साथ सम्बन्ध होने को आहारकाहारकवन्धन कहते हैं।

आहार-तैजस-कार्मणशरीरवन्ध–आहार-तेया-कम्मइयसरीरवंधो (आहार-तेया-कम्मइयसरीरक्खंधाणं एक्कम्हि जीवे णिविट्ठाणं जो अण्णोण्णेण वंधो सो आहार-तेया-कम्मइयसरीरवंधो णाम)। षट्खं. ५, ६, ५६—पु. १४, पृ. ४४)।

आहारक, तैजस और कार्मण शरीरों सम्बन्धी पुद्गलस्कन्धों का जो एक जीव में परस्पर वन्ध होता है उसे आहार-तैजस-कार्मणशरीरवन्ध कहते हैं।

आहार-तैजसशरीरवन्ध–आहारतेयासरीरवंधो (आहार-तेयासरीरक्खंधाणं एकम्हि जीवे णिविट्ठाणं जो अण्णोण्णेण वंधो सो आहार-तेयासरीरवंधो णाम)। (षट्खं. ५, ६, ५४—पु. १४, पृ. ४३)।

आहारक और तैजस शरीरों के पुद्गलस्कन्धों का एक जीव में जो परस्पर वन्ध होता है उसे आहार-तैजस-शरीरवन्ध कहते हैं।

आहारद्रव्यवर्गणा—१. आहारदव्ववग्गणा णाम का॥ आहारदव्ववग्गणं तिण्णं सरीराणं गहणं पवत्तदि॥ ओरालिय-वेउव्विय- आहारसरीराणं जाणि दव्वाणि घेत्तूण ओरालिय-वेउव्विय-आहारसरीरत्ताए परिणामेदूण परिणमंति जीवा ताणि दव्वाणि आहारदव्ववग्गणा णाम। (षट्खं. ५, ६, ७२८–३०—पु. १४, पृ. ५४६)। २. जिस्से परमाणुपोग्गलक्खंधे घेत्तूण तिण्णं सरीराणं गहणं णिप्पत्ती पवत्तदि होदि सा आहारदव्ववग्गणा णाम। (धव. पु. १४, पृ. ५४६); जाणि ओरालिय-वेउव्विय-आहारसरीराणं पाओग्गाणि दव्वाणि ताणि घेत्तूण पाविऊण ओरालिय-वेउव्विय-आहारसरीरत्ताए ओरालिय-वेउव्विय-आहारसरीराणं सरूवेण ताणि परिणामेदूण परिणमाविय जेहि सह परिणमंति वंधं

गच्छंति जीवा ताणि दव्वाणि आहारदव्ववग्गणा णाम। (धव. पु. १४, प. ५४७)।

जिसके आश्रय से औदारिक, वैक्रियिक और आहारक इन तीनों शरीरों की निष्पत्ति होती है उसे आहार-द्रव्यवर्गणा कहते हैं।

आहारपर्याप्ति—१. आहारपज्जत्ती णाम खल-रसपरिणामसत्ती। (नन्दी. चू. पृ. १५)। २. शरीरेन्द्रिय-वाङ्-मनःप्राणाऽपानयोग्यदलिकद्रव्याऽऽहरण-क्रियापरिसमाप्तिः आहारपर्याप्तिः। (त. भा. ८, १२; नन्दी. हरि. वृ. पृ. ४३-४४)। ३. आहारग्रहण-समर्थकरणनिष्पत्तिराहारपर्याप्तिः। × × × शरीरस्येन्द्रियाणां वाचो मनसः प्राणापानयोश्चागमप्रसिद्धवर्गणाक्रमेण यानि योग्यानि दलिकद्रव्याणि तेषाम् आहरणक्रिया ग्रहणम्—आदानम्, तस्याः परिसमाप्तिराहारपर्याप्तिः करणविशेषः। (त. भा. हरि. व सिद्ध. वृ. ८–१२)। ४. तत्राहारपर्याप्तेरर्थ उच्यते—शरीरनामकर्मोदयात् पुद्गलविपाकिनः आहारवर्गणागतपुद्गलस्कन्धाः समवेतानन्तपरमाणुनिष्पादिता आत्मावष्टब्धक्षेत्रस्थाः कर्मस्कन्धसम्बन्धतो मूर्तिभूतमात्मानं समवेतत्वेन समाश्रयन्ति; तेषामुपगतानां पुद्गलस्कन्धानां खल-रसपर्यायैः परिणमनशक्तेर्निमित्तानामाप्तिराहारपर्याप्तिः (खल-रसपर्यायैः परिणमनशक्तिराहारपर्याप्तिः—मूला. वृ.)। (धव. पु. १, पृ. २५४; मूला. वृ. १२, १९५)। ५. आहारपर्याप्तिर्नाम खल-रसपरिणमन-शक्तिः। (स्थाना. अभय. वृ. २, १, ७३, पृ. ५०)। ६. आहारग्रहणसमर्थकरणपरिनिष्पत्तिः आहारपर्याप्तिः। (त. भा. सिद्ध. वृ. ८–१२)। ७. यया शक्त्या करणभूतया जन्तुराहारमादाय खल-रसरूपतया परिणमयति सा आहारपर्याप्तिः। (प्रव. सारो. वृ. १३१७; विचारस. वि. व्या. ४२, पृ. ९; बृहत्क. वृ. १११२; संग्रहणी दे. वृ. २६८)। ८. यया बाह्यमाहारमादाय खल-रसरूपतया परिणमयति सा आहारपर्याप्तिः। (प्रज्ञाप. मलय. वृ. १–१२, पृ. २५; नन्दी. मलय. वृ. १३, पृ. १०५; षडशीति मलय. वृ. ३, पृ. १२४; पंचसं. मलय. वृ. १–५, पृ. ८; जीवाजी. मलय. वृ. १–१२, पृ. १०; षष्ठ कर्म. मलय. वृ. ५, पृ. १५३; शतक. मल. हेम. वृ. ३७, ३८, पृ. ५०; कर्मस्तव गो. वृ. ९–१०, पृ. १९; कर्मवि. दे. स्वो. वृ. ६; षडशीति दे. स्वो. वृ. २, पृ. ११७; षष्ठ कर्म. दे. स्वो. वृ. ६, पृ. १२६)। ९. आहारवर्गणाभ्य आगतसमयप्रबद्धपुद्गलस्कन्धान् खल-रसभागेन परिणमयितुं पर्याप्तिनामकर्मोदयसहिताहारवर्गणावष्टम्भजनिता आत्मनः शक्तिनिष्पत्तिः आहारपर्याप्तिः। (गो. जी. म. प्र. टी. ११९)। १०. औदारिक-वैक्रियिकाहारक-शरीरनामकर्मोदय-प्रथमसमयमादिं कृत्वा तच्छरीरत्रय-षट्पर्याप्तिपर्याय-परिणमनयोग्यपुद्गलस्कन्धान् खल-रसभागेन परिणमयितुं पर्याप्तिनामकर्मोदयावष्टम्भसम्भूतात्मनः शक्ति-निष्पत्तिः आहारपर्याप्तिः। (गो. जी. जी. प्र. टी. ११९; कार्तिके. टी. १३४)। ११. तत्रैषाऽऽहार-पर्याप्तिर्ययाऽऽदाय निजोचितम्। पृथक् खल-रसत्वेनाऽऽहारं परिणतिं नयेत्॥ (लोकप्र. ३–१७)।

१ आहारवर्गणा के परमाणुओं को खल और रस भागरूप से परिणमन कराने की शक्ति को आहार-पर्याप्ति कहते हैं।

आहारपोषध—तत्राहारपोषधो देशतो विवक्षित-विकृतेरविकृते राचाम्लस्य वा सकृदेव द्विरेव वा भोजनम्। (योगशा. स्वो. विव. ३-८५, पृ. ५११)।

विवक्षित विकृति—विकारजनक घी-दूध आदि, अविकृति—कामादि विकार को न उत्पन्न करने वाला सादा भोजन—अथवा आचाम्ल (संस्कार-रहित कांजी व भात आदि) का एक-दो वार भोजन करना; यह देशतः आहारपोषधव्रत कहलाता है।

आहारमिश्रकाययोग — आहार-कार्मणस्कन्धतः समुत्पन्नवीर्येण योगः आहारमिश्रकाययोगः। (धव. पु. १, पृ. २९३)।

आहारकशरीर और कार्मणशरीर के स्कन्धों से उत्पन्न हुए वीर्य के द्वारा जो योग होता है उसे आहारमिश्रकाययोग कहते हैं।

आहारशरीर—अंतोमुहुत्तसंचिदपदेसकलाओ आहारसरीरं णाम। (धव. पु. १४, पृ. ७८)।

अन्तर्मुहूर्त काल में संचित नोकर्मप्रदेशों के समूह का नाम आहारशरीर है।

आहारशरीरनाम—जस्स कम्मस्स उदएण आहार-वग्गणाए खंधा आहारसरीररूवेण परिणमंति तस्स आहारसरीरमिदि सण्णा। (धव. पु. ६, पृ. ६९)।

जिस कर्म के उदय से आहारवर्गणा के स्कन्ध आहारशरीर के रूप में परिणत होते हैं उसे आहार-शरीरनामकर्म कहते हैं।

आहारशरीरबन्धननाम—देखो आहारकशरीरबन्धन नामकर्म। जस्स कम्मस्स उदएण आहारसरीरपरमाणू अण्णोण्णेण बंधमागच्छंति तमाहारसरीरबंधणणाम। (धव. पु. ६, पृ. ७०)।

जिस कर्म के उदय से आहारशरीर के परमाणु परस्पर में बन्ध को प्राप्त होते हैं उसे आहारशरीरबन्धन नामकर्म कहते हैं।

आहारशरीरसंघातनाम—देखो आहारकशरीरसंघातनाम। जस्स कम्मस्स उदएण आहारसरीरक्खंधाणं सरीरभावमुवगदाणं बंधणणामकम्मोदएण एगबंधणबद्धाण मट्ठत्तं होदि तमाहारसरीरबंधणणाम। (धव. पु. ६, पृ. ७०)।

जिस कर्म के उदय से शरीर अवस्था को प्राप्त आहारशरीर के स्कन्ध बन्धन नामकर्म के उदय से एक बन्धनबद्ध होकर छिद्ररहित अवस्था को प्राप्त होते हैं उसे आहारशरीरसंघात नामकर्म कहते हैं।

आहारसमुद्घात — देखो आहारकसमुद्घात। १. आहारसमुग्घादो णाम पत्तिड्ढीणं महारिसीणं होदि। तं च हत्थुस्सेधं हंसधवलं सव्वंगसुंदरं खणमेत्तेण अणेयजोयणलक्खगमणक्खमं अप्पडिहयगमणं उत्तमंगसंभवं आणाकणिट्ठदाए असंजमबहुलदाए च लद्धप्पसरूवं। (धव. पु. ४, पृ. २८); आहारसमुग्घादो णाम हत्थपमाणेण सव्वंगसुंदरेण समचउरस्ससंठाणेण हंसधवलेण रस-रुधिर-मंस-मेदट्ठि-मज्ज-सुक्कसत्तधाउअवज्जिएण विसग्गि-सत्थादिसयलबाहामुक्केण वज्जसिलाथंभ-जल-पव्वयगमणदच्छेण सीसादो उग्गएण देहेण तित्थयरपादमूलगमणं। (धव. पु. ७, पृ. ३००)। २. समुत्पन्नपद-पदार्थभ्रान्तेः परमर्द्धिसम्पन्नस्य महर्षेर्मूलशरीरमत्यज्य शुद्धस्फटिकाकृतिरेकहस्तप्रमाणः पुरुषो मस्तकमध्यान्निर्गत्य यत्र-कुत्रचिदन्तर्मुहूर्तमध्ये केवलज्ञानिनं पश्यति तद्दर्शनाच्च स्वाश्रयस्य मुनेः पद-पदार्थनिश्चयं समुत्पाद्य पुनः स्वस्थाने प्रविशति असौ आहारसमुद्घातः॥ (वृ. द्रव्यसं. टी. ११; कार्तिके. टी. १७६)।

१ प्रमाण में एक हाथका, सर्वांगसुन्दर, समचतुरस्रसंस्थान से सहित, हंसके समान धवल, रस-रुधिरादि सात धातुओं से रहित, समस्त बाधाओंसे विनिर्मुक्त, पर्वत एवं जल आदि के भीतर गमन में समर्थ और मस्तक से उत्पन्न हुए ऐसे शुभ शरीर के द्वारा तीर्थंकर के पादमूल में जाना; इसे आहारसमुद्घात कहते हैं।

आहारसंज्ञा—१. आहारदंसणेण य तस्सुवजोगेण ऊणकुट्ठाए। सादिदरुदीरणाए हवदि हु आहारसण्णा दु॥ (प्रा. पंचसं. १–५२; गो. जी. १३४)। २. आहारसंज्ञा आहाराभिलाषः क्षुद्वेदनीयोदयप्रभवः खल्वात्मपरिणाम इत्यर्थः। (आव. हरि. वृ. पृ. ५८०; जीवाजी. वृ. १-१३, पृ. १५)। ३. असद्वेदनीयोदयादोज-लोम-प्रक्षेपभेदेनाहाराभिलापपूर्वकं विशिष्टपुद्गलग्रहणमाहारसंज्ञा, संज्ञा नाम विज्ञानं तद्विषयमाहारमभ्यवहरामीति। (त. भा. हरि. व सिद्ध. वृ. २–२५)। ४. आहारे या तृष्णा काङ्क्षा सा आहारसंज्ञा। (धव. पु. २, पृ. ४१४)। ५. आहाराभिलाप आहारसंज्ञा, सा च तैजसशरीरनामकर्मोदयादसातोदयाच्च भवति। (आचारा. नि. शी. वृ. १, १, १, ३६, पृ. ११)। ६. तत्राहारसंज्ञा आहाराभिलापः। (स्थाना. अभय. वृ. ४–४, ३५५, पृ. २६३)। ७. तत्राहारसंज्ञा क्षुद्वेदनीयोदयादाहाराभिलाषः। (धर्मसं. मान. स्वो. वृ. ३-२७, पृ. ८०)। ८. आहारे विशिष्टान्नादौ संज्ञा वाञ्छा आहारसंज्ञा। (गो. जी. जी. प्र. टी. १३५)। ९. आहारे योऽभिलापः स्याज्जन्तोः क्षुद्वेदनीयतः। ह्याहारसंज्ञा सा ज्ञेया × × ×। (लोकप्रकाश ३–४४४)।

१ आहार के देखने से, उसकी ओर उपयोग जाने से तथा पेट के खाली होने से असातावेदनीय की उदीरणा होने पर जो आहार की अभिलाषा होती है उसका नाम आहारसंज्ञा है।

आहितविशेषत्व—१. आहितविशेषत्वं वचनान्तरापेक्षया ढौकितविशेषता। (समवा. अभय. वृ. ३५, पृ. ६०)। २. आहितविशेषत्वं शेषपुरुषवचनापेक्षया शिष्येपूत्पादितमतिविशेषता। (रायप. मलय. वृ. सू. ४, पृ. २८)।

१ दूसरों के वचनोंकी अपेक्षा विशेषता की उपस्थिति को आहितविशेषत्व कहते हैं। यह ३५ सत्यवचनातिशयों में ३१वां है।

आहृतकर्म—१. यद् गृहादेः साधुवसतिमानीय ददाति तदाहृतम्। (आचारा. शी. वृ. २, १, २६६, पृ. ३१७)। २. आहृतं स्वग्रामाद्याहृतादि। (व्यव. भा. मलय. वृ. ३–१६४, पृ. ३५)। ३. यद् ग्रामा-

न्तराद् गृहाद् वा यतिनिमित्तमानीतं तदाहृतम्। (गु. गु. षट्. स्वो. वृ. २०, पृ. ४९)।

१ गृहादि से साधु की वसति में लाकर जो दिया जाता है वह आहृत नामक उद्गम दोष से दूषित होता है।

इक्ष्वाकु—१. आकन्तीक्षुरसं प्रीत्या बाहुल्येन त्वयि प्रभो। प्रजाः प्रभो यतस्तस्मादिक्ष्वाकुरिति कीर्त्यसे॥ (ह. पु. ८–२१०)। २. आकानाच्च तदेक्षूणां रस-संग्रहणे नृणाम्। इक्ष्वाकुरित्यभूद् देवो जगतामभि-संमतः॥ (म. पु. १६–२६४)।

कर्मभूमि के प्रारम्भ में भगवान् आदिनाथ ने प्रजा के लिए चूंकि इक्षुरस के संग्रह का उपदेश दिया था, अतएव उन्हें इक्ष्वाकु कहा जाता है।

इङ्गाल—देखो अङ्गार दोष। १. जे णं णिग्गंथे वा णिग्गंथी वा फासु-एसणिज्जं असण-पाण-खाइम-साइमं पडिग्गाहेत्ता समुच्छिए गिद्धे गढिए अज्झोव-न्ने आहारं आहारेति एस णं गोयमा स इंगाले पाण-भोयणे। (भगवती ७, १, १९—खण्ड ३, पृ. ५)। २. निर्वाता विशाला नात्युष्णा शोभनेयमिति तत्रा-नुराग इङ्गालः। (भ. आ. विजयो. ३–२३०; कार्तिके. टी. ४४९)। ३. इङ्गालं सरागप्रशंसनम्। (गु. गु. षट्. स्वो. वृ. २५, पृ. ५८)।

१ साधु और साध्वी प्रासुक व एषणीय अशन, पान, खादिम एवं स्वादिम आहार को ग्रहण करके मोह को प्राप्त होता हुआ यदि लोलुपता व आसक्ति से उस आहार को खाता है तो यह इङ्गाल (अंगार) नाम का एषणा दोष होता है। २ यह वसतिका हवा और अधिक गर्मी-सर्दी से रहित विशाल और सुन्दर है; ऐसा समझ कर उसमें अनुराग करने से इंगालदोष होता है।

इङ्गित—इङ्गितं निपुणमतिगम्यं प्रवृत्ति-निवृत्ति-सूचकमीषद्भ्रू-शिरःकम्पादि। (जीतक. चू. वि. व्या. ४–२५, पृ. ३८)।

निपुणबुद्धियों के द्वारा जान सकने के योग्य ऐसे प्रवृत्ति या निवृत्ति के सूचक कुछ भृकुटि व शिर के कम्पन आदि शारीरिक संकेतों को इङ्गित कहा जाता है।

इङ्गिनी—१. इंगिणीशब्देन इङ्गितमात्मनो भण्यते। (भ. आ. विजयो. २९)। २. इंगिणीशब्देन इंगित-मात्मनोऽभिप्रायो भण्यते। (भ. आ. मूला. २९)।

२ अपने अभिप्राय को इंगित या इंगिनी कहा जाता है।

इङ्गिनी-अनशन—इङ्गिनी श्रुतविहितः क्रियावि-शेषस्तद्विशिष्टमनशनमिङ्गनी। अस्य प्रतिपत्ता तेनैव क्रमेणायुषः परिहाणिमवबुध्य तथाविध एव स्थण्डिले एकाकी कृतचतुर्विधाहारप्रत्याख्यानश्छायात् उष्ण-मुष्णाच्छायां संक्रामन् सचेष्टः सम्यग्ध्यानपरायणः प्राणान् जहाति इत्येतदिङ्गिनीरूपमनशनम्। (योग-शा. स्वो. विव. ४–८९)।

आगमविहित एक क्रियाविशेष का नाम इङ्गिनी है। उसको स्वीकार करने वाला क्रमसे होने वाली आयु की हानि को जानकर जीव-जन्तु रहित एकान्त स्थान में रहता हुआ चारों प्रकार के आहार का परित्याग करता है। वह छाया से उष्ण प्रदेश में और उष्ण प्रदेश से छाया में संक्रमण करता हुआ सावधान रहकर ध्यान में तत्पर रहता है व प्राणों को छोड़ता है—मृत्यु को स्वीकार करता है। इसे इङ्गिनीरूप अनशन कहा जाता है।

इङ्गिनीमरण—देखो इङ्गिनी व इङ्गिनी-अनशन। १. आत्मोपकारसव्यपेक्षं परोपकारनिरपेक्षम् इङ्गि-नीमरणम्। (धव. पु. १, पृ. २३-२४)। २. इङ्गिनी श्रुतविहितक्रियाविशेषः, तद्विशिष्टं मरणमिङ्गिनीमर-णम्। अयमपि हि प्रव्रज्यादिप्रतिपत्तिक्रमेणैवायुषः परिहाणिमवबुध्य आत्तनिजोपकरणः स्थावर-जङ्गम-प्राणिविवर्जितस्थण्डिलस्थायी एकाकी कृतचतुर्विधा-हारप्रत्याख्यानः छायात उष्णं उष्णाच्छायां सङ्क्रामन् सचेष्टः सम्यग्ज्ञानपरायणः प्राणान् जहाति एतदिङ्गि-नीमरणमपरिकर्मपूर्वकं चेति। (त. भा. सिद्ध. वृ. ९, १९)। ३. स्वाभिप्रायानुसारेण स्थित्वा प्रवर्त्यमानं मरणं इङ्गिनीमरणम्। (भ. आ. विजयो. व मूला. टी. २९)। ४. अप्पोवयारवेक्खं परोवयारूणमिगणीमर-णं। (गो. क. ६१)। ५. परप्रतीकारनिरपेक्षमा-त्मोपकारसापेक्षमिङ्गिनीमरणम्। (चा. सा. पृ. ६८; कार्तिके. टी. ४९९)।

१ दूसरेके द्वारा की जाने वाली सेवा-सुश्रूषा को स्वी-कार न करके स्वयं ही शरीर की सेवा-सुश्रूषा करते हुए जो मरण होता है उसे इङ्गिनीमरण कहते हैं।

इच्छा—१. एषणं इच्छा बाह्याऽभ्यन्तरपरिग्रहाभि-लाषः। (जयध. प. ७७७)। २. इच्छाऽभिलाषस्त्रै-लोक्यविषयः। (त. भा. सिद्ध. वृ. ८-१०, पृ. १४९)।

३. इच्छा अन्तःकरणप्रवृत्तिः। (सूत्रकृ. शी. वृ. २, २, ३५, पृ. ७१)। ४. इच्छा तद्वत्कथाप्रीतिः ××× । (ज्ञानसार २७–४)। ५. इच्छा साधकभावाभिलाषः, तद् योगपञ्चकं येषु विद्यते ते तद्वन्तः श्रमणाः, तेषां कथासु गुणकथनादिषु प्रीतिः इष्टता। उक्तं च हरिभद्रपूज्यैः—तज्जुत्तकहापीई संगया विपरिणामणी इच्छा इति। (ज्ञानसार देव-चन्द्र वृ. २७–४)।

१ बाह्य और आभ्यन्तर परिग्रह की अभिलाषा को इच्छा कहते हैं। २ तीनों लोक सम्बन्धी अभि-लाषा का नाम इच्छा है। यह लोभ कषाय का नामान्तर है।

इच्छाकार—१. इट्ठे इच्छाकारो ×××। (मूला. ४–५)। २. तत्रैषणमिच्छा क्रियाप्रवृत्त्यभ्यु-पगमः, करणं कारः, इच्छया करणं इच्छाकारः, आज्ञा-बलाभियोगव्यापारप्रतिपक्षो व्यापारणं चेत्यर्थः। (अनुयो. हरि. वृ. पृ. ५८)। ३. एषणमिच्छा, करणं कारः, ××× इच्छया बलाभियोगमन्तरेण करणम् इच्छाकारः, इच्छाक्रियेत्यर्थः। तथा च ममेदं कुरु इच्छाक्रियया, न च बलाभियोगपूर्विकयेति भावार्थः। (आव. नि. हरि. वृ. ६६६, पृ. २५८; जीतक. चू. वि. व्या. पृ. ४१, ६–४)। ४. इच्छा-मभ्युपगमं करोतीति इच्छाकारः आदरः। (मूला. वृ. ४–४); इट्ठे इष्टे सम्यग्दर्शनादिके शुभपरि-णामे वा, इच्छाकारो—इच्छाकारोऽभ्युपगमो हर्षः स्वेच्छया प्रवर्तनम्। (मूला. वृ. ४–५)। ५. पुस्त-कातापयोगादेर्या याञ्चा विनयान्विता। स्व-परार्थे यतीन्द्राणां सेच्छाकारः प्ररूपितः॥ (आचा. सा. २–६)।

१ अभीष्ट सम्यग्दर्शनादि अथवा शुभ परिणाम को स्वीकार करना, उसमें हर्ष प्रगट करना और इच्छा-नुसार उसमें प्रवर्तना; इसका नाम इच्छाकार है। ३ बलप्रयोग के विना इच्छा से 'मेरा यह कार्य कर दो' इस प्रकार प्रेरणा करना; यह इच्छाकार कह-लाता है।

इच्छानुलोमवचनी — देखो इच्छानुलोमवाक्। १. इच्छानुलोमवचनी इच्छानुवृत्तिभाषा यथा तथा भवतीत्यादिः। (गो. जी. म. प्र. टी. २२५)। २. तथैव मयाऽपि भवितव्यमित्यादि इच्छानुवृत्तिभाषा इच्छा-नुलोमवचनी। (गो. जी. जी. प्र. टी. २२५)।

इच्छानुरूप वचनप्रयोग का नाम इच्छानुलोमवचनी है। जैसे—उसी प्रकार मैं भी होना चाहता हूं, इत्यादि वचनप्रयोग।

इच्छानुलोमवाक्—तवेष्टं पुष्टं कुर्वेऽहमित्याद्येच्छा-नुलोमवाक्॥ (आचा. सा. ५–८६)।

तुम्हारे अभीष्ट को मैं पुष्ट करता हूं, इत्यादि प्रकार के वचन को इच्छानुलोमवाक् कहते हैं।

इच्छानुलोमा–देखो इच्छानुलोमवचनी। १. इच्छा-नुलोमा नाम कार्यं कर्तुमिच्छता केनचित् पृष्टे कश्चि-दाह करोति(तु) भवान् ममाप्येतदभिप्रेतमिति। (धर्मसं. मान. स्वो. वृ. ३–४१, पृ. १२३)। २. णियइच्छियत्तकहणं णेया इच्छाणुलोमा य॥ (भाषार. ७६)। ३. निजेप्सितत्वं स्वेच्छाविषयत्वम्, तत्कथनं स्वेच्छानुलोमा ज्ञेया। यथा कश्चित् कि-ञ्चित्कर्मारभमाणः कञ्चन पृच्छति करोम्येतदिति। स प्राह—करोतु भवान्, ममाप्येतदभिप्रेतमिति। (भाषार. वृ. ७६)।

१ कार्य करने के इच्छुक किसी के द्वारा पूछने पर जो कोई यह कहता है कि 'करो, मुझे भी यह अभी-ष्ट है', इस प्रकार की भाषा को इच्छानुलोमा कहा जाता है।

इच्छाप्रवृत्तदर्शनबालमरण — तयोः (इच्छानि-च्छाप्रवृत्तमरणयोः) आद्यमग्निना धूमेन शस्त्रेण विषेण उदकेन मरुत्प्रपातेन उच्छ्वासनिरोधेन अति-शीतोष्णपातेन रज्ज्वा क्षुधा तृषा जिह्वोत्पाटनेन विरुद्धाहारसेवनया बाला मृतिं ढौकन्ते कुतश्चिन्नि-मित्ताज्जीवितपरित्यागैषिणः। (भग. आ. विजयो. टी. २५; भा. प्रा. टी. ३२)।

कारणवश प्राणघात की इच्छा करने वाले अज्ञानी जन अग्नि, धूम, शस्त्र, विष, पानी, आंधी, श्वास-निरोध, अतिशय शैत्य या उष्णता, रस्सी (फांसी), भूख, प्यास, जीभ का उखाड़ना और विपरीत आहार का सेवन; इत्यादि कारणों में किसी भी कारण के द्वारा जो मृत्यु का आश्रय लेते हैं, यह इच्छाप्रवृत्तदर्शनबालमरण कहलाता है।

इच्छायोग—१. कर्तुमिच्छोः श्रुतार्थस्य ज्ञानिनोऽपि प्रमादतः। विकलो धर्मयोगो यः स इच्छायोग उच्यते॥ (योगदृष्टिस. ३)। २. तज्जुत्तकहापीईइ संगया विपरिणामिणी इच्छा। (योगविं. ५)। ३. ज्ञातागमस्यापि प्रमादिनः कालादिवैकल्येन चैत्य-

वन्दनाद्यनुष्ठानमिच्छाप्राधान्यादिच्छायोगः । (शास्त्रवा. टी. ९–२७) ।
३ आगम का ज्ञाता होकर भी प्रमादवश कालादि की विकलता से स्वेच्छापूर्वक चैत्यवन्दना आदि क्रियाओं के करने को इच्छायोग कहते हैं ।

इच्छाविभाषण—१. दीनाद्यन्नाद्यदानेन पुण्यं ननु भवेदिति । पृष्टेऽभ्युपगमान्नार्थं भवेदिच्छाविभाषणम् ।। (आचा. सा. ८–४०) । २. कश्चित् पृच्छति हे मुने, दीन-हीनादीनामन्नादिदानेन पुण्यं भवेन्न वा भवेत् ? मुनिरन्नार्थं वदति पुण्यं भवेदेवेत्यभ्युपगम इच्छाविभाषणम् । (भा. प्रा. टी. ९९) ।
१ दीन-हीन जनों को अन्नादि के देने से क्या पुण्य होता है, इस प्रकार किसी के पूछने पर अन्न के लिये 'होता है' ऐसा स्वीकारात्मक वचन कहना, यह एक इच्छाविभाषण नाम का उत्पादन दोष माना जाता है ।

इच्छावृत्ति—पूर्वात्तानशनातापयोगोपकरणादिषु । सेच्छावृत्तिर्गणीच्छानुवृत्तिर्या विनयास्पदा ।। (आचा. सा. २–९) ।
पूर्व में गृहीत अनशन व आतापनयोग आदि करने के समय आचार्य की इच्छा के अनुसार सविनय आचरण करने को इच्छावृत्ति कहते हैं ।

इतर मैत्री—इतरः प्रतिपन्नः पूर्वपुरुषप्रतिपन्नेषु वा स्वजनसम्बन्धनिरपेक्षा या मैत्री सा तृतीया । षोडशक वृ. १३–६) ।
कुटुम्बी जन से भिन्न इतर जनों में—जिन्हें स्वयं स्वीकार किया गया है या जो पूर्व पुरुषों द्वारा स्वीकृत हैं—स्वजन सम्बन्ध की अपेक्षा न कर मैत्रीभाव के रखने को इतर मैत्री कहते हैं। यह मैत्रीभावना के चार भेदों में तीसरा है ।

इतरेतराभाव—स्वरूपान्तरात् स्वरूपव्यावृत्तिरितरेतराभावः । (प्र. न. त. ३–६३) ।
स्वरूपान्तर से स्वरूप की व्यावृत्ति को इतरेतराभाव कहते हैं ।

इत्थंभूत (एवम्भूत नय)—१. ××× इत्थंभूतः क्रियाश्रयः । (लघीय. ५–४४; प्रमाणसं. ८३) । २. इत्थंभूतनयः क्रियार्थवचनः स्यात्कारमुद्राङ्कितः । (सिद्धिवि. ११–३१, पृ. ७३६ पं. ६)। ३. इत्थंभूतः क्रियाशब्दभेदात् अर्थभेदकृत इति । ××× ननु च इत्थंभूतस्वरूपप्ररूपणे प्रस्तुते एवम्भूताभिधाने किं केन संगतम् ? इत्यसत्, यस्मात् इत्थम्भूतस्यैव इदम् 'एवम्भूतः' इति नामान्तरम् । (न्यायकु. ५–४४, पृ. ६३९) ।
१ क्रिया के आश्रयसे वस्तुस्वरूप के प्रतिपादन करने वाले नय को इत्थंभूत (एवम्भूत) नय कहते हैं। जैसे—गमनक्रियापरिणत गाय को ही गौ कहना ।

इत्थंलक्षणसंस्थान— १. वृत्त-त्र्यस्र-चतुरस्रायत-परिमण्डलादीनामित्थंलक्षणम् । (स. सि. ५-२४; त. सुखबो. वृ. ५–२४) । २. वृत्तं त्र्यस्रं चतुरस्रमायतं परिमण्डलमित्येवमादि संस्थानमित्थंलक्षणम् । (त. वा. ५, २४, १३) । ३. संस्थानमित्थंलक्षणं चतुरस्रादिकम् । (त. श्लो. ५–२४) । ४. संस्थानं कलशादीनामित्थंलक्षणमिष्यते । (त. सा. ६–६३) । ५. इत्थंलक्षणं संस्थानं त्रिकोण-चतुःकोण-दीर्घ-परिमण्डलादि । (त. वृत्ति श्रुत. ५–२४) ।
१ गोल, त्रिकोण एवं चतुष्कोण आदि विविध आकारों को इत्थंलक्षणसंस्थान कहते हैं ।

इत्वर अनशन—१. न अशनमनशनम्, आहारत्याग इत्यर्थः । तत्पुनर्द्विधा इत्वरं यावत्कथिकं च । तत्रेत्वरं परमितकालम्, तत्पुनश्चरमतीर्थकृत्तीर्थे चतुर्थादिषण्मासान्तम् । (दशवै. नि. हरि. वृ. १, १, ४७, पृ. २६) । २. तत्रेत्वरं नमस्कारसहितादि । ××× चतुर्थभक्तादिषण्मासपर्यवसानमित्वरमनशनं भगवतः महावीरस्य तीर्थे । (त. भा. सिद्ध. वृ. ९–१९) ।
१ परमित काल तक जो आहार का त्याग किया जाता है उसे इत्वर अनशन कहते हैं । वह महावीर के तीर्थ में एक से लेकर छह मास तक अभीष्ट है।

इत्वर-परिगृहीतागमन — १. इत्वरपरिगृहीतागमनं स्तोककालपरिगृहीतागमनम्, भाटीप्रदानेन कियन्तमपि कालं स्ववशीकृतवेश्यामैथुनासेवनमित्यर्थः । (श्रा. प्र. टी. २७३) । २. तत्रेत्वरकालपरिगृहीता काल-शब्दलोपादित्वरपरिगृहीता, भाटिप्रदानेन कियन्तमपि कालं दिवस-मासादिकं स्ववशीकृतेत्यर्थः, तस्या गमनम् अभिगमो मैथुनासेवना इत्वरपरिगृहीतागमनम् । (श्राव. वृ. ६, पृ. ८२५) ।
१ द्रव्य देकर कुछ काल के लिए अपने अधीन करके व्यभिचारिणी (वेश्या) स्त्री के साथ विषय सेवन

करने को इत्वरपरिगृहीतागमन कहते हैं। यह ब्रह्मचर्याणुव्रत का एक अतीचार है।

इत्वर-परिगृहीतापरिगृहीतागमन—इत्वरी अयनशीला, भाटीप्रदानेन स्तोककालं परिगृहीता इत्वरपरिगृहीता वेश्या, तथा अपरिगृहीता वेश्यैव अगृहीतान्यसत्कभाटिः, कुलाङ्गना वा ऽनाथेति, तयोर्गमनम् आसेवनम् इत्वरपरिगृहीतापरिगृहीतागमनम्। (धर्मवि. मु. वृ. ३–२६)।

व्यभिचारिणी वेश्या अथवा अनाथ कुलीन स्त्री को द्रव्य देकर और कुछ काल के लिए अपनी मानकर उनके साथ विषय-सेवन करने को इत्वरपरिगृहीतापरिगृहीतागमन कहते हैं। यह ब्रह्मचर्याणुव्रत का एक अतीचार है।

इत्वर-परिहारविशुद्धिक—१. इत्तरिश्र थेरकप्पे जिणकप्पे आवकहिआ उ ॥ (पंचव. १५२४)। २. एते च परिहारविशुद्धिका द्विविधाः। तद्यथा—इत्वरा यावत्कथिकाश्च। तत्र ये कल्पसमाप्त्यनन्तरं तमेव कल्पं गच्छं समुपयास्यन्ति ते इत्वराः। (आव. उपो. नि. मलय. वृ. ११४, पृ. १२२)। ३. ये कल्पसमाप्त्यनन्तरमेव कल्पं गच्छं वा समुपास्यन्ति त इत्वराः। (षडशी. दे. स्वो. वृ. १२, पृ. १३७)।

जो कल्पसमाप्ति के अनन्तर अर्थात् परिहारविशुद्धिसंयम की साधना के पश्चात् अपने पूर्व गच्छ (स्थविर कल्प) को चले जाते हैं उनको इत्वर-परिहारविशुद्धिक कहते हैं।

इत्वर-सामायिक—१. सावज्जजोगविरइ त्ति तत्थ सामाइयं दुहा तं च। इत्तरमावकहं चिय पढमं पढमंतिमजिणाणं ॥ तित्थेसु अणारोवियवयस्स सेहस्स थोवकालीयं। (विशेषा. १२६८–६९); तत्र स्वल्पकालमित्वरम्, तदाद्य-चरमार्हत्तीर्थयोरेवाऽनारोपितव्रतस्य शैक्षस्य। (विशेषा. स्वो. वृ. १२६१)। २. तत्रेत्वरं भरतैरावतेषु प्रथम-पश्चिमतीर्थंकरतीर्थेषु अनारोपितमहाव्रतस्य शैक्षकस्य विज्ञेयम् × × ×। (आव. उपो. नि. मलय. वृ. ११४)।

१ भरत और ऐरावत क्षेत्र सम्बन्धी प्रथम और अन्तिम तीर्थंकरों के तीर्थ में महाव्रतों के आरोपण (स्थापन) से रहित शैक्ष (शिष्यभूत) साधु के जो इत्वर—कुछ काल की अवधि युक्त—सामायिक चारित्र हुआ करता है उसे इत्वर सामायिक कहते हैं।

इत्वरात्तागम—इत्वरी प्रतिपुरुषमयनशीला, वेश्या इत्यर्थः, सा चासावात्ता च कञ्चित्कालं भाटीप्रदानादिना संगृहीता, पुंवद्भावे इत्वरात्ता। अथवा इत्वरं स्तोकमप्युच्यते, इत्वरं स्तोकमल्पमात्ता इत्वरात्ता, विस्पष्टपटुवत् समासः। अथवा इत्वरकालमात्ता इत्वरात्ता, मयूरव्यंसकादित्वात् समासः, काल-शब्दलोपश्च। तस्यां गम आसेवनम्। इयं चात्र भावना—भाटीप्रदानादित्वरकालस्वीकारेण स्वकलत्रीकृत्य वेश्यां सेवमानस्य स्वबुद्धिकल्पनया स्वदारत्वेन व्रतसापेक्षचित्तत्वान्न भङ्गः, अल्पकालपरिग्रहाच्च; वस्तुतोऽन्यकलत्रत्वाद् भङ्गः, इति भङ्गाभङ्गरूपत्वादित्वरात्तागमोऽतिचारः। (योगशा. स्वो. विव. ३–९४)।

इत्वरीका अर्थ परपुरुष से सम्बन्ध रखने वाली वेश्या है और आत्त शब्द का अर्थ है गृहीत। अभिप्राय यह है कि भाड़ा देकर कुछ काल के लिए अपनी स्त्री समझते हुए वेश्या से समागम करना, इसका नाम इत्वरात्तागम है। अथवा इत्वर का अर्थ स्तोक भी होता है, तदनुसार ऐसी स्त्री को कुछ काल के लिए ग्रहण करना, इसे इत्वरात्तागम समझना चाहिए। यह ब्रह्मचर्याणुव्रत का प्रथम अतीचार है।

इत्वरिकागमन—१. तत्रेत्वरिकागमनम् अस्वामिका असती गणिकात्वेन पुंश्चलित्वेन वा पुरुषानेति गच्छतीत्येवंशीला इत्वरी। तथा प्रतिपुरुषमेतीत्येवंशीलेति व्युत्पत्त्या वेश्यापीत्वरी। ततः कुत्सायां के इत्वरिका, तस्यां गमनमासेवनम्। इयं चात्र भावना—भाटीप्रदानान्नियतकालस्वीकारेण स्वकलत्रीकृत्य वेश्यां वेत्वरिकां सेवमानस्य स्वबुद्धिकल्पनया स्वदारत्वेन व्रतसापेक्षचित्तत्वादल्पकालपरिग्रहाच्च न भंगो, वस्तुतोऽस्वदारत्वाच्च भङ्ग इति भङ्गाभङ्गरूपत्वादित्वरिकाया वेश्यात्वेनान्यस्यास्त्वनाथतयैव परदारत्वात्। (सा. ध. स्वो. टी. ४–५८)। २. इत्वरिकागमनं पुंश्चली-वेश्या-दासीनां गमनं जघन-स्तन-वदनादिनिरीक्षण-संभाषण-हस्त-भ्रूकटाक्षादिसंज्ञाविधानम् इत्येवमादिकं निखिलं रागित्वेन दुश्चेष्टितं गमनमित्युच्यते। (कार्तिके. टी. ३३८)। ३. इत्वरिका स्यात्पुंश्चली सा द्विधा प्राग्यथोदिता। काचित् परिगृहीता स्यादपरिगृहीता परा ॥ ताभ्यां सरागवागादि वपुस्पर्शोऽथवा रतम्।

दोषोऽतिचारसंज्ञोऽपि ब्रह्मचर्यस्य हानये ।। (लाटी-सं. ७५–७६) ।

१ भाड़ा देकर कुछ काल के लिए अपनी मान वेश्या या अन्य दुराचारिणी स्त्री का सेवन करना, यह ब्रह्मचर्याणुव्रत को दूषित करने वाला उसका एक इत्वरिकागमन नामका अतीचार है।

इत्वरिकापरिगृहीताऽपरिगृहीतागमन—१. परपुरुषानेति गच्छतीत्येवंशीला इत्वरी, कुत्सिता इत्वरी, कुत्सितायां कः, इत्वरिका। या एकपुरुषभर्तृका सा परिगृहीता, या गणिकात्वेन पुंश्चलीत्वेन वा परपुरुषगमनशीला अस्वामिका सा अपरिगृहीता। परिगृहीता चापरिगृहीता च परिगृहीतापरिगृहीते, इत्वरिके च ते परिगृहीतापरिगृहीते च इत्वरिकापरिगृहीताऽपरिगृहीते, तयोर्गमनम् इत्वरिकापरिगृहीताऽपरिगृहीतागमनम्। (स. सि. ७–२८)। २. अयनशीलेत्वरी। ज्ञानावरणक्षयोपशमापादितकलागुणज्ञतया चारित्रमोह-स्त्रीवेदोदयप्रकर्षादंगोपांगनामोदयावष्टम्भाच्च परपुरुषानेति (अग्रे स. सि. वत्)। (त. वा. ७, २८, २; चा. सा. पृ. ६)। ३. एति गच्छति परपूरुषानित्येवंशीला इत्वरी, कुत्सिता इत्वरी इत्वरिका। एकपुरुषभर्तृका या स्त्री भवति सधवा विधवा वा सा परिगृहीता सम्बद्धा कथ्यते। या वाराङ्गनात्वेन पुंश्चलीभावेन वा परपुरुषानुभवनशीला निःस्वामिका सा अपरिगृहीता असम्बद्धा कथ्यते। परिगृहीता च अपरिगृहीता च परिगृहीताऽपरिगृहीते, इत्वरिके च ते परिगृहीताऽपरिगृहीते इत्वरिकापरिगृहीताऽपरिगृहीते, इत्वरिकापरिगृहीताऽपरिगृहीतयोर्गमने प्रवृत्ती द्वे इत्वरिकापरिगृहीताऽपरिगृहीतागमने। गमने इति कोऽर्थः? जघन-स्तन-वदनादिनिरीक्षणं सम्भाषणं पाणि-भ्रू-चक्षुरन्तादिसंज्ञाविधानमित्येवमादिकं निखिलं रागित्वेन दुश्चेष्टितं गमनमित्युच्यते। (त. वृत्ति श्रुत. ७–२८)।

१ एक पुरुष (स्वामी) से सम्बद्ध दुराचारिणी स्त्री के साथ समागम करनेका नाम इत्वरिकापरिगृहीतागमन है। तथा स्वामी से विहीन वेश्या या अन्य दुराचारिणी स्त्री के साथ समागम करना, यह इत्वरिका-अपरिगृहीतागमन है। ये दो ब्रह्मचर्याणुव्रत के पृथक् पृथक् अतिचार हैं।

इन्द्र—१. अन्यदेवासाधारणाणिमादियोगादिन्दन्तीति

इन्द्राः। (स. सि. ४-४; त. श्लो. ४-४)। २. परमैश्वर्यादिन्द्रव्यपदेशः। अन्यदेवासाधारणाणिमादियोगादिन्दन्तीति इन्द्राः। (त. वा. ४, ४, १)। ३. इन्द्रो जीवः सर्वद्रव्यैश्वर्ययोगाद्विषयेषु वा परमैश्वर्ययोगात्। (त. भा. २–१५); तत्रेन्द्रा भवनवासि-व्यन्तर-ज्योतिष्क-विमानाधिपतयः। (त. भा. ४–४)। ४. इन्द्रः स्वरूपतो ज्ञानाद्यैश्वर्ययुक्तत्वादात्मा। (नन्दी. हरि. वृ. पृ. २८)। ५. इन्दनाद्यणिमाद्यैश्च गुणैरिन्द्रो ह्यनन्यजैः। (म. पु. २२–२२)। ६. इन्दनादिन्द्रः सर्वभोगोपभोगाधिष्ठानः सर्वद्रव्यविषयैश्वर्योपभोगाज्जीवः। (त. भा. सिद्ध. वृ. २–१५)। ७. तत्र 'इंदु परमैश्वर्ये' इन्दन्ति परमाज्ञैश्वर्यमनुभवन्तीति इन्द्रा अधिपतयः। (बृहत्सं. मलय. वृ. २)। ८. इन्द्राः परमैश्वर्यतः सर्वाधिपतयः। (संग्रहणी दे. वृ. १)। ९. इन्दन्ति परमैश्वर्यं प्राप्नुवन्ति अपरामरासमानाः अणिमादिगुणयोगादिति इन्द्राः। (त. वृत्ति श्रुत. ४–४)।

१ अन्य देवों में नहीं पाई जाने वाली असाधारण अणिमा-महिमादि ऋद्धियों के धारक ऐसे देवाधिपति को इन्द्र कहते हैं।

इन्द्रधनुष—इन्द्रधनुः धनुषाकारेण पञ्चवर्णपुद्गलनिचयः। (मूला. वृ. ५–७७)।

वर्षाकाल में आकाश में जो धनुषाकार पांच वर्ण वाला पुद्गलसमूह दिखता है वह इन्द्रधनुष कहलाता है।

इन्द्रिय—१. इन्दतीति इन्द्र आत्मा, तस्य ज्ञस्वभावस्य तदावरणक्षयोपशमे सति स्वयमर्थान् गृहीतुमसमर्थस्य यदर्थोपलब्धिनिमित्तं लिङ्गं तदिन्द्रस्य लिङ्गमिन्द्रियमित्युच्यते। अथवा लीनमर्थं गमयतीति लिङ्गम्। आत्मनः सूक्ष्मस्यास्तित्वाधिगमे लिङ्गमिन्द्रियम्। × × × अथवा इन्द्र इति नामकर्मोच्यते, तेन सृष्टमिन्द्रियमिति। (स. सि. १–१४)। २. इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा [पा. अष्टा. ५।२।९३]। इन्द्रो जीवः सर्वद्रव्येष्वैश्वर्ययोगाद् विषयेषु वा परमैश्वर्ययोगात्, तस्य लिङ्गमिन्द्रियम्। लिङ्गनात्सूचनात्प्रदर्शनादुपष्टम्भनाद् व्यञ्जनाच्च जीवस्य लिङ्गमिन्द्रियम्। (त. भा. २–१५)। ३. इन्द्रस्यात्मनोऽर्थोपलब्धिलिङ्गमिन्द्रियम्। इन्द्र आत्मा, तस्य कर्म-

मलीमसस्य स्वयमर्थान् गृहीतुमसमर्थस्याऽर्थोपलम्भने यल्लिङ्गं तदिन्द्रियमुच्यते । (त. वा. १, १४, १); इन्द्रस्यात्मनो लिङ्गमिन्द्रियम् । उपभोक्तुरात्मनोऽनिवृत्तकर्मबन्धस्यापि परमेश्वरत्वशक्तियोगात् इन्द्रव्यपदेशमर्हतः स्वयमर्थान् गृहीतुमसमर्थस्योपयोगोपकरणं लिङ्गमिन्द्रियमित्युच्यते । (त. वा. २, १५, १); इन्द्रेण कर्मणा सृष्टमिति वा । अथवा स्वकृतकर्मवशादात्मा देवेन्द्रादिषु तिर्यगादिषु चेष्टानिष्टमनुभवतीति कर्मैव तत्रेन्द्रः, तेन सृष्टमिन्द्रियमित्याख्यायते । (त वा. २, १५, २) । ४. तत्रेन्द्रियमिति कः शब्दार्थः ? 'इदि परमैश्वर्ये' इन्दनादिन्द्रः—सर्वोपलब्धिभोगपरमैश्वर्यसम्बन्धाज्जीवः, तस्य लिङ्गं तेन दृष्टं सृष्टं चेत्यादि । (आव. नि. हरि. वृ. ९१८, पृ. ३९८)। ५. इन्द्रेण कर्मणा स्पृ[सृ]ष्टमिन्द्रियं स्पर्शनादीन्द्रियनामकर्मोदयनिमित्तत्वात् । इन्द्रस्यात्मनो लिङ्गमिन्द्रियमिति वा कर्ममलीमसस्यात्मनः स्वयमर्थानुपलब्ध्य[ब्धुम]समर्थस्य हि यदर्थोपलब्धौ लिङ्गं निमित्तं तमिन्द्रियमिति भाष्यते । (त. श्लो. २-१५)। ६. प्रत्यक्षनिरतानीन्द्रियाणि । अक्षाणीन्द्रियाणि । अक्षमक्षं प्रति वर्तत इति प्रत्यक्षं विषयोऽक्षजो बोधो वा तत्र निरतानि व्यापृतानि इन्द्रियाणि । शब्दस्पर्श-रस-रूप-गन्धज्ञानावरणकर्मणां क्षयोपशमाद् द्रव्येन्द्रियनिबन्धनादिन्द्रियाणीति यावत् । ××× सङ्कर-व्यतिकराभ्यां व्यापृतिनिराकरणाय स्वविषयनिरतानीन्द्रियाणीति वा वक्तव्यम् । ××× अथवा स्ववृत्तिरतानीन्द्रियाणि । संशय-विपर्यय-निर्णयादौ वर्तनं वृत्तिः, तस्यां स्ववृत्तौ रतानीन्द्रियाणि । ××× अथवा स्वार्थनिरतानीन्द्रियाणि । ××× अथवा इन्दनादाधिपत्यादिन्द्रियाणि । (धव. पु. १, पृ. १३५ आदि); इन्द्रस्य लिङ्गमिन्द्रेण सृष्टमिति वा इन्द्रियशब्दार्थः ××× । (धव. पु. १, पृ. २३७); इन्द्रस्य लिङ्गमिन्द्रियम् । उपभोक्तुरात्मनोऽनिवृत्तकर्मसम्बन्धस्य परमेश्वरशक्तियोगादिन्द्रव्यपदेशमर्हतः स्वयमर्थान् गृहीतुमसमर्थस्योपयोगोपकरणं लिङ्गमिति कथ्यते । (धव. पु. १, पृ. २६०); स्वविषयनिरतानीन्द्रियाणि, स्वार्थनिरतानीन्द्रियाणीत्यर्थः । अथवा इन्द्र आत्मा, इन्द्रस्य लिङ्गमिन्द्रियम् । (धव. पु. ७, पृ. ६); इंदस्स लिंगमिंदियं । इंदो जीवो, तस्स लिंगं जाणावणं सूचयं जं तमिंदियमिदि वुत्तं होदि । (धव. पु. ७, पृ. ६१) । ७. तस्यैवंप्रकारस्यात्मन इन्द्रस्य लिङ्गं चिह्नमविनाभाव्यत्यन्तलीनपदार्थावगमकारीन्द्रियमुच्यते । (त. भा. सिद्ध. वृ. २-१५) । ८. इन्द्रियाणि मतिज्ञानावरणक्षयोपशमशक्तयः । (मूला. वृ. १-१६); स्वार्थनिरतानीन्द्रियाणि, अथवा इन्द्र आत्मा तस्य लिङ्गमिन्द्रियम्, इन्द्रेण दृष्टमिति चेन्द्रियम् । (मूला. वृ. १२-१५६) । ९. इन्दनादिन्द्रो जीवः सर्वविषयोपलब्धिभोगलक्षणपरमैश्वर्ययोगात्, तस्य लिङ्गमिन्द्रियम् । (ललितवि. मु. पं. पृ. ३९) । १०. स्पर्शादिग्रहणं लक्षणं येषां तानि यथासंख्यं स्पर्शनादीनीन्द्रियाणि ××× तत्रेन्द्रेण कर्मणा सृष्टानीन्द्रियाणि, नामकर्मोदयनिमित्तत्वात् । इन्द्रस्यात्मनो लिङ्गानि वा, कर्ममलीमसस्य हि स्वयमर्थानुपलब्धुमसमर्थस्यात्मनोऽर्थोपलब्धौ निमित्तानि इन्द्रियाणि । ××× यद्वा, इन्द्रस्यात्मनो लिङ्गान्यात्मगमकानि इन्द्रियाणि । (प्रमाणमी. १, १, २१, पृ. १६)। ११. इन्द्रस्यात्मनः कर्ममलीमसस्य सूक्ष्मस्य च लिङ्गमर्थोपलम्भे सहकारिकारणं ज्ञाय[प]कं वा यत्तदिन्द्रियम् । इन्द्रेण नामकर्मणा वा जन्यमिन्द्रियम् । (त. सुखबो. वृ. १-१४)। १२. 'इदु परमैश्वर्ये', 'उदितो नम्' इति नम्, इन्दनात् इन्द्रः आत्मा सर्वद्रव्योपलब्धिरूपपरमैश्वर्ययोगात्, तस्य लिङ्गं चिह्नमविनाभावि इन्द्रियम् । (नन्दी. मलय. वृ. ३, पृ. ७५; जीवाजी. मलय. वृ. १-१३, पृ. १६; प्रव. सारो. वृ. ११०५) । १३. इन्दनादिन्द्रः आत्मा ज्ञानलक्षणपरमैश्वर्ययोगात्, तस्येदं इन्द्रियम् इति निपातनादिन्द्रशब्दादियप्रत्ययः । (प्रज्ञाप. मलय. वृ. १३-१८२, पृ. २८५) । १४. इन्द्रो जीवः सर्वपरमैश्वर्ययोगात्, तस्य लिङ्गमिन्द्रियम् । लिङ्गनात् सूचनात् प्रदर्शनादुपलम्भाद् व्यञ्जनाच्च जीवस्य लिङ्गमिन्द्रियम् । (ज्ञा. सा. दे. वृ. ७, पृ. २५) । १५. इन्दति परमैश्वर्यं प्राप्नोतीति इन्द्रः, आत्मतत्त्वस्य आत्मनः ज्ञायकैकस्वभावस्य मतिज्ञानावरणक्षयोपशमे सति स्वयमर्थान् गृहीतुमसमर्थस्य यदर्थोपलब्धिलिङ्गं तत् इन्द्रस्य लिङ्गमिन्द्रियमुच्यते । अथवा लीनमर्थं गमयति ज्ञापयतीति लिङ्गमिन्द्रियमुच्यते । आत्मनः सूक्ष्मस्य अस्तित्वाधिगमकारकं लिङ्गमिन्द्रियमित्यर्थः । ××× अथवा नामकर्मणः इन्द्र इति संज्ञा, इन्द्रेण नामकर्मणा स्पृष्टं[सृष्टं] इन्द्रियमित्युच्यते । (त. वृत्ति श्रुत. २-१८); इन्द्रशब्देन आत्मा उच्यते, तस्य लिङ्गं इन्द्रियमुच्यते ।

(त. वृत्ति श्रुत. २–१८)। १६. इदुः स्यात् परमैश्वर्ये धातोरस्य प्रयोगतः। इन्दनात् परमैश्वर्यादिन्द्र आत्माभिधीयते ॥ तस्य लिङ्गं तेन सृष्टमितीन्द्रियमुदीर्यते ॥ (लोकप्र. ३–४६४-६५)।

१ परम ऐश्वर्य को प्राप्त करने वाले आत्मा को इन्द्र और उस इन्द्र के लिङ्ग या चिह्न को इन्द्रिय कहते हैं। अथवा जो जीव को अर्थ की उपलब्धि में निमित्त होता है उसे इन्द्रिय कहते हैं। अथवा जो सूक्ष्म आत्मा के सद्भाव की सिद्धि का हेतु है उसे इन्द्रिय कहते हैं। अथवा इन्द्र नाम नामकर्म का है, उसके द्वारा निर्मित स्पर्शनादि को इन्द्रिय कहा जाता है।

इन्द्रियजय—१. अरिषड्वर्गत्यागेनाविरुद्धार्थप्रतिपत्त्येन्द्रियजयः। (धर्मवि. १–१५)। २. विषयाटवीषु स्वच्छन्दप्रधावमानेन्द्रियगजानां ज्ञान-वैराग्योपवासाद्यंकुशाकर्षणेन वशीकरणमिन्द्रियजयः। (चा. सा. पृ. ४४)। ३. इन्द्रियाणां श्रोत्रादीन्द्रियाणां जयः अत्यन्तासक्तिपरिहारेण स्व-स्वविकारनिरोधः। (धर्मसं. मान. स्वो. वृ. १–६, पृ. ६)।

२ विषयरूप वन में स्वच्छन्द दौड़ने वाले इन्द्रियरूप मदोन्मत्त गजों के ज्ञान, वैराग्य एवं उपवासादिरूप अंकुश के प्रहारों द्वारा वश में करने को इन्द्रियजय कहते हैं।

इन्द्रियपर्याप्ति—१. पंचण्हमिंदियाणं जोग्गा पोग्गला विचिणिसु अणाभोगणिव्वत्तितवीरियकरणेण तब्भावापायणसत्ती इंदियपज्जत्ती। (नन्दी. चू. पृ. १५)। २. त्वगादीन्द्रियनिर्वर्तनक्रियापरिसमाप्तिरिन्द्रियपर्याप्तिः। (त. भा. ८–१२; नन्दी. हरि. वृ. पृ. ४४)। ३. योग्यदेशस्थितरूपादिविशिष्टार्थग्रहणशक्त्युत्पत्तेर्निमित्तपुद्गलप्रचयावाप्तिरिन्द्रियपर्याप्तिः। (धव. पु. १, पृ. २५५); सच्छेसु पोग्गलेसु मिलिदेसु तव्वलेण वज्झत्थगहणसत्तीए समुप्पत्ती इंदियपज्जत्ती णाम। (धव. पु. १४, पृ. ५२७)। ४. इन्द्रियकरणनिष्पत्तिरिन्द्रियपर्याप्तिः (त. भा. सिद्ध. वृ. ८–१२, पृ. १६०); तत्र च स्वरूपनिर्वर्तनक्रियापरिसमाप्तिरिन्द्रियपर्याप्तिः। (त. भा. सिद्ध. वृ. ८–१२, पृ. १६१)। ५. योग्यदेशस्थितरूपादिविशिष्टार्थग्रहणशक्तेर्निष्पत्तिरिन्द्रियपर्याप्तिः। (मूला. वृ. १२–१६६)। ६. इन्द्रियपर्याप्तिः पञ्चानामिन्द्रियाणां योग्यान् पुद्गलान् गृहीत्वाऽनाभोगनिर्वर्तितेन वीर्येण तद्भावनयनशक्तिः। (स्थाना. अभय. वृ. २, १, ७३, पृ. ५०)। ७. यया धातुरूपतया परिणमितमाहारमिन्द्रियरूपतया परिणमयति सा इन्द्रियपर्याप्तिः। (पंचसं. मलय. वृ. १-५; नन्दी. मलय. वृ. १३, पृ. १०५; षष्ठ कर्म. मलय. वृ. ६, पृ. १२६; कर्मवि. दे. स्वो. वृ. ४८, पृ. ५५, ५६; जीवाजी. मलय. वृ. १–१२; प्रज्ञाप. मलय. वृ. १–१२, पृ. २५; सप्ततिका मलय. वृ. ५, पृ. १५३; षडशी. मलय. वृ. ३, पृ. १२४; षडशी. दे. स्वो. वृ. २, पृ. ११७)। ८. यया तु धातुभूतमाहारमिन्द्रियतया परिणमयति सेन्द्रियपर्याप्तिः। (कर्मस्त. गो. वृ. १०, पृ. ८७; शतक. मल. हेम. वृ. ३७–३८, पृ. ५०)। ९. यया धातुरूपतया परिणमितादाहारादिन्द्रियप्रायोग्यद्रव्याण्युपादायैक-द्वित्र्यादीन्द्रियरूपतया परिणमय्य स्पर्शादिविषयपरिज्ञानसमर्थो भवति सा इन्द्रियपर्याप्तिः। (बृहत्क. क्षेम. वृ. १११२)। १०. योग्यदेशस्थितस्पर्शादिविषयग्रहणव्यापारविशिष्टस्यात्मनः पर्याप्तनामकर्मोदयवशात् स्पर्शनादिद्रव्येन्द्रियरूपेण विवक्षितपुद्गलस्कन्धान् परिणमयितुं शक्तिनिष्पत्तिरिन्द्रियपर्याप्तिः। (गो. जी. म. प्र. टी. ११९)। ११. इन्द्रियपर्याप्तिः— यया धातुरूपतया परिणमितादाहारादेकस्य द्वयोस्त्रयाणां चतुर्णां पञ्चानां वा इन्द्रियाणां योग्यान् पुद्गलानादाय स्व-स्वेन्द्रियरूपतया परिणमय्य च स्वं स्वं विषयं परिज्ञातुं प्रभुर्भवति। (संग्रहणी दे. वृ. २६८)। १२. आवरण-वीर्यान्तरायक्षयोपशमविजृम्भितात्मनो योग्यदेशावस्थितरूपादिविषयग्रहणव्यापारे शक्तिनिष्पत्तिर्जातिनामकर्मोदयजनितेन्द्रियपर्याप्तिः। (गो. जी. जी. प्र. टी. ११९; कार्तिके. टी. १३४)।

३ योग्य देश में स्थित रूपादि से युक्त पदार्थों के ग्रहण करनेरूप शक्ति की उत्पत्ति के निमित्तभूत पुद्गलप्रचय की प्राप्ति को इन्द्रियपर्याप्ति कहते हैं। ७ जिस शक्ति के द्वारा धातुरूप से परिणत आहार इन्द्रियों के आकार रूप से परिणत हो, उसे इन्द्रियपर्याप्ति कहते हैं।

इन्द्रियप्रणिधि—सद्देसु अ रूवेसु अ गंधेसु रसेसु तह य फासेसु। न वि रज्जइ न वि दुस्सइ एसा खलु इंदियप्पणिही ॥ (दशवै. नि. २९५)।

पांचों इन्द्रियों के शब्दादिरूप मनोज्ञ और अमनोज्ञ

विषयों में राग और दोष के नहीं करने को इन्द्रिय-प्रणिधि कहते हैं।

इन्द्रियप्रत्यक्ष—१. तत्रेन्द्रियं श्रोत्रादि, तन्निमित्तं यदलैङ्गिकं शब्दादिज्ञानं तदिन्द्रियप्रत्यक्षं व्यावहारिकम्। (अनुयो. चू. पृ. ७४; अनुयो. हरि. वृ. पृ. १००)। २. इन्द्रियाणां प्रत्यक्षमिन्द्रियप्रत्यक्षम्। (नन्दी. हरि. वृ. १०, पृ. २०)। ३. इन्द्रियप्रत्यक्षं देशतो विशदमविसंवादकं प्रतिपत्तव्यम्। (प्रमाणप. पृ. ६८)। ४. हिताहिताप्तिनिर्मुक्तिक्षममिन्द्रियनिर्मितम्। यद्देशतोऽर्थज्ञानं तदन्द्रियाध्यक्षमुच्यते॥ (न्यायवि. वि. १, ३, ३०८, पृ. १०५)। ५. तत्रेन्द्रियस्य चक्षुरादेः कार्यं यद्बहिर्नीलादिसंवेदनं तदिन्द्रियप्रत्यक्षम्। (प्रमाणनि. २, पृ. ३३)। ६. स्पर्शनादीन्द्रियव्यापारप्रभवमिन्द्रियप्रत्यक्षम्। (लघीय. अभय. वृ. ६१, पृ. ८२)। ७. अत्रेन्द्रियं श्रोत्रादि, तन्निमित्तं सहकारिकारणं यस्योत्पित्सोस्तदलिङ्गकं शब्दरूपरसगन्धस्पर्शविषयज्ञानमिन्द्रियप्रत्यक्षम्। (अनुयो. मल. हेम. वृ. पृ. २११)। ८. इन्द्रियप्राधान्यादनिन्द्रियबलाधानादुपजातमिन्द्रियप्रत्यक्षम्। (प्र. र. मा. २–५)।

४. श्रोत्रादि इन्द्रियों से उत्पन्न होने वाला जो अर्थज्ञान हित की प्राप्ति और अहित के परिहार में समर्थ होता हुआ देशतः विशद (स्पष्ट) होता है उसे इन्द्रियप्रत्यक्ष कहते हैं।

इन्द्रियवशार्तमरण—१. इन्द्रियवशार्तमरणं यत् तत्पंचविधमिन्द्रियविषयापेक्षया। सुरैर्नरैस्तिर्यग्भिरजीवैश्च कृतेषु तत-वितत-घन-सुषिरेषु मनोज्ञेषु रक्तोऽमनोज्ञेषु द्विष्टो मृतिमेति। तथा चतुःप्रकारे आहारे रक्तस्य द्विष्टस्य वा मरणम्, पूर्वोक्तानां सुर-नरादीनां गन्धे द्विष्टस्य रक्तस्य वा मरणम्, तेषामेव रूपे संस्थाने वा रक्तस्य द्विष्टस्य वा मरणम्, तेषामेव स्पर्शे रागवतो द्वेषवतो वा मरणम्। (भ. आ. विजयो. टी. २५)। २. इंदियविसयवसगया मरंति जे तं वसट्टं तु। (प्रव. सारो. १०१०)।

१ पांच इन्द्रियों के इष्ट विषयों में अनुरक्त और अनिष्ट विषयों में द्वेष को प्राप्त हुए प्राणी के मरण को इन्द्रियवशार्तमरण कहा जाता है।

इन्द्रियसंयम—१. शब्दादिष्वन्द्रियार्थेषु रागानभिष्वंगः। (त. वा. ६, ६, १४)। २. इन्द्रियविषयराग-द्वेषाभ्यां निवृत्तिरिन्द्रियसंयमः। (भ. आ. विजयो. टी. ४६)। ३. इन्द्रियादिषु अर्थेषु [इन्द्रियार्थेषु] रागानभिष्वंग इन्द्रियसंयमः। (चा. सा. पृ. ३२)। ४. पञ्चानामिन्द्रियाणां च मनसश्च निरोधनात्। स्यादिन्द्रियनिरोधाख्यः संयमः प्रथमो मतः॥ (पंचाध्यायी २–१११५)।

१ पांचों इन्द्रियों के विषयों में राग-द्वेष के अभाव को इन्द्रियसंयम कहते हैं।

इन्द्रियसुख—जं णोकसाय-विग्घचउक्काण बलेण सादपहुदीणं। सुहपयडीणुदयभवं इंदियतोसं हवे सोक्खं॥ (क्ष. सा. ६११)।

नोकषाय और अन्तराय की लाभादि चार प्रकृतियों के बल से व सातावेदनीय आदि पुण्य प्रकृतियों के उदय से जो इन्द्रियजनित सन्तोष उत्पन्न होता है उसे इन्द्रियसुख कहते हैं।

इन्द्रियासंयम—१. तत्थ इंदियासंजमो छव्विहो परिस-रस-रूप-गंध-सद्द-णोइंदियासंजमभेएण। (धव. पु. ८, पृ. २१)। २. रसविषयानुरागात्मकः इन्द्रियासंयमः। (भ. आ. विजयो. टी. २१३)। ३. यः स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्रलक्षणानां मनश्च स्पर्श-रस-गन्ध-वर्ण-शब्दलक्षणेषु स्वेच्छाप्रचारः स इन्द्रियासंयमः। (आरा. सा. टी. ६)।

३ पांचों इन्द्रियों के विषयों में स्वच्छन्द प्रवृत्ति करने को इन्द्रियासंयम कहते हैं। इन्द्रियभेद से उस असंयम के भी छह भेद हो जाते हैं।

इभ्य—१. इभ्यः अर्थवान्, स च किल यस्य पुञ्जीकृतरत्नराश्यन्तरितो हस्त्यपि नोपलभ्यत इत्येतावताऽर्थेनेति। (अनुयो. हरि. वृ. सू. १६, पृ. १६)। २. इभमर्हतीतीभ्यो धनवान्। (प्रज्ञाप. मलय. वृ. १६–२०५, पृ. ३३०)। ३. इभो हस्ती, तत्प्रमाणं द्रव्यमर्हतीतीभ्यः, यत्सत्कपुञ्जीकृतहिरण्य-रत्नादिद्रव्येणान्तरितो हस्त्यपि न दृश्यते सोऽधिकतरद्रव्यो वा इभ्य इत्यर्थः। (जीवाजी. मलय. वृ. ३, २, १४७)। ४. इभमर्हतीति इभ्यः, यस्य सत्कसुवर्णादिद्रव्यपुञ्जेनान्तरितो हस्त्यपि न दृश्यते सः अभ्यधिकद्रव्यो वेत्यर्थः। (बृहत्क. क्षे. वृ. १२०६)।

१ जिसके पास संचित सुवर्ण-रत्नादि की राशि से अन्तरित हाथी भी दिखाई न दे उस अति धनवान् पुरुष को इभ्य कहते हैं।

इषुगति—ऋज्वी गतिरिषुगतिरेकसमयिकी। (धव. पु. १, पृ. २९९)।

पूर्व शरीर को छोड़कर उत्तर शरीर को प्राप्त करने

के लिए जो जीव की एक समय वाली सीधी—मोड़ा से रहित—गति होती है वह इषुगति कहलाती है।

इष्ट—१. तेन साधनविषयत्वेनेप्सितमिष्टमुच्यते। (प्र. र. मा. ३–२०)। २. इष्टम् आगमेन स्ववचनैरेवाभ्युपगतम्। (षोडश. वृ. १–१०)।

१ साधन का विषय होकर जो वक्ताको अभीष्ट है उसे इष्ट कहते हैं।

इष्टवियोगज आर्तध्यान—१. विपरीतं मनोज्ञस्य (मनोज्ञस्य विप्रयोगे तत्संप्रयोगाय स्मृतिसमन्वाहारः)। (त. सू. ९–३१)। २. मनोज्ञस्येष्टस्य स्वपुत्र-दारा-धनादेर्विप्रयोगे तत्सम्प्रयोगाय सङ्कल्पश्चिन्ताप्रबन्धो द्वितीयमार्तम्। (स. सि. ९–३१)। ३. मनोज्ञानां विषयाणां मनोज्ञायाश्च वेदनाया विप्रयोगे तत्सम्प्रयोगाय स्मृतिसमन्वाहार आर्तम्। (त. भा. ९–३३)। ४. मनोज्ञस्य विषयस्य विप्रयोगे सम्प्रयुयुक्षां प्रति या परिध्यातिः स्मृतिसमन्वाहारशब्दचोदिता असावपि आर्तध्यानमिति निश्चीयते। (त. वा. ९, ३१, १)। ५. मनोज्ञस्य विप्रयोगे तत्सम्प्रयोगाय स्मृतिसमन्वाहारो द्वितीयमार्तम्। (त. श्लो. ९–३१)। ६. मणहरविसयवियोगे कह तं पावेमि इदि वियप्पो जो। संतावेण पयट्टो सो च्चिय अट्टं हवे झाणं॥ (कार्तिके. ४७४)। ७. कथं नु नाम भूयोऽपि तैः सह मनोज्ञविषयैः सम्प्रयोगः स्यान्ममेति एवं प्रणिधत्ते दृढं मनस्तदप्यार्तम्। (त. भा. सिद्ध. वृ. ९-३३)। ८. राज्यैश्वर्य-कलत्र-बान्धव-सुहृत्सौभाग्य-भोगात्यये, चित्तप्रीतिकरप्रसन्नविषयप्रध्वंसभावेऽथवा। संत्रास-भ्रम-शोक-मोहविवशैर्यत् खिद्यतेऽहर्निशम्, तत्स्यादिष्टवियोगजं तनुमतां ध्यानं कलङ्कास्पदम्॥ (ज्ञानार्णव २५–२९, पृ. २५९)। ९. इष्टैः सह सर्वदा यदि मम संयोगो भवति, वियोगो न कदाचिदपि स्याद्यद्येवं चिन्तनमार्तध्यानं द्वितीयम्। (मूला. वृ. ५–१९८)। १०. जीवाजीव-कलत्र-पुत्र-कनकाऽगारादिकादात्मनः, प्रेमप्रीतिवशात्मसात्कृतबहिःसंगाद्वियोगोद्गमे। क्लेशेनेष्टवियोगजार्तमचलं तच्चिन्तनं मे कथम्, न स्यादिष्टवियोग इत्यपि सदा मन्दस्य दुःकर्मणः॥ (आचा. सा. १०–१४)। ११. इष्टानां च शब्दादीनां विषयाणां सातवेदनायाश्चावियोगाध्यवसानं सम्प्रयोगाभिलाषश्च तृतीयम्। (योगशा. स्वो. विव. ३–७३; धर्मसं. मान. स्वो. वृ. ३–२७, पृ. ८०)। १२. मनोहरविषयवियोगे सति मनोहराः विषयाः इष्टपुत्र-मित्र-कलत्र-भ्रातृ-धन-धान्य-सुवर्ण-रत्न-गज-तुरंग-वस्त्रादयः, तेषां वियोगे विप्रयोगे तं वियुक्तं पदार्थं कथं प्रापयामि लभे, तत्संयोगाय वारंवारं स्मरणं विकल्पश्चिन्ताप्रबन्ध इष्टवियोगाख्यं द्वितीयमार्तम्। (कार्तिके. टी. ३७४)।

२ पुत्र, पत्नी एवं धन आदि इष्ट पदार्थों का वियोग होने पर उनके संयोग के लिये जो बार-बार चिन्ता होती है; वह इष्टवियोगज आर्तध्यान कहलाता है।

इहलोकभय—१. इहलोकभयं हि क्षुत्पिपासापीडादिविषयम्। (रत्नक. टी. ५–८)। २. मनुष्यादिकस्य सजातीयादेरन्यस्मान्मनुष्यादेरेव सकाशाद् भयम् तदिहलोकभयम्। (ललितवि. मु. पं. पृ. ३८)। ३. तत्र यत्स्वभावात्प्राप्यते यथा मनुष्यस्य मनुष्यात्, तिरश्चः तिर्यग्भ्यः इत्यादि तदिहलोकभयम्। (आव. भा. मलय. वृ. १८४, पृ. ५७३)। ४. तत्रेहलोकतो भीतिः क्रन्दितं चात्र जन्मनि। इष्टार्थस्य व्ययो मा भून्माभून्मेऽनिष्टसंगमः॥ (पंचाध्यायी २–५०६)। ५. मनुष्यस्य मनुष्याद् भयं इहलोकभयम्। (कल्पसू. वि. वृ. १–१५, पृ. ३०)।

१ इस लोक सम्बन्धी भूख-प्यास आदि की पीड़ा के भय को इहलोकभय कहते हैं। २ सजातीय मनुष्य आदि को जो अन्य मनुष्य आदि से भय होता है उसे इहलोकभय कहते हैं।

इहलोकसंवेजनी—जहा सव्वमेयं माणुसत्तणं असारमधुवं कदलीथंभसमाणं, एरिसं कहं कहेमाणो धम्मकही सोयारस्स संवेगमुप्पाएइ, एसा इहलोकसंवेयणी। (दशवै. नि. हरि. वृ. ३–१९९)।

यह मनुष्य पर्याय कदली-स्तम्भ के समान असार व अस्थिर है, इस प्रकार की कथा को कहने वाला उपदेशक चूंकि श्रोताओं के हृदय में इस लोक से वैराग्य को उत्पन्न करता है, अतः उसे इहलोकसंवेजनी कथा कहते हैं।

इहलोकाशंसाप्रयोग — इहलोको मनुष्यलोकः, तस्मिन्नाशंसाभिलाषः, तस्याः प्रयोगः। (श्रा. प्र. टी. ३८५)।

इस लोक (मनुष्यलोक) के विषय में अभिलाषा के प्रयोग को इहलोकाशंसाप्रयोग कहते हैं। यह एक संलेखना का अतिचार है।

ईर्यापथकर्म—१. जं तमीरियावहकम्मं णाम । तं छदुमत्थवीयरायाणं सजोगिकेवलीणं वा तं सव्वमीरियावहकम्मं णाम ।। (षट्खं. ५, ४, २३–२४, पु. १३, पृ. ४७)। २. ईरणमीर्या योगो गतिरित्यर्थः, तद्द्वारकं कर्म ईर्यापथम् । (स. सि. ६–४)। ३. ईरणमीर्या योगगतिः। ×××ईरणमीर्या योगगतिरिति यावत् । तद्द्वारकमीर्यापथम् । सा ईर्या द्वारं पन्था यस्य तदीर्यापथं कर्म । ××× उपशान्तक्षीणकषाययोः योगिनश्च योगिवशादुपात्तं कर्म कषायाभावाद् बन्धाभावे शुष्ककुड्यपतितलोष्ठवद् अनन्तरसमये निवर्तमानमीर्यापथमित्युच्यते । (त. वा. ६, ४, ६–७) । ४. अकषायस्येर्यापथस्यैवैकसमयस्थितेः । (त. भा. ६–५)। ५. ईर्या योगः, स पन्था मार्गः हेतुः यस्य कर्मणः तदीर्यापथकर्म । जोगणिमित्तेणेव जं बज्झइ तमीरियावहकम्मं ति भणिदं होदि । ××× एत्थ ईरियावहकम्मस्स लक्खणं गाहाहि उच्चदे । तं जहा—अप्पं बादर मवुअं बहुअं लुक्खं च सुक्किलं चेव । मंदं महव्वयं पि य सादब्भहियं च तं कम्मं ।। गहिदमगहिदं च तहा बद्धमबद्धं च पुट्ठऽपुट्ठं च । उदिदाणुदिदं वेदिदमवेदिदं चेव तं जाणे ।। णिज्जरिदाणिज्जरिदं उदीरिदं चेव होदि णायव्वं । अणुदीरिदं ति य पुणो इरियावहलक्खणं एदं ।। (धव. पु, १३, पृ. ४७–४८) । ६. ईर्या योगगतिः, सैव यथा [पन्था] यस्य तदुच्यते । कर्मेर्यापथमस्यास्तु शुष्ककुड्येऽश्मवच्चिरं ।। ××× कषायपरतंत्रस्यात्मनः साम्परायिकास्रवस्तदपरतंत्रस्येर्यापथास्रव इति सूक्तम् । (त. श्लो. वा. ६, ४, ६) । ७. ईरणमीर्या गतिरागमानुसारिणी । विहितप्रयोजने सति पुरस्ताद् युगमात्रदृष्टिः स्थावर-जंगमाभिभूतानि परिवर्जयन्नप्रमत्तः शनैर्यायात् तपस्वीति सैवंविधा गतिः पन्थाः मार्गः प्रवेशो यस्य कर्मणस्तदीर्यापथम् । (त. भा. सिद्ध. वृ. ६–५) । ८. ईरणमीर्या गतिरिति यावत्, सा ईर्या द्वारं पन्था यस्य तदीर्यापथं कर्म । (त. सुखबो. वृ. ६–४) । ९. ईर्येति कोऽर्थः ? योगो गतिः योगप्रवृत्तिः काय-वाङ्-मनोव्यापारः कायवाङ्मनोवर्गणावलम्बी च आत्मप्रदेशपरिस्पन्दो जीवप्रदेशचलनम् ईर्येति भण्यते, तद्द्वारकं कर्म ईर्यापथम् । (त. वृत्ति श्रुत. ६–४) ।

२ ईर्या का अर्थ योग है, एक मात्र उस योग के द्वारा जो कर्म आता है उसे ईर्यापथकर्म कहते हैं।

ईर्यापथक्रिया— १. ईर्यापथनिमित्तेर्यापथक्रिया । (स. सि. ६–५; त. वा. ६, ५, ७) । २. ईर्यापथनिमित्ता या सा प्रोक्तेर्यापथक्रिया । (ह. पु. ५८, ६५) । ३. ईर्यापथक्रिया तत्र प्रोक्ता तत्कर्महेतुका। (त. श्लो. ६, ५, ७) । ४. ईर्यापथकर्मणो याऽति (हि ?) निमित्तभूता बध्यमान-वेद्यमानस्य सेर्यापथक्रिया । (त. भा. सिद्ध. वृ. ६–६) । ५. अर्जयन्त्युपशान्ताद्या ईर्यापथमथापरे । (त. सा. ४–५) ।

२ ईर्यापथ कर्म की कारणभूत क्रिया को ईर्यापथक्रिया कहते हैं।

ईर्यापथशुद्धि—१. ईर्यापथशुद्धिर्नानाविधजीवस्थानयोन्याश्रयावबोधजनितप्रयत्नपरिहृतजन्तुपीडा ज्ञानादित्य-स्वेन्द्रियप्रकाशनिरीक्षितदेशगामिनी द्रुत-विलम्बित-सम्भ्रान्त-विस्मित-लीलाविकार-दिगन्तरावलोकनादिदोषरहितगमना । तस्यां सत्यां संयमः प्रतिष्ठितो भवति विभव इव सुनीतौ । (त. वा. ९, ६, १५; चा. सा. पृ. ३५; कार्तिके. टी. ३९९) । २. भयविस्मय-विभ्रान्ति-लीलाविकृतिलङ्घन- । प्रधावनाद्यपेतेर्यापथशुद्धिर्दयान्विता ।। (आचा. सा. ८–१२) ।

१ जीवस्थान व योनि आदि के परिज्ञानपूर्वक प्राणिपीडाके परिहारका प्रयत्न करते हुए ज्ञान व सूर्यप्रकाश से आलोकित मार्ग पर द्रुत-विलम्बित, सम्भ्रान्त, विस्मय और दिगन्तरावलोकन आदि दोषों से रहित होकर चलने को ईर्यापथशुद्धि कहते हैं।

ईर्यापथिकी क्रिया—देखो ईर्यापथक्रिया । ईर्यापथिकी क्रिया केवलिनामेकसामयिकरूपा । (गु. गु. षट्. स्वो. वृ. १५, पृ. ४१) ।

ईर्यापथ कर्म की कारणभूत जो केवलियों के एक समय रूप क्रिया हुआ करती है वह ईर्यापथिकी क्रिया कहलाती है।

ईर्यासमिति—१. फासुयमग्गेण दिवा जुगंतरप्पेहिणा सकज्जेण । जंतूण परिहरंतेणिरियासमिदी हवे गमणं ।। (मूला. १–११); मग्गुज्जोवुपओगालंवणसुद्धीहि इरियदो मुणिणो । सुत्ताणुवीचि भणिया इरियासमिदी पवयणम्मि ।। (मूला. ५–१०५; भ. आ. ११९१) । २. फासुयमग्गेण दिवा अवलोगंतो जुगप्पमाणं हि । गच्छइ पुरदो समणो इरियासमिदी हवे तस्स ।। (नि. सा. ६१) । ३. आवश्यकायैव संयमार्थं सर्वतो युगमात्रनिरीक्षणायुक्तस्य

शनैर्न्यस्तपदा गतिरीर्यासमितिः। (त. भा. ९–५)। ४. तत्र व्रज्यायां जीवधपरिहारः ईर्यासमितिः। विदित-जीवस्थानादिविधेर्मुनेर्धर्मार्थं प्रयतमानस्य सवितर्युदिते चक्षुषो विषयग्रहणसामर्थ्ये उपजाते मनुष्यादिचरण-पातोपहतावश्यायप्रायमार्गेऽनन्यमनसः शनैर्न्यस्त-पादस्य संकुचितावयवस्य युगमात्रपूर्वनिरीक्ष-णावहितदृष्टेः पृथिव्याद्यारम्भाभावात् ईर्या-समितिरित्याख्यायते। (त. वा. ९, ५, ३)। ५. ईर्यासमितिर्नाम रथ-शकट-यान-वाहनाक्लान्तेषु मार्गेषु सूर्यरश्मिप्रतापितेषु प्रासुकविविक्तेषु पथिषु युगमात्रदृष्टिना भूत्वा गमनागमनमिति। (आव. हरि. वृ. पृ. ६१५)। ६. ईरणम् ईर्या गमनम्, तत्र समितिः सङ्गतिः श्रुतरूपेणात्मनः परिणामः, तदु-पयोगिता पुरस्ताद् युगमात्रया दृष्ट्या स्थावर-जंगमानि भूतानि परिवर्जयन्नप्रमत्त इत्यादिको विधिरीर्यासमितिः। (त. भा. हरि. व सिद्ध. वृ. ७–३); ईरणमीर्या गतिः परिणतिः सम्यग् आग-मानुसारिणी गतिरीर्यासमितिः। (त. भा. हरि. व सिद्ध. वृ. ९–५); सम्यग् आगमपूर्विका ईर्या गमनम् आत्म-परबाधापरिहारेण। (त. भा. हरि. व सिद्ध. वृ. ९–५)। ७. चक्षुर्गोचरजीवौघान् परि-हृत्य यतेर्यतः। ईर्यासमितिराद्या सा व्रतशुद्धिकरी मता॥ (ह. पु. २–१२२)। ८. चर्यायां जीववाधा-परिहारः ईर्यासमितिः। (त. श्लो. ९–५)। ९. मार्गोद्योतोपयोगानामालम्ब्यस्य च शुद्धिभिः। गच्छतः सूत्रमार्गेण स्मृतेर्यासमितिर्यतेः॥ (त. सा. ६–७)। १०. सिद्धक्षेत्राणि सिद्धानि जिनबिम्बानि वन्दितुम्। गुर्वाचार्य-तपोवृद्धान् सेवितुं व्रजतोऽथवा॥ दिवा सूर्यकरैः स्पृष्टं मार्गं लोकातिवाहितम्। दया-र्द्रस्यांगिरक्षार्थं शनैः संश्रयतो मुनेः॥ प्रागेवालोक्य यत्नेन युगमात्राहितेऽक्षिणः। प्रमादरहितस्यास्य समितीर्या प्रकीर्तिता॥ (ज्ञानार्णव १८, ५–७, पृ. १८९)। ११. ईर्यायाः समितिः ईर्यासमितिः सम्यग-वलोकनं समाहितचित्तस्य प्रयत्नेन गमनागमनादि-कम्। (मूला. वृ. १–११०)। १२. पुरो युगान्तरे-ऽक्षस्य दिने प्रासुकवर्त्मनि। सदयस्य सकार्यस्य स्यादीर्यासमितिर्गतिः॥ (आचा. सा. १–२२); मन्दं न्यस्तपदापास्तद्रुतातीवविलम्बिनः। दिपेन्द्र-मन्दयानस्य स्यादीर्यासमितिर्गतिः॥ (आचा. सा. ५–७८)। १३. लोकातिवाहिते मार्गे चुम्बिते भास्व-दंशुभिः। जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम्॥ (योगशा. १–३६)। १४. स्यादीर्यासमितिः श्रुतार्थविदुषो देशान्तरं प्रेप्सतः, श्रेयःसाधनसिद्धये नियमिनः कामं जनैर्वाहिते। मार्गे कौक्कुटिकस्य भास्करकरस्पृष्टे दिवा गच्छतः, कारुण्येन शनैः पदानि ददतः पातुं प्रयत्याङ्गिनः॥ (अन. ध. ४–१६४)। १५. जुगमित्तंतरदिट्ठी पयं पयं चक्खुणा विसोहितो। अव्वक्खित्ताउत्तो इरियासमिओ मुणी होइ॥ (गु. गु. षट्. ३, पृ. १४; उप. मा. २९६)। १६. ईर्यासमितिर्नाम कर्मोदयाऽऽपादित-विशेषैक-द्वि-त्रि-चतुः-पञ्चेन्द्रियभेदेन चतुर्द्विर्द्विर्द्विर्चतुर्विकल्पचतुर्दश-जीवस्थानादिविधानवेदिनो मुनेर्धर्मार्थं प्रयतमानस्य सवितर्युदिते चक्षुषोर्विषयग्रहणसामर्थ्यमुपजनयतः (कार्ति.—धर्मार्थं पर्यटतः गच्छतः सूर्योदये चक्षुषो विषयग्रहणसामर्थ्यम् उपजायते।) मनुष्य-हस्त्यश्व-शकट-गोकुलादिचरणपातोपहतावश्यायप्राये (चा.—प्रालेय) मार्गेऽनन्यमनसः शनैर्न्यस्तपादस्य सङ्कु-चितावयवस्य उत्सृष्टपार्श्वदृष्टेर्युगमात्रपूर्वनिरीक्षणा-वहितलोचनस्य स्थित्वा दिशो विलोकयतः पृथि-व्याद्यारम्भाभावादीर्यासमितिरित्याख्यायते। (चा. सा. पृ. ३१; कार्तिके. टी. ३९९)। १७. मार्तण्ड-किरणस्पृष्टे गच्छतो लोकवाहिते। मार्गे दृष्ट्वा ऽङ्गिसङ्घातमीर्यादिसमितिर्मता॥ (धर्म. श्रा. ९–४) १८. तीर्थयात्रा-धर्मकार्याद्यर्थं गच्छतो मुने-श्चतुःकरमात्रमार्गनिरीक्षणपूर्वकं सावधानदृष्टेरप्य-ग्रचेतसः सम्यग्विज्ञातजीवस्थानस्वरूपस्य सम्यगीर्या-समितिर्भवति। (त. वृत्ति श्रुत. ९–५)। १९. ईर्यासमितिश्चतुर्हस्तवीक्षितमार्गगमनम्। (चा. प्रा. टी. ३६)। २०. दृष्ट्वा दृष्ट्वा शनैः सम्यग्युगदघ्नां धरां पुरः। निष्प्रमादो गृही गच्छेदीर्यासमिति-रुच्यते॥ (लाटीसं. ५–२१५)। २१. युगमात्रा-वलोकिन्या दृष्ट्या सूर्यांशुभासितम्। विलोक्य मार्गं गन्तव्यमितीर्यासमितिर्भवेत्॥ (लोकप्र. ३०.७४४)। २२. त्रस-स्थावरजन्तुजाताभयदानदीक्षितस्य मुने-रावश्यके प्रयोजने गच्छतो जन्तुरक्षानिमित्तं न पादाग्रादारभ्य युगमात्रक्षेत्रं यावन्निरीक्ष्य ईरणम् ईर्या गतिस्तस्याः समितिरीर्यासमितिः। (धर्मसं. मान. स्वो. वृ. ३–४७ पृ. १३०)।

१ शास्त्रश्रवण व तीर्थयात्रादिरूप कार्य के वश दिन में प्रासुक—जीव-जन्तुरहित—मार्ग से चार हाथ

भूमिको देखते हुए जन्तुओं को पीड़ा न पहुँचा कर गमन करना, इसका नाम ईर्यासमिति है।

ईर्ष्या—१. परसम्पदामसहनमीर्ष्या। (जीतक. चू. वि. व्या. पृ. ३८, ५–१६)। २. ईर्ष्या परगुणविभवाद्यक्षमा। (त. भा. हरि व सिद्ध. वृ. ६–१)। ३. ईर्ष्या प्रतिपक्षाभ्युदयजनितो मत्सरविशेषः। (शास्त्रवा. टी. १–२)।

१ दूसरों के उत्कर्ष को न सह सकना, इसका नाम ईर्ष्या है।

ईशित्व—१. णिस्सेसाण पहुत्तं जगाण ईसत्तणाम रिद्धी सा। (ति. प. ४–१०३०)। २. त्रैलोक्यस्य प्रभुतेशित्वम्। (त. वा. ३–३६; चा. सा. पृ. ६८; प्रा. योगभ. टी. ६)। ३. सव्वेसिं जीवाणं गाम-णयर-खेडादीणं च भुंजणसत्ती समुप्पण्णा ईसित्तं णाम। (धव. पु. ६, पृ. ७६)। ४. ईशित्वं त्रैलोक्यस्य प्रभुता तीर्थकर-त्रिदशेश्वर-ऋद्धिविकरणम्। (योगशा. स्वो. विव. १–८; प्रव. सारो. वृ. १४६५)।

१ समस्त जगत् के ऊपर प्रभाव डालनेवाली शक्ति को ईशित्व ऋद्धि कहते हैं।

ईश्वर—१. ईश्वरो युवराजा माण्डलिकोऽमात्यश्च। अन्ये तु व्याचक्षते—अणिमाद्यष्टविधैश्वर्ययुक्त ईश्वरः। (अनुयो. हरि. वृ. पृ. १६)। २. येनाप्तं परमैश्वर्यं परानन्दसुखास्पदम्। बोधरूपं कृतार्थोऽसावीश्वरः पटुभिः स्मृतः॥ (आप्तस्व. २३)। ३. केवलज्ञानादिगुणैश्वर्ययुक्तस्य सतो देवेन्द्रादयोऽपि तत्पदाभिलाषिणः यस्याज्ञां कुर्वन्ति स ईश्वराभिधानो भवति। (बृ. द्रव्यसं. वृ. १४)। ४. ईश्वरः अणिमाद्यैश्वर्ययुक्तः। (प्रज्ञाप. मलय. वृ. १६–२०५, पृ. ३३०)। ५. ईश्वरो भोगिकादि, अणिमाद्यष्टविधैश्वर्ययुक्त ईश्वर इत्येके। (जीवाजी. मलय. वृ. ३, २, १४७, पृ. २८०)।

१ युवराज, माण्डलिक और अमात्य को ईश्वर कहा जाता है। मतान्तर से जो अणिमादिरूप आठ प्रकार के ऐश्वर्य से सम्पन्न है उसे ईश्वर कहते हैं। २ जिसने कृतकृत्य होकर निराकुल सुख के कारणभूत केवलज्ञान रूप उत्कृष्ट विभूति को प्राप्त कर लिया है, उस परमात्मा को ईश्वर कहते हैं।

ईश्वरवाद—१. अण्णाणी हु अणीसो अप्पा तस्स य सुहं च दुक्खं च। सग्गं णिरयं गमणं सव्वं ईसरकयं होदि॥ (गो. क. ८८०)। २. जीवो अण्णाणी खलु असमत्थो तस्स जं सुहं दुक्खं। सग्गं णिरयं गमणं सव्वं ईसरकयं होदि॥ (अंगप. २, २०)।

यह अज्ञ प्राणी अपने सुख और दुख को भोगने के लिए स्वयं असमर्थ होकर ईश्वर के आधीन है, उसकी प्रेरणा से ही वह स्वर्ग को या नरक को जाता है। इस प्रकार की मान्यता को ईश्वरवाद कहते हैं।

ईषत्प्राग्भार—देखो अष्टम पृथ्वी। १. सव्वट्ठसिद्धिइंदयकेदणदंडादु उवरि गंतूणं। बारसजोयणमेत्तं अट्ठमिया चिट्ठदे पुढवी॥ पुव्वावरेण तीए उवरिम-हेट्ठिम-तलेसु पत्तेक्कं। वासो हवेदि एक्का रज्जू रूवेण परिहीणा॥ उत्तर-दक्खिणभाए दीहा किंचूणसत्तरज्जूओ। वेत्तासणसंठाणा सा पुढवी अट्ठजोयणा बहला॥ जुत्ता घणोवहि-घणाणिल-तणुवादेहिं तिहिं समीरेहिं। जोयणवीससहस्सं पमाणबहलेहिं पत्तेक्कं॥ एदाए बहुमज्झे खेत्तं णामेण ईसिपब्भारं। अज्जुणसुवण्णसरिसं णाणारयणेहिं परिपुण्णं॥ (ति. प. ८, ६५२–६५६)। २. अत्थीसिप्पब्भारोवलक्खियं मणुयलोगपरिमाणं। लोगग्गनभोभागो सिद्धिक्खेत्तं जिणक्खादं॥ (विशेषा. ३८२०)। ३. अट्ठमपुढवी सत्तरज्जुआयदा एगरज्जुरुंदा अट्ठजोयणबाहल्ला सप्तमभागाहियएयजोयणबाहल्लं जगपदरं होदि। (धव. पु. ४, पृ. ६१)। ४. उपरिष्टात्पुनः सर्वकल्पविमानान्यतीत्यार्धतृतीयद्वीपविष्कम्भायामोत्तानकछत्राकृतिरीषत्प्राग्भारा। (त. भा. सिद्ध. वृ. ३–१)। ५. ईषत्—अल्पो योजनाष्टकबाहल्य-पञ्चचत्वारिंशल्लक्षविष्कम्भात् प्राग्भारः पुद्गलनिचयो यस्याः सेषत्प्राग्भाराऽष्टमपृथिवी। (स्थाना. अभय. वृ. ३, १, १४८, पृ. ११६)। ६. तिहुवणसिहरेण मही वित्थारे अट्ठजोयणुदयथिरे। धवलच्छत्तायारे मणोहरे ईसिपब्भारे॥ (क्ष. सा. ६४५)।

१ सर्वार्थसिद्धि इन्द्रक के ध्वजदण्ड से ऊपर बारह योजन जाकर आठवीं पृथिवी अवस्थित है। वह पूर्व-पश्चिम में रूप से कम एक राजु चौड़ी, उत्तर-दक्षिण में कुछ कम सात राजु लम्बी और आठ योजन मोटी है। आकार उसका वेत के आसन जैसा है। तीन वातवलयों से युक्त उस पृथिवी के

मध्य में जो सिद्धक्षेत्र अवस्थित है उसे नाम से ईषत्-प्राग्भार कहा जाता है। ४ समस्त कल्प-विमानों के ऊपर जाकर ईषत्प्राग्भार पृथिवी अवस्थित है। उसका विस्तार व आयाम अढ़ाई द्वीप प्रमाण—पैंतालीस लाख योजन—तथा आकार खुले हुए छत्र के समान है।

ईहा (मतिज्ञानभेद)—१. ईहा ऊहा अपोहा मग्गणा गवेसणा मीमांसा। (षट्खं. ५, ५, ३८–पु. १३, पृ. २४२)। २. ईहा अपोह वीमंसा मग्गणा य गवेसणा। सन्ना सई मई पन्ना सव्वं आभिणिवोहियं॥ (नन्दी. गा. ८७)। ३. अवग्रहगृहीतेऽर्थे तद्विशेषाकाङ्क्षणमीहा। (स. सि. १–१५)। ४. अवगृहीतम्। विषयार्थैकदेशाच्छेषानुगमनम्। निश्चयविशेषजिज्ञासा चेष्टा ईहा। ईहा ऊहा तर्कः परीक्षा विचारणा जिज्ञासेत्यनर्थान्तिरम्। (त. भा. १-१५)। ५. ईहा तदर्थविशेषालोचनम्। (विशेषा. को. वृ. १७८)। ६. ××× विशेषकांक्षेहा ×××। (लघीय. १–५); पुनः अवग्रहीकृतविशेषाकांक्षणमीहा। (लघीय. स्वो. वृ. १–५)। ७. तदर्थ-(अवग्रहगृहीतार्थ-) विशेषालोचनम् ईहा। (आव. नि. हरि. वृ. २, पृ. ९); ईहनमीहा ××× एतदुक्तं भवति—अवग्रहादुत्तीर्णः अवायात्पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽसद्भूतार्थविशेषत्यागाभिमुखश्च प्रायो मधुरत्वादयः शंखशब्दधर्मा अत्र घटन्ते, न खर-कर्कश-निष्ठुरतादयः शार्ङ्गशब्दधर्मा इति मतिविशेष ईहेति। (आव. नि. हरि. वृ. ३, पृ. १०; नन्दी. हरि. वृ. २७, पृ. ६३); ईहनमीहा सतामर्थानाम् अन्वयिनां व्यतिरेकिणां च पर्यालोचना इति यावत्। (आव. नि. हरि. व मलय. वृ. १२)। ८. अवगृहीतविषयार्थैकदेशात् शेषानुगमनेन निश्चयविशेषजिज्ञासा चेष्टा ईहा। (अने. ज. प. पृ. १८)। ९. ईहा शब्दाद्यवग्रहणोत्तरकालमन्वय-व्यतिरेकधर्मालोचनचेष्टेत्यर्थः। (नन्दी. हरि. वृ. पृ. ७८)। १०. अवग्रहीतस्यार्थस्य विशेषाकांक्षणमीहा। (धव. पु. १, पृ. ३५४); जो अवग्गहेण गहिदो अत्थो तस्स विसेसाकांखणमीहा। जधा कं पि दट्ठूण किमेसो भव्वो अभव्वो त्ति विसेसपरिक्खा सा ईहा। (धव. पु. ६, पृ. १७); पुरुष इत्यवग्रहीते भाषा-वयो-रूपादिविशेषैराकांक्षणमीहा। (धव. पु. ९, पृ. १४४); पुरुषमवगृह्य किमयं दाक्षिणात्य उत उदीच्य इत्येवमादिविशेषाप्रतिपत्तौ संशयानस्योत्तर-कालं विशेषोपलिप्सां प्रति यतनमीहा। (धव. पु. ९, पृ. १४६); अवगृहीते तद्विशेषाकांक्षणमीहा। ××× का ईहा नाम? संशयादूर्ध्वमवायादधस्तात् मध्यावस्थायां वर्तमानः विमर्शात्मकः प्रत्ययः हेत्ववष्टम्भबलेन समुत्पद्यमानः ईहेति भण्यते। (धव. पु. १३, पृ. २१७); उत्पन्नसंशयविनाशाय ईहते चेष्टते अनया बुद्ध्या इति ईहा। (धव. पु. १३, पृ. २४२)। ११. का ईहा? ओग्गहणाणग्गहिए अत्थे विण्णाणाउपमाण-देस-भासादिविसेसाकांखणमीहा। ओग्गहादो उवरि अवायादो हेट्ठा जं णाणं विचारप्पयं समुप्पण्णसंदेहच्छिदणसहावमीहा त्ति भणिदं होदि। (जयध. १, पृ. ३३६)। १२. यदा हि सामान्येन स्पर्शनेन्द्रियेण स्पर्शसामान्यमागृहीतमनिर्देश्यादिरूपं तत उत्तरं स्पर्शभेदविचारणा ईहाभिधीयते इति। (त. भा. सिद्ध. वृ. १–१५); तस्यैव (सामान्यानिर्देश्यस्वरूपस्य नामादिकल्पना-रहितस्य) स्पर्शादेः किमयं स्पर्श उतास्पर्श इत्येवं परिच्छेदिका ईहा। (त. भा. सिद्ध. वृ. १–१७); ईहा तत्त्वान्वेषिणी जिज्ञासा। (त. भा. सिद्ध. वृ. ७–६, पृ. ५९)। १३. अवग्रहगृहीतस्य वस्तुनो भेदमीहते। व्यक्तमीहा ×××॥ (त. श्लो. १, ९, ३२); तद्गृहीतार्थसामान्ये यद्विशेषस्य कांक्षणम्। निश्चयाभिमुखं सेहा संशीतेर्भिन्नलक्षणा। (त. श्लो. १, १५, ३)। १४. तद्गृहीतवस्तुविशेषाकांक्षणमीहा। (प्रमाणप. पृ. ६८)। १५. अवग्रहाद् विशेषाकाङ्क्षा विशेषेहा। (सिद्धिवि. टी. २–९, पृ. १३७)। १६. तदवगृहीतविशेषस्य 'देवदत्तेन भवितव्यम्' इति भवितव्यतामुल्लिखन्ती प्रतीतिरीहा। (प्रमाणनि. २–२८)। १७. विसयाणं विसईणं संजोगाणंतरं हवे णियमा। अवगहणाणं गहिदे विसेसकंखा हवे ईहा॥ (गो. जी. ३०७)। १८. तदुत्तर-(अवग्रहोत्तर-) कालभाविनी ईहा, ईहनमीहा चेष्टा कायवाङ्मनोलक्षणा। (कर्मवि. पू. व्या. १३, पृ. ८)। १९. अवगृहीतार्थविशेषाकांक्षणमीहा। (प्र. न. त. २–८)। २०. अवगृहीतस्यैव वस्तुनोऽपि किमयं भवेत् स्थाणुः पुरुषो वा, इत्यादि वस्तुधर्मान्वेषणात्मको वितर्क ईहा। (कर्मवि.

पर. व्या. पृ. ६)। २१. अपि किन्वयं भवेत् पुरुष एव उत स्थाणुः इत्यादिवस्तुधर्मान्वेषणात्मकं ज्ञानचेष्टनमीहा। (कर्मस्त. गो. वृ. ६, पृ. ८०)। २२. पुनः अवग्रहोत्तरकालम्, अवग्रहेण विषयीकृतः अवग्रहीकृतः, अवान्तरमनुष्यत्वादिजातिविशेषः, तस्य विशेषः कर्णाट-लाटादिभेदः, तस्य आकाङ्क्षणं भवितव्यताप्रत्ययरूपतया ग्रहणाभिमुख्यम्, ईहा भवति। (न्यायकु. १, पृ. १७२)। २३. अवगहिदत्थस्स पुणो सग-सगविसएहि जादसारस्स। जं च विसेसग्गहणं ईहाणाणं हवे तं तु॥ (जं दी. प. १३-५८)। २४. ईहा वितर्को मतिः। (समवा. अभय. वृ. १४०)। २५. गृहीतस्यार्थस्य विशेषाकांक्षणमीहा, योऽवग्रहेण गृहीतोऽर्थस्तस्य विशेषाकांक्षणं भवितव्यताप्रत्ययम्। (मूला. वृ. १२-१८७)। २६. अवगृहीतविशेषाकांक्षणमीहा। (प्रमाणमी. १, १, २७); अवगृहीतस्य शब्दादेरर्थस्य 'किमयं शब्दः शाङ्खः शार्ङ्गो वा इति संशये सति माधुर्यादयः शाङ्खधर्मा एवोपलभ्यन्ते, न कार्कश्यादयः शार्ङ्गधर्माः इत्यन्वय-व्यतिरेकरूपविशेषपर्यालोचनरूपा मतेश्चेष्टेहा। (प्रमाणमी. स्वो. वृ. १, १, २७)। २७. ईहनमीहा—सद्भूतार्थपर्यालोचनरूपा चेष्टा इत्यर्थः। किमुक्तं भवति? अवग्रहादुत्तरकालमपायात् पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽसद्भूतार्थविशेषपरित्यागाभिमुखः प्रायोऽत्र मधुरत्वादयः शङ्खादिधर्मा दृश्यन्ते, न कर्कश-निष्ठुरतादयः शार्ङ्गादिधर्मा इत्येवंरूपो मतिविशेष ईहा। (प्रज्ञाप. मलय. वृ. १५–२००, पृ. ३१०; आव. नि. मलय. वृ. २, पृ. २२; नन्दी. मलय. वृ. सू. २६, पृ. १६८)। २८. ईहनमीहा अवगृहीतस्यार्थस्यासद्भूतविशेषपरित्यागेन सद्भूतविशेषादानाभिमुखो बोधविशेषः। (व्यव.भा.मलय. वृ. १०–२७६, पृ. ४०)। २९. अवगृहीतशब्दाद्यर्थगत(तासद्भूत-) सद्भूतपरित्यागा-(दाना-)भिमुखं प्रायो मधुरत्वादयः शङ्खशब्दधर्मा अत्र घटन्ते, न खर-कर्कश-निष्ठुरतादयः शार्ङ्गशब्दधर्माः इति ज्ञानमीहा। (धर्मसं. मलय. वृ. ८२३, पृ. २९४)। ३०. अवगृहीतस्यैव वस्तुनोऽपि किमयं भवेत् स्थाणुरेव, न तु पुरुष इत्यादि वस्तुधर्मान्वेषणात्मकं ज्ञानचेष्टनमीहा। 'अरण्यमेतत् सविताऽस्तमागतो न चाधुना सम्भवतीह मानवः। प्रायस्तदेतेन खगादिभाजा भाव्यं स्मरारातिसमाननाम्ना॥' इत्याद्यन्वयधर्मघटन-व्यतिरेकधर्मनिराकरणाभिमुखताऽऽलिङ्गितो ज्ञानविशेष ईहा। (प्रव. सारो. वृ. १२५३, पृ.३६०; कर्मवि. दे.स्वो. वृ. ५)। ३१. अवग्रहगृहीतार्थसमुद्भूतसंशयनिरासाय यत्नमीहा। (न्या.दी. २, पृ. ३२)। ३२. × × × तत्तो विशेषकंखा हवे ईहा। (अंगप. ३–६१, पृ. २८८)। ३३. पुनरवगृहीतविषयसंशयानन्तरं तद्विशेषाकाङ्क्षणमीहा। (षड्द. स. टी. ४–५५, पृ. २०८)। ३४. इन्द्रियान्तरविषयेषु मनोविषये चावग्रहगृहीते यथावस्थितस्य विशेषस्याकांक्षारूपेहा। (गो. जी. म. प्र. टी. ३०८)। ३५. इन्द्रियान्तरविषयेषु मनोविषये चावग्रहगृहीते यथावस्थितस्य विशेषस्याकांक्षारूपेहा। (गो. जी. जी. प्र. टी. ३०८)। ३६. अवगृहीतार्थाभिमुखा मतिचेष्टा पर्यालोचनरूपा ईहा। (जम्बूद्वी. वृ. ३-७०)। ३७. अवगृहीतविशेषाकांक्षणमीहा, व्यतिरेकधर्मनिराकरणपरोऽन्वयधर्मघटनप्रवृत्तो बोध इति यावत्। (जैनत. पृ. ११६)।

१ ऊहा, अपोहा, मार्गणा, गवेषणा और मीमांसा ये ईहा के नामान्तर हैं। ३ अवग्रह से जाने गये पदार्थ के विशेष जानने की इच्छा को ईहा कहते हैं।

ईहावरणीय कर्म—एतस्या (ईहायाः) आवारकं कर्म ईहावरणीयं। (धव. पु. १३, पृ. २१८)।

इस (ईहामतिज्ञान) को आच्छादित करने वाले कर्म को ईहावरणीय कहते हैं।

उक्त—१. उक्तं प्रतीतम् (शब्दे उच्चारिते सति यदवग्रहादिज्ञानं जायते तदुक्तम्)। (त. वा. १, १६, १६)। २. एतत्प्रतिपक्षः (इन्द्रियप्रतिनियतगुणविशिष्टवस्तूपलम्भकाले एव तदिन्द्रियानियतगुणविशिष्टस्यार्थस्योपलम्भकादनुक्तप्रत्ययाद् विपरीतः) उक्तप्रत्ययः। (धव. पु. ९, पृ. १५४; पु. १३, पृ. २३९)। ३. × × × उक्तार्थः प्ररूप्यते। स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं मनश्च खम्। अर्थः स्पर्शो रसो गन्धो रूपं शब्दः श्रुतादयः॥ (आचा. सा. ४, २४–२५)।

२ विवक्षित इन्द्रिय के प्रतिनियत गुण से युक्त वस्तु का ग्रहण होने पर उसके प्रतिनियत गुण का ही ज्ञान होना, इतर गुण का ज्ञान न होना; इसका नाम उक्त प्रत्यय है।

उक्तावग्रह—१. णियमियगुणविसिट्ठअत्थग्गहणं उत्तावग्गहो। जहा चक्खिदिएण धवलत्थग्गहणं, घाणिंदि-

एण सुअंधदव्वग्गहणमिच्चादि। (धव. पु. ९, पृ. २०)। २. उक्तमवगृह्णातीत्ययं तु विकल्पः श्रोत्रादिविषय एव, न सर्वव्यापीति। यत उक्तमुच्यते शब्दः, स चाप्यक्षरात्मकः, तमवगृह्णातीति। (त. भा. सिद्ध. वृ. १–१६)। ३. इतरस्य (उक्तस्य) सर्वात्मना प्रकाशितस्य × × × अवग्रहः। (त. श्लो. १, १६, ४)। ४. नियमितगुणविशिष्टार्थग्रहणमुक्तावग्रहः, यथा चक्षुरिन्द्रियेण धवलग्रहणम्। (मूला. वृ. १२–१८७)। ५. तस्यैव परेणोक्तस्य कर्पूरादेर्ग्र[दिरग्र]हणम् उक्तावग्रहः। (त. सुखबो. वृ. १–१६)। ६. अनुक्तं च अभिप्राये स्थितम्। × × × अनुक्तस्य अवग्रहः, तदितरस्योक्तस्यावग्रहः। (त. वृत्ति श्रुत. १–१६)।

१ नियमित गुणविशिष्ट द्रव्य के अथवा उसके एक देश के ग्रहण करने को उक्तावग्रह कहते हैं। जैसे चक्षु इन्द्रिय के द्वारा धवल अर्थ का ग्रहण अथवा घ्राण इन्द्रिय के द्वारा सुगन्ध द्रव्य का ग्रहण।

उग्रतप — १. चतुर्थ-षष्ठाष्टम-दशम-द्वादश-पक्ष-मासाद्यनशनयोगेष्वन्यतमयोगमारभ्य आमरणान्तादनिवर्तका उग्रतपसः। (त. वा. ३–३६, पृ. २०३)। २. पञ्चम्यां अष्टम्यां चतुर्दश्यां च प्रतिज्ञातोवासा अलाभद्वये त्रये वा तथैव निर्वाहयन्ति, एवंप्रकारा उग्रतपसः। (प्रा. योगिभक्ति टी. १५, पृ. २०३)। ३. पञ्चम्यां अष्टम्यां चतुर्दश्यां च गृहीतोपवासव्रता अलाभद्वये अलाभत्रये वा त्रिभिरुपवासैश्चतुर्भिरुपवासैः पञ्चभिरुपवासैः कालं निर्गमयन्ति इत्येवंप्रकाराः उग्रतपसः। (त. वृत्ति श्रुत. ३–३६)।

१ एक, दो, तीन, चार, पांच व पन्द्रह दिन तथा एक मास आदि का; इस प्रकार इन उपवासयोगों में से किसी भी एक उपवास योग को प्रारम्भ कर मरण पर्यन्त उससे च्युत न होना, उसका बराबर निर्वाह करना; इसका नाम उग्रतप ऋद्धि है। इस ऋद्धि के धारक साधु भी उग्रतप—उग्रतपस्वी—कहे जाते हैं।

उग्रोग्रतप—१. उग्गतवा दोभेदा उग्गोग्ग-अवट्ठिदुग्गतवणामा॥ दिक्खोववासमादिं कादूणं एक्काहिएक्कपच्चएण। आमरणंतं जवणं होदि उग्गोग्गतवरिद्धी॥ (ति. प. १०५०–५१)। २. उग्गतवा दुविहा उग्गुग्गतवा अवट्ठिदुग्गतवा चेदि। तत्थ जो एक्कोववासं काऊण पारिय दो उववासे करेदि, पुणरवि पारिय तिण्णि उववासे करेदि। एवमेगुत्तरवड्ढीए जाव जीविदंतं तिगुत्तीगुत्तो होदूण उववासे करेंतो उग्गुग्गतवो णाम। (धव. पु. ९, पृ. ८७)। ३. तत्रोग्रतपसा द्विविधा उग्रोग्रतपसः अवस्थितोग्रतपसश्चेति। तत्रैकमुपवासं कृत्वा पारणं विधाय द्विदिनमुपोष्य तत्पारणानन्तरं पुनरप्युपवासत्रयं कुर्वन्ति। एवमेकोत्तरवृद्धया यावज्जीवं त्रिगुप्तिगुप्ताः सन्तो ये केचिदुपवसन्ति ते उग्रोग्रतपसः। (चा. सा. पृ. ९८)।

१ दीक्षा के उपवास को आदि करके बीच में पारणा करते हुए एक-एक अधिक उपवास को मरण-पर्यन्त बढ़ाते हुए जीवन यापन करने को उग्रोग्रतप ऋद्धि कहते हैं।

उच्चगोत्र—१. यस्योदयात् लोकपूजितेषु कुलेषु जन्म तदुच्चैर्गोत्रम्। (स. सि. ८–१२; त. वा. ८, १२, २; मूला. १२–१९७; त. सुखबो. ८-१२; त. वृत्ति श्रुत. ८–१२; भ. आ. मूला. टी. २१२१)। २. उच्चैर्गोत्रं देश-जाति-कुल-स्थान-मान-सत्कारैश्वर्याद्युत्कर्षनिर्वर्तकम्। (त. भा. ८–१२)। ३. जस्स कम्मस्स उदएण उच्चागोदं होदि तं उच्चागोदं। गोत्रं कुलं वंशः सन्तानमित्येकोऽर्थः। (धव. पु. ६, पृ. ७७); दीक्षायोग्यसाध्वाचाराणां साध्वाचारैः कृतसम्बन्धानाम् आर्यप्रत्ययाभिधान-व्यवहारनिबन्धनानां पुरुषाणां सन्तान उच्चैर्गोत्रम्, तत्रोत्पत्तिहेतुकर्माप्युच्चैर्गोत्रम्। (धव. पु. १३, पृ. ३८९)। ४. उत्तमजातित्वम्, प्रशस्यता, पूज्यत्वं चोच्चैर्गोत्रम्। (पंचसं. स्वो. वृ. ३–५, पृ. ११२)। ५. अधणी बुद्धिविउत्तो रूवविहीणो वि जस्स उदएणं। लोयम्मि लहइ पूयं उच्चागोयं तयं होइ॥ (कर्मवि. ग. १५४)। ६. उच्चैर्गोत्रं पूज्यत्वनिबन्धनम्। (स्थाना. अभय. वृ. २, ४, १०५, पृ. ९२)। ७. उच्चैर्गोत्रं यदुदयादज्ञानो विरूपोऽपि सत्कुलमात्रादेव पूज्यते। (श्रा. प्र. टी. २५; धर्मसं. मलय. वृ. ६३२)। ८. उच्चं णीचं चरणं उच्चं णीचं हवे गोदं। (गो. क. १३)। ९. उत्तमजाति-कुल-बल-रूप-तपऐश्वर्य-श्रुतलाभाख्यैरष्टभिः प्रकारैर्वेद्यते इत्युच्चैर्गोत्रम्। (शतक. मल. हेम. वृ. ३७–३८, पृ. ५१)। १०. उच्चैर्नीचैर्भवेद् गोत्रं कर्मोच्चैर्नीचगोत्रकृत्। (त्रि. श. पु. च. २, ३, ४७४)। ११. यदुदयवशात् उत्तम जाति-कुल-बल-...

श्रुतसत्काराभ्युत्थानासनप्रदानाञ्जलिप्रग्रहादिसम्भवस्तदुच्चैर्गोत्रम् । (पंचसं. मलय. वृ. ३-५, पृ. ११३; प्रज्ञाप. मलय. वृ. २३, २, २९३, पृ. ४७५; कर्मप्र. यशो. वृ. १, पृ. ७)। १२. यदुदयादुत्तमकुलजातिप्राप्तिः सत्काराभ्युत्थानाञ्जलिप्रग्रहादिरूपपूजालाभसम्भवश्च तदुच्चैर्गोत्रम् । (षष्ठ क. मलय. वृ. ६, पृ. १२७)। १३. अधनी धनहीनः, बुद्धिवियुक्तः मतिनिर्मुक्तः, रूपविहीनः रूपरहितोऽपि । यस्य कर्मण उदयेन लोके जातिमात्रादेव पूजां लभते तदुच्चैर्गोत्रं पूर्णकलशकारिकुम्भकारतुल्यम् । (कर्मवि. पा. व्या. १५४, पृ. ६३)। १४. यथा हि कुलालः पृथिव्यास्तादृशं पूर्णकलशादिरूपं करोति, यादृशं लोकात् कुसुम-चन्दनादिभिः पूजां लभते × × × तथा यदुदयाद् निर्धनः कुरूपो बुद्ध्यादिपरिहीनोऽपि पुरुषः सुकुलजन्ममात्रादेव लोकात् पूजां लभते तत् उच्चैर्गोत्रम् । (कर्मवि. दे. स्वो. वृ. ५१)।

१ जिसके उदय से लोकपूजित कुल में जन्म हो उसे उच्चगोत्र कहते हैं। ११ जिसके उदय से जीव उत्तम जाति, कुल, बल, रूप, तप, ऐश्वर्य और श्रुत आदि द्वारा जगत् में पूजा व आदर-सत्कारादि को प्राप्त हो उसे उच्चगोत्र जानना चाहिये।

उच्चताभृतक–भ्रियते पोष्यते स्मेति भृतः, स एवानुकम्पितो भृतकः—कर्मकरः इत्यर्थः। × × × मूल्यकालनियमं कृत्वा यो नियतं यथावसरं कर्म कार्यते स उच्चताभृतकः । (स्थाना. अभय. वृ. ४, १, २७१, पृ. १९१-९२)।

काल के अनुसार किसी कार्य का मूल्य निश्चित करके यथावसर कार्य जिससे कराया जाता है उसे उच्चताभृतक कहते हैं।

उच्चयबन्ध—से किं तं उच्चयबंधे ? उच्चयबंधे जं णं तणरासीण वा कट्ठरासीण वा पत्तरासीण वा तुसरासीण वा भुसरासीण वा गोमयरासीण वा अवगररासीण वा उच्चत्तेणं बंधे समुप्पज्जइ, जहन्नेणं अंतोमुहुत्तं उक्कोस्सेणं संखेज्जं कालं से त्तं उच्चयबंधे। (भगवती ८, ९, १४—खण्ड ३, पृ. १०३)।

तृणराशि, काष्ठराशि, पत्रराशि, तुषराशि, भुसराशि, गोबरराशि और अवकर (कचड़ा) राशि, इनका ऊंचा ढेर करने को उच्चयबन्ध कहा जाता है।

उच्चस्थान—उच्चस्थानं स्वगृहान्तः स्वीकृतयतिं नीत्वा निरवद्यानुपहतस्थाने उच्चासने निवेशनम् । (सा. ध. स्वो. टी. ५-४५)।

पडिगाहे गये साधु को घर के भीतर ले जाकर निर्दोष व निर्बाध स्थान में उच्च आसन पर बैठाने को उच्चस्थान भक्ति कहते हैं।

उच्चारप्रस्रवणसमिति— वणदाह-किसि-मसिकदे थंडिल्लेणुप्परोध वित्थिण्णे । अवगदजंतुविवित्ते उच्चारादी विसज्जेज्जो ॥ (मूला. ५-१२४)।

जो स्थान दावाग्नि से जल गया है, जहां खेती की गई है, जहां शवदाह आदि हुआ है, जो ऊषर—अंकुरोत्पादन से रहित है, तथा द्वीन्द्रियादि जीवों से भी रहित है, ऐसे विस्तीर्ण निर्जन स्थान में मल-मूत्रादि के विसर्जन को उच्चारप्रस्रवणसमिति कहते हैं।

उच्छादन—प्रतिबन्धकहेतुसन्निधाने सति अनुद्भूतवृत्तिता अनाविर्भाव उच्छादनम् । (स. सि. ६, २५)।

विरोधी कारणों के मिलने पर गुणों के नहीं प्रगट करने को उच्छादन कहते हैं।

उच्छेद—देखो अन्तर। अंतरमुच्छेदो विरहो परिणामंतरगमणं णत्थित्तगमणं अण्णभावव्ववहाणमिदि एयट्ठो। (धव. पु. ५, पृ. ३)।

अन्तर, उच्छेद, विरह, अन्य परिणाम की प्राप्ति, नास्तित्व की प्राप्ति और अन्य भाव का व्यवधान; इन सबका एक ही अर्थ है। तात्पर्य यह कि एक अवस्था को छोड़कर अन्य अवस्था को प्राप्त होते हुए पुनः उक्त (पूर्व) अवस्था के प्राप्त होने में जो काल लगता है उसका नाम उच्छेद (अन्तर) है।

उच्छ्लक्ष्णश्लक्ष्णिका (उत्सण्हसण्हिया) — देखो उत्संज्ञासंज्ञा। १. परमाणू य अणंता सहिया उस्सण्हसण्हिया एक्का। (जीवस. ९६)। २. अणंताणं परमाणुपोग्गलाणं समुदयसमितिसमागमेणं सा एगा उस्सण्हसण्हिया। (भगवती श. ६, ७, पृ. ८२७)। ३. एते चानन्ताः परमाणवः एका अतिशयेन श्लक्ष्णा श्लक्ष्णश्लक्ष्णा, सैव श्लक्ष्णश्लक्ष्णिका, उत्तरप्रमाणापेक्षया उत् प्राबल्येन श्लक्ष्णश्लक्ष्णिका उच्छ्लक्ष्णश्लक्ष्णिका। (संग्रहणी दे. वृ. २४५)। ४. अणंताणंति—अनन्तानां व्यावहारिकपरमाणूनाम्, समुदायाः द्व्यादिरूपास्तेषां समितयो मीलनानि, तासां समागमः परिणामवशादेकीभवनम्, ते येन समुदयसमितिसमागमेनैका उत् प्राबल्येन

श्लक्ष्णिका उच्छ्लक्ष्णश्लक्ष्णिका। (भगवती दान. वृ. ६, ७, २४७, पृ. ९५–९६)।

१ अनन्तानन्त व्यावहारिक परमाणुओं के समुदाय के मिलने से जो एकरूपता होती है उसका नाम एक उच्छ्लक्ष्ण-श्लक्ष्णिका (एक माप-विशेष) है।

उच्छ्वास—१. ××× तहेव उस्सासो। संखेज्जावलिणिवहो सो चिय पाणो त्ति विक्खादो॥ (ति. प. ४–२८६)। २.×××ता (आवलिया) संखेज्जा य ऊसासो। (जीवस. १–८)। ३. संखेज्जाओ आवलिआओ ऊसासो। (अनुयो. सू. १३७, पृ. १७८; भगवती ६, ७, २४६—सुत्तागमे पृ. ५०३; जम्बूद्वी. शा. वृ. १८, पृ. ८९)। ४. समया य असंखेज्जा हवइ हु उस्सास-णिस्सासो। (ज्योतिष्क. १–८)। ५. ताः (आवलिकाः) संख्येया उच्छ्वासः। (त. भा. ४–१५)। ६. संखेयावलिका एक उच्छ्वासः। (त. वा. ३, ३८, ७)। ७. तप्पाओग्गासंखेज्जावलिकाओ घेत्तूण एगो उस्सासो हवदि। (धव. पु. ३, पृ. ६५); तप्पाओग्गसंखेज्जावलिकाहि एगो उस्सास-णिस्सासो होदि। (धव. पु. ४, पृ. ३१८)। ८. ××× संखेज्जावलिसमूहमुस्सासो। (जं. दी. प. १३–१३२; गो. जी. ५७३)। ९. ताः संख्येयाः ४४४६$\frac{३४५८}{३७७३}$ सत्यः आवलिकाः एक उच्छ्वासो निःश्वासो वा ऊर्ध्वाधोगमनभेदात्। (त. भा. सिद्ध. वृ. ४–१५)। १०. संख्याताभिरावलिकाभिरेक उच्छ्वासनिःश्वासकालः। (प्रज्ञाप. मलय. वृ. ५–१०४)। ११. संख्येया आवलिका एक उच्छ्वासः। (जीवाजी. मलय. वृ. ३, २, १७८; ज्योतिष्क. मलय. वृ. १–८)। १२. ऊर्ध्वं वातोद्गमो यः स उच्छ्वासः। (पंचसं. वृ. ३–६, गा. १२७)। १३. संखेज्जावलिगुणिओ उस्सासो होइ जिणदिट्ठो। (भावसं. दे. ३१२)। १४. उच्छ्वास ऊर्ध्वगमनस्वभावः परिकीर्तितः। (लोकप्र. २८, २१५)।

१ संख्यात आवली प्रमाण काल को उच्छ्वास कहते हैं।

उच्छ्वास नामकर्म—१. यद्धेतुरुच्छ्वासस्तदुच्छ्वासनाम। (स. सि. ८-११; त. वा. ८, ११, १७; त. श्लो. ८–११; त. वृत्ति श्रुत. ८–११)। २. प्राणापानपुद्गलग्रहणसामर्थ्यजनकं उच्छ्वासनाम। (त. भा. ८–१२)। ३. यस्योदयादुच्छ्वासनिःश्वासौ भवतः तदुच्छ्वासनाम। (श्रा. प्र. टी. २१; त. भा. हरि. व सिद्ध. वृ. ८–१२; धर्मसं. मलय. वृ. ६१८; कर्मवि. पू. व्या. ७५)। ४. जस्स कम्मस्स उदएण उस्सासणिस्सासाणं णिप्फत्ती होदि तं उस्सासणाम। (धव. पु. १३, पृ. ३६४)। ५. जस्सुदएणं जीवे णिप्फत्ती होइ आणपाणूणं। तं ऊसासं नामं तस्स विवागो सरीरम्मि॥ (कर्मवि. ग. १२४)। ६. यस्य कर्मण उदयेन जीव उच्छ्वासनिःश्वासकार्योत्पादनसमर्थः स्यात् तदुच्छ्वास-निःश्वासनाम। (मूला. वृ. १२–१९४)। ७. उच्छ्वसनमुच्छ्वासः प्राणापानकर्म। तद्यद्धेतुकं भवति तदुच्छ्वासनाम। …शीतोष्णसम्बन्धजनितदुःखस्य पंचेन्द्रियस्य यावदुच्छ्वास-निःश्वासौ दीर्घनादौ श्रोत्रस्पर्शनेन्द्रियप्रत्यक्षौ तावदुच्छ्वासनामोदयजौ बोद्धव्यौ। (त. सुखबो. वृ. ८-११, पृ. १९८ व १९९)। ८. उच्छ्वसनमुच्छ्वासस्तस्य नाम उच्छ्वासनाम, यदुदयाज्जीवस्योच्छ्वास-निःश्वासौ भवतस्तच्च ज्ञातव्यम्। (कर्मवि. पू. व्या. ७२, पृ. ३३)। ९. यदुदयादुच्छ्वास-निःश्वासनिष्पत्तिर्भवति तदुच्छ्वासनाम। (समवा. अभय. वृ. ४२, पृ. ६४)। १०. यदुदयवशादात्मन उच्छ्वासनिःश्वासलब्धिरुपजायते तदुच्छ्वासनाम। (पंचसं. मलय. वृ. ३–७, पृ. ११६; षष्ठ कर्म. मलय. वृ. ६; प्रज्ञाप. मलय. वृ. २३, २९३, पृ. ४७; कर्मवि. दे. स्वो. वृ. ४३; कर्मप्र. यशो. टी. १, पृ. ६)।

१ जिस कर्म के उदय से जीव उच्छ्वास लेने में समर्थ हो उसे उच्छ्वास नामकर्म कहते हैं।

उच्छ्वासपर्याप्ति—देखो आनप्राणपर्याप्ति। १. यया तूच्छ्वासप्रायोग्यं वर्गणाद्रव्यमादायोच्छ्वासतयाऽऽलम्ब्य मुञ्चति सोच्छ्वासपर्याप्तिः। (कर्मस्त. गो. वृ. ९–१०, पृ. ८७)। २. यया पुनरुच्छ्वासप्रायोग्यवर्गणादलिकमादायोच्छ्वासरूपतया परिणमय्य आलम्ब्य च मुञ्चति सा उच्छ्वासपर्याप्तिः। (नन्दी. मलय. वृ. सू. १३, पृ. १०५; प्रज्ञाप. मलय. वृ. १-१२, पृ. २५; पंचसं. मलय. वृ. १-५, पृ. ८, षष्ठ क. मलय. वृ. ६; षडशीति मलय. वृ. ३; शतक. मल. हेम. वृ. ३७–३८, पृ. ५०; जीवाजी. वृ. १–१२; षडशीति दे. स्वो. वृ. २, पृ. ११७; कर्मवि. दे. स्वो. वृ. ४८, पृ. ५६)। ३. यथोच्छ्वासार्हमादाय दलं परिणमय्य च। तत्तयाऽऽलम्ब्य मुञ्चे-

त्सोच्छ्वासपर्याप्तिरुच्यते ।। (लोकप्र. ३–२२) ।
१ जिस शक्ति से उच्छ्वास के योग्य वर्गणाद्रव्य को ग्रहण कर और उसे उच्छ्वास रूप से परिणमाकर छोड़ता है उसे उच्छ्वासपर्याप्ति कहते हैं ।

उच्छ्वास-निःश्वासपर्याप्ति — विवक्षितपुद्गलस्कन्धान् उच्छ्वास-निःश्वासरूपेण परिणमयितुं पर्याप्तनामकर्मोदयजनितात्मनः शक्तिनिष्पत्तिरुच्छ्वास-निःश्वासपर्याप्तिः । (गो. जी. म. प्र. टी. ११९; कार्तिके. टी. १३४) ।
पर्याप्त नामकर्म के उदय से विवक्षित पुद्गलस्कन्धों को उच्छ्वास-निःश्वासरूप से परिणमाने के लिए जो जीव के शक्ति उत्पन्न होती है उसका नाम उच्छ्वास-निःश्वासपर्याप्ति है ।

उज्झित दोष—१. स्यादुज्झितं बहु त्यक्त्वा यच्चूताद्यल्पसेवनम् । पानादि दीयमानं वा ऽनल्पेन गलनेन तत् ।। (आचा. सा. ८–४८) । २. यच्चूतफलादिकं बहु त्यक्त्वाल्पसेवनं तदुज्झितम्, अथवा यत्पानादिकं दीयमानं बहुतरेण गलनेनाल्पसेवनं तदुज्झितम् । (भा. प्रा. टी. ९९, पृ. २५१) ।
१ दिये गये बहुत आम्रफलादिक को छोड़कर थोड़े का सेवन करना, अथवा पीने योग्य द्रव्य में से बहुत अधिक गलने से थोड़े का सेवन करना, यह उज्झित नाम का एषणादोष है ।

उत्कञ्चन—उत्कञ्चनम् उपरि कम्बिकानां बन्धनम् । (बृहत्क. मलय. वृ. ५८३) ।
ऊपर कम्बिकाओं—काष्ठविशेषों—का बांधना, यह उत्कञ्चन नाम का वसति-उत्तरकरण है ।

उत्कटिकासन—देखो उत्कुटिकासन और उत्कुटुकासनिक । १. पुत-पार्ष्णिसमायोगे प्राहुरुत्कटिकासनम् । (योगशा. ४-१३२)। २. उक्कडिया यु-[पु-] ताभ्यां भूमिमस्पृशतः समपादाभ्यामासनम् । (भ. आ. मूला. टी. २२४) ।
२ चूतड़ और पार्ष्णियों (एड़ियों) के मिलने पर उत्कटिकासन होता है ।

उत्कर—१. तत्रोत्करः काष्ठादीनां करपत्रादिभिरुत्करणम् । (स. सि. ५-२४; त. वा. ५, २४, १४; कार्तिके. टी. २०६) । २. दार्वादीनां क्रकच-कुठारादिभिः उत्करणं भेदनमुत्करः । (त. वृत्ति श्रुत. ५–२४) ।
१ करोंत आदि से काष्ठ आदि के चीरने को उत्कर कहते हैं ।

उत्कर्षण—१. कम्मपदेसट्ठिदिवड्ढावणमुक्कड्डुणा । (धव. पु. १०, पृ. २२) । २. उक्कड्डुणं हवे वड्ढी । (गो. क. ४३८) । ३. स्थित्यनुभागयोर्वृद्धिरुत्कर्षणम् । (गो. क. जी. प्र. टी. ४३८) ।
१ कर्मप्रदेशों की स्थिति के बढ़ाने को उत्कर्षण कहते हैं ।

उत्कालिक—स्वाध्यायकाले अनियतकालमुत्कालिकम् । (त. वा. १, २०, १४) ।
जिस अंगबाह्य श्रुत के स्वाध्याय का काल नियत नहीं है वह उत्कालिक कहलाता है ।

उत्कीर्तना—उत्कीर्तना नाम संशब्दना, यथा कल्पाध्ययनं व्यवहाराध्ययनमिति । (व्यव. भा. मलय. वृ. १, पृ. २) ।
किसी ग्रन्थ आदि के स्पष्ट उच्चारण का नाम उत्कीर्तना है । जैसे कल्पाध्ययन व व्यवहाराध्ययन ।

उत्कुटिकासन—देखो उत्कटिकासन । उक्कुडिया ऊर्ध्वं संकुचितासनम् । (भ. आ. विजयो. टी. २२४)। देखो उत्कटिकासन ।

उत्कुटुकासनिक—उत्कुटुकासनं पीठादौ पुतालगनेनोपवेशनरूपमभिग्रहतो यस्यास्ति स उत्कुटुकासनिकः । (स्थाना. अभय. वृ. ५, १, ३९६, पृ. २८४) ।
चूतड़ों का स्पर्श न कराकर पाटे आदि पर बैठना, यह उत्कुटुक आसन कहलाता है, इस आसनविशेष को जिसने नियमपूर्वक ग्रहण किया है उसे उत्कुटुकासनिक कहा जाता है ।

उत्कृष्ट अन्तरात्मा — पंचमहव्वयजुत्ता धम्मे सुक्के वि संठिया णिच्चं । णिज्जियसयलपमाया उक्किट्ठा अंतरा होंति ।। (कार्तिके. १९५) ।
पञ्च महाव्रतों के धारक, सकल प्रमादों के विजेता और धर्म अथवा शुक्ल ध्यान में स्थित साधुओं को उत्कृष्ट अन्तरात्मा कहते हैं ।

उत्कृष्ट ज्ञान—निर्वाणपदमेप्येकं भाव्यते यन्मुहुर्मुहुः । तदेव ज्ञानमुत्कृष्टं निर्बन्धो नास्ति भूयसा ।। (ज्ञानसा. ५–२) ।
जिस ज्ञान के द्वारा एक मात्र निर्वाण पद की निरन्तर भावना की जाती है वही उत्कृष्ट ज्ञान कहलाता है ।

उत्कृष्ट दाह—उक्कसदाहो णाम उक्कस्सठिदिबंधकारणउक्कस्ससंकिलेसो। (धव. पु. ११, पृ. ३३६)।
उत्कृष्ट कर्मस्थिति के बन्ध के कारणभूत उत्कृष्ट संक्लेश का नाम उत्कृष्ट दाह है।

उत्कृष्ट निक्षेप—१. उक्कस्सम्रो पुण णिक्खेवो केत्तियो? जत्तिया उक्कस्सिया कम्मठिदी उक्कस्सियाए आबाहाए समउत्तरावलियाए च ऊणा तत्तिम्रो उक्कस्सो णिक्खेवो। (धव. पु. ६, पृ. २२६ का टि. १)। २. उक्कस्सट्ठिदिबंधो समयजुदावलिदुगेण परिहीणो। उक्कट्ठिदिम्मि चरिमेट्ठिदिम्मि उक्कस्सणिक्खेवो। (लब्धि. ५८)।
उत्कृष्ट आबाधा और एक समय अधिक आवलि से हीन जितनी उत्कृष्ट कर्मस्थिति हो, उतना उत्कृष्ट निक्षेप होता है।

उत्कृष्ट पद—उक्कस्सदव्वमस्सिदूण जो गुणगारो तमुक्कस्सपदं णाम। (धव. पु. १४, पृ. ३६२)।
उत्कृष्ट द्रव्य का आश्रय लेकर जो गुणकार होता है उसे उत्कृष्ट पद कहा जाता है।

उत्कृष्ट पदमीमांसा—जत्थ पचण्हं सरीराणं उक्कस्सदव्वपरिक्खा कीरदि सा उक्कस्सपदमीमांसा। (धव. पु. १४, पृ. ३६७)।
जिस अधिकार में पांचों शरीरों के उत्कृष्ट द्रव्य की परीक्षा की जाती है उसे उत्कृष्ट पदमीमांसा कहते हैं।

उत्कृष्टपदाल्पबहुत्व—उक्कस्सदव्वविसयमुक्कस्सपदप्पाबहुगं णाम। (धव. पु. १४, पृ. ३८५)।
उत्कृष्ट द्रव्य सम्बन्धी अल्पबहुत्व को उत्कृष्टपदाल्पबहुत्व कहते हैं।

उत्कृष्ट परीतानन्त—१. जं तं जहण्णपरित्ताणंतयं तं विरलेदूण एक्केक्कस्स रूवस्स जहण्णपरित्ताणंतयं दादूण अण्णोण्णब्भत्थे कदे उक्कस्सपरित्ताणतयं अदिच्छिदूण जहण्णजुत्ताणंतयं गंतूण पडिदं। एवदिम्रो अभवसिद्धियरासी। तदो एगरूवे अवणीदे जादं उक्कस्सपरित्ताणंतयं। (ति. प. ४, पृ. १८३)। २. यज्जघन्यपरीतानान्तं तत्पूर्ववद् वर्गित-संवर्गितमुत्कृष्टपरीतानन्तमतीत्य जघन्ययुक्तानन्तं गत्वा पतितम्। तत एकरूपेऽपनीते उत्कृष्टं परीतानन्तं तद् भवति। (त. वा. ३, ३८, ५, पृ. २०७)।
२ जघन्य परीतानन्त को पूर्व के समान—उत्कृष्ट परीतासंख्यात के समान—वर्गित-संवर्गित करने पर उत्कृष्ट परीतानन्त को लांघ कर जघन्य युक्तानन्त जाकर प्राप्त होता है। उसमें से एक अंक के कम करने पर उत्कृष्ट परीतानन्त होता है।

उत्कृष्ट मंगल—धम्मो मंगलमुक्किट्ठं अहिंसा संजमो तवो। (दशवै. सू. १–१)।
अहिंसा, संयम और तप रूप धर्म को उत्कृष्ट मंगल कहते हैं।

उत्कृष्ट श्रावक—१. गृहतो मुनिवनमित्वा गुरूपकण्ठे व्रतानि परिगृह्य। भैक्ष्याशनस्तपस्यन्नुत्कृष्टश्चेलखण्डधरः॥ (रत्नक. १४७)। २. एयारसम्मि ठाणे उक्किट्ठो सावम्रो हवे दुविहो। वत्थेक्कधरो पढमो कोवीणपरिग्गहो विदिम्रो॥ धम्मिल्लाणं चयणं करेइ कत्तरि छुरेण वा पढमो। ठाणाइसु पडिलेहइ उवयरणेण पयडप्पा॥ भुंजेइ पाणि-पत्तम्मि भायणे वा सइं समुवविट्ठो। उपवासं पुण णियमा चउव्विहं कुणइ पव्वेसु॥ पक्खालिऊण पत्तं पविसइ चरियाय पंगणे ठिच्चा। भणिऊण धम्मलाहं जायइ भिक्खं सयं चेव॥ सिग्घं लाहालाहे अदीणवयणो णियत्तिऊण तम्रो। अण्णम्मि गिहे वच्चइ दरिसइ मोणेण कायं वा॥ जइ अद्धवहे कोइ वि भणइ पत्थेइ भोयणं कुणइ। भोत्तूण णिययभिक्खं तस्सण्णं भुंजए सेसं॥ अह ण भणइ तो भमेज्ज णियपोट्टपूरणपमाणं। पच्छा एयम्मि गिहे जाएज्ज पासुगं सलिलं॥ जं किं पि पडियभिक्खं भुंजिज्जो सोहिऊण जत्तेण। पक्खालिऊण पत्तं गच्छिज्जो गुरुसयासम्मि॥ जइ एयं ण रएज्जो काउंरिसगिहम्मि चरियाए। पविसत्ति एयभिक्खं पवित्तिणियमणं ता कुज्जा॥ गंतूण गुरुसमीवं पच्चक्खाणं चउव्विहं विहिणा। गहिऊण तम्रो सव्वं आलोचेज्जा पयत्तेण॥ एमेव होइ विइम्रो णवरि विसेसो कुणिज्ज णियमेण। लोचं धरिज्ज पिच्छं भुंजिज्जो पाणिपत्तम्मि॥ उद्दिट्ठपिंडविरम्रो दुवियप्पो सावम्रो समासेण। एयारसम्मि ठाणे भणिम्रो सुत्ताणुसारेण॥ (वसु. श्रा. ३०१–११ व ३१३)। ३. तत्तद्व्रतास्त्रनिर्भिन्नश्वसन्मोहमहाभटः। उद्दिष्टं पिण्डमप्युज्झेदुत्कृष्टः श्रावकोऽन्तिमः॥ स द्वेधा प्रथमः श्मश्रुमूर्धजानपनाययेत्। सितकौपीनसंव्यानः कर्तर्या वा क्षुरेण वा॥ स्थानादिषु प्रतिलिखेन् मृदूपकरणेन सः। कुर्यादेव चतुष्पर्व्यामुपवासं चतुर्विधम्॥ स्वयं समुपविष्टोऽद्यात् पाणिपात्रेऽथ भाजने। स श्रावकगृहं गत्वा पात्रपाणिस्तदङ्गणे॥ स्थित्वा भिक्षां धर्म-

लाभं भणित्वा प्रार्थयेत वा। मौनेन दर्शयित्वाङ्गं लाभालाभे समोऽचिरात् ॥ निर्गत्यान्यद् गृहं गच्छेद् भिक्षोद्युक्तस्तु केनचित्। भोजनायार्थितोऽद्यात् तद् भुक्त्वा यद् भिक्षितं मनाक् ॥ प्रार्थयेतान्यथा भिक्षां यावत् स्वोदरपूरणीम्। लभेत प्रासु यत्राम्भस्तत्र संशोध्य तां चरेत् ॥ आकांक्षन् संयमं भिक्षापात्र-प्रक्षालनादिषु। स्वयं यतेत चादर्पः परथाऽसंयमो महान् ॥ ततो गत्वा गुरूपान्तं प्रत्याख्यानं चतुर्विधं। गृह्णीयाद् विधिवत् सर्वं गुरोश्चालोचयेत् पुरः ॥ यस्त्वेकभिक्षानियमो गत्वाऽद्यादनुमुन्यसौ। भुक्त्य-भावे पुनः कुर्यादुपवासमवश्यकम् ॥ वसेन्मुनिवने नित्यं शुश्रूषेत गुरूंश्चरेत्। तपो द्विधापि दशधा वैयावृत्यं विशेषतः ॥ तद्वद् द्वितीयः किन्त्वार्यसंज्ञो लुञ्चत्यसौ कचान्। कौपीनमात्रयुग् धत्ते यतिवत् प्रतिलेखनम् ॥ स्वपाणिपात्र एवात्ति संशोध्यान्येन योजितम्। इच्छाकारं समाचारं मिथः सर्वे तु कुर्वते ॥ (सा. ध. ७, ३७–४९)।

१ उत्कृष्ट—ग्यारहवीं प्रतिमाका धारक—श्रावक वह कहलाता है जो घर से मुनियों के आश्रम में जाकर गुरु के समीप में व्रत को ग्रहण करता हुआ भिक्षाभोजन को करता है और वस्त्रखण्ड—लंगोटी मात्र—को धारण करता है। २ उत्कृष्ट श्रावक दो प्रकार के होते हैं। उनमें प्रथम उत्कृष्ट श्रावक (क्षुल्लक) एक वस्त्र को धारण करता है, पर दूसरा लंगोटी मात्र का धारक होता है। प्रथम उत्कृष्ट श्रावक बालों का परित्याग कैंची या उस्तरे से करता है—उन्हें निकलवाता है—तथा बैठने-उठने आदि क्रियाओं में प्रयत्नपूर्वक प्रतिलेखन करता है—प्राणिरक्षा के लिए कोमल वस्त्र आदि से भूमि आदि को झाड़ता है। भोजन वह बैठकर हाथरूप पात्र में करता है अथवा थाली आदि में भी करता है। परन्तु पर्वदिनों में—अष्टमी-चतुर्दशी आदि को—उपवास नियम से करता है। पात्र को धोकर व भिक्षा के लिए गृहस्थ के घर पर जाकर आंगन में स्थित होता हुआ 'धर्मलाभ' कहकर भिक्षा की स्वयं याचना करता है, तत्पश्चात् भोजन चाहे प्राप्त हो अथवा न भी प्राप्त हो, वह दैन्य भाव से रहित होता हुआ वहां से शीघ्र ही वापिस लौटकर दूसरे घर पर जाता है और मौन के साथ शरीर को दिखलाता है। बीच में यदि कोई श्रावक वचन द्वारा भोजन करने के लिए प्रार्थना करता है तो जो कुछ भिक्षा प्राप्त कर ली है, पहिले उसे खाकर तत्पश्चात् उसके अन्न को खाता है। परन्तु यदि मार्ग में कोई नहीं बुलाता है तो अपने उदर की पूर्ति के योग्य भिक्षा प्राप्त होने तक अन्यान्य गृहों में जाता है। तत्पश्चात् एक किसी गृह पर प्रासुक पानी को मांगकर व याचित भोजन को प्रयत्न-पूर्वक शोधकर खाता है। फिर पात्र धोकर गुरु के पास में जाता है। यह भोजनविधि यदि किसी को नहीं रुचती है तो वह मुनि के आहार के पश्चात् किसी घर में चर्या के लिए प्रविष्ट होता है और एक भिक्षा के नियमपूर्वक भोजन करता है—यदि विधि-पूर्वक वहां भोजन नहीं प्राप्त होता है तो फिर उपवास ही करता है। गुरु के पास विधिपूर्वक चार प्रकार के प्रत्याख्यान को—उपवास को—ग्रहण करता है व आलोचना करता है। दूसरे उत्कृष्ट श्रावक की भी यही विधि है। विशेषता इतनी है कि वह बालों का नियम से लोच ही करता है, पिच्छी को धारण करता है और हाथरूप पात्र में ही भोजन करता है।

उत्कृष्ट सान्तरअवक्रमणकाल—विदियादिवक्क-मणकंदयाणमावलियाए असंखेज्जदिभागमेत्ताणं उक्क-स्सकालकलाओ उक्कस्सगो सांतरवक्कमणकालो णाम। (धव. पु. १४, पृ. ४७६)।

आवलि के असंख्यातवें भाग मात्र द्वितीय आदि अवक्रमणकाण्डकों के उत्कृष्ट कालसमूह का नाम उत्कृष्ट सान्तरअवक्रमणकाल है।

उत्कृष्ट स्थितिप्राप्तक—जं कम्मं बंधसमयादो कम्मट्ठिदीए उदए दीसदि तम्मुक्कस्सट्ठिदिपत्तयं। (कसायपा. चू. पृ. २३५)।

जो कर्म बन्धसमय से कर्मस्थिति के अनुसार उदय में दिखता है उसका नाम उत्कृष्ट स्थितिप्राप्तक है।

उत्कृष्ट स्थितिसंक्लेश—अथवा उक्कस्सट्ठिदिबंध-पाओग्गअसंखेज्जलोगमेत्तसंकिलेसट्ठाणाणि पलिदोव-मस्स असंखेज्जदिभागमेत्तखंडाणि काढूण तत्थ चरि-मखंडस्स उक्कस्सट्ठिदिसंकिलेसो णाम। (धव. पु. ११, पृ. ९१)।

अथवा उत्कृष्ट स्थितिबन्ध के योग्य असंख्यात लोक मात्र संक्लेशस्थानों के पल्योपम के असंख्यातवें भाग मात्र खण्ड करने पर उनमें अन्तिम खण्ड का नाम उत्कृष्ट स्थितिसंक्लेश है।

उत्कृष्टासंख्येयासंख्येय— १. जहण्णमसंखेज्जासंखेज्जयं दोप्पडिरासियं कादूण एगरासिं सलायपमाणं ठविय एगरासिं विरलेदूण एक्केक्कस्स रूवस्स एगपुंजपमाणं दादूण अण्णोण्णभत्थं करिय सलायरासिदो एगरूवं अवणेदव्वं। पुणो वि उप्पण्णरासिं विरलेदूण एक्केक्कस्स रूवस्सुप्पण्णरासिपमाणं दादूण अण्णोण्णभत्थं कादूण सलायरासिदो एगरूवं अवणेदव्वं। एदेण कमेण सलायरासी णिट्ठिदा। णिट्ठियतदणंतररासिं दुप्पडिरासिं कादूण एयपुंजं सलायं ठविय एयपुंजं विरलिदूण एक्केक्कस्स रूवस्स उप्पण्णरासिं दादूण अण्णोण्णभत्थं कादूण सलायरासिदो एयं रूवं अवणेदव्वं। एदेण सरूएण विदियसलायपुंजं समत्तं। सम्मत्तकाले उप्पण्णरासिं दुप्पडिरासिं कादूण एयपुंजं सलायं ठविय एयपुंजं विरलिदूण एक्केक्कस्स रूवस्स उप्पण्णरासिपमाणं दादूण अण्णोण्णभत्थं कादूण सलायरासीदो एयरूवं अवणेदव्वं। एदेण कमेण तदियपुंजं णिट्ठिदं। एवं कदे उक्कस्स-असंखेज्जासंखेज्जयं ण पावदि। धम्माधम्म-लोगागास-एगजीवपदेसा चत्तारि वि लोगागासमेत्ता, पत्तेगसरीर-वादरपदिट्ठिया एदे दो वि (कमसो असंखेज्जलोगमेत्ता), छप्पि एदे असंखेज्जरासीओ पुव्विल्लरासिस्स उवरि पक्खिविदूण पुव्वं व तिण्णिवारवग्गिदे कदे उक्कस्सअसंखेज्जासंखेज्जयं ण उप्पज्जदि। तदा ठिदिबंधज्झवसायठाणाणि अणुभागबंधज्झवसायठाणाणि योगपलिच्छेदाणि उस्सप्पिणी-ओसप्पिणीसमयाणि च एदाणि पक्खिविदूण पुव्वं व वग्गिद-संविग्गदं कदे (उक्कस्स-असंखेज्जासंखेज्जयं अदिच्छिदूण जहण्णपरित्ताणंतयं गंतूण पडिदं।) तदो (एगरूवं अवणीदे जादं) उक्कस्सअसंखेज्जासंखेज्जयं। (ति. प. १, पृ. १८१, १८२)। २. यज्जघन्यासंख्येयासंख्येयं तद्विरलीकृत्य पूर्वविधिना त्रीन् वारान् वर्गित-संवर्गितं उत्कृष्टासंख्येयासंख्येयं [न] प्राप्नोति। ततो धर्माधर्मैकजीव-लोकाकाश-प्रत्येकशरीरजीव - बादरनिगोतशरीराणि षडप्येतान्यसंख्येयानि स्थितिबन्धाध्यवसायस्थानान्यनुभागबन्धाध्यवसायस्थानानि योगाविभागपरिच्छेदरूपाणि चासंख्येयलोकप्रदेशपरिमाणान्युत्सर्पिण्यवसर्पिणीसमयांश्च प्रक्षिप्य पूर्वोक्तराशौ त्रीन् वारान् वर्गित-संवर्गितं कृत्वा उत्कृष्टासंख्येयासंख्येयमतीत्य जघन्यपरीतानन्तं गत्वा पतितम्। तत एकरूपेऽपनीते उत्कृष्टासंख्येयासंख्येयं भवति। (त. वा. ३, ३८, ५, पृ. २३८, पं. ७–१२)।

२ जघन्य असंख्येयासंख्येय का विरलन करके पूर्वोक्त विधि से—उत्कृष्ट युक्तासंख्येय के समान—तीन वार वर्गित-संवर्गित करने पर उत्कृष्ट असंख्येयासंख्येय प्राप्त नहीं होता। तब धर्म, अधर्म, एक जीव, लोकाकाश, प्रत्येकशरीर जीव और बादर निगोद जीवशरीर; इन छह असंख्यात राशियों तथा असंख्यात लोकप्रदेश प्रमाण स्थितिबन्धाध्यवसायस्थान, अनुभागबन्धाध्यवसायस्थान, योगाविभागप्रतिच्छेद और उत्सर्पिणी-अवसर्पिणी के समयों को मिलाकर पूर्वोक्त राशि के तीन वार वर्गित-संवर्गित करने पर उत्कृष्ट असंख्येयासंख्येय का अतिक्रमण करके जघन्यपरीतानन्त जाकर प्राप्त होता है। उसमें से एक अंक के कम कर देने पर उत्कृष्ट असंख्येयासंख्येय का प्रमाण होता है।

उत्कृष्टि—उत्कृष्टिः हर्षविशेषप्रेरितो ध्वनिविशेषः। (आव. नि. हरि. वृ. ५५२, पृ. २३१)।
हर्ष-विशेष से प्रेरित होकर की गई ध्वनिविशेष को उत्कृष्टि कहते हैं।

उत्क्रम व्यवच्छिद्यमान-बन्धोदय—उत्क्रमेण, पूर्वमुदयः पश्चात् बन्ध इत्येवंलक्षणेन, व्यवच्छिद्यमानौ बन्धोदयौ यासां ता उत्क्रमव्यवच्छिद्यमानबन्धोदयाः। (पंचसं. मलय. वृ. ३–५५, पृ. १४८)।
जिन कर्मप्रकृतियों की उत्क्रम से बन्धोदय-व्युच्छित्ति होती है, अर्थात् पहले उदयव्युच्छित्ति और पीछे बन्धव्युच्छित्ति होती है, वे उत्क्रमव्यवच्छिद्यमान बन्धोदयप्रकृतियां कहलाती हैं।

उत्क्षिप्तचरक—उत्क्षिप्तं पाकपिठरात् पूर्वमेव दायकेनोद्धृतम्, तद् ये चरन्ति गवेषयन्ति ते उत्क्षिप्तचरकाः। (बृहत्क. वृ. १६५२)।
दातार गृहस्थ के द्वारा साधु के आने के पूर्व ही पात्र में से निकाले गये आहार को खोजने वाले—उसे गोचरी में ग्रहण करने वाले—साधुओं को उत्क्षिप्तचरक कहते हैं। अभिग्रह और अभिग्रहवान् में कथंचित् अभेद होने से उसे भावाभिग्रह का लक्षण समझना चाहिये।

उत्क्षिप्तचर्या—१. उत्क्षिप्तं पटलोदंकिका-कटुच्छ-

कादिनोपकरणेन दानयोग्यतया दायकेनोद्यातं तादृशं यदि लप्स्येत ततो गृहीष्याम: नावशिष्टमित्युत्क्षिप्त-चर्या उत्क्षिप्ताभ्यवहरणमिति। (त. भा. हरि. वृ. ६–१६)। २. उत्क्षिप्तं पटलकादिकं कुडुच्छुकादि-नोपकरणेन दानयोग्यतया दायकेनोद्यतं तादृशं यदि लप्स्ये ततो गृहीष्यामि, नावशिष्टमित्युत्क्षिप्तचर्या उत्क्षिप्ताऽभ्यवहरणमिति। (त. भा. सिद्ध. वृ. ६–१६)।

दाता कलछी आदि से दान के योग्य जिस भोज्य वस्तु को पात्र में से निकाल लेता है, ऐसा यदि प्राप्त होगा तो उसे ही ग्रहण करूंगा, अन्य को नहीं; इस प्रकार से अभिग्रहपूर्वक की जाने वाली चर्या को उत्क्षिप्तचर्या कहते हैं।

उत्तरकरण—१. खंडिअ-विराहिआणं मूलगुणाणं स-उत्तरगुणाणं। उत्तरकरणं कीरइ जह सगड-रहंग-गेहाणं ॥६६॥ (आव. ५ अ.—अभिधा. २, पृ. ७५७)। २. मूलत: स्वहेतुभ्य उत्पन्नस्य पुनरुत्तर-कालं विशेपाधानात्मकं करणमुत्तरकरणम्। (उत्तरा. नि. शा. वृ. ४–१८२, पृ. १६४)।

१ मूलगुण और उत्तरगुणों के सर्वथा खण्डित होने पर अथवा देशतः खण्डित होने पर पुन: उनका जो उत्तरकरण किया जाता है—आलोचना आदि के द्वारा उन्हें शुद्ध किया जाता है, इसका नाम उत्तर-करण है। जैसे लोक में गाड़ी आदि के विकृत हो जाने पर उनका सुधार करके फिर से उन्हें व्यवहार के योग्य बनाया जाता है। २ अपने कारणों से उत्पन्न घटादि को जो पश्चात् विशेषाधान रूप किया जाता है उसे उत्तरकरण कहते हैं।

उत्तरकरणकृति—जा सा उत्तरकरणकदी णाम सा अणेयविहा। तं जहा—असि-वासि-परसु-कुडारि-चक्क-दंड-वेम-णालिया-सलागमट्टियसुत्तोदयादीणसुव-संपदसण्णिज्झे। (षट्खं. ४, १, ७२—पु. ६, पृ. ४५०)।

तलवार, वसूला, फरसा और कुदारी आदि उप-करणों का कार्योत्पत्ति में सांनिध्य रहने से उन सबको उत्तरकरणकृति कहा जाता है। जीव से अपृथग्भूत होकर समस्त करणों के कारण होने से औदारिकादि पांच शरीरों को मूलकरण कहा जाता है। इन मूलकरणों के करण होने के कारण उक्त तलवार आदि को उत्तरकरण माना गया है।

उत्तरगुण—शेपा: पिण्डविशुद्धचाद्या: स्युरुत्तरगुणा: स्फुटम्। एपां चानतिचाराणां पालनं ते त्वमी मता: ॥४७॥ (अभिधा. २, पृ. ७६३)।

मूलगुणों से भिन्न पिण्डशुद्धि आदि उत्तरगुण माने जाते हैं।

उत्तरगुणकल्पिक—आहार-उवहि-सेज्जा उग्गम-उप्पादणेसणासुद्धा। जो परिगिण्हति नियय उत्तर-गुणकप्पिओ स खलु ॥ (बृहत्क. ६४४४); य: आहा-रोपधि-शय्या उद्गमोत्पादनैषणाशुद्धा नियतं निश्चितं परिगृह्णाति स खलु उत्तरगुणकल्पिको मन्तव्य:। (बृहत्क. वृ. ६४४४)।

जो साधु नियम से उद्गम, उत्पादन और एषणा दोषों से रहित आहार, उपधि और शय्या को ग्रहण किया करता है उसे उत्तरगुणकल्पिक कहा जाता है।

उत्तरगुणनिर्वर्तनाधिकरण—१. उत्तरगुणनिर्व-र्तना काष्ठ-पुस्त-चित्र-कर्मादीनि। (त. भा. ६-१०)। २. उत्तरं काष्ठ-पुस्त-चित्रकर्माणि। (त. वा. ६, ६, १२)। ३. तथाङ्गोपाङ्ग-संस्थान-मृद्वादि-तक्ष्ण्यादि-रुत्तरगुण:, सोऽपि निर्वृत्त: सन्निधिकरणीभवति कर्मवन्धस्योत्तरगुण एव निर्वर्तनाधिकरणम्। (त. भा. सिद्ध. वृ. ६–१०)। ४. उत्तरगुणनिर्वर्तना काष्ठ-पुस्त-चित्रकर्मभेदा। (त. सुखबो. वृ. ६-६)। ५. उत्तरगुणनिर्वर्तनाधिकरणं काष्ठ-पापाण-पुस्तक-चित्र-कर्मादिनिष्पादनं जीवरूपादिनिष्पादनं लेखनं चेत्यनेकविधम्। (त. वृत्ति श्रुत. ६–६)।

१ काष्ठ, पुस्तक व चित्रकर्म आदि को उत्तरगुण-निर्वर्तना कहा जाता है।

उत्तरचूलिका दोष—१. वन्दनां स्तोकेन कालेन निर्वर्त्य वन्दनायाश्चूलिकाभूतस्यालोचनादिकस्य महता कालेन निर्वर्तकं[नं] कृत्वा यो वन्दनां विध-धाति तस्योत्तरचूलिकादोप:। (मूला. वृ. ७-१०६)। २. उत्तरचूलं वन्दनं दत्त्वा महता शब्देन 'मस्तकेन वन्दे' इत्यभिधानम्। (योगशा. स्वो. विव. १३०, पृ. २३७)। ३. ××× चूला चिरेणोत्तरचूलिका॥ (अन. ध. ८–१०६); उत्तरचूलिका नाम दोप: स्यात्। या किम्? या चूला। केन? चिरेण। वन्दनां स्तोककालेन कृत्वा तच्चूलिकाभूतस्यालोचना-देर्महता कालेन करणमित्यर्थ:। (अन. ध. स्वो. टी. ८–१०६)।

१ वन्दना को शीघ्रता से करके उसकी चूलिका

स्वरूप आलोचना आदि को दीर्घ काल तक करने के पश्चात् जो वन्दना करता है उसके उत्तरचूलिका नामक वन्दनादोष होता है। २ वन्दना देकर 'मस्तक से मैं वन्दना करता हूँ, इस प्रकार उच्च स्वर से कहना, यह वन्दनाविषयक उत्तरचूल नाम का दोष है।

उत्तरप्रकृति—पुध-पुधावयवा पज्जवट्ठियणयणिबंधणा उत्तरपयडी णाम। (धव. पु. ६, पृ. ५–६)।

पर्यायार्थिक नय के आश्रय से किये जाने वाले पृथक् पृथक् कर्मप्रकृतिभेदों का नाम उत्तरप्रकृति है।

उत्तरप्रकृति-अनुभागसंक्रम—उत्तरपयडीणं च मिच्छत्तादीणमणुभागस्स ओकड्डुकड्डुण-परपयडिसंकमेहि जो सत्तिविपरिणामो सो उत्तरपयडि-अणुभागसंकमो त्ति। (जयध. ६, पृ. २)।

मिथ्यात्व आदि उत्तर प्रकृतियों के अनुभाग की शक्ति का जो अपकर्षण, उत्कर्षण और परप्रकृति-संक्रमण के द्वारा विरुद्ध परिणमन होता है उसे उत्तरप्रकृति-अनुभागसंक्रम कहते हैं।

उत्तरप्रकृति-विपरिणामना—णिज्जिण्णा पयडी देसेण सव्वणिज्जराए वा, अण्णपयडीए देससंकमेण वा सव्वसंकमेण वा जा संकामिज्जदि, एसा उत्तरपयडिविपरिणामणा णाम। (धव. पु. १५, पृ. २८३)।

देशनिर्जरा अथवा सर्वनिर्जरा से निर्जीर्ण प्रकृति का तथा देशसंक्रमण अथवा सर्वसंक्रमण के द्वारा अन्य प्रकृति में संक्रान्त की जाने वाली प्रकृति का नाम उत्तरप्रकृति-विपरिणामना है।

उत्तरप्रयोगकरण—१. ××× इअरं पओगओ जमिह। निप्फन्ना निप्फज्जइ आइल्लाणं च तं तिण्हं॥ (आव. भा. १५६, पृ. ५५६)। २. प्रयोगेण यदिह लोके मूलप्रयोगेण, निष्पन्नात् तन्निष्पन्नात् निष्पद्यते तदुत्तरप्रयोगकरणम्, तच्च त्रयाणामाद्यानां शरीराणाम्। इयमत्र भावना ××× अङ्गोपाङ्गादिकरणं तूत्तरप्रयोगकरणं, तच्चौदारिक-वैक्रियिकाहारकरूपाणां त्रयाणां शरीराणाम्, न तु तैजस-कार्मणयोः, तयोरङ्गोपाङ्गाद्यसम्भवात्। (आव. भा. मलय. वृ. १५६, पृ. ५५६)।

औदारिक, वैक्रियिक और आहारक इन तीन शरीरों के अङ्गोपाङ्ग आदि करण को उत्तरप्रयोगकरण कहते हैं।

उत्तराध्ययन—१. कमउत्तरेण पगयं आयारस्सेव उवरिमाइं तु। तम्हा उ उत्तरा खलु अज्झयणा होंति णायव्वा॥ (उत्तरा. नि. ३, पृ. ५)। २. उत्तरज्झयणाणि आयारस्स उवरिं आसित्ति तम्हा उत्तराणि भवंति। (उत्तरा. चू. पृ. ६)। ३. उत्तरज्झयणं उत्तरपदाणि वण्णेइ। (धव. पु. १, पृ, ७७); उत्तरज्झयणं उग्गमुप्पायणेसणदोसगयपायच्छित्तविहाणं कालादिविसेसिदं परूवेदि। (धव. पु. ६, पृ. १६०)। ४. चउव्विहोवसग्गाणं वावीसपरिस्सहाणं च सहणविहाणं सहणफलमेदम्हादो एदमुत्तरमिदि च उत्तरज्झेणं वण्णेदि। (जयध. १, पृ. १२०)। ५. आचारात् परतः पूर्वकाले यस्मादेतानि पठितवन्तो यतयस्तेनोत्तराध्ययनानि। (त. भा. सिद्ध. वृ. १–२०)। ६. उत्तराण्यधीयन्ते पठ्यन्तेऽस्मिन्नित्युत्तराध्ययनम्, तच्च चतुर्विधोपसर्गाणां द्वाविंशतिपरीषहाणां च सहनविधानं तत्फलम्, एवं प्रश्ने एवमित्युत्तरविधानं च वर्णयति। (गो. जी. म. प्र. व जी. प्र. टी. ३६७)। ७. भिक्षूणामुपसर्गसहनफलनिरूपकमुत्तराध्ययनम्। (त. वृत्ति श्रुत. १–२०)। ८. उत्तराणि अहिज्जंति उत्तरऽज्झयणं मदं जिणिदेहिं। वावीसपरीसहाणं उवसग्गाणं च सहणविहिं॥ वण्णेदि तप्फलमवि एवं पण्हे च उत्तरं एवं। कहदि गुरुसीसयाणं पइण्णियं अट्ठमं तं खु॥ (अंगप. २५, २६, पृ. ३०६)।

१ क्रम की अपेक्षा जो आचारांग के उत्तर—पश्चात्—मुनियों के द्वारा पढ़े जाते थे वे विनय व परीषह आदि ३६ उत्तराध्ययन कहे जाते हैं। ३ जिसमें उद्गम, उत्पादन और एषण दोषों सम्बन्धी प्रायश्चित्त का विधान कालादि की विशेषतापूर्वक किया गया हो वह उत्तराध्ययन कहलाता है। ६ जिस शास्त्र में देव, मनुष्य, तिर्यंच और अचेतन कृत चतुर्विध उपसर्ग व बाईस परीषहों के सहन करने की विधि का एवं उनके फल का विधान किया गया हो तथा प्रश्नों के उत्तर का विधान किया गया हो उसे उत्तराध्ययन कहते हैं।

उत्तराध्यायानुयोग—अनुयोजनमनुयोगः, अर्थव्याख्यानमित्यर्थः, उत्तराध्यायानामनुयोगः उत्तराध्यायानुयोगः ×××। (उत्तरा. चू. पृ. १)।

उत्तराध्ययन के अध्ययनों के अर्थ के व्याख्यान को उत्तराध्यायानुयोग कहते हैं।

प्लुत्य करोति यत्र तट्टोलगतिवन्दनकमिति गाथार्थः। (आव. वृ. टि. मल. हेम. पृ. ८७)।

पतंगा अथवा टिड्डी के समान आगे-पीछे उछलकर वन्दना करना, यह उत्ष्वष्क्कण-अभिष्वष्कण नामक वन्दना का दोष है। इसका दूसरा नाम टोलगति भी है। (मूलाचार ७–१०६ और अनगारधर्मामृत ८–६६ में सम्भवतः ऐसे ही दोष को दोलायित नाम से कहा गया है)।

उत्सन्नक्रिय-अप्रतिपाति—देखो व्युपरतक्रियानिवर्ति शुक्लध्यान। केवलिनः शैलेशीगतस्य शैलवदकम्पनीयस्य। उत्सन्नक्रियमप्रतिपाति तुरीयं परमशुक्लम्॥ (योगशा. ११–६)।

मेरु के समान स्थिरतारूप शैलेशी अवस्था को प्राप्त अयोगिकेवली के ध्यान को उत्सन्नक्रिय-अप्रतिपाति शुक्ल ध्यान कहते हैं। यह शुक्ल ध्यान का अन्तिम (चतुर्थ) भेद है।

उत्सर्ग—देखो अप्रत्यवेक्षिताप्रमार्जितोत्सर्ग। १. उत्सर्गः त्यागो निष्ठ्यूत-स्वेद-मल-मूत्र-पुरीपादीनाम्। ××× अथवा अप्रत्यवेक्षिताप्रमार्जित उत्सर्गं करोति, ततः पौपधोपवासव्रतमतिचरति। (त. भा. सिद्ध. वृ. ७–२६)। २. वाल-वृद्ध-श्रान्त-ग्लानेनापि संयमस्य शुद्धात्मतत्त्वसाधनत्वेन मूलभूतस्य छेदो न यथा स्यात्तथा संयतस्य स्वस्य योग्यमतिकर्कशमेवाचरणमाचरणीयमित्युत्सर्गः। (प्रव. सा. अमृत. वृ. ३–३०)। ३. यदुचितं परिपूर्णद्रव्यादि योग्यमनुष्ठानं शुद्धान्न-पानगवेषणारूपं परिपूर्णमेव यत्तदौचित्येनानुष्ठान्नं स उत्सर्गः। (उप. प. वृ. ७८४)।

१ भूमि के विना देखे शोधे थूक, पसीना, मल, मूत्र और विष्ठा आदि के त्याग करने का नाम उत्सर्ग है। यह पौषधोपवास का एक अतिचार है। २ वाल, वृद्ध, श्रान्त और रुग्ण साधु भी मूलभूत संयम का विनाश न हो, इस दृष्टि से जो शुद्ध आत्मतत्त्व के साधनभूत अपने योग्य अति कठोर संयम का आचरण करता है; यह संयम परिपालन का उत्सर्गमार्ग—सामान्य विधान है।

उत्सर्गसमिति — देखो उच्चारप्रस्रवणसमिति। १. स्थण्डिले स्थावर-जङ्गमजन्तुवर्जिते निरीक्ष्य प्रमृज्य च मूत्र-पुरीपादीनामुत्सर्ग उत्सर्गसमितिः। (त. भा. ६–५)। २. जीवाविरोधेनाङ्गमलनिर्हरणमुत्सर्गसमितिः। स्थावराणां जङ्गमानां च जीवादीनाम् अविरोधेन अङ्गमलनिर्हरणं शरीरस्य च स्थापनम् उत्सर्गसमितिरवगन्तव्या। (त. वा. ६, ५, ८)। ३. जीवाविरोधेनाङ्गमलनिर्हरणं समुत्सर्गसमितिः। (त. श्लो. ६–५)। ४. तद्वर्जितं (स्थावर-जङ्गमजीववर्जितं) निरीक्ष्य चक्षुषा प्रमृज्य च रजोहृत्या वस्त्र-पात्र-खेल-मल-भक्तपान-मूत्र-पुरीपादीनामुत्सर्गः उज्झनं उत्सर्गसमितिः। (त. भा. हरि. वृ. ६–५)। ५. स्थावराणां जङ्गमानां च जीवानामविरोधेनांगमलनिर्हरणं शरीरस्य च स्थापनमुत्सर्गसमितिः। (चा. सा. पृ. ३२)। ६. कफ-मूत्र-मलप्रायं निर्जन्तु जगतीतले। यत्नाद्युत्सृजेत् साधुः सोत्सर्गसमितिर्भवेत्॥ (योगशा. १–४०)। ७. दूरगूढविशालानिरुद्धशुद्धमहीतले। उत्सर्गसमितिर्विण्मूत्रादीनां स्याद्विसर्जनम्॥ (आचा. सा. १–३६)। ८. निर्जन्तौ कुशले विविक्तविपुले लोकोपरोधोज्झिते प्लुष्टे कृष्ट उतोपरे क्षितितले विष्ठादिकानुत्सृजन्। नृः प्रज्ञाश्रमणेन नक्तमभितो दृष्टेः विभज्य त्रिधा। सुस्पृष्टेऽप्यपहस्तकेन समितावुत्सर्ग उत्तिष्ठते॥ (अन. ध. ४–१६६)। ९. निर्जीवे शुषिरे देशे प्रत्युपेक्ष्य प्रमार्ज्य च। यत्त्यागो मल-मूत्रादेः सोत्सर्गसमितिः स्मृता॥ (लोकप्र. ३०–७४८)। १०. विण्मूत्र-श्लेष्म-खिल्यादिमलमुज्झति यः शुचौ। दृष्ट्वा विशोध्य तस्य स्यादुत्सर्गसमितिर्हिता॥ (धर्मसं. श्रा. ६–८)। ११. प्राणिनामविरोधेन अङ्गमलत्यजनं शरीरस्य च स्थापनं दिगम्वरस्य उत्सर्गसमितिः भवति। (त. वृत्ति श्रुत. ६–५)।

१ स्थावर और जङ्गम जीवों से रहित शुद्ध भूमि में देखकर एवं रजोहरण से झाड़कर मल-मूत्र आदि का त्याग करना, इसका नाम उत्सर्गसमिति है। २ त्रस-स्थावर जीवों के विरोध (विराधना) से रहित शुद्ध भूमि में शरीरगत मल के छोड़ने और शरीर के स्थापित करने को उत्सर्गसमिति कहते हैं।

उत्सर्पिणी— १. णर-तिरियाणं आऊ-उच्छेह-विभूदिपहुदियं सव्वं। ××× उस्सप्पिणियासु वड्ढेदि। (ति. प. ४–३१४)। २. अनुभवादिभिरुत्सर्पणशीला उत्सर्पिणी। (स. सि. ३–२७)। ३. तद्विपरीतोत्सर्पिणी। तद्विपरीतैरेवोत्सर्पणशीला वृद्धिस्वाभाविकोत्सर्पिणीत्युच्यते। (त. वा. ३, २७, ५)। ४. दससागरोवमाणं पुण्णाओ होंति कोडिको-

डीओ। ओसप्पिणीपमाणं तं चेवुसप्पिणीए वि ।। (ज्योतिष्क. २–८३)। ५. जत्थं बलाउ-उस्सेहाणं उस्सप्पणं उड्ढी होदि सो कालो उस्सप्पिणी। (धव. पु. ९, पृ. ११९)। ६. उत्सर्प्पति वर्द्धतेऽरकापेक्षया उत्सर्प्पयति वा भावानायुष्कादीन् वर्द्धयतीति उत्सर्पिणी। (स्थाना. अभय. वृ. १–५०, पृ. २५)। ७. उत्सर्पयति प्रथमसमयादारभ्य निरन्तरवृद्धि नयति तैस्तैः पर्यायैर्भावानित्युत्सर्पिणी। (उप. प. मु. वृ. १–१७)। ८. ताभ्यां षट्समयाभ्यामुपभोगादिभिरुत्सर्पणशीला उत्सर्पिणी। (त. सुखबो. वृ. ३, २७)। ९. उत्सर्पन्ति क्रमेण परिवर्द्धन्ते शुभा भावा अस्यामित्युत्सर्पिणी। (ज्योतिष्क. मलय. वृ. २-८३)। १०. सागरोपमाणां दश कोटीकोट्य एव दुष्षमदुष्षमाद्यरकक्रमेणेकोत्सर्पिणी। (जीवाजी. मलय. वृ. ३, २, १७९, पृ. ३४५)। ११. शुभा भावा विवर्द्धन्ते क्रमादस्यां प्रतिक्षणम्। हीयन्ते चाशुभा भावा भवत्युत्सर्पिणीति सा ।। (लोकप्र. २९–४५)। १२. उत्सर्पयति वृद्धि नयति भोगादीन् इत्येवंशीला उत्सर्पिणी। (त. वृत्ति श्रुत. ३–२७)।

१ जिस काल में जीवों की आयु, शरीर की ऊंचाई और विभूति आदि की उत्तरोत्तर वृद्धि हो उसे उत्सर्पिणी कहते हैं।

उत्संज्ञासंज्ञा—देखो उवसन्नासन्न। अनन्तानन्तपरमाणुसंघातपरिमाणादाविर्भूता उत्संज्ञासंज्ञकः। (त. वा. ३, ३८, ६, पृ. २०७, पं. २६–२७)।

अनन्तानन्त परमाणुओं के समुदाय से एक उत्संज्ञासंज्ञा नामक माप होता है।

उत्सूत्र—उत्सूत्रं किमित्याह—यदनुपदिष्टं तीर्थकरगणधरैः, स्वच्छन्देन स्वाभिप्रायेण विकल्पितम् उत्प्रेक्षितम्, अतएव सिद्धान्ताननुपाति, सिद्धान्तबहिर्भूतम् इत्यर्थः। (आव. ह. वृ. मल. हे. टि. पृ. ८४)।

तीर्थङ्कर या गणधरों ने जिसका उपदेश नहीं दिया है ऐसे तत्त्व का अपने अभिप्राय से कल्पना करके कथन करने को उत्सूत्र कहते हैं, क्योंकि, इस प्रकार का व्याख्यान सिद्धान्त के बहिर्भूत है।

उत्सृतोत्सृत कायोत्सर्ग—१. धम्मं सुक्कं च दुवे झायइ झाणाइं जो ठिओ संतो। एसो काउस्सग्गो उसिउसिओ होइ नायव्वो ।। (आव. नि. १४७९)। २. धर्मं च शुक्लं च प्राक् प्रतिपादितस्वरूपे, ते एव द्वे ध्यायति ध्याने यः कश्चित् स्थितः सन् एष कायोत्सर्ग उत्सृतोत्सृतो भवति ज्ञातव्यः, यस्मादिह शरीरमुत्सृतं भावोऽपि धर्म-शुक्लध्यायित्वादुत्सृत एव। (आव. नि. हरि. वृ. १४७९, पृ. ७७९)।

देखो उत्थितोत्थित कायोत्सर्ग।

उत्सेक—देखो अनुत्सेक। १. विज्ञानादिभिरनुत्कृष्टस्यापि सतस्तत्कृतमदोऽहंकारतोत्सेकः। (स. सि. ६–२६; त. वा. ६, २६, ५)। २. उत्सेको ज्ञानादिभिराधिक्येऽभिमान आत्मनः। (त. भा. सिद्ध. वृ. ८–१०, पृ. १४५)।

ज्ञानादिकी अधिकता के होने पर तद्विषयक अभिमान करने को उत्सेक कहते हैं। यह मान कषाय का नामान्तर है।

उत्सेधाङ्गुल—१. परिभासाणिप्पणं (१, १०२-६) होदि हु उदिसेहसूचिअंगुलयं ।। (ति. प. १–१०७)। २. अट्ठेव य जवमज्झाणि अंगुलं ××× । (जीवस. ९९)। ३. अष्टौ यवमध्यानि एकमंगुलमुत्सेधाख्यम्। (त. वा. ३, ३८, ५)। ४. ××× यवैरष्टभिरङ्गुलम् ।। उत्सेधाङ्गुलमेतत् स्यादुत्सेधोऽनेन देहिनाम्। अल्पावस्थितवस्तूनां प्रमाणं च प्रगृह्यते ।। (ह. पु. ७, ४०-४१)। ५. परमाणू तसरेणू रहरेणू वालअग्ग-लिक्खा य। जूअ जवो अट्ठगुणो कमेण उस्सेहअंगुलयं। (संग्रहणी २४४)। ६. उत्सेधो देवादिशरीराणामुच्चत्वम्, तन्निर्णयार्थमङ्गुलमुत्सेधाङ्गुलम्। उत्सेधः 'अणंताणं सुहुमपरमाणुपुग्गलाणं समुदयसमिइसमागमेणं एगे ववहारपरमाणू' इत्यादिक्रमेणोच्छ्रयो वृद्धिस्तस्माज्जातमङ्गुलमुत्सेधाङ्गुलम्। (संग्रहणी दे. वृ. २४४); यवमध्यान्यप्यष्टावेकमुत्सेधाङ्गुलम्। (संग्रहणी दे. वृ. २४५)। ७. लिक्षाष्टकमिता यूका भवेद्यूकाभिरष्टभिः। यवमध्यं ततोऽष्टाभिस्तैः स्यादौत्सेधमङ्गुलम्। (लोकप्र. १–३३)।

२ आठ यवमध्यों का एक उत्सेधाङ्गुल होता है।

उत्स्वेदिम—१. उस्सेइम पिट्ठाइ ××× ।। (बृहत्क. ८४०)। २. उत् ऊर्ध्वं निर्गच्छता बाष्पेण यः स्वेदः स उत्स्वेदः, उत्स्वेदेन निर्वृत्तमुत्स्वेदिमम्। (बृहत्क. क्षे. वृ. ८३९); उत्स्वेदिमं पिष्टादि—पिष्टं सूक्ष्मतन्दुलादिचूर्णनिष्पन्नम्, तद्धि वस्त्रान्तरितमधःस्थितस्योष्णोदकस्य बाष्पेणोत्स्विद्यमानं पच्यते। तत्र यदामं तत् उत्स्वेदिमामम्। (बृहत्क. क्षे. वृ. ८४०)।

सूक्ष्म चावल आदि के चूर्ण से उत्पन्न पिष्ट आदि को उत्स्वेदिम कहते हैं। कारण कि वह वस्त्र से आच्छादित होकर नीचे स्थित उष्ण जल के भाप से पकता है।

उदकराजिसदृश क्रोध—उदकराजिसदृशो नाम—यथोदके दण्डशलाकाङ्गुल्यादीनामन्यतमेन हेतुना राजिरुत्पन्ना द्रवत्वादपामुत्पत्त्यनन्तरमेव संरोहति, एवं यथोक्तनिमित्तोत्पन्नो यस्य क्रोधो विदुषोऽप्रम त्तस्य प्रत्यवमर्शनोत्पत्त्यनन्तरमेव व्यपगच्छति स उदकराजिसदृशः। (त. भा. ८–१०)।

जिस प्रकार जल में लकड़ी या अंगुली आदि किसी भी निमित्त से उत्पन्न हुई रेखा उत्पन्न होने के अनन्तर ही विलीन हो जाती है, उसी प्रकार किसी भी निमित्त से उत्पन्न हुआ प्रमादहीन विद्वान् का क्रोध भी चूंकि उत्पन्न होने के अनन्तर ही शान्त हो जाता है, अत एव उसे उदकराजि सदृश (संज्वलन) क्रोध कहा जाता है।

उदधिकुमार—१. ऊरु-कटिष्वधिकप्रतिरूपा कृष्णश्यामा मकरचिह्नाः उदधिकुमाराः। (त. भा. सिद्ध. वृ. ४–११)। २. उदधिकुमारा भूषणनियुक्त-हयवररूपचिह्नधारिणः। (जीवाजी. मलय. वृ. ३, १, ११७)। ३. उदधिकुमारा ऊरु-कटिष्वधिकरूपा अवदातश्वेतवर्णाः। (संग्रहणी दे. वृ. १७, पृ. १३)। ४. उदानि उदकानि धीयन्ते येषु ते उदधयः, उदधिक्रीडायोगात् त्रिदशा अपि उदधयः, उदधयश्च ते कुमाराश्च उदधिकुमाराः। (त. वृत्ति श्रुत. ४-११)।

१ ऊरु और कटिभाग में अतिशय रूपवान्, वर्ण से श्याम और मकर के चिह्न युक्त देव उदधिकुमार कहे जाते हैं।

उदय—१. द्रव्यादिनिमित्तवशात्कर्मणां फलप्राप्तिरुदयः। (स. सि. २–१; त. वा. २, १, ४)। २. द्रव्यादिनिमित्तवशात् कर्मणः फलप्राप्तिरुदयः। द्रव्यादिनिमित्तं प्रतीत्य कर्मणो विपच्यमानस्य फलोपनिपात उदय इतीमामाख्यां लभते। (त. वा. २, १, ४); द्रव्यादिनिमित्तवशात् कर्मपरिपाक उदयः। प्रागुपात्तस्य कर्मणः द्रव्यादिनिमित्तवशात् फलप्राप्तिः परिपाक उदय इति निश्चीयते। (त. वा. ६, १४, १)। ३. उदयः उदीरणावलिकागततत्पुद्गलोद्भूतसामर्थ्यता। (आव. नि. हरि. वृ. १०८, पृ. ७७)। ४. कर्मविपाकाविर्भाव उदयः। (त. भा. हरि. व सिद्ध. वृ. २–१)। ५. जे कम्मक्खंधा ओकड्डुक्कड्डुणादिपओगेण विणा ट्ठिदिक्खयं पाविदूण अप्पप्पणो फलं देंति, तेसिं कम्मक्खंधाणमुदओ त्ति सण्णा। (धव. पु. ६, पृ. २१३)। ६. उदयः फलकारित्वं द्रव्यादिप्रत्ययद्वयात्। (त. श्लो. २, १, ४); द्रव्यादिनिमित्तवशात् कर्मपरिपाक उदयः। (त. श्लो. ६, १४)। ७. ओकड्डणाए विणा पत्तोदयकम्मक्खंधो कम्मोदओ णाम। ××× एत्थ कम्मोदयो उदओ त्ति गहिदो। (जयध. १, पृ. १८८)। ८. कर्मणो यथाकालं फलोपजननसामर्थ्यपरिपाक उदयः। (सिद्धिवि. टी. ४–१०, पृ. २६८)। ९. तेषां च यथास्वस्थितिबद्धानां कर्मपुद्गलानां करणविशेषकृते स्वाभाविके वा स्थित्यपचये सत्युदयसमयप्राप्तानां विपाकवेदनमुदयः। (षडशीति हरि. वृ. ११, पृ. १३१; कर्मस्त. गो. वृ. १, पृ. ६९)। १०. कर्मणां फलदातृत्वं द्रव्य-क्षेत्रादियोगतः। उदयः पाकजं ज्ञेयं ××× ॥ (पंचसं. अमित. ३–४)। ११. तेषामेव यथास्वस्थितिबद्धानां कर्मपुद्गलानामपवर्तनाकरणविशेषतः स्वभावतो वोदयसमयप्राप्तानां विपाकवेदनमुदयः। (शतक. मल. हेम. ३, पृ. ६)। १२. अष्टानां कर्मणां यथास्वमुदयप्राप्तानामात्मीयात्मीयस्वरूपेणानुभवनमुदयः। (पंचसं. मलय. व. २–३, पृ. ४४)। १३. उदयः उदयावलिकाप्रविष्टानां तत्पुद्गलानामुद्भूतसामर्थ्यता। (आव. नि. मलय. वृ. १०८, पृ. ११६)। १४. कर्मपुद्गलानां यथास्थितिबद्धानामबाधाकालक्षयेणापवर्तनादिकरणविशेषतो वा उदयसमयप्राप्तानामनुभवनमुदयः। (कर्मप्र. मलय. वृ. १, पृ. २)। १५. इह कर्मपुद्गलानां यथास्वस्थितिबद्धानामुदयप्राप्तानां यद् विपाकेन अनुभवनेन वेदनं स उदयः। (कर्मस्त. दे. स्वो. वृ. १३, पृ. ८४)।

१ द्रव्यादि का निमित्त पाकर जो कर्म का फल प्राप्त होता है उसे उदय कहा जाता है।

उदयनिष्पन्न—उदयणिप्फण्णो णाम उदिण्णेण जेण अण्णो णिप्फादितो सो उदयणिप्फण्णो। (अनुयो. चू. पृ. ४२)।

कर्मके उदयसे जीव व अजीव में जो अवस्था प्रादुर्भूत होती है वह उदयनिष्पन्न कही जाती है। जैसे—नरकगति नामकर्म के उदय से होने वाली जीव की नारक अवस्था और औदारिकशरीर नामकर्म के

उदय से उत्पन्न होने वाली औदारिक वर्गणाओं की औदारिकशरीररूप अवस्था।

उदयबन्धोत्कृष्ट—१. उदयकालेऽनुभूयमानानां स्वबन्धादुत्कृष्टं स्थितिसत्कर्म यासां ता उदयबन्धोत्कृष्टाभिधानाः। (पंचसं. स्वो. वृ. ३-६२, पृ. १५१)। २. यासां प्रकृतीनां विपाकोदये सति वन्धादुत्कृष्टं स्थितिसत्कर्मावाप्यते ता उदयबन्धोत्कृष्टसंज्ञाः। (पंचसं. मलय. वृ. ३–६२, पृ. १५२; कर्मप्र. यशो. टी. १, पृ. १५)।

१ उदयकाल में अनुभूयमान जिन कर्मप्रकृतियों का स्थितिसत्त्व बन्ध से उत्कृष्ट पाया जाता है उन्हें उदयबन्धोत्कृष्ट कहते हैं।

उदयभाव — अट्ठविहकम्मपोग्गला संतावत्थातो उदीरणावलियमतिक्रान्ता अप्पणो विपागेण उदयावलियाए वट्टमाणा उदिन्नाओ त्ति उदयभावो भन्नति। (अनुयो. चू. पृ. ४२)।

आठ प्रकार के कर्मपुद्गलों का सत्त्व अवस्था से उदीरणावली का अतिक्रमण कर अपने परिपाक से उदयावली में वर्तमान होते हुए उदय को प्राप्त होना, इसका नाम उदयभाव है।

उदयवती—१. चरिमसमयंमि दलियं जासिं अण्णत्थ संकमे ताओ। अणुदयवइ इयराओ उदयवई होंति पगईओ॥ (पंचसं. ३–६६)। २. इतराः या स्वोदयेन चरमसमये जीवोऽनुभवति ता उदयवत्यः। (पंचसं. स्वो. वृ. ३–६६, पृ. १५३)। ३. इतरास्तु प्रकृतय उदयवत्यो भवन्ति, यासां दलिकं चरमसमये स्वविपाकेन वेदयते। (पंचसं. मलय. वृ. ३–६६, पृ. १५३)। ४. यासां च दलिकं चरमसमये स्वविपाकेन वेदयते ता उदयवत्यः। (कर्मप्र. यशो. टी. १, पृ. १५)।

२ जिन कर्म-प्रकृतियों के दलिक का स्थिति के अन्तिम समय में अपना फल देते हुए वेदन किया जाता है उन कर्मप्रकृतियों को उदयवती कहते हैं।

उदयसंक्रमोत्कृष्ट—१. उदयेऽन्याभ्यः संक्रमेण उत्कृष्टं स्थितिसत्कर्म यासां ता उदयसंक्रमोत्कृष्टाः। (पंचसं. स्वो. वृ. ३-६२, पृ. १५१)। २. यासां पुनर्विपाकोदये प्रवर्तमाने सति संक्रमत उत्कृष्टं स्थितिसत्कर्म लभ्यते, न बन्धतस्ता उदयसंक्रमोत्कृष्टाभिधानाः। (पंचसं. मलय. वृ. ३–६२, पृ. १५२; कर्मप्र. यशो. टी. १, पृ. १५)। ३. उदये सति संक्रमत उत्कृष्टा स्थितिर्यासां ता उदयसंक्रमोत्कृष्टाः। (पंचसं. मलय. वृ. ५–१४५, पृ. २८४)।

२ विपाकोदय के होने पर जिन कर्मप्रकृतियों का संक्रम की अपेक्षा उत्कृष्ट स्थितिसत्कर्म प्राप्त होता है, बन्ध की अपेक्षा नहीं; उन्हें उदयसंक्रमोत्कृष्ट कहते हैं।

उदयस्थितिप्राप्तक—जं कम्मं उदए जत्थ वा तत्थ वा दिस्सइ तमुदयट्ठिदिपत्तयं णाम। (कसायपा. चू. पृ. २३६; धव. पु. १०, पृ. ११४)।

जो कर्मप्रदेशाग्र बंधने के अनन्तर जहां कहीं भी—जिस किसी भी स्थिति में होकर—उदय को प्राप्त होता है, उसे उदयस्थितिप्राप्तक कहते हैं।

उदरक्रिमिनिर्गम अन्तराय—××× स्यादुदरक्रिमिनिर्गमः॥ उभयद्वारतः कुक्षिक्रिमिनिर्गमने सति। (अन. ध. ५, ५५–५६)।

भोजन के समय ऊर्ध्व या अधोद्वार से पेट में से कृमि के निकलने पर उदरक्रिमिनिर्गम नाम का अन्तराय होता है।

उदराग्निप्रशमन—१. यथा भाण्डागारे समुत्थितमनलमशुचिना शुचिना वा वारिणा शमयति गृही, तथा यतिरपि उदराग्निं प्रशमयतीति उदराग्निशमनमिति च निरुच्यते। (त. वा. ९, ६, १६, पृ. ५९७; त. श्लो. ९-६)। २. यथा भाण्डागारे समुत्थितमनलं शुचिनाऽशुचिना वा वारिणा प्रशमयति गृही तथा यथालब्धेन यतिरप्युदराग्निं सरसेन विरसेन वाऽऽहारेण प्रशमयतीत्युदराग्निप्रशमनमिति च निरुच्यते। (चा. सा. पृ. ३६)। ३. भाण्डागारवदुदरे प्रज्वलितोऽग्निः प्रश[शा]म्यते येन शुचिना अशुचिना वा जलेनेव सरसेन विरसेन वादानेन तदुदराग्निप्रशमनमिति प्रसिद्धम्। (अन. ध. स्वो. टी. ९–४९)।

१ जैसे भण्डार में लगी हुई अग्नि को गृहस्वामी पवित्र या अपवित्र किसी भी जल से बुझाने का प्रयत्न करता है, उसी प्रकार असातावेदनीय कर्म की उदीरणा से उठी हुई उदराग्नि को साधु भी सरस-नीरस आदि किसी भी प्रकार के आहार से शान्त करता है, इसलिए उदराग्निप्रशमन यह उसका सार्थक नाम जानना चाहिये।

उदात्तत्व—उदात्तत्वं उच्चैर्वृत्तिता । (समवा. अभय. वृ. ३५, पृ. ६०; रायप. वृ. पृ. २७) ।
उन्नत व्यवहार के साथ जो यथार्थ वचन का प्रयोग किया जाता है उसे उदात्तत्व कहा जाता है। यह सत्य वचन के ३५ अतिशयों में दूसरा है।

उदान वायु—रक्तो हृत्कण्ठ-तालु-भ्रूमध्य-मूर्ध्नि च संस्थितः। उदानो वश्यतां नेयो गत्यागतिनियोगतः॥ (योगशा. ५-१८); रसादीनूर्ध्वं नयतीत्युदानः। योगशा. स्वो. विव. ५-१३) ।
रस आदि को ऊपर ले जाने वाली वायु को उदान वायु कहते हैं। वह वर्ण से लाल होती हुई हृदय, कण्ठ, तालु, भ्रुकुटिमध्य और शिर में स्थित रहती है।

उदारत्व—१. अभिधेयार्थस्यातुच्छत्वं गुम्फगुणविशेषो वा। (समवा. अभय. वृ. ३५, पृ. ६०) । २. उदारत्वमतिशिष्टगुम्फगुणयुक्तता अतुच्छार्थप्रतिपादकता वा। (रायप. वृ. पृ. २८) ।
शब्द के वाच्यभूत अर्थ की महानता अथवा शब्दसंघटनारूप विशिष्ट गुण युक्तता का नाम उदारत्व है। यह ३५ सत्यवचनातिशयों में २२वां है।

उदाहरण—१. उदाह्रियते प्राबल्येन गृह्यतेऽनेन दार्ष्टान्तिकोऽर्थ इति उदाहरणम्। (दशवै. नि. हरि. वृ. १-५२) । २. दृष्टान्तवचनमुदाहरणम्। (प्रमाणमी. २, १, १३) । ३. व्याप्तिपूर्वकदृष्टान्तवचनमुदाहरणम्। (न्या. दी. ३, पृ. ७८) ।
३ व्याप्तिपूर्वक दृष्टान्त के कहने को उदाहरण कहते हैं।

उदीचीन—एवमुदीच्यां दिश्येतावन्मयाद्य पञ्चयोजनमात्रं तदधिकमूनतरं वा गन्तव्यमित्येवम्भूतम्। (सूत्रकृ. शी. वृ. २, ७, ७९, पृ. १८२) ।
आज मैं उत्तर दिशा में पांच योजन अथवा उससे अधिक या कम इतनी दूर जाऊँगा, इस प्रकार उत्तर दिशा में गमन का नियम करने को उदीचीन देशावकाशिकव्रत कहते हैं।

उदीरणा—१. जे कम्मक्खंधा महंतेसु ट्ठिदि-अणुभागेसु अवट्ठिदा ओकड्डिदूण फलदाइणो कीरंति तेसिमुदीरणा त्ति सण्णा, अपक्वपाचनस्य उदीरणाव्यपदेशात्। (धव. पु. ६, पृ. २१४); अपक्वपाचनमुदीरणा। आवलियाए बाहिरट्ठिदिमादिं कादूणं उवरिमाणं ठिदीणं बंधावलियवदिक्कंतपदेसग्गमसंखेज्जलोगपडिभागेण पलिदोवमस्स असंखेज्जदिभागपडिभागेण वा ओकड्डिदूण उदयावलियाए देदि सा उदीरणा। (धव. पु. १५, पृ. ४३) । २. ओकड्डणवसेण पत्तोदयकम्मक्खंधो अकम्मोदओ णाम। ××× अकम्मोदओ उदीरणा णाम। (जयध. १, पृ. १८८) । ३. जं करणेणोकड्ढिय उदए दिज्जइ उदीरणा एसा। (कर्मप्र. उदी. क. १; पंचसं. उदी. क. १, पृ. १०९) । ४. अनुभूयमाने कर्मणि प्रक्षिप्याऽनुदयप्राप्तं प्रयोगेणानुभूयते यत्सा उदीरणा। (पंचसं. स्वो. वृ. ५-१, पृ. १९१); यत्करणेनापकृष्य दीयते उदये उदीरणा। ××× यद्दलं परमाण्वात्मकं करणेन स्ववीर्यात्मकेनापकृष्य, अनुदितस्थितिभ्यः इत्यवगम्यते, दीयते प्रक्षिप्यते उदये उदयप्राप्तस्थितौ एषा उदीरणोच्यते। (पंचसं. स्वो. वृ. उदी. १, पृ. १७५); उदयस्थितौ यत्प्रथमस्थितेः सकाशात् पतति सोदीरणा। (पंचसं. स्वो. वृ. उपश. २०, पृ. १६२) । ५. अण्णत्थ ठियस्सुदये संथु[छु]हणमुदीरणा हु अत्थित्तं। (गो. क. ४३९) । ६. समुदीर्यानुदीर्णानां स्वल्पीकृत्य स्थितिं बलात्। कर्मणामुदयावल्यां प्रक्षेपणमुदीरणा। (पंचसं. अमित. ३-३) । ७. सा (उदीरणा) पुनः कर्मपुद्गलानां करणविशेषजनिते स्थित्यपचये सत्युदयावलिकायां प्रवेशनमुदीरणा। (कर्मस्त. गो. वृ. १, पृ. ६९) । ८. उदीरणम् अनुदयप्राप्तस्य करणेनाकृष्योदये प्रक्षेपणमिति। (स्थाना. अभय. वृ. ४, १, २५१, पृ. १८४); अप्राप्तकालफलानां कर्मणामुदए प्रवेशनमुदीरणा। (स्थाना. अभय. वृ. ४, २, २९६, पृ. २१०) । ९. तेषामेव च कर्मपुद्गलानामकालप्राप्तानां जीवसामर्थ्यविशेषादुदयावलिकायां प्रवेशनमुदीरणा। (शतक. मल. हेम. ३, पृ. ६; षडशीति मलय. वृ. १-२, पृ. १२२; कर्मस्त. दे. स्वो. वृ. १, पृ. ६७; षडशीति दे. स्वो. पृ. ११५) । १०. उदीरणाऽप्राप्तकालस्य कर्मदलिकस्योदये प्रवेशनम्। (षडशीति हरि. वृ. ११, पृ. १३१) । ११. उदयावलिकातो बहिर्वर्तिनीनां स्थितीनां दलिकं कषायैः सहितेनासहितेन वा योगसंज्ञिकेन वीर्यविशेषेण समाकृष्योदयावलिकायां प्रवेशनमुदीरणा। तथा चोक्तम्—उदयावलियाबाहिरल्लठिईहिंतो कसायसहियासहिएणं जोगसन्नेणं दलियमोकड्ढिय उदयावलीयाए पवेसणमुदीरणा इति। (पंचसं. मलय. वृ. ५-६,

पृ. १६४); यत्परमाण्वात्मकं दलिकं करणेन योगसंज्ञिकेन वीर्यविशेषेण कषायसहितेन असहितेन वा उदयावलिकावहिर्वर्तिनीभ्यः स्थितिभ्योऽपकृष्य उदये दीयते उदयावलिकायां प्रक्षिप्यते एषा उदीरणा। (पंचसं. मलय. वृ. उदी. क. १, पृ. १०६); इह प्रथमस्थितौ वर्तमान उदीरणाप्रयोगेण यत्प्रथमस्थितेरेव दलिकं समाकृष्योदयसमये प्रक्षिपति सा उदीरणा। (पंचसं. मलय. वृ. उपश. २०, पृ. १६३)। १२. कर्मपुद्गलानामकालप्राप्तानामुदयावलिकायां प्रवेशनमुदीरणा। × × × अनुदयप्राप्तं सत्कर्मदलिकमुदीर्यत उदयावलिकायां प्रवेश्यते यया सोदीरणा। (कर्मप्र. मलय. वृ. १-२, पृ. १७, १८)। १३. अन्तरकरणसत्कं च दलिकमुत्कीर्य प्रथमस्थितौ द्वितीयस्थितौ च प्रक्षिपति। प्रथमस्थितौ च वर्तमान उदीरणाप्रयोगेण यत्प्रथमस्थितिगतं दलिकं समाकृष्योदये प्रक्षिपति सा उदीरणा। (शतक. दे. स्वो. वृ. ६८, पृ. १२८)। १४. उदयावलिबाह्यस्थितिस्थितद्रव्यस्यापकर्षणवशादुदयावल्यां निक्षेपणमुदीरणा। (गो. क. जी. प्र. ४३९)।

१ अधिक स्थिति व अनुभाग को लिये हुए जो कर्म स्थित हैं उनकी उस स्थिति व अनुभाग को हीन करके फल देने के उन्मुख करना, इसका नाम उदीरणा है।

उदीरणाकरण—देखो उदीरणा। अप्राप्तकालकर्मपुद्गलानामुदयव्यवस्थापनमुदीरणाकरणकम्, सा चोदयविशेष एव। (पंचसं. स्वो. वृ. बं. क. १, पृ. १०६)।

जिन कर्म पुद्गलों का उदयकाल प्राप्त नहीं हुआ है उनको उदय में स्थापित करना, इसका नाम उदीरणाकरण है। यह एक उदय की ही विशेष अवस्था है।

उदीरणोदय—१. अयथाकालविपाक उदीरणोदयः। (त. वा. ६, ३६, ६)। २. जेसिं कम्मंसाणमुदयावलियब्भंतरे अंतरकरणेण अच्चंतमसंताणं कम्मपरमाणूणं परिणामविसेसेणासंखेज्जलोगपडिभागेणोदीरिदाणमणुहवो तेसिमुदीरणोदओ त्ति एसो एत्थ भावत्थो। (जयध. ७, पृ ३५६)। ३. अध्यवसायप्रयोगेणोदयावलिकारहितानां स्थितीनां यद्दलमुदयस्थितौ प्रक्षिप्यानुभवति स उदीरणोदयो भण्यते। (पंचसं. स्वो. वृ. ५-१०२, पृ. २६३)। ४. यः पुनस्तस्मिन्नुदये प्रवर्तमाने सति प्रयोगतः उदीरणाकरणरूपेण प्रयोगेण दलिकमाकृष्यानुभवति स द्वितीय उदीरणोदयाभिधान उच्यते। (पंचसं. मलय वृ. ५-१०२, पृ. २६३)।

२ जिन कर्मपरमाणुओं का उदयावली के भीतर सर्वथा असत्त्व है उनको अन्तरकरणरूप परिणामविशेष के द्वारा असंख्यात लोकप्रतिभाग से उदीरणा को प्राप्त कराकर वेदन करना, यह उनका उदीरणोदय है।

उदीर्ण—१. फलदातृत्वेन परिणतः कर्मपुद्गलस्कन्धः उदीर्णः। (धव. पु. १२, पृ. ३०३)। २. उदीर्णम् उद्भूतशक्तिकमुदयावलिकाप्रविष्टमिति यावत्। (धर्मसं. मलय. वृ. ७६७)।

१ फल देने रूप अवस्था में परिणत कर्म-पुद्गलस्कन्ध को उदीर्ण कहते हैं।

उद्गमशुद्ध उपधिसंभोग—तत्र यत्साम्भोगिकस्सा[सां]म्भोगिकेण सममाधाकर्म्मादिभिः षोडषभिरुद्गमदोषैः शुद्धमुपधिमुत्पादयति एष उद्गमशुद्धउपधिसंभोगः। (व्यव. भा. मलय. वृ. ५-५१, पृ. १२)।

साम्भोगिकका—समान सामाचारी होने के कारण सहभोजन-पानादि व्यवहार के योग्य साधु का—असाम्भोगिक के साथ आधाकर्म आदि सोलह दोषों से रहित उपधि को जो उत्पन्न करना है, यह उद्गमशुद्ध-उपधिसंभोग कहलाता है।

उद्दिष्टत्यागप्रतिमा—उद्दिट्ठाहाराईण वज्जण इत्थ होइ तप्पडिता। दसमासावहिसज्झाय-झाणजोगप्पहाणस्स॥ (श्रा. प्र. वि. १०-१६)।

प्रमुखता से स्वाध्याय व ध्यान में उद्यत श्रावक जो उद्दिष्ट आहार आदि का परित्याग करता है, इसका नाम उद्दिष्टत्यागप्रतिमा है। इसकी कालमर्यादा दस मास है।

उद्दिष्टाहारविरत—देखो उत्कृष्ट श्रावक। १. जो णवकोडिविसुद्धं भिक्खायरणेण भुंजदे भोज्जं। जायणरहियं जोग्गं उद्दिट्ठाहारविरओ सो॥ (कार्तिके. ३९०)। २. उद्दिष्टविनिवृत्तः स्वोद्दिष्टपिण्डोपधि-शयन-वसनादेर्विरतः सन्नेकशाटकधरो भिक्षाशनः पाणि-पात्रपुटेनोपविश्यभोजी रात्रिप्रतिमादितपः-समुद्यत आतापनादियोगरहितो भवति। (चा. सा.

पृ. १६) । ३. स्वनिमित्तं त्रिधा येन कारितोऽनुमतः कृतः । नाहारो गृह्यते पुंसां त्यक्तोद्दिष्टः स भण्यते । (सुभा. सं. ८४३) । ४. न वल्भ्यते यो विजितेन्द्रियोऽशनं मनोवचःकायनियोगकल्पितम् । महान्तमुद्दिष्टनिवृत्तचेतसं वदन्ति तं प्रासुकभोजनोद्यतम् ।। (धर्मप. अमित. २०–६३) । ५. यो वन्धुरावन्धुरतुल्यचित्तो गृह्णाति भोज्यं नवकोटिशुद्धम् । उद्दिष्टवर्जी गुणिभिः स गीतो विभीलुकः संसृति-यातुधान्याः ।। (अमित. श्रा. ७–७७) ।

१ जो श्रावक भिक्षाचरण से—भिक्षा के लिए श्रावक के घर जाता हुआ—नवकोटिविशुद्ध अर्थात् मन, वचन व काय की शुद्धिपूर्वक कृत, कारित एवं अनुमोदना से रहित आहार को याचना के विना ग्रहण करता है वह उद्दिष्टाहारविरत कहलाता है।

उद्देशकाचार्य—प्रथमतः एव श्रुतमुद्दिशति यः स उद्देशकाचार्यः । (योगशा. स्वो. विव. ४–९०, पृ. ३१४) ।

जो शास्त्रव्याख्यानादि के समय सर्वप्रथम श्रुत का निर्देश करे—भूमिका रूप में श्रुत का उद्देश प्रकट करे—उसे उद्देशकाचार्य कहते हैं।

उद्धारपल्य—१. तैरेव लोमच्छेदैः प्रत्येकमसंख्येयवर्षकोटीसमयमात्रच्छिन्नैस्तत्पूर्णमुद्धारपल्यम् । (स. सि. ३–३८; त. वा. ३, ३८, ७) । २. असंख्येयाब्दकोटीनां समयै रोमखण्डितम् । प्रत्येकं पूर्वकं तत्स्यात्पल्यमुद्धारसंज्ञकम् ।। (ह. पु. ७–५०) । ३. तान्येव रोमखण्डानि प्रत्येकं असंख्येयकोटिवर्षसमयमात्रगुणितानि गृहीत्वा द्वितीया महाखनिस्तैः पूर्यते । सा खनिः उद्धारपल्यम् । (त. वृत्ति श्रुत. ३–३८) ।

व्यवहारपल्य के जितने रोमच्छेद हैं उनमें से प्रत्येक रोमच्छेद को असंख्यात कोटि वर्षों के समयों से छिन्न करके उनसे भरे गये गड्ढे को उद्धारपल्य कहते हैं।

उद्धारपल्यकाल—१. ववहाररोमराशिं पत्तेक्कमसंखकोडिवस्साणं । समयसमं घेत्तूणं विदिए पल्लम्हि भरिदम्हि ।। समयं पडि एक्केक्कं वालग्गं पेल्लिदम्हि सो पल्लो । रित्तो होदि स कालो उद्धारं णाम पल्लं तु ।। (ति. प. १, १२६–२७) । २. ततश्च तस्माद् व्यवहारपल्याद् वालाग्रमेकं परिगृह्य सूक्ष्मम् । अनेककोटयब्दविखण्डितं तत्तस्यातिपूर्णं निचितं समन्तात् ।। पूर्णे समासान्तशते ततस्तु एकैकशो रोम समुद्धरेच्च । क्षयं च जाते खलु रोमपुञ्ज उद्धारपल्यस्य हि कालमाहुः ।। (वरांग. २७, २०-२१) ।

१. व्यवहारपल्य की रोमराशि में से प्रत्येक को असंख्यात करोड़ वर्षों की समयसंख्या से खण्डित करके व उनसे दूसरे गड्ढे को भरकर उसमें से एक एक समय में एक एक रोमच्छेद के निकालने पर जितने समय में वह गड्ढा खाली होता है उतने काल को उद्धारपल्यकाल कहते हैं।

उद्धारपल्योपम—१. तत्थ णं जे से ववहारिए से जहानामए पल्ले सिआ जोयणं आयामविक्खंभेणं, जोअणं तं तिगुणं सविसेसं परिक्खेवेण, से णं पल्ले एगाहिअ-बेआहिअ-तेआहिअ-जाव उक्कोसेणं सत्तरत्तरूढाणं संसट्ठे संनिचिते भरिए वालग्गकोडीणं ते णं वालग्गा नो अग्गी डहेज्जा नो वाऊ हरेज्जा नो कुहेज्जा नोपलिविद्धंसिज्जा णो पूइत्ताए हव्वमागच्छेज्जा, तओ णं समए समए एगमेगं वालग्गं अवहाय जावइएणं कालेण से पल्ले खीणे नीरए निल्लेवे णिट्ठिए भवइ, से तं ववहारिए उद्धारपलिओवमे । (अनुयो. १३८, पृ. १८०) । २. ततः समये समये एकैकस्मिन् रोमच्छेदेऽपकृष्यमाणे यावता कालेन तद्रिक्तं भवति तावान् काल उद्धारपल्योपमाख्यः । (स. सि. ३–३८; त. वा. ३, ३८, ७) । ३. व्यवहारपल्योपमे चैकैकं रोम असंख्यातवर्षकोटीसमयमात्रान् भागान् कृत्वा वर्षशतसमयैश्चैकैकं खण्डं प्रगुण्य तत्र यावन्मात्राः समयाः तावन्मात्रमुद्धारपल्योपमं भवति । (मूला. वृ. १२–३६) । ४. तदनन्तरं समये समये एकैकरोमखंडं उद्धारपल्यगतं निष्काष्यते, यावत्कालेन सा महाखनिः रिक्ता जायते तावत्काल उद्धारपल्योपमाह्वयः संसूच्यते । (त. वृत्ति श्रुत. ३–३८) । ५. तत्र उद्धारो वालाग्राणां तत्खण्डानां वा अपोद्धरणमुच्यते, तद्विषयं तत्प्रधानं वा पल्योपमम् उद्धारपल्योपमम् । (अनुयो. हरि. वृ. पृ. ८४; शतक. दे. स्वो. वृ. ८५; संग्रहणी दे. वृ ४) ।

१ पल्य नाम कुशूल (धान्य रखने के लिए मिट्टी से निर्मित पात्र) का है। एक उत्सेध योजन प्रमाण विस्तृत व ऊंचे गोल गड्ढे में मुण्डित शिर पर एक दिन, दो दिन, तीन दिन अथवा अधिक से अधिक सात दिन में उगने वाले वालाग्रों को इस प्रकार से ठसाठस भरे कि जिन्हें न अग्नि जला सके, न वायु

विचलित कर सके तथा वायु का प्रवेश न होने से जो न सड़-गल सकें, न विनष्ट हो सकें और न दुर्गन्धित हो सकें; इस प्रकार भरे गये उन बालाग्रों में से एक-एक समय में एक-एक बालाग्र के निकालने पर जितने काल में उक्त गड्ढा उनसे रिक्त हो जाता है उतने काल को व्यावहारिक (उद्धारपल्य का दूसरा भेद) उद्धारपल्योपम कहा जाता है।

उद्धारसागरोपम—१. एएसिं पल्लाणं कोडाकोडी हवेज्ज दसगुणिया। तं ववहारियस्स उद्धारसागरोवमस्स एगस्स भवे परिमाणं॥ (अनुयो. गा. १०७, पृ. १८०)। २. तेषामुद्धारपल्यानां दशकोटीकोटय एकमुद्धारसागरोपमम्। (स. सि. ३–३८; त. वा. ३, ३८, ७)। ३. उद्धारपल्योपमानि च दशकोटीकोटीमात्राणि गृहीत्वैकं उद्धारसागरोपमम् भवति। (मूला. वृ. १२-३६)। ४. उद्धारपल्यानां दशकोटीकोटयः एकमुद्धारसागरोपमम्। (त. वृत्ति श्रुत. ३–३८)।

२ दश कोड़ाकोड़ी उद्धारपल्यों का एक उद्धारसागरोपम होता है।

उद्भावन—१. प्रतिबन्धकाभावे प्रकाशवृत्तिता उद्भावनम्। (स. सि. ६-२५; त. श्लो. ६-२५)। २. प्रतिबन्धकाभावे प्रकाशितवृत्तितोद्भावनम्। प्रतिबन्धकस्य हेतोरभावे प्रकाशितवृत्तिता उद्भावनमिति व्यपदेशमर्हति। (त. वा. ६, २५, ४)।

प्रतिबन्धक कारण का अभाव होने पर प्रकाश में आना, इसका नाम उद्भावन है।

उद्भिन्न—१. पिहिदं लंछिदयं वा ओसह-घिद-सक्करादि जं दव्वं। उब्भिण्णिऊण देयं उब्भिण्णं होदि णादव्वं। (मूला. ६–२२)। २. इष्टकादिभिः मृत्पिण्डेन वृत्त्या कपाटेनोपलेन वा स्थगितमपनीय दीयते यत्तदुद्भिन्नम्। (भ. आ. विजयो. व मूला. वृ. २३)। ३. गोमयाद्युपलिप्तं भाजनमुद्भिद्य ददाति तदुद्भिन्नम्। (आचारा. शी. वृ. २, १, २६६, पृ. ३१७)। ४. विमुद्रादिकमुद्भिन्नम् ××× । (आचा. सा. ८-३३)। ५. कुतुपादिस्थस्य घृतादेर्दानार्थं यत् मृत्तिकाद्यपनयनं तदुद्भिन्नम्। (योगशा. स्वो. विव. १–३८; धर्मसं. मान. स्वो. वृ. ३-२२, पृ. ४०)। ६. पिहितं लाञ्छितं वाज्य-गुडाद्युद्घाट्य दीयते। यत्तदुद्भिन्नम् ×××। (अन. ध. ५, १७)। ७. उद्भिन्नं यत्कुतुपादिमुखं स्थगितमप्युद्भिद्य ददाति। (व्यव. भा. मलय. वृ. ३, पृ. ३५)। ८. यन्मुद्रितकुतुपादिमुखं यतिहेतोरुन्मुद्रय घृतादि दत्ते तदुद्भिन्नम्। (गु. गु. षट्. स्वो. वृ. २०, पृ. ४९)। ९. विमुद्रादिकं यदन्नादिकं भवति तदुद्भिन्नम्, उद्घाटितं न भुज्यत इत्यर्थः। (भा. प्रा. टी. ९९)।

१ ढकी हुई अथवा चिह्नित (नाम-बिम्बादि से मुद्रित) औषध, घी और शक्कर आदि को उघाड़ कर देना, यह उद्भिन्न नाम का उद्गम दोष है। ५ कुतुप (चमड़े का पात्रविशेष) में स्थित घी आदि को देने के लिए मिट्टी आदि को जो दूर किया जाता है, इसे उद्भिन्न दोष कहा जाता है।

उद्भेदिम—भूमि-काष्ठ-पाषाणादिकं भित्वा ऊर्ध्वं-निःसरणम् उद्भेदः, उद्भेदो विद्यते येषां ते उद्भेदिमाः। (त. वृत्ति श्रुत. २–१४)।

पृथिवी, काष्ठ और पत्थर आदि को भेदकर उत्पन्न होने वाले जीवों को उद्भेदिम कहते हैं।

उद्यवन—१. उत्कृष्टं यवनमुद्यवनम्। असकृद्दर्शनादिपरिणतिरुद्यवनम्। भ. आ. विजयो. टी. २)। २. उज्जवणं उत्कृष्टं यवनं मिश्रणमसकृत्परिणतिः। (भ. आ. मूला. टी. २)।

निरन्तर दर्शन, ज्ञान व चारित्रादि रूप परिणति करने को उद्यवन या उद्यमन कहते हैं।

उद्यान—१. चम्पकवनाद्युपशोभितमुद्यानम्। (अनुयो. हरि. वृ. पृ. १७)। २. पुष्पादिसद्वृक्षसंकुलमुत्सवादौ बहुजनोपभोग्यमुद्यानम्। (जीवाजी. मलय. वृ. ३, २, १४२, पृ. २५८)।

२ पुष्प वाले वृक्षों से व्याप्त एवं उत्सवादि के समय सर्वसाधारण जनों के द्वारा उपभोग्य उपवन को उद्यान कहते हैं।

उद्योत—१. उद्योतश्चन्द्र-मणि-खद्योतादिप्रभवः प्रकाशः। (स. सि. ५–२४; त. सुखबो. वृ. ५, २४)। २. उद्योतश्चन्द्र-मणि-खद्योतादिविषयः। चन्द्र-मणि-खद्योतादीनां प्रकाशः उद्योत उच्यते। (त. वा. ५, २४, १९)। ३. उद्योतोऽपि आह्लादादिहेतुत्वात् वृष्टिवत्, च-शब्दात् वृष्टिदीपोद्योतादिविरोधादिपरिणामपरिग्रहः। (त. भा. हरि. वृ. ५–२४)। ४. उद्योतश्च पुद्गलात्मकः चन्द्रिकादिराह्लादकत्वाज्जलवत्, प्रकाशकत्वादग्निवत्, तथाऽनुष्णाशीतत्वात् उद्योतः पद्मरागोपलादीनाम्। (त. भा. सिद्ध. वृ.

५-२४)। ५. ज्योतिरिङ्गण-रत्न-विद्युज्जातः प्रकाशः उद्योत उच्यते। (त. वृत्ति श्रुत. ५-२४)।

१ चन्द्र, मणि व खद्योत (जुगनू) आदि से होने वाले प्रकाश को उद्योत कहते हैं।

उद्योतनाम—१. यन्निमित्तमुद्योतनं तदुद्योतनाम। (स. सि. ८-११; त. वा. ८, ११, १६; त. श्लो. ८-११)। २. प्रकाशसामर्थ्यजनकमुद्योतनाम। (त. भा. ८-१२)। ३. उद्योतनाम यदुदयादुद्योतवान् भवति। (श्रा. प्र. टी. २२; आव. नि. हरि. वृ. १२२, पृ. ८४)। ४. उद्योतनमुद्योतः। जस्स कम्मस्स उदएण जीवसरीरे उज्जोओ उप्पज्जदि तं कम्मं उज्जोवणाम। (धव. पु. ६, पृ. ६०; पु. १३, पृ. ३६५)। ५. शशि-तारक-मणि-जल-काष्ठादिविमलत्वप्रकर्षो यस्तदुद्योतनाम। (पंचसं. स्वो. वृ. ३-६, पृ. ११८)। ६. उद्योतननिमित्तमुद्योतनाम, तच्चन्द्र-खद्योतादिषु स्वफलाभिव्यक्तं वर्तते। (भ. आ. विजयो. टी. २०६५)। ७. जस्सुदएणं जीवो अणुसिणदेहेण कुणइ उज्जोयं। तं उज्जोयं णामं जाणसु खज्जोयमाईणं॥ (कर्मवि. ग. १२७, पृ. ५२)। ८. यदुदयाज्जन्तुशरीरमनुष्णप्रकाशात्मकमुद्योतं प्रकरोति। यथा—यति-देवोत्तरवैक्रिय-चन्द्रर्क्ष-ग्रह-तारा-रत्नौपधि-मणि-प्रभृतयस्तदुद्योतनाम। (कर्मस्त. गो. वृ. १०, पृ. ८८)। ९. यतोऽनुष्णोद्योतवच्छरीरो भवति तदुद्योतनाम। (समवा. अभय. वृ. ४२, पृ. ६४)। १०. उद्योतनमुद्योतः, यस्य कर्मस्कन्धस्योदयाज्जीवशरीर उद्योत उत्पद्यते तदुपद्योतनाम। (मूला. वृ. १२-१९६)। ११. यदुदयाज्जन्तुशरीराण्यनुष्णप्रकाशरूपमुद्योतं कुर्वन्ति। यथा—यति-देवोत्तरवैक्रिय-चन्द्र-नक्षत्र-ताराविमान-रत्नौपधयस्तदुद्योतनाम। (शतक. मल. हेम. वृ. ३७-३८, पृ. ५१; प्रज्ञाप. मलय. वृ. २३-२९३, पृ. ४७४; पंचसं. मलय. वृ. ३-७, पृ. ११५; षष्ठ कर्म. मलय. वृ. ६, पृ. १२६; प्रव. सारो. वृ. १२६४)। १२. उद्योतनाम यदुदये जन्तुशरीरमनुष्णप्रकाशात्मकमुद्योतं करोति। यथा—यति-देवोत्तर-वैक्रिय-चन्द्र-ग्रह-नक्षत्र-ताराविमान-मणि-रत्नौपधिप्रभृतयः। (धर्मसं. मलय. वृ. ६१९)। १३. अणुसिणपयासरूवं जियंगमुज्जोयए इहुज्जोया। जइ-देवुत्तरविक्किय-जोइस-खज्जोवमाइव्व॥ (कर्मवि. दे. ४५); ××× अयमर्थः—यथा यति-देवोत्तरवैक्रिय-चन्द्र-ग्रहादिज्योतिष्काः खद्योता रत्नौपधिप्रभृतयश्चानुष्णप्रकाशात्मकमुद्योतमातन्वन्ति तत् उद्योतनामेत्यर्थः। (कर्मवि. दे. स्वो. वृ. ४५)। १४. उद्योतकर्मोदयाच्चन्द्रमण्डलानाम् अनुष्णप्रकाशो हि जने उद्योत इति व्यवह्रियते। (जम्बूद्वी. शा. वृ. ७-१२६)। १५. यदुदयेन चन्द्र-ज्योतिरिङ्गणादिवत् उद्योतो भवति तदुद्योतनाम। (त. वृत्ति श्रुत. ८-११)।

१ जिस कर्म के उदय से जीव के शरीर से उद्योत (प्रकाश) होता है उसे उद्योतनामकर्म कहते हैं।

उद्वर्तन—१. उद्वर्तनं वा स्वप्रकृतावेव स्थितेः दीर्घीकरणम्। (पंचसं. स्वो. वृ. संक्रम. ३५, पृ. १५४)। २. उद्वर्तनं स्थिति-रस-वृद्ध्यापादनम्। (विशेषा. को. वृ. ३०१५, पृ. ७२५)। ३. उद्वर्तनं अस्मादन्यत्रोत्पत्तिः। (मूला. वृ. १२-३)। ४. उव्वट्टणं जलादिप्लुतमसूरादिपिष्टादिना देहस्येतस्ततो मर्दनम्। (भ. आ. मूला. टी. ९३)।

१ स्थिति व अनुभाग की वृद्धि करने को उद्वर्तन या उद्वर्तना कहते हैं। ३ एक गति से निकल कर दूसरी गति में जीव के जाने को उद्वर्तन कहा जाता है। ४ तेल और जलादि से मिश्रित मसूर आदि के चूर्ण से शरीर के मर्दन करने को उद्वर्तन कहते हैं।

उद्वर्तनाकरण—देखो उद्वर्तन। १. उव्वट्टणा ठिईए उदयावलियाइबाहिरठिईणं। (कर्मप्र. उद्व. १, पृ. १४०)। २. तव्विसेसा एव उव्वट्टणोवट्टणातो ठितिअणुभागाणं वड्ढावणं उव्वट्टणा, हस्सीकरणमोवट्टणाकरणं। (कर्मप्र. चू. १-२)। ३. स्थित्यनुभागयोर्वृहत्करणमुद्वर्तना ××× उद्वर्त्यते प्राबल्येन प्रभूतीक्रियते स्थित्यादि यया जीववीर्यविशेषपरिणतया सोद्वर्तना। (कर्मप्र. मलय. वृ. १-२, पृ. १६)। ४. उदयावलिवज्झाणं ठिईण उव्वट्टणा उ ठितिविसया। (पंचसं. उद्व. १, पृ. १७१)।

१ उदयावलि से बाह्य स्थिति और अनुभाग के वृद्धिगत करने को उद्वर्तनाकरण कहते हैं।

उद्वर्तनासंक्रम—स्तोकस्य रसस्य प्रभूतीकरणमुद्वर्तनासंक्रमः। (पंचसं. वृ. संक्रम. ५२, पृ. ५७)। कर्म के थोड़े अनुभाग के अधिक करने को उद्वर्तनासंक्रम कहते हैं।

उद्वेग—१. इष्टवियोगेषु विक्लवभाव एवोद्वेगः। (नि. सा. वृ. १-६)। २. उद्वेगः स्थानस्थित्यैव उद्विग्नता। (षोडशक वृ. १४-३)।

१ इष्टवियोग होने पर विकलता के होने को उद्वेग कहते हैं।

उद्वेलनसंक्रम—१. उव्वेलणसंकमो णाम करण-परिणामेहि विणा रज्जुव्वेलणकमेण कम्मपदेसाणं परपयडिसरूवेण संछोहणा। (जयध.—कसायपा. पृ. ३९७, टि. ६)। २. करणपरिणामेन विना कर्मपरमाणूनां परप्रकृतिरूपेण निक्षेपणमुद्वेलनसंक्रमणम्। (गो. क. जी. प्र. टी. ४१३)।

अधःकरणादि परिणामों के विना रस्सी के उकेलने के समान कर्मपरमाणुओं के परप्रकृतिरूप से निक्षेपण को उद्वेलनसंक्रम कहते हैं।

उद्वेल्लिम — गंथिम-वाइमादिदव्वाणमुव्वेल्लणेण जाददव्वमुव्वेल्लिमं णाम। (धव. पु. ९, पृ. २७३)।

गूंथी गई (जैसे माला आदि) और बुनी गई वस्तुओं के अलग करने (उकेलने) से जो उनकी अवस्था प्रादुर्भूत होती है उसका नाम उद्वेल्लिम है।

उन्मग्ना नदी—णियजलपवाहपडिदं दव्वं गरुवं पि णेदि उवरिम्मि। जम्हा तम्हा भण्णइ उम्मग्गा वाहिणी एसा॥ (ति. प. ४–२३८; त्रि. सा. ५९४)।

जो नदी अपने जलप्रवाह में गिरे हुए भारी से भारी द्रव्य को भी ऊपर ले आती है उसका नाम उन्मग्ना है।

उन्मत्त—१. उन्मत्तो भूतादिगृहीतः। (गु. गु. षट्. स्वो. वृ. २२, पृ. ५२)। २. उन्मत्तो भूत-वातादिदोषेण वैकल्यमाप्तः। (आ. दि. १९, पृ. ७४)।

भूत-प्रेतादि से गृहीत (पीड़ित) पुरुष को उन्मत्त कहते हैं। वह दीक्षा के योग्य नहीं होता।

उन्मत्त दोष— × × × घूर्णनं मदिरार्तवत्। (अन. ध. ८–११९)।

मद्य पीकर भ्रान्तचित्त हुए मनुष्य के समान भ्रान्ति को प्राप्त होना, यह कायोत्सर्ग सम्बन्धी उन्मत्त नाम का दोष है।

उन्मान—१. से किं तं उम्माणे? जं णं उम्मिणिज्जइ। तं जहा—अद्धकरिसो करिसो पलं अद्धपलं अद्धतुला तुला अद्धभारो भारो। दो अद्धकरिसा करिसो, दो करिसा अद्धपलं, दो अद्धपलाइं पलं, पंचपलसइया तुला, दस तुलाओ अद्धभारो, वीसं तुलाओ भारो। (अनुयो. सू. १३२, पृ. १५३)। २. कुष्ठ-तगरादिभाण्डं येनोत्क्षिप्य मीयते तदुन्मानम्। (त. वा. ३, ३८, ३)। ३. उन्मीयतेऽनेनोन्मीयत इति वोन्मानं तुला-कर्पादिसूत्रसिद्धम्। (अनुयो. हरि. वृ. पृ. ७६)। ४. उन्मीयते तदित्युन्मानम्, उन्मीयतेऽनेनेति वा उन्मानमित्यादि। (अनुयो. मल. हेम. वृ. १३२, पृ. १५४)।

२ जिसके द्वारा ऊपर उठाकर कुष्ठ (औषधिविशेष) व तगर आदि तौले जाते हैं, ऐसी तराजू आदि को उन्मान कहा जाता है।

उन्मार्गदेशक (उम्मग्गदेसअ)—नाणाइ अदूसितो तव्विवरीयं तु उवदिसइ मग्गं। उम्मग्गदेसओ एस आयअहिओ परेसि च॥ (बृहत्क. १३२२)।

जो परमार्थभूत ज्ञानादि को दूषित न करता हुआ उन (ज्ञानादि) से विपरीत मार्ग का उपदेश करता है उसे उन्मार्गदेशक कहते हैं।

उन्मिश्रदोष—१. पुढवी आऊ य तहा हरिदा वीया तसा य सज्जीवा। पंचेहिं तेहिं मिस्सं आहारं होदि उम्मिस्सं॥ (मूला. ६–५३)। २. स्थावरैः पृथिव्यादिभिः, त्रसैः पिपीलिका-मत्कुणादिभिः सहितोन्मिश्राः। (भ. आ. विजयो. टी. २३०, पृ. ४४४)। ३. उन्मिश्रोऽप्रासुकेन द्रव्येण पृथिव्यादिसच्चित्तेन मिश्र उन्मिश्र इत्युच्यते, तं यद्यादत्ते उन्मिश्रनामाशनदोषः। (मूला. वृ. ६–४३)। ४. देयद्रव्यं खण्डादि सचित्तेन धान्यकणादिना मिश्रं ददत उन्मिश्रम्। (योगशा. स्वो. विव. १–३८; धर्मसं. मान. स्वो. वृ. ३–२२, पृ. ४२)।

१ सजीव पृथिवी, जल, हरितकाय, बीज और त्रस इन पांच से मिले हुए आहार को उन्मिश्र दोष (अशनदोष) से दूषित कहा जाता है।

उपकरण—१. येन निर्वृत्तेरुपकारः क्रियते तदुपकरणम्। (स. सि. २–१७; त. श्लो. २–१७)। २. विषयग्गहणसमत्थं उवगरणं इंदियंतरं तं पि। जं नेह तदुवघाए गिण्हइ निव्वित्तिभावे वि॥ (विशेषा. ३५६३)। ३. उपकरणं बाह्यमभ्यन्तरं च निर्वर्तितस्यानुपघातानुग्रहाभ्यामुपकारीति। (त. भा. २–१७)। ४. उपक्रियतेऽनेनेत्युपकरणम्। येन निर्वृत्तेरुपकारः क्रियते तदुपकरणम्। (त. वा. २, १७, ५; धव. पु. १, पृ. २३६; मूला. वृ. १२, १५६)। ५. निर्वर्तितस्य निष्पादितस्य स्वावयवविभागेन, निर्वृत्तीन्द्रियस्येति गम्यते, अनुपघातानुग्रहाभ्यामुपकारीति यदनुपहत्या उपग्रहेण चोपकरोति

तदुपकरणेन्द्रियमिति। (त. भा. हरि. वृ. २–१७)। ६. निर्वृत्तौ सत्यां कृपाणस्थानीयायामुपकरणेन्द्रियमवश्यमपेक्षितव्यम्। तच्च स्वविषयग्रहणशक्तियुक्तं खड्गस्येव धारा छेदनसमर्था तच्छक्तिरूपमिन्द्रियान्तरं निर्वृत्तौ सत्यपि शक्त्युपघातैर्विषयं न गृह्णाति तस्मान्निर्वृत्तेः श्रवणादिसंज्ञिके द्रव्येन्द्रिये तद्भावादात्मनोऽनुपघातानुग्रहाभ्यां यदुपकारि तदुपकरणेन्द्रियं भवति। ××× एतदेव स्फुटयति—निर्वर्तितस्य निष्पादितस्य स्वावयवविभागेन यदनुपहत्या अनुग्रहेण चोपकरोति ग्रहणमात्मनः स्वच्छतरपुद्गलजालनिर्मापितं तदुपकरणेन्द्रियमध्यवस्यन्ति विद्वांसः। (त. भा. सिद्ध. वृ. २–१७)। ७. उपक्रियतेऽनुगृह्यते ज्ञानसाधनमिन्द्रियमनेनेत्युपकरणमक्षिपत्र-शुक्ल-कृष्णतारकादिकम्। (भ. आ. विजयो. टी. ११५)। ८. तस्या एव निर्वृत्तेर्द्विरूपायाः येनोपकारः क्रियते तदुपकरणम्। (आचारा. शी. वृ. १, १, ६४, पृ. ६४)। ९. उपकरणं नाम खड्गस्थानीयाया वाह्यनिर्वृत्तेर्या खड्गधारास्थानीया स्वच्छतरपुद्गलसमूहात्मिकाऽभ्यन्तरा निर्वृत्तिस्तस्याः शक्तिविशेषः। (जीवाजी. मलय. वृ. १, १३, पृ. १६)। १०. उपकरणं वाह्यमाभ्यन्तरं च निर्वृत्तिः, तस्यानुपघातानुग्रहाभ्यामुपकरोति। (ज्ञानसार यशो. वृ. ७, पृ. २५)।

१ जिसके द्वारा निर्वृत्ति इन्द्रिय का उपकार किया जाता है उसे उपकरण इन्द्रिय कहते हैं।

उपकरणवकुश—१. उपकरणवकुशो वहुविशेषयुक्तोपकरणाकांक्षी। (स. सि. ९–४७; त. सुखबो. वृ. ९–४७)। २. उपकरणाभिष्वक्तचित्तो विविधविचित्रमहाधनोपकरणपरिग्रहयुक्तो वहुविशेषोपकरणाकांक्षायुक्तो नित्यं तत्प्रतिसंस्कारसेवी भिक्षुरुपकरणवकुशो भवति। (त. भा. ९–४९)। ३. उपकरणाभिष्वक्तचित्तो विविधविचित्रपरिग्रहयुक्तः वहुविशेषयुक्तोपकरणकांक्षी तत्संस्कार-प्रतीकारसेवी भिक्षुरुपकरणवकुशो भवति। (त. वा. ९, ४७, ४; चा. सा. पृ. ४६)। ४. उपकरणवकुशस्तु अकाल एव प्रक्षालितचोलपट्टकान्तरकल्पादिश्चोक्षकवासःप्रियः पात्र-दण्डकाद्यपि तैलपातया(त्र्या) उज्ज्वलीकृत्य विभूषार्थमनुवर्तमानो विभर्ति ऋद्धीः प्रभूतवस्त्र-पात्रादिकास्ताः इच्छन्ति कामयन्ते तत्कामाः, यशः ख्यातिगुणवन्तो विशिष्टाः साधवः इत्येवंविधः प्रवादः, तच्च यशः कामयन्त इति ऋद्धि-यशस्कामाः। (त. भा. सिद्ध. वृ. ९–४८)। ५. अकाल एव प्रक्षालितचोलपट्टकान्तरकल्पादिश्चोक्षवासःप्रियः पात्र-दण्डकाद्यपि विभूषार्थं तैलमात्रयोज्ज्वलीकृत्य धारयन्नुपकरणवकुशः। (प्रव. सारो. वृ. ७२४; धर्मसं. मान. स्वो. वृ. ३–५६, पृ. १५२)। ६. नानाविधोपकरणसंस्कार-प्रतीकाराकांक्षी उपकरणवकुश उच्यते। (त. वृत्ति श्रुत. ९–४७)।

३ जो भिक्षु उपकरणों में मुग्ध होता हुआ अनेक प्रकार के विचित्र परिग्रह से युक्त होता है तथा बहुत विशेष योग्य उपकरणों का अभिलाषी होकर उनके संस्कार की अपेक्षा करता है उसे उपकरणवकुश कहते हैं। ४ उपकरण वकुश वे साधु कहे जाते हैं जो असमय में चोलपट्ट (कटिवस्त्र) आदि को धोते हैं, उक्षवस्त्र (साध्वी का वस्त्रविशेष) में अनुराग रखते हैं। दण्ड व पात्र आदि स्वच्छ रख कर सजावट की अपेक्षा करते हैं, तथा प्रचुर वस्त्र-पात्रादि की इच्छा करते हुए कीर्ति व प्रसिद्धि को चाहते हैं।

उपकरणसंयम — उपकरणसंयम इत्यजीवकायसंयमः। अजीवकायश्च पुस्तकादिः, तत्र यदा ग्रहण-धारणशक्तिसम्पद्भाजो ऽभूवन् पुरुषाः दीर्घायुषश्च तदा नासीत् प्रयोजनं पुस्तकैः, दुःषमानुभावात् तु परिहीनैर्ग्रहण-धारणादिभिरस्ति निर्युक्त्यादिपुस्तकग्रहणानुज्ञेत्येवं यथाकालमपेक्ष्यासंयमः संयमो वा भवति। (त. भा. सिद्ध. वृ. ९–६)।

उपकरणसंयम से अभिप्राय अजीवकाय पुस्तक आदिविषयक संयम का है। जब संयत पुरुष दीर्घायु होकर ग्रहण-धारण शक्ति से सम्पन्न होते थे तब पुस्तक आदि से उन्हें कोई प्रयोजन नहीं रहता था। किन्तु दुःषमा काल के प्रभाव से यदि वे ग्रहण-धारण शक्ति से हीन होते हैं तो ऐसे संयतों को पुस्तक आदि के ग्रहण की अनुमति है। इस प्रकार समयानुसार अपेक्षाकृत संयम-असंयम होता है।

उपकरणसंयोजन(ना)—१. उपकरणानां पिच्छादीनां अन्योऽन्येन संयोजना शीतस्पर्शस्य पुस्तकस्य कमण्डलादेर्वा आतपादितप्तेन पिच्छेन प्रमार्जनम् इत्यादिकम्। (भ. आ. विजयो. टी. ८१५)। २. शीतस्य पुस्तकादेरातपादितप्तेन पिच्छादिना प्रमार्जनं प्रच्छादनादिकरणमुपकरणसंयोजनम्। (अन. ध. स्वो. टी. ४–२८)।

१ शीतल पुस्तकादि का सूर्य-सन्तप्त पिच्छी आदि से प्रमार्जन करने को उपकरणसंयोजन कहते हैं।

उपकरणेन्द्रिय—देखो उपकरण। १. उपकरणेन्द्रियं विषयग्रहणे समर्थम्, छेद्यच्छेदने खड्गस्येव धारा, यस्मिन्नुपहते निर्वृत्तिसद्भावेऽपि विषयं न गृह्णातीति। (ललितवि. पं. पृ. ३९)। २. तच्चोपकरणेन्द्रियं कदम्बपुष्पातिमुक्तकपुष्पक्षुरप्रनानाकृतिसंस्थितं श्रोत्र-घ्राण-रसन-स्पर्शनलक्षणं शब्द-गन्ध-रस-स्पर्शपरिणतद्रव्यसंघातो वा। (कर्मवि. दे. स्वो. वृ. गा. ४, पृ. ११)।

१ निर्वृत्ति का सद्भाव होने पर भी जिसके कुण्ठित या दूषित होने पर इन्द्रिय अपने विषय को ग्रहण न कर सके उसे उपकरणेन्द्रिय कहते हैं। जिस प्रकार तलवार या फरसा आदि की धार यदि मोथरी नहीं है, तो वह काष्ठादि के विदारण में समर्थ रहती है, इसी प्रकार यदि उपकरण इन्द्रिय कुण्ठित नहीं है तो वह नियत विषय के ग्रहण में समर्थ रहती है।

उपकारी (मैत्री)—उपकर्तुं शीलमस्येत्युपकारी, उपकारं विवक्षितपुरुषसम्बन्धिनमाश्रित्य या मैत्री लोके प्रसिद्धा सा प्रथमा। (षोडशक वृ. १३-६, पृ. ८८)।

किसी पुरुषविशेष से सम्बद्ध उपकारविशेष की अपेक्षा जो मित्रता का सम्बन्ध स्थापित होता है उसे उपकारी मैत्री कहते हैं।

उपक्रम—१. उपक्रमोऽपवर्तननिमित्तम्। (त. भा. २, ५२)। २. सत्थस्सोवक्कमणं उवक्कमो तेण तम्मि व तओ वा। सत्यसमीवीकरणं आणयणं नासदेसम्मि॥ (विशेषा. ९१४)। ३. तत्र शास्त्रस्य उपकरणम्, उपक्रमम्यतेऽनेनास्मादस्मिन्निति वा उपक्रमः, शास्त्रस्य न्यासः, देशानयनमित्यर्थः। (आव. नि. हरि. वृ. ७६, पृ. ५४); उपक्रमः प्रायः शास्त्रसमुत्थानार्थः उक्तः; ××× उपक्रमो ह्युद्देशमात्रनियतः। (आव. नि. हरि. वृ. १४१, पृ. १०५; उवरिमश्रुतादिहानयनमुपक्रमः। (आव. नि. हरि. व मलय. वृ. ६६५)। ४. तत्रोपक्रमणमुपक्रम इति भावसाधनः शास्त्रस्य न्यासदेशं समीपीकरणलक्षणः, उपक्रम्यते वाऽनेन गुरुवाग्योगेनेत्युपक्रमः करणसाधनः, उपक्रम्यतेऽस्मादिति वा विनीतविनेयविनयादित्युपक्रमः इत्यपादानसाधनः। (अनुयो. हरि. वृ. पृ. २७)। ५. ×××सोपक्रमा निरुपक्रमाश्च—बाहुल्येन अपवर्त्यायुषः अनपवर्त्यायुषश्च भवन्ति। (त. भा. हरि. वृ. २-५२)। ६. अर्थमात्मन उप समीपं क्राम्यति करोतीत्युपक्रमः। (धव. पु. १, पृ. ७२); उपक्रम्यतेऽनेन इत्युपक्रमः जेण करणभूदेण णाम-पमाणादीहि गंथो अवगम्यते सो उवक्कमो णाम। (धव. पु. ९, पृ. १३४)। ७. उपक्रम्यते समीपीक्रियते श्रोत्रा अनेन प्राभृतमित्युपक्रमः। (जयध. १, पृ. १३)। ८. प्रकृतस्यार्थतत्त्वस्य श्रोतृबुद्धौ समर्पणम्। उपक्रमोऽसौ विज्ञेयस्तथोपघात इत्यपि॥ (म. पु. २-१०३)। ९. उपक्रमणमुपक्रमः प्रत्यासन्नीकरणकारणमुपक्रमशब्दाभिधेयम्। अतिदीर्घकालस्थित्यप्यायुर्येन कारणविशेषेणाध्यवसानादिनाऽल्पकालस्थितिकमापद्यते स कारणकलाप उपक्रमः। (त. भा. सिद्ध. वृ. २-५१, पृ. २२०); उपक्रमो विषाग्नि-शस्त्रादिः। ××× न ह्येषां प्राणापानाहारनिरोधाध्यवसाननिमित्तवेदनापराघातस्पर्शाख्याः सप्त वेदनाविशेषाः सन्त्यायुषो भेदकाः उपक्रमा इति, अतो निरुपक्रमा एव। (त. भा. सिद्ध. वृ. २-५२, पृ. २२३)। १०. उपक्रम्यते क्रियतेऽनेनेत्युपक्रमः कर्मणो बद्धत्वोदीरितत्वादिना परिणमनहेतुर्जीवस्य शक्तिविशेषो योऽन्यत्र करणमिति रूढः, उपक्रमणं वोपक्रमो बन्धनादीनामारम्भः। प्रकृत्यादिबन्धनारम्भा वा उपक्रमा इति। उपक्रमस्तु प्रकृत्यादित्वेन पुद्गलानां परिणमनसमर्थं जीववीर्यम्। (स्थाना. अभय. वृ. ४, २, २९६, पृ. २१०)। ११. जेणाउमुवक्कमिज्जइ अप्पसमुत्थेण इअरगेणावि। सो अज्झवसाणाई उवक्कमो ××× ॥ (संग्रहणी २६६)। १२. शास्त्रमुपक्रम्यते समीपमानीयते निक्षेपस्थानेनेति उपक्रमः, निक्षेपयोग्यतापादनमिति भावः, उपक्रमान्तर्गतभेदैर्हि विचारितं निक्षिप्यते, नान्यथा। (आव. मलय. वृ. ७६, पृ. ९०)। १३. उपक्रमणमुपक्रमः, उपशब्दः सामीप्ये, 'क्रमु पादविक्षेपे', उपेति सामीप्येन क्रमणमुपक्रमः, दूरस्थस्य समीपापादनमित्यर्थः। (ओघनि. वृ. पृ. १)। १४. उपक्रमणमुपक्रम इति भावसाधनः व्याचिख्यासितशास्त्रस्य समीपानयनेन निक्षेपावसर-

प्रापणम्, उपक्रम्यते वाऽनेन गुरुवाग्योगेनेत्युपक्रम इति करणसाधनः । उपक्रम्यतेऽस्मिन्निति वा शिष्य-श्रमणभावे सतीत्युपक्रम इत्यधिकरणसाधनः, उपक्रम्यतेऽस्मादिति वा विनेयविनयादित्युपक्रमः इत्यपादानसाधन इति । (जम्बूद्वी. वृ. ५) ।

१ आयु के अपवर्तन (विघात) का जो कारण है उसे उपक्रम कहते हैं। ६ जिसके द्वारा नाम व प्रमाणादि से ग्रन्थ का बोध होता है उसे उपक्रम कहा जाता है। १० जीव की जो विशिष्ट शक्ति कर्म की बद्धता और उदीरता आदि रूप से परिणमन में कारण होती है उसे उपक्रम कहते हैं। अन्यत्र इसे करण भी कहा गया है।

उपक्रमकाल—१. उपक्रमणमुपक्रमः अभिप्रेतस्यार्थस्य सामीप्यापादनम्, उपक्रमस्य कालः भूयिष्ठक्रियापरिणामः, प्रभूतकालप्राप्यं स्वल्पकालप्राप्यं भवति स उपक्रमकालः। (विशेषा. को. वृ. २५४०, पृ. ६०८)। २. उपक्रमकालः अभिप्रेतार्थसामीप्यानयनलक्षणः सामाचारीयथायुष्कभेदभिन्नो वाच्यः। (आव. नि. मलय. वृ. ६६०)।

१ अभीष्ट अर्थ को समीप में लाने रूप उपक्रम का जो काल है उसे उपक्रम काल कहते हैं।

उपगतश्लाघत्व—उपगतश्लाघत्वं उक्तगुणयोगात् प्राप्तश्लाघता। (समवा. अभय. वृ. ३५; रायप. वृ. पृ. १७)।

परनिन्दा व आत्मोत्कर्ष से रहित होने के कारण जो वचन को श्लाघता—प्रशस्तता—प्राप्त होती है उसका नाम उपगतश्लाघत्व है। यह सत्य वचन के ३५ अतिशयों में से २४वाँ है।

उपगूहन—देखो उपबृंहण। १. दंसण-चरणविवण्णे जीवे दट्ठूण धम्मभत्तीए। उवगूहणं करितो दंसणसुद्धो हवदि एसो ॥ (मूला. ५-६४)। २. जो सिद्धभत्तिजुत्तो उपगूहणगो दु सव्वधम्माणं। सो उवगूहणगारी सम्मादिट्ठी मुणेदव्वो ॥ (समयप्रा. २५१)। ३. स्वयं शुद्धस्य मार्गस्य बालाशक्तजनाश्रयाम्। वाच्यतां यत्प्रमार्जन्ति तद्वदन्त्युपगूहनम् ॥ (रत्नक. १५)। ४. हिताहितविवेकविकलं व्रताद्यनुष्ठानेऽसमर्थजनमाश्रित्य रत्नत्रये तद्वति वा दोपस्य यत्प्रच्छादनं तदुपगूहनम्। (रत्नक. टी. १-१५)। ५. उपगूहनं चातुर्वर्ण्यश्रमणसंघदोषापहरणं प्रमादाचरितस्य च संवरणम्। (मूला. वृ. ४-४)। ६. जो परदोसं गोवदि णियसुकयं जो ण पयडदे लोए। भवियव्वभावणरओ उवगूहणकारगो सो हु ॥ (कार्तिके. ४१९)। ७. यद्वत्पुत्रकृतं दोषं यत्नान्माता निगूहति। तद्वत्सद्धर्मदोषोपगूहः स्यादुपगूहनम् ॥ (आचा. सा. ३-६१)। ८. यो निरीक्ष्य यतिलोकदूषणं कर्मपाकजनितं विशुद्धधीः। सर्वथाऽप्यवति धर्मबुद्धितः कोविदास्तमुपगूहकं विदुः ॥ (अमित. श्रा. ३-३७)। ९. भेदाभेदरत्नत्रयभावनारूपो मोक्षमार्गः स्वभावेन शुद्ध एव तावत्। तत्राज्ञानिजननिमित्तेन तथैवाशक्तजननिमित्तेन च धर्मस्य पैशून्यं दूषणमपवादो दुष्प्रभावना यदा भवति तदागमाविरोधेन यथाशक्त्यार्थेन धर्मोपदेशेन वा यद्धर्मार्थं दोषस्य झम्पनं निवारणं क्रियते तद् व्यवहारनयेनोपगूहनं भण्यते। तथैव निश्चयेन पुनस्तस्यैव व्यवहारोपगूहनगुणस्य सहकारित्वेन निजनिरञ्जननिर्दोषपरमात्मनः प्रच्छादका ये मिथ्यात्व-रागादिदोषास्तेषां तस्मिन्नेव परमात्मनि सम्यक्श्रद्धान-ज्ञानानुष्ठानरूपं यद् ध्यानं तेन प्रच्छादनं विनाशनं गोपनं झम्पनं तदेवोपगूहनम्। (बृ. द्रव्यसं. वृ. ४१)। १०. स्वयमकलंकस्य मार्गस्य बालाशक्तजनाश्रयवाच्यतानिरास उपगूहनम्। (भ. आ. मूला. टी. ४५)। ११. रत्नत्रयोपयुक्तस्य जनस्य कस्यचित् क्वचित्। गोपनं प्राप्तदोषस्य तद् भवत्युपगूहनम् ॥ (भावसं. वाम. ४१४)। १२. उत्तमक्षमादिरात्मनो धर्मवृद्धिकरणं संघदोषाच्छादनं चोपबृंहणमुपगूहनम्। (भा. प्रा. टी. ७७; त. वृत्ति श्रुत. ६-२४)। १३. उत्तमक्षमादिभावनया आत्मनः चतुर्विधसंघस्य दोषझम्पनं सम्यक्त्वस्य उपबृंहणम् उपगूहननामा गुणः। (कार्तिके. टी. ३२६)।

३ बाल (अज्ञानी) एवं अशक्त जनों के द्वारा विशुद्ध मोक्षमार्ग की होनेवाली निन्दा के दूर करने को उपगूहन अंग कहते हैं।

उपग्रह—१. उपग्रहो निमित्तमपेक्षा कारणं हेतुरित्यनर्थान्तरम्। (त. भा. ५-१७)। २. उपग्रहोऽनुग्रहः। द्रव्याणां शक्त्यन्तराविर्भावे कारणभावोऽनुग्रह उपग्रह इत्याख्यायते। (त. वा. ५, १७, ३)।

२. द्रव्यों की अन्य शक्ति के आविर्भाव में निमित्तता रूप अनुग्रह का नाम उपग्रह है।

उपघात—१. प्रशस्तज्ञानदूषणमुपघातः। (स. सि. ६-१०)। २. प्रशस्तज्ञानदूषणमुपघातः। स्वमतेः

कलुषभावात् युक्तस्याप्ययुक्तवत्प्रतीतेः दोषोद्भावनं दूषणमुपघात इति विज्ञायते। (त. वा. ६, १०, ६)। ३. प्रशस्तस्यापि ज्ञानस्य दर्शनस्य वा दूषणमुपघातः। (त. श्लो. ६-१०)। ४. युक्तमपि ज्ञानं वर्तते, तस्य युक्तस्य ज्ञानस्य अयुक्तमिदं ज्ञानमिति दूषणप्रदानम् उपघात उच्यते, सम्यग्ज्ञानविनाशाभिप्राय इत्यर्थः। (त. वृत्ति श्रुत. ६-१०)। ५. मनसा वाचा वा प्रशस्तज्ञानदूषणमध्येतृषु क्षुद्रबाधाकरणं वा उपघातः। (गो. क. जी. प्र. टी. ८००)।

१ किसी व्याख्याता के प्रशस्त ज्ञान में दूषण लगाने को उपघात कहते हैं।

उपघातजनक —उपघातजनकं सत्त्वोपघातजनकम्। यथा वेदविहिता हिंसा धर्माय इत्यादि। (आव. नि. हरि. व मलय. वृ. ८८१)।

प्राणियों का घात करने वाले वचनों को उपघातजनक वचन कहते हैं। जैसे—वेदविहित हिंसा धर्म का कारण होती है।

उपघातनाम—१. यस्योदयात्स्वयंकृतोद्बन्धन-मरुप्रपतनादिनिमित्त उपघातो भवति तदुपघातनाम। (स. सि. ८-११)। २. शरीराङ्गोपाङ्गोपघातकमुपघातनाम, स्वपराक्रमविजयाद्युपघातजनकं वा। (त. भा. ८-१२, पृ. १५७)। ३. **यदुदयात् स्वयंकृतोद्बन्धनाद्युपघातस्तदुपघातनाम।** यस्योदयात् स्वयंकृतोद्बन्धन-मरुत्प्रपतनादिनिमित्त उपघातो भवति तदुपघातनाम। (त. वा. ८, ११, १३)। ४. उपघातनाम यदुदयात् उपहन्यते। (श्रा. प्र. टी. २१)। ५. उपेत्य घातः उपघात आत्मघात इत्यर्थः। जं कम्मं जीवपीडाहेदुअवयवे कुणदि जीवपीडाहेदुदव्वाणि वा विसासि-पासादीणि जीवस्स ढोएदि तं उवघादणाम। (धव. पु. ६, पृ. ५९); जस्स कम्मस्स उदएण सरीरमप्पणो चेव पीडं करेदि तं कम्ममुवघादं णाम। (धव. पु. १३, पृ. ३६४)। ६. यदुदयात् स्वयंकृतो बन्धनाद्युपघातस्तदुपघात नाम। (त. श्लो. ८-११)। ७. स्वशरीरोपहननमित्युपघातः। (पंचसं. स्वो. वृ. ३-६)। ८. अंगावयवो पडिजिब्भियाइ अप्पणो उवग्घायं। कुणइ हु देहम्मि ठिओ सो उवघायस्स उ विवागो। (कर्मवि. ग. ११६)। ९. स्वशरीरावयवैरेव नखादिभिः शरीरान्तःवर्द्धमानैर्यदुदयादुपहन्यते पीड्यते तदुपघातनाम। (कर्मस्त. गो. वृ. ९-१०, पृ. ८८)। १०. उपेत्य घात उपघातः यस्योदयात् स्वयंकृतोद्बन्धनमरुत्पतनादिनिमित्त उपघातो भवति तदुपघातनाम। अथवा यत्कर्म जीवस्य स्वपीडाहेतूनवयवान् महाशृंगलाम्बस्तानुदरादीन् करोति तदुपघातनाम। (मूला. वृ. १२-१९४)। ११. यतोऽङ्गावयवः प्रतिजिह्विकादिरात्मोपघातको जायते तदुपघातनाम। (समवा. अभय. वृ. ४२, पृ. ६४)। १२. यस्योदयात् स्वयंकृतोद्बन्धन-प्राणापाननिरोधादिनिमित्त उपघातो भवति तदुपघातनाम। (भ. आ. मूला. टी. २१२४) १३. यदुदयवशात् स्वशरीरावयवैरेव शरीरान्तःपरिवर्द्धमानैः प्रतिजिह्वा-गलवृन्दलंक (प्रज्ञा.—गलवृन्दलम्बक, षष्ठ क.—गलवृन्दलंचक) चोरदन्तादिभिरुपहन्यते, यद्वा स्वयंकृतोद्बन्धन-भैरवप्रपातादिभिस्तदुपघातनाम। (पंचसं. मलय. वृ. ३-७; पृ. ११५; प्रज्ञाप. मलय. वृ. २३-२९१, पृ. ४७३; षष्ठ कर्म. मलय. वृ. ६, पृ. १२६)। १४. उपघातनाम यदुदयात् स्वशरीरावयवैरेव प्रतिजिह्वालम्बक-गलवृन्द-चोरदन्ताभिः प्रवर्तमानैर्जन्तुरुपहन्यते। (धर्मसं. मलय. वृ. ६१८)। १५. स्वशरीरावयवैरेव प्रतिजिह्वा-वृन्दलम्बक-चौरदन्तादिभिः शरीरान्तर्वर्धमानैः यदुदयादुपहन्यते पीड्यते तदुपघातनाम। (शतक. मल. हेम. वृ. ३७-३८, पृ. ५१; प्रव. सारो. वृ. १२९३)। १६. उपेत्य घात उपघात आत्मघात इत्यर्थः, यस्योदयादात्मघातावयवाः महाशृंगलम्बस्तनतुन्दोदरादयो भवन्ति तदुपघातनाम। (गो. क. जी. प्र. टी. ३२)। १७. उवघाया उवहम्मइ सतणुवयलंबिगाईहिं। (कर्मवि. दे. ४७); यदुदयवशात् स्वशरीरान्तःप्रवर्द्धमानैर्लम्बिकाप्रतिजिह्वाचौरदन्तादिभिर्जन्तुरुपहन्यते तदुपघातनाम। (कर्मवि. दे. स्वो. वृ. ७४, पृ. ५५)। १८. यदुदयेन स्वयमेव गले पाशं बद्ध्वा वृक्षादौ अवलम्ब्य उद्बन्धमरणं करोति तदुपघातनाम्। (त. वृत्ति श्रुत. ८-११)।

१ जिस कर्म के उदय से स्वयंकृत बन्धन और पर्वतपात आदि के द्वारा अपना ही उपघात (मरण) हो उसे उपघात नामकर्म कहते हैं। ९ जिसके उदय से शरीर के भीतर बढ़ने वाले प्रतिजिह्वा आदि अवयवों के द्वारा जीव का अपना ही घात होता है वह उपघात नामकर्म कहलाता है।

उपघातनिःसृता—१. जं उवघायपरिणओ भासइ वयणं अलीअमिह जीवो। उवघायणिस्सिआ सा ××× ॥ (भाषार. ५१); उपघातपरिणतः पराशुभचिन्तनपरिणत इह जगति जीवो यदलीकं वचनं भाषते सा उपघातनिःसृता। (भाषार. टी. ५१)।

मनुष्य जो दूसरे के अशुभचिन्तन में रत होकर असत्य वचन बोलता है उसे उपघातनिःसृता भाषा कहते हैं।

उपचय—१. उपचयनं चितस्याबाधाकालं मुक्त्वा ज्ञानावरणीयादितया निषेकः। स च एवम्—प्रथमस्थितौ बहुतरं कर्मदलिकं निषिञ्चति, ततो द्वितीयायां विशेषहीनम्, एवं यावदुत्कृष्टायां विशेषहीनं निषिञ्चति। (स्थाना. अभय. वृ. ४, १, २५०, पृ. १८३)। २. उपचयो नाम स्वस्याबाधाकालस्योपरि ज्ञानावरणीयादिकर्मपुद्गलानां वेदनार्थं निषेकः। (प्रज्ञाप. मलय. वृ. १४–१६०)।

गृहीत कर्मपुद्गलों के अबाधाकाल को छोड़कर आगे ज्ञानावरणादि स्वरूप से निसिञ्चन करना—क्षेपण करना, इसका नाम उपचय है।

उपचयद्रव्यमन्द—उपचयद्रव्यमन्दो नाम यः परिस्थूरतरशरीरतया गमनादिव्यापारं कर्तुं न शक्नोति। (बृहत्क. वृ. ६९७)।

जो शरीर के अधिक स्थूल होने से गमनागमन आदि कार्यों के करने में असमर्थ हो उसे उपचयद्रव्यमन्द कहते हैं।

उपचयपद—१. तत्रोपचितावयवनिबन्धनानि (अवयवपदानि)। यथा—गलगण्डः, शिलीपदः, लम्बकर्ण इत्यदीनि नामानि। (धव. पु. १, पृ. ७७)। २. सिलीवदी गलगंडो दीहनासो लंबकण्णो इच्चेवमादीणि णामाणि उवचयपदाणि, सरीरे उवचिदमवयवमवेक्खिय एदेसिं णामाणं पउत्तिदंसणादो। (जयध. पु. १, पृ. ३२-३३)।

२ शरीर के अवयवों में वृद्धि होने से जो विशिष्ट अवयव होते हैं उन्हें उपचयपद कहते हैं। जैसे—शिलीपदी, गलगण्ड, दीर्घनास और लम्बे कान वाला आदि।

उपचयभावमन्द—उपचयभावमन्दः पुनर्यो बुद्धेरुपचयेन यतस्ततः कार्यं कर्तुं नोत्सहते। ××× अथवा तलिना' सूक्ष्मा कुशाग्रीया बुद्धिः श्रेष्ठा, ततः सा सूक्ष्मतन्तुव्यूतपटीवत् अन्तःसारवत्त्वेन उपचितेति कृत्वा यः कुशाग्रीयमतिः स उपचयभावमन्दः। (बृहत्क. वृ. ६९७)।

जो बुद्धि के उपचय से इधर-उधर के कार्य करने में उत्साहित नहीं होता उसे उपचयभावमन्द कहते हैं। अथवा सारयुक्त होने से सूक्ष्म कुशाग्रबुद्धि उपचित कही जाती है, उस कुशाग्रबुद्धि से जो संयुक्त हो उसे उपचयभावमन्द कहते हैं।

उपचरित भाव—एकत्र निश्चितो भावः परत्र चोपचर्यते। उपचरितभावः सः ××× ॥ (द्रव्यानु. त. १२–१०)।

एकत्र निश्चित भाव का अन्यत्र जो उपचार किया जाता है उसे उपचरितभाव कहते हैं।

उपचरितसद्भूतव्यवहारनय—१. उपचरितः सद्भूतो व्यवहारः स्यान्नयो यथानाम। अविरुद्धे हेतुवशात् परतोऽप्युपचर्यते यथा स्वगुणः॥ अर्थविकल्पो ज्ञानं प्रमाणमिति लक्ष्यतेऽधुनापि यथा। अर्थः स्व-परनिकायो भवति विकल्पस्तु चित्तदाकारम्॥ (पंचाध्यायी १, ५४०-४१)। २. सोपाधिगुण-गुणिनोर्भेदविषय उपचरितसद्भूतव्यवहारः। यथा जीवस्य मतिज्ञानादयो गुणाः। (नयप्र. पृ. १०२)।

२ उपाधिसहित गुण और गुणी में भेद को जो विषय करता है उसे उपचरित-सद्भूत-व्यवहारनय कहते हैं। जैसे—जीव के मतिज्ञान आदि गुण।

उपचरितासद्भूतव्यवहारनय—१. उपचरितोऽसद्भूतोव्यवहाराख्यो नयः स भवति यथा। क्रोधाद्या औदयिकाश्चितश्चेद् बुद्धिजा विवक्ष्याः स्युः॥ (पंचाध्यायी १–५४६)। २. यश्चैकेनोपचारेणोपचारो हि विधीयते। स स्यादुपचरिताद्यसद्भूतव्यवहारकः॥ (द्रव्यानु. त. ७–१३)। ३. अन्यत्र प्रसिद्धस्य धर्मस्यान्यत्र समारोपणमसद्भूतव्यवहारः॥१२॥ असद्भूतव्यवहार एवोपचारः, यः उपचारादप्युपचारं करोति स उपचरितासद्भूतव्यवहारः। यथा देवदत्तस्य धनमिति, अत्र संश्लेषरहितं वस्तु सम्बन्धसहितवस्तुसम्बन्धविषयः॥१३॥ (नयप्र. पृ. १०३)।

१ जीव के क्रोधादि भाव यदि बुद्धिपूर्वक संजात विवक्षित हैं तो उन्हें जीव के औदयिक भाव मानना यह उपचरित-असद्भूतव्यवहारनय है। ३ अन्य वस्तु के प्रसिद्ध धर्म का अन्य में आरोप करना,

इसका नाम असद्भूतव्यवहारनय है। जैसे—देवदत्त का घन। सम्बन्ध रहित धनरूप वस्तु यहां सम्बन्ध-सहित देवदत्त के सम्बन्ध का विषय बन गई है।

उपचारछल—१. धर्माध्यारोपनिर्देशे सत्यार्थप्रतिषेधनम्। उपचारछलं मंचाः क्रोशन्तीत्यादिगोचरम्॥ अत्राभिधानस्य धर्मो यथार्थे प्रयोगस्तस्याध्यारोप्यो विकल्पः अन्यत्र दृष्टस्य अन्यत्र प्रयोगः, मंचाः क्रोशन्ति गायन्तीत्यादौ शब्दप्रयोगवत्। स्थानेषु हि मंचेषु स्थानिनां पुरुषाणां धर्ममाक्रोष्टित्वादिकं समारोप्य जनैस्तथा प्रयोगः क्रियते गौणशब्दार्थश्रयणात् सामान्यादिष्वस्तीति शब्दप्रयोगवत्। तस्य धर्माध्यारोपनिर्देशे सत्यर्थस्य प्रतिषेधनम्, न मंचाः क्रोशन्ति, मचस्थाः पुरुषाः क्रोशन्तीति। तदिदमुपचारछलं प्रत्येयम्। (त. श्लो. १-२६६, पृ. २६६; सिद्धिवि. टी. ५-२, पृ. ३१७)। २. धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारछलम्। (प्र. क. मा. ६, ७३, पृ. ६५१)।

१ धर्म के अध्यारोप का (उपचार का) निर्देश करने पर सत्य अर्थ के सद्भाव का निषेध करने को उपचार छल कहते हैं। जैसे—'मंचाः क्रोशन्ति' (मंच चिल्लाते हैं) ऐसा कहने पर उसका निषेध करते हुए कहना कि 'न मंचाः क्रोशन्ति, किन्तु मंचस्थाः पुरुषाः क्रोशन्ति' (मंच नहीं चिल्लाते हैं, किन्तु मंच पर बैठे पुरुष चिल्ला रहे हैं।) यह उपचारछल है।

उपचारविनय—१. प्रत्यक्षेष्वाचार्यादिषु अभ्युत्थानाभिगमनाञ्जलिकरणादिरुपचारविनयः। (स. सि. ६-२३; त. वा. ६, २३, ५; त. श्लो. ६-२३)। २. उपचारविनयोऽभ्युत्थानासनप्रदानाञ्जलिप्रग्रहादिभेदः। (त. भा. हरि. व सिद्ध. वृ. ६-२३)। ३. अभ्युत्थानानुगमनं वन्दनादीनि कुर्वतः। आचार्यादिषु पूज्येषु विनयो ह्यौपचारिकः॥ (त. सा. ७-३४)। ४. प्रत्यक्षेष्वाचार्यादिष्वभ्युत्थानाभिगमनाञ्जलिकरणादिः उपचारविनयः, परोक्षेष्वपि काय-वाङ्-मनोभिरञ्जलिक्रियागुणसंकीर्तनानुस्मरणादिरुपचारविनयः। (योगशा. स्वो. विव. ४-६०)। ५. उपोण्सृत्यरचारैः [चारः] उपचारो यथोचितः। स प्रत्यक्ष परोक्षात्मा तत्राद्यः प्रतिपाद्यते॥ अभ्युत्थानं नतिः सूरावागच्छति सति स्थिते। स्थानं नीचैर्निविष्टेऽपि शयनोच्चासनोज्झनम्॥ गच्छत्यनुगमो वक्तर्यनुकूले वचो मनः। प्रमोदीत्यादिकं चैवं पाठकादिचतुष्टये॥ आचार्यादिष्वसत्स्वेवं स्थविरस्य मुनेर्गणे। प्रतिरूपकालयोग्या क्रिया चान्येषु साधुषु॥ आर्या-देशयमाऽसंयतादिषूचितसत्क्रिया। कर्तव्या चेत्यदः प्रत्यक्षोपचारोपलक्षणम्॥ ज्ञान-विज्ञानसत्कीर्तिर्नतिराज्ञाऽनुवर्तनम्। परोक्षे गणनाथानां परोक्षप्रश्रयः परः॥ (आचा. सा. ६, ७७-८२)। ६. अभ्युत्थानोचितवितरणोच्चासनाद्युज्झनानुव्रज्यापीठाद्युपनयविधिः कालभावाङ्गयोग्यः। कृत्याचारः प्रणतिरिति चाङ्गेन सप्तप्रकारः कार्यः साक्षाद् गुरुषु विनयः सिद्धिकामैस्तुरीयः॥ हितं मितं परिमितं वचः सूत्रानुवीचि च। ब्रुवन् पूज्यांश्चतुर्भेदं वाचिकं विनयं भजेत्॥ निरुन्धन्नशुभं भावं कुर्वन् प्रियहिते मतिम्। आचार्यादिरवाप्नोति मानसं विनयं द्विधा॥ वाङ्मनस्तनुभिः स्तोत्रस्मृत्यञ्जलिपुटादिकम्। परोक्षेष्वपि पूज्येषु विदध्याद्विनयं त्रिधा॥ (अन. ध. ७, ७१-७४)। ७. प्रत्यक्षेष्वाचार्यादिष्वभ्युत्थानवन्दनानुगमनादिरात्मानुरूपः, परोक्षेष्वपि तेष्वञ्जलिक्रिया - गुणकीर्तनं - स्मरणानुज्ञानुष्ठायित्वादिश्च काय-वाङ्-मनोभिरुपचारविनयः। (भा. प्रा. टी. ७८; त. वृत्ति श्रुत. ६-२३)।

१ आचार्य आदि के सन्मुख आने पर उठ कर खड़ा होना, सन्मुख जाना और हाथ जोड़कर प्रणाम करना; इत्यादि सब उपचार विनय कहलाता है।

उपचारोपेतत्व—उपचारोपेतत्वम् अग्राम्यता। (समवा. अभय. वृ. ३५; रायप. टी. पृ. १६)।

वचनप्रयोग में ग्रामीणता का न होना, इसका नाम उपचारोपेतत्व है। यह ३५ सत्यवचनातिशयों में तीसरा है।

उपदेश—उपदेशो मौनीन्द्र प्रवचनप्रतिपादनरूपः। भव-जलधियानपात्रप्रायः खल्वयम्, अस्य श्रवणमात्रादेव समीहितसिद्धेः, सुतरां च तदर्थज्ञानात्। (शास्त्रवा. टी. १-७)।

जिनेन्द्रदेव के वचनों के प्रतिपादन करने को उपदेश कहते हैं।

उपदेशरुचि—१. तीर्थंकर-बलदेवादिशुभचरितोपदेशहेतुकश्रद्धाना उपदेशरुचयः। (त. वा. ३-३६)। २. एए चेव उ भावे उवइट्ठे जो परेण सद्दहइ। छउमत्थेण जिणेण व उवएसरुइ त्ति नायव्वो॥ (उत्तरा. २८-१६; प्रव. सारो. ६५२)। ३. भावान् उपदिष्टान् यः परेण श्रद्दधाति छद्मस्थेन जिनेन वा स

उपदेशरुचिरिति ज्ञातव्यः। (उत्तरा. वृ. २८, १६)। ४. उपदेशो गुर्वादिभिर्वस्तुतत्त्वकथनम्, तेन रुचिः उक्तरूपा यस्य स उपदेशरुचिः। (प्रव. सारो. वृ. ६५४)। ५. परोपदेशप्रयुक्तं जीवाजीवादिपदार्थविषयि श्रद्धानम् उपदेशरुचिः। (धर्मसं. मान. स्वो. वृ. २-२२, पृ. ३७)। ६. ××× तव्विवरीओ-वएसरुई ॥ (गु. गु. षट्. स्वो. वृ. पृ. ३६)।

१ तीर्थंकर एवं बलदेव आदि के उत्तम चरित्र के सुनने से जिसे तत्त्व-श्रद्धा उत्पन्न हुई हो उसे उपदेशरुचि—उपदेशसम्यक्त्व से सम्पन्न—कहा जाता है।

उपदेशसम्यक्त्व— देखो उपदेशरुचि। १. त्रिषष्टिपुरुषादीनां या पुराणप्ररूपणात्। श्रद्धा सद्यः समुत्पन्ना सोपदेशसमुद्भवा ॥ (म. पु. ७४-४४२, ४४३)। २. ××× पुरुषवरपुराणोपदेशोपजाता या संज्ञानागमाब्धिप्रसृतिभिरुपदेशादिरादेशि दृष्टिः। (आत्मानु. १२)। ३. पुराणपुरुषचरितश्रवणाभिनिवेश उपदेशः। (उपासका. पृ. ११४; अन. ध. स्वो. टी. २-६२)। ४. त्रिषष्ठिलक्षणमहापुराणसमाकर्णनेन बोधि-समाधिप्रदानकारणेन यदुत्पन्नं श्रद्धानं तदुपदेशनामकं सम्यग्दर्शनम्। (द. प्रा. टी. १२)।

तिरेसठ शलाका पुरुषों आदि के पुराण के सुनने से जो तत्त्वश्रद्धा उत्पन्न होती है उसे उपदेशसमुद्भव-श्रद्धा—उपदेशसम्यक्त्व कहते हैं।

उपद्रावण (ओद्दावण)—जीवस्य उपद्रवणं ओद्दावणं णाम। (धव. पु. १३, पृ. ४६)।

प्राणी को कष्ट पहुँचाना, इसे उपद्रावण नामक आधाकर्म कहा गया है।

उपधा—परवञ्चनेच्छा उपधा। (स्या. र. ५-८)। दूसरे को धोखा देने की इच्छा का नाम उपधा है।

उपधान—उपदधातीत्युपधानं तपः, तद्धि यद्यत्राध्ययने आगाढादियोगलक्षणमुक्तं तत्तत्र कार्यम्, तत्पूर्वकश्रुतग्रहणस्यैव सफलत्वात्। (दशवै. नि. हरि. वृ. ३-१८४, पृ. १०४)।

आगाढादिरूप योगविशेष का नाम उपधान (तप) है। जिसके अध्ययन में जो भी उपधान तप कहा गया है उसे वहां श्रुतग्रहण की सफलता के लिए करना ही चाहिए।

उपधान ज्ञानाचार— १. यावदिदमनुयोगद्वारं निष्ठामुपैति तावदिदं मया न भोक्तव्यम्, इदम् अनशनं चतुर्थ-षष्ठादिकं करिष्यामीति संकल्पः। (भ. आ. विजयो. टी. ११३; मूला. ११३)। २. उपधानमवग्रहविशेषेण पठनादिकं साहचर्यादुपधानाचारः। (मूला. वृ. ५-७२)।

१ जब तक अमुक अनुयोगद्वार समाप्त नहीं होता है तब तक मैं अमुक वस्तु का उपभोग नहीं करूंगा तथा एक या दो आदि उपवासों को करूँगा, इस प्रकार के संकल्प का नाम उपधान ज्ञानाचार है।

उपधि—१. उपदधाति तीर्थम् उपधिः (उत्तर. चू. पृ. २०४)। २. उपधीयते बलाधानार्थमित्युपधिः। योऽर्थोऽन्यस्य बलाधानार्थं उपधीयते स उपधिः। (त. वा. ६, २६, २)। ३. तत्रोपकरणं बाह्यं रजोहरण-पात्रादि स्थविर-जिनकल्पयोग्योपधिः, दुष्टवाङ् मनसोऽभ्यन्तरं क्रोधादिश्चातिदुस्त्यज उपधिः, शरीरं वा ऽभ्यन्तरोपधिरन्न-पानं च बाह्यम्। (त. भा. हरि. वृ. ६-६)। ४. उपेत्य क्रोधादयो धीयन्तेऽस्मिन्नित्युपधिः, क्रोधाद्युत्पत्तिनिबन्धनो बाह्यार्थ उपधिः। (धव. पु. १२, पृ. २८५)। ५. सद्भावं प्रच्छाद्य धर्मव्याजेन स्तैन्यादिदोषे प्रवृत्तिरुपधिसंज्ञिता माया। (भ. आ. विजयो. टी. २५)। ६. बाह्यचेष्टयोपधीयते बाह्यत इत्युपधिरन्यथापरिणामश्चित्तस्य। (त. भा. सिद्ध. वृ. ८-१०)। ७. उपधीयते पोष्यते जीवोऽनेनेत्युपधिः। (स्थानां. अभय. वृ. ३, १, १३८, पृ. ११४)। ८. औधिकौपग्रहिकभेदादुपधिर्द्विविधः। ××× तत्रौघोपधिर्नित्यमेव यो गृह्यते, भुज्यते पुनः कारणे न सः। औपग्रहिक स्तु स यस्य[कारणे न] ग्रहणं भोगश्चेत्युभयमपि कारणे न भवति। तदुक्तं पञ्चवस्तुके—ओहेण जस्स गहणं भोगो पुण कारणासओ होही। जस्स उभयं पि णियमा कारणओ सो उवग्गहिओ ॥ (धर्मसंग्रह. मान. स्वो. टी. २ पृ. ६२)। ६. उप सामीप्येन संयमं दधाति पोषयति चेत्युपधिः। (ध. ३ अ.—अभिधा. २, पृ. १०५६)।

४ क्रोधादि की उत्पत्ति के कारणभूत बाह्य पदार्थ को उपधि कहते हैं। ६ चित्त का जो अन्यथा—कपटरूप—परिणाम है, उसे उपधिरूप परिणाम कहा जाता है। यह माया कषाय का नामान्तर है। ६ जिसकी समीपता से संयम का धारण एवं पोषण हो, ऐसे ज्ञान-संयम के उपकरणों को भी उपधि कहते हैं।

उपधिवाक्—यां वाचं श्रुत्वा परिग्रहार्जन-रक्षणादिष्वासज्यते सोपधिवाक् । (त. वा. १, २०, १२, पृ. ७५; धव. पु. १, पृ. ११७) ।

परिग्रह के अर्जन एवं रक्षण आदि में आसक्ति उत्पन्न करने वाले वचनों को उपधिवाक् कहते हैं।

उपधिविवेक—कायेनोपकरणानामनादानम्, अस्थापनं क्वचिदरक्षा चोपधिविवेक: । परित्यक्तानीमानि ज्ञानोपकरणादीनीति वचनं वाचा उपधिविवेक: । (भ. आ. विजयो. टी. १६८; मूला. वृ. ३-१६८—अत्र 'ज्ञानोपकरणादीनि' पदं नास्ति ।)

ज्ञान-संयमादि के परित्यक्त उपकरणों के काय से नहीं ग्रहण करने को उपधिविवेक कहते हैं। 'इन उपकरणों को मैंने छोड़ दिया है' इस प्रकार का जो वचन है वह वचन से उपधिविवेक है।

उपनय—१. तत्-(नय-) शाखा-प्रशाखात्मोपनय: । (अष्टश. १०७) । २. एतेषां नयानां विषय उपनय: । (धव. पु. ६, पृ. १८२)। ३. हेतोरुपसंहार उपनय: । (परीक्षा. ३–४५) । ४. हेतो: साध्यधर्मिण्युपसंहरणमुपनय: । (प्र. न. त. ३–४६) । ५. हेतो: पक्षधर्मतयोपसहार उपनय: । (प्र. र. मा. ३-४५) । ६. उपनीयते साध्याविनाभावित्वेन विशिष्टो हेतु: साध्यधर्मिण्युपदृश्यते येन स उपनय: । (स्या. र. ३-४७)। ७. धर्मिणि साधनस्योपसंहार उपनय: । (प्रमाणमी. २, १, १४) । ८. दृष्टान्तधर्मिणि विसृतस्य साधनधर्मस्य साध्यधर्मिणि य उपसंहार: स उपनय:, उपसंह्रियतेऽनेनोपनीयतेऽनेनेति वचनरूप: । यथा धूमवांश्चायमिति । (प्रमाणमी. स्वो. वृ. २, १, १४) । ९. कृतोपनय: कृतो यथाविध्युपकल्पित उपनयो मौञ्जीबन्धादिलक्षणोपनीतिक्रिया यस्य स तथोक्त: । (सा. ध. स्वो. टी. २–१९) । १०. हेतोरुपसंहारमुपनय: । (ष. द. स. टी. पृ. २१०) । ११. दृष्टान्तापेक्षया पक्षे हेतोरुपसंहारवचनमुपनय: तथा चायं धूमवानिति । (न्या. दी. पृ. ७८) ।

१ नय की शाखा-प्रशाखाओं—भेद-प्रभेदों को—उपनय कहते हैं। ३ हेतु के उपसंहार को उपनय कहते हैं। ६ मौञ्जीबन्धनादिरूप उपनीति क्रिया को भी उपनय कहा जाता है।

उपनयन—तत्रोपनयनं नाम मनुष्याणां वर्णक्रमप्रवेशाय संस्कारो हि वेषमुद्रोद्वहनेन स्व-स्वगुरूपदिष्टे धर्ममार्गे निवेशयति । (आ. दि. १२, पृ. १८) ।

मनुष्यों को उनके वर्णों के अनुसार गुरूपदिष्ट अपने अपने धर्ममार्ग में एक निश्चित वेष-भूषा के साथ निविष्ट करने को उपनयन संस्कार कहते हैं।

उपनयब्रह्मचारिन्—१. उपनयनब्रह्मचारिणो गणधरसूत्रधारिण: समभ्यस्तागमा गृहिधर्मानुष्ठायिनो भवन्ति । (चा. सा. पृ. २०; सा. ध. स्वो. टी. ७–१९) । २. समभ्यस्तागमा नित्यं गणभृत्सूत्रधारिण: । गृहधर्मरतास्ते चोपनयब्रह्मचारिण: । (धर्मसं. श्रा. ९–१८) ।

१ जो गणधरसूत्र—यज्ञोपवीत—के धारक होकर आगमों का अभ्यास करते हैं और तत्पश्चात् गृहिधर्म का अनुष्ठान करने वाले होते हैं उन्हें उपनयब्रह्मचारी कहते हैं।

उपनयाभास—इह साध्यधर्मं साध्यधर्मिणि साधनधर्मं वा दृष्टान्तधर्मिणि उपसंहरत उपनयाभास: । (रत्नाकराव. ६–८१) ।

साध्यधर्म का साध्यधर्मी में अथवा साधनधर्म का दृष्टान्तधर्मी में उपसंहार करने को उपनयाभास कहते हैं।

उपनीत—उपनीतमुपनयोपसंहृतम् । (व्यव. भा. मलय. वृ. ७–१९०) ।

उपनय (अनुमानावयव) के उपसंहार से युक्त वाक्य को उपनीत वचन कहा जाता है।

उपनीतरागत्व—१. उपनीतरागत्वं मालकोशादिग्रामरागयुक्तता । (समवा. अभय. वृ. ३५, पृ. ६०)। २. उपनीतरागत्वं उत्पादितश्रोतृजनस्वविषयबहुमानता । (रायप. वृ. पृ. १६) ।

जिस सम्भाषण को सुनकर श्रोता जनों में अपने प्रति बहुत आदरभाव उत्पन्न हो उसका नाम उपनीतरागत्व है। यह ३५ सत्यवचनातिशयों में सातवां है।

उपपात — १. उपपातस्तूपपातक्षेत्रमात्रनिमित्त: प्रच्छदपटादेरुपरि देवदूष्याद्यधो वैक्रियिकशरीरप्रायोग्यद्रव्यादानादिति। (त. भा. हरि. वृ. २–३२)। २. उपपातक्षेत्रप्राप्तिमात्रनिमित्तं यज्जन्म तदुपपातजन्म । (त. भा. सिद्ध. वृ. २–३२) । ३. उपपात: प्रादुर्भावो जन्मान्तरसंक्रान्ति: । (आचारा. शी. वृ. १, १, १३) । ४. उपपतनमुपपातो देव-नारकाणां जन्म । (स्थाना. अभय. वृ. १–२८, पृ. १९) । ५. उपपतनमुपपात:, उत्पत्तिर्जन्मेति यावत् । (मंदहणी दे. वृ. १, पृ. ३) ।

१ जिस जन्म का कारण उपपात क्षेत्र मात्र होता है उसे उपपात जन्म कहते हैं। यह जन्म प्रच्छद पट (वस्त्रविशेष) के ऊपर और देवदूष्य के नीचे वैक्रियिक शरीर के योग्य द्रव्य के ग्रहण से होता है।

उपपाद—१. उपेत्य पद्यतेऽस्मिन्निति उपपादः। (स. सि. २–३१; त. श्लो. २–३१)। २. उपेत्य पद्यतेऽस्मिन्नित्युपपादः ॥ देव-नारकोत्पत्तिस्थान-विशेषसंज्ञा। (त. वा. २, ३१, ४)। ३. अप्पिद-गदीदो अण्णगदीए समुप्पत्ती उववादो णाम। × × ×. पोग्गलेपु अण्णपज्जाएण परिणामो उववादो णाम। (धव. पु. १३, पृ. ३४७)। ४. उपपादः अन्यस्मादागत्योत्पत्तिः। (मूला. वृ. १२–१)। ५. उपेत्य संपुटशय्याम् उष्ट्रादिकं वा आश्रित्य पदनं शरीरपरिणामयोग्यपुद्गलस्कन्धस्य गमनं प्राप्तिः उपपादः। रूढिशब्दोऽयं देव-नारकाणामेव जन्मवाची (गो. जी. मं. प्र. टी. ८३)। ६. उपपदनं संपुट-शय्योष्ट्रमुखाकारादिपु लघुनान्तर्मुहूर्तेनैव जीवस्य जननमुपपादः। (गो. जी. जी. प्र. टी. ८३); परि-त्यक्तपूर्वभवस्य उत्तरभवप्रथमसमये प्रवर्तनमुपपादः। (गो. जी. जी. प्र. ५४३)। ७. उपेत्य गत्वा पद्यते यस्मिन्निति उपपादः, देव-नारकाणां जन्मस्थानम्। (त. वृत्ति श्रुत. २–१४); उपेत्य पद्यते सम्पूर्णांगः उत्पद्यते यस्मिन् स उपपादः देवनारकोत्पत्तिस्थान-विशेष इत्यर्थः। (त. वृत्ति श्रुत. २–३१)।

३ विवक्षित गति से निकल कर अन्य गति में जन्म लेने को उपपाद कहा जाता है। ६ सम्पुटशय्या व उष्ट्रमुख आदि के आकारवाली नारक जन्मभूमियों में जीव के उत्पन्न होने का नाम उपपाद है।

उपपादयोगस्थान— उववादजोगठाणा भवादि-समयट्ठियस्स अवर-वरा। विग्गह-इजुगइगमणे जीव-समासे मुणेयव्वा ॥ (गो. क. २१६)।

जो योगस्थान जीव के नवीन भव प्राप्त करने के प्रथम समय में होते हैं उन्हें उपपादयोगस्थान कहते हैं।

उपप्रदान—उपप्रदानं अभिमतार्थदानम्। (विपाक. अभय. वृ. ४–४२, पृ. ४२)।

अभीष्ट अर्थ के दान को उपप्रदान कहा जाता है।

उपप्लुत स्थान—उपप्लुतं स्वचक्र-परचक्रविक्षो-भात् दुर्भिक्षमारीति-जनविरोधादेश्चाश्वस्थीभूतं यत्स्थानं निवासभूमिलक्षणं ग्रामनगरादि। (धर्मबि. मु. वृ. १–१६)।

स्वचक्र या परचक्र के आक्रमण से या दुर्भिक्ष, मारी, ईति और जनविरोध आदि से अशान्त स्थान को उपप्लुत स्थान कहते हैं।

उपबृंहण—देखो उपगूहन। १. उत्तमक्षमादिभाव-नयाऽऽत्मनो धर्मपरिवृद्धिकरणमुपबृंहणम्। (त. वा. ६, २४, १)। २. उपबृंहणं नाम समानधार्मिकाणां सद्गुणप्रशंसनेन तद्वृद्धिकारणम्। (दशवै. हरि. वृ. ३–१८२)। ३. उपबृंहणं नाम वर्धनम्। × × × स्पष्टेनाऽग्राम्येण श्रोत्र-मनःप्रीतिदायिना वस्तुयाथा-त्म्यप्रकाशनप्रवणेन धर्मोपदेशेन परस्य तत्त्वश्रद्धान-वर्द्धनमुपबृंहणम्। सर्वजनविस्मयकारणीं शतमख-प्रमुखगीर्वाणसमितिविरचितोपचितिसदृशीं पूजां संपाद्य दुर्धरतपोयोगानुष्ठाननेन वा आत्मनि श्रद्धा-स्थिरीकरणम्। (भ. आ. विजयो. टी. ४५)। ४. उत्तमक्षमादिभावनयात्मनः आत्मीयस्य च धर्म-परिवृद्धिकरणमुपबृंहणम्। (चा. सा. पृ. ३)। ५. धर्मोऽभिवर्धनीयः सदात्मनो मार्दवादिभावनया। परदोपनिगूहनमपि विधेयमुपबृंहणगुणार्थम्। (पु. सि. २७)। ६. टंकोत्कीर्णभावमयत्वेन समस्तात्म-शक्तीनामुपबृंहणादुपबृंहणम्। (समयप्रा. ज. वृ. २५१)। ७. तच्च (उपबृंहणं च) परस्य स्पष्टा-ग्राम्यश्रवण-मनःप्रीतिकरतत्त्वप्रकाशन-परधर्मोपदेशेन तत्त्वश्रद्धानस्फारीकरणम्, स्वस्य च शक्रनिर्मि-तसपर्यासोदर्यपूजाविशेषेण दुर्द्धरतपोयोगानुष्ठानेन जिनेन्द्रोपज्ञश्रुतज्ञानातिशयभावनया वा श्रद्धानवर्द्ध-नम्। (भ. आ. मूला. ४५)। ८. धर्मं स्वबन्धुमभि-भूष्णुकपायरक्षः, क्षेप्तुं क्षमादिपरमास्त्रपरः सदा स्यात्। धर्मोपबृंहणधियाऽबल-बालिशात्म यूथ्यात्ययं स्थगयितुं च जिनेन्द्रभक्तः ॥ (अन. ध. २–१०५)। ९. उपबृंहण नाम समानधार्मिकाणां क्षपण-वैया-वृत्त्यादिसद्गुणप्रशंसनेन तद्वृत्ति। (व्यव. भा. मलय. वृ. १–६४)। १०. उपबृंहा दर्शनगुणवतां प्रशंसया तत्तद्गुणपरिवर्द्धनम्। (उत्तरा. ने. वृ. २८, ३१)। ११. उपबृंहणं नाम समानधार्मिकाणां सद्गुणप्रशंशनेन तद्वृद्धिकरणम्।(ध. वि. मु. वृ. २-११; धर्मसं. मान. स्वो. वृ. १-२०)। १२. उपबृंहणमत्रास्ति गुणः सम्य-ग्दृगात्मनः। लक्षणादात्मशक्तीनामवश्यं बृंहणादिह ॥ आत्मशुद्धेरदौर्बल्यकरणं चोपबृहणं। अर्थाद्दृग्ज्ञप्ति-

चारित्रभावादस्खलनं हि तत् ॥ (लाटीसं. ४, २७९–८०; पञ्चाध्यायी २, ८७५–७६)।
१ उत्तम क्षमा आदि की भावना से अपने धर्म के बढ़ाने को उपबृंहण (उपगूहन) कहते हैं। २ साधर्मी बन्धुओं के समीचीन गुणों की प्रशंसा के द्वारा उनके बढ़ाने को उपबृंहण कहते हैं।

उपभोग—१. ××× भुक्त्वा पुनश्च भोक्तव्यः। उपभोगः ××× ॥ (रत्नक. ८३)। २. इन्द्रियप्रणालिकया शब्दादीनामुपलब्धिरुपभोगः। (स. सि. २–४४); उपभोगोऽशन-पान-गन्ध-माल्यादिः। (स. सि. ७–२१)। ३. इन्द्रियनिमित्तशब्दाद्युपलब्धिरुपभोगः। इन्द्रियप्रणालिकया शब्दादीनामुपलब्धिरुपभोग इत्युच्यते। (त. वा. २, ४४, २); उपेत्य भुज्यत इत्युपभोगः। उपेत्यात्मसात्कृत्य भुज्यते अनुभूयत इत्युपभोगः, अशन-पान-गन्ध-माल्यादिः। (त. वा, ७, २१, ९)। ४. उपेत्य भुज्यत इत्युपभोगः अशनादिः। (त. श्लो. ७–२१)। ५. उचितभोगसाधनावाप्त्यवन्ध्यहेतुः उपभोगः क्षायिकः। ××× पुनः पुनरुपभुज्यत इत्युपभोगः। (त. भा. हरि. वृ. २–४)। ६. उपभुज्यत इत्युपभोगः अशनादिः, उपशब्दस्य सकृदर्थत्वात्, सकृद् भुज्यत इत्यर्थः। (श्रा. प्र. टी. २६)। ७. उपभोगोऽन्न-पान-वसनाद्यासेवनम्। (त. भा. हरि. व सिद्ध. वृ. ६–२६)। ८. विषयसम्पदि सत्यां तथोत्तरगुणप्रकर्षात् तदनुभव उपभोगः, पुनः पुनरुपभोगाद् वा वस्त्र-पात्रादिरुपभोगः। (त. भा. सिद्ध. वृ. २–४)। ९. उपेत्यात्मसात्कृत्य भुज्यत इत्युपभोगः। (चा. सा. पृ. १२)। १०. वाहनाशन-पल्यङ्क-स्त्री-वस्त्राभरणादयः। भुज्यन्तेऽनेकधा यस्मादुपभोगाय ते मताः ॥ (सुभा. सं. ८१४)। ११. उपभोगो य पुणो पुण उवभुज्जइ भवण-विलयाई। (कर्मवि. ग. १६५, पृ. ६७)। १२. स उपभोगो भण्यते ××× यः पुनः पुनः सेव्यो भूयोभूयः सेव्यते, सेवित्वापि पुनः सेव्यते इत्यर्थः। (सा. ध. स्वो. टी. ५–१४)। १३. उवभोगो उ पुणो पुण उवभुज्जइ वत्थ-विलया इति। (प्रश्नव्या. वृ. पृ. २२०)। १४. पुनः पुनर्भुज्यते इत्युपभोगः। (पंचसं. मलय. वृ. ३–३, पृ. १०९; षष्ठ क. मलय. वृ. ६, पृ. १२७; धर्मसं. मलय. वृ. ६२३, शतक. मल. हेम. वृ. ३७–३८, पृ. ५१)। १५. उपेति पुनः पुनर्भुज्यते इति उपभोगो भवनाऽऽसनाङ्गनादि। उक्तं च—××× उवभोगो उ पुणो पुण उवभुज्जइ भवण-वणियाई ॥ (कर्मवि. दे. स्वो. वृ. ५१, पृ. ५८)। १६. भुज्यतेऽसकृदेवात्र स्यादुपभोगसंज्ञकः। (लाटीसं. ६, १४६)। १७. इन्द्रियद्वारेण शब्दादिविषयाणामुपलब्धिः उपभोगः। (त. वृत्ति श्रुत. २–४४)।
१ जो वस्तु बार-बार भोगी जा सके उसे उपभोग कहते हैं। २. श्रोत्र आदि इन्द्रियों के द्वारा शब्दादि विषयों की प्राप्ति को उपभोग कहा जाता है। ३ जो अशन-पान आदि एक ही बार भोगे जा सकते हैं उन्हें उपभोग कहा जाता है।

उपभोग-परिभोगपरिमाणव्रत—१. उपभोगोऽशन-पान-गन्ध-माल्यादिः, परिभोग आच्छादन-प्रावरणालङ्कार-शयनासन-गृह-वाहनादिः, तयोः परिमाणमुपभोग-परिभोगपरिमाणम्। (स. सि. ७, २१)। २. उपेत्य भुज्यते इत्युपभोगः। उपेत्यात्मसात्कृत्य भुज्यते अनुभूयत इत्युपभोगः अशन-पान-गन्ध-माल्यादिः। परित्यज्य भुज्यत इति परिभोगः। सकृद् भुक्त्वा परित्यज्य पुनरपि भुज्यते इति परिभोग इत्युच्यते, आच्छादन-प्रावरणालंकार-शयनासन-गृहयान-वाहनादिः। उपभोगश्च परिभोगश्च उपभोगपरिभोगौ, उपभोग-परिभोगयोः परिमाणम् उपभोगपरिभोगपरिमाणम्। (त. वा. ७, २१, ९–१०)।
३. गन्ध-माल्यान्न पानादिरुपभोग उपेत्य यः। भोगोऽन्यः परिभोगो यः परित्यज्यासनादिकः ॥ परिमाणं तयोर्यत्र यथाशक्ति यथायथम्। उपभोग-परीभोगपरिमाणव्रतं हि तत ॥ (ह. पु. ५८, १५५–५६)।
४. उपेत्य भुज्यत इत्युपभोगः अशनादिः। परित्यज्य भुज्यत इति परिभोगः, पुनः पुनर्भुज्यते इत्यर्थः, स वस्त्रादिः। परिमाणशब्दः प्रत्येकमुभाभ्यां सम्बन्धनीयः। (त. श्लो. ७–२१)। ५. उपेत्यात्मसात्कृत्य भुज्यत इत्युपभोगः, अशन-पान-गन्ध-माल्यादिः। सकृद् भुक्त्वा पुनरपि भुज्यत इति परिभोगः, आच्छादन-प्रावरणालङ्कार-शयनासन-गृह-यान-वाहनादिः। तयोः परिमाणमुपभोग-परिभोगपरिमाणम्। (चा. सा. पृ. १२)। ६. अशन-पान-गन्धमाल्य-ताम्बूलादिकमुपभोगः कथ्यते। आच्छादन-प्रावरण-भूषण-शय्यासन-गृह-यान-वाहन-

वनितादिकः परिभोग उच्यते । उपभोगश्च परिभोगश्च उपभोग-परिभोगौ, तयोः परिमाणम् उपभोगपरिभोगपरिमाणम् । भोगोपभोग-परिमाणमिति च क्वचित् पाठो वर्तते । तत्र अशनादिकं यत्सकृद् भुज्यते स भोगः, वस्त्र-वनितादिकं यत्पुनः पुनर्भुज्यते स उपभोगः तयोः परिमाणं भोगोपभोगपरिमाणम् । (त. वृत्ति श्रुत. ७–२१) ।

१ अन्न-पानादि उपभोग और वस्त्र-अलंकारादि परिभोग, इन दोनों का परिमाण करने को उपभोग-परिभोगपरिमाण कहते हैं ।

उपभोग-परिभोगव्रत—उपभोग-परिभोगव्रतं नाम अशन-पान-खाद्य-स्वाद्य-गन्ध-माल्यादीनां प्रावरणालंकार-शयनाशन-गृह-यान-वाहनादीनां बहुसावद्यानां च वर्जनम्, अल्पसावद्यानामपि परिमाणकरणमिति । (त. भा. ७–१६) ।

अन्न, पान, खाद्य, स्वाद्य व गन्ध-माला आदि (उपभोग) तथा वस्त्र, अलङ्कार, शयन, आसन, गृह, यान और वाहन आदि (परिभोग); इनमें बहुत पापजनक वस्तुओं का सर्वथा परित्याग करना तथा अल्प सावद्य वाली वस्तुओं का प्रमाण करना, इसका नाम उपभोग-परिभोगव्रत है ।

उपभोग-परिभोगानर्थक्य—१. यावताऽर्थेनोपभोग-परिभोगौ सोऽर्थस्ततोऽन्यस्याधिक्यमानर्थक्यम् । (स. सि. ७–३२; त. वा. ७, ३२, ६) । २. यावतार्थेनोपभोग - परिभोगस्यार्थस्ततोऽन्यस्याधिक्यमानर्थक्यम् । (त. श्लो. ७–३२) । ३. न विद्यतेऽर्थः प्रयोजनं ययोस्तौ अनर्थकौ, अनर्थकयोर्भावः कर्म वा आनर्थक्यम्, उपभोग-परिभोगयोरानर्थक्यम् उपभोग-परिभोगानर्थक्यम्, अधिकमूल्यं दत्त्वा उपभोग-परिभोगग्रहणमित्यर्थः । (त. वृत्ति श्रुत. ७–३२) । ४. आनर्थक्यं तयोरेव (उपभोग-परिभोगयोः) स्यादसंभविनोर्द्वयोः । अनात्मोचितसंख्यायाः करणादपि दूषकम् ॥ (लाटीसं. ६–१४८) ।

१ जितनी उपभोग-परिभोग वस्तुओं से प्रयोजन की सिद्धि होती है उतने का नाम अर्थ है, उससे अधिक उपभोग-परिभोग के संग्रह को उपभोग-परिभोगानर्थक्य कहा जाता है । यह अनर्थदण्डव्रत का एक अतिचार है ।

उपभोगाधिकत्व—देखो उपभोग-परिभोगानर्थक्य । उपभोगस्य, उपलक्षणत्वाद् भोगस्य च उक्तनिर्वचनस्याधिकत्वम् अतिरिक्तता उपभोगाधिकत्वम् । (ध. बि. मु. वृ. ३–३०) ।

भोग और उपभोग सामग्री का आवश्यकता से अधिक रखना, इसका नाम उपभोगाधिक्य है । यहां उपभोग शब्द भोग का उपलक्षण रहा है ।

उपभोगान्तराय—१. स्त्री-वस्त्र-शयनासन-भाजनादिक उपभोगः, पुनः पुनरुपभुज्यते हि सः, पौनःपुन्यं चोपशब्दार्थः । स सम्भवन्नपि यस्य कर्मण उदयान्न परिभुज्यते तत्कर्मोपभोगान्तरायाख्यम् । (त. भा. हरि. व सिद्ध. वृ. ८–१४) । २. उपभोगविग्घयरं उवभोगंतराइयं । (धव. पु. १५, पृ. १४) । ३. मणुयत्ते वि हु पत्ते लद्धे वि हु भोगसाहणे विभवे । भुत्तुं नवरि न सक्कइ विरइविहूणो वि जस्सुदये । (कर्मवि. ग. १६३, पृ. ६६) । ४. पुनः पुनर्भुज्यत इत्युपभोगः, शयन-वसन-वनिता-भूषणादिस्तमुपभोगं विद्यमानमनुपहत'ङ्गोऽपि यदुदयादुपभोक्तुं न शक्नोति तदुपभोगान्तरायम् । (शतक. मल. हेम. वृ. ३७–३८, पृ. ५१) । ५. यदुदयाद् विद्यमानमपि वस्त्रालङ्कारादि नोपभुंक्ते तत् उपभोगान्तरायम् । (कर्मवि. दे. स्वो. वृ. ५१) ।

१ जिस कर्म के उदय से जीव विद्यमान भी उपभोगसामग्री—स्त्री, वस्त्र व शय्या आदि—का उपभोग न कर सके उसे उपभोगान्तराय कर्म कहते हैं ।

उपमान—१. उपमानं प्रसिद्धार्थसाधर्म्यात्साध्यसाधनम् । (लघीय. ३–१९, पृ. ४८८; न्यायवि. ३–८५) । २. यथा गौस्तथा गवयः केवलं सास्नारहितः इत्युपमानम् ××× । (त. वा. १, २०, १५) । ३. उपमीयतेऽनेन दार्ष्टान्तिकोऽर्थ इत्युपमानम् । (दशवै. हरि. वृ. १–५२) । ४. प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम् । (सिद्धिवि. वृ. ३, ७, पृ. १८४, पं. २०) । ५. प्रसिद्धेन गवादिना, प्रसिद्धं वा यत्साधर्म्यं तस्मात्, साध्यस्य संज्ञासंज्ञिसम्बन्धज्ञानस्य, साधनं प्रमातृ-प्रमेयाभ्यामन्यः कारणकलापः उपमानं प्रमाणम् । (सिद्धिवि. टी. ३–७ पृ. १८५, पं. २१–२३) ।

१ प्रसिद्ध अर्थ की समानता से साध्य के सिद्ध करने को उपमान कहते हैं । ३ जिसके द्वारा दार्ष्टान्तिरूप पदार्थ से समानता जानी जाती है उसे उपमान कहते हैं ।

उपमालोक—तिण्णिसदतेयालघणरज्जुपमाणो उवमालोओ णाम। (धव. पु. ४, पृ. १८५)।

तीन सौ तेतालीस (३४३) घनराजु प्रमाण उपमालोक माना जाता है।

उपमासत्य—१. ओवम्मेण दु सच्चं जाणसु पलिदोवमादीया॥ (मूला. ५–११६)। २. पल्योपमसागरोपमादिकमुपमासत्यम्। (भ. आ. विजयो. टी. ११९३)। ३. प्रसिद्धार्थसादृश्यमुपमा, तदाश्रितं वचः उपमासत्यम्। (गो. जी. जी. प्र. टी. २२४)।

३ प्रसिद्ध अर्थ की समानता के आश्रय से जो वचन कहा जाता है, उसे उपमासत्य कहते हैं। जैसे—पल्योपम-सागरोपम इत्यादि।

उपमासत्या भाषा—उवमासच्चा सा खलु, एएसु सदुवमाणघडिया जा। णासंभवियधम्मग्गहदुट्ठा देसाइगहणाओ॥ (भाषार. ३५)।

जो भाषा समीचीन उपमा से घटित होकर असम्भव धर्मों के ग्रहण से—जैसे चन्द्रमुखी कहने पर मुख में असम्भव कलंकितत्व आदि— दूषित न हो, वह उपमासत्या भाषा कही जाती है।

उपमित— उवमाणं [विणा] जं कालप्पमाणं ण सक्कइ घेत्तुं तं उवमियं भवति। (अनुयो. चू. पृ. ५७)।

जिस कालप्रमाण को उपमा के बिना ग्रहण न कर सकें उसे उपमित कहते हैं।

उपयुक्त नोआगमभावमंगल—आगममन्तरेणार्थोपयुक्त उपयुक्तः। (धव. पु. १, पृ. २९)।

आगम के बिना जो मंगलविषयक उपयोग से सहित हो, उसे उपयुक्त नोआगमभावमंगल कहते हैं।

उपयोग — १. ××× उवओगो णाण-दंसणं भणिदो। (प्रव. सा. २–६२)। २. ×××उवओगो णाण-दंसणं होई। (नि. सा. १०)। ३. उभयनिमित्तवशादुत्पद्यमानश्चैतन्यानुविधायी परिणाम उपयोगः। (स. सि. २–८); यत्सन्निधानादात्मा द्रव्येन्द्रियनिर्वृत्ति प्रति व्याप्रियते तन्निमित्त आत्मनः परिणामः (प्र. मी.—परिणामविशेषः) उपयोगः। (स. सि. २–१८; प्रमाणमी. १, १, २३)। ४. उपयोगः प्रणिधानमायोगस्तद्भावः परिणाम इत्यर्थः। (त. भा. २–१९)। ५. जो सविसयववारो सो उवजोगो स चेगकालम्मि। एगेण चेव तम्हा उवओगेगिंदिओ सव्वो। (विशेषा. ३५९५)। ६. बाह्याभ्यन्तरहेतुद्वयसन्निधाने यथासम्भवमुपलब्धुश्चैतन्यानुविधायी परिणाम उपयोगः। (त. वा. २, ८, २१); तन्निमित्तः (लब्धिनिमित्तः) परिणामविशेष उपयोगः। तदुक्तं निमित्तं प्रतीत्य उत्पद्यमानः आत्मनः परिणाम उपयोग इत्युपदिश्यते। (त. वा. २, १८, २)। ७. उपयोगो ज्ञानादिव्यापारः स्पर्शादिविषयः। (त. भा. हरि. वृ. २–१०)। ८. उपयोजनमुपयोगो विवक्षिते कर्मणि मनसोऽभिनिवेशः। (नन्दी. हरि. वृ. ६२)। ९. ज्ञेय-दृश्यस्वभावेषु परिणामः स्वशक्तितः। उपयोगश्च तद्रूपं ×××॥ (पद्मच. १०५–१४६)। १०. तदुक्तनिमित्तं (ज्ञानावरणक्षयोपशमविशेषरूपां लब्धि) प्रतीत्योत्पद्यमानः आत्मनः परिणाम उपयोगः। (धव. पु. १, पृ. २३६); स्व-परग्रहणपरिणामः उपयोगः। (धव. पु. २, पृ. ४१३)। ११. तत्र क्षयोद्भवो भावः क्षयोपशमजश्च यः। तद्व्यक्तिव्यापिसामान्यमुपयोगस्य लक्षणम्। (त. श्लो. २–८)। १२. अर्थग्रहणव्यापार उपयोगः। (प्रमाणप. पृ. ६१; लघीय. अभय. वृ. १–५, पृ. १५)। १३. युज्यन्त इति योगाः, योजनानि वा जीवव्यापाररूपाणि योगा अभिधीयन्ते। उपयुज्यन्त इति उपयोगाः जीवविज्ञानरूपाः। (पंचसं. स्वो. वृ. १–३)। १४. उपयोगः उपलम्भः ज्ञानदर्शनसमाधिः ज्ञान-दर्शनयोः सम्यक् स्वविषयसीमानुल्लंघनेन धारणं समाधिरुच्यते, अथवा युज्जनं योगः ज्ञान-दर्शनयोः प्रवर्तनं विषयावधानाभिमुखता, सामीप्यवर्ती योगः उपयोगो नित्यसम्बन्ध इत्यर्थः। (त. भा. सिद्ध. वृ. २–८)। १५. उपयोगो हि तावदात्मनः स्वभावश्चैतन्यानुविधायिपरिणामत्वात्। (प्रव. सा. अमृत. वृ. २–६३)। १६. आत्मनः परिणामो यः उपयोगः स कथ्यते। (त. सा. २–४६)। १७. आत्मनश्चैतन्यानुविधायिपरिणाम उपयोगः। (पंचा. का. अमृत. व जय. वृ. ४०)। १८. तन्निमित्तः आत्मनः परिणाम उपयोगः, कारणधर्मस्य कार्ये दर्शनात्। (मूला. वृ. १–१६)। १९. उपयोगस्तु रूपादिविषयग्रहणव्यापारः। (प्र. क. मा. २–५, पृ. २३१)। २०. वत्थुणिमित्तं भावो जादो जीवस्स जो दु उवजोगो। (गो. जी. ६७२)। २१. आत्मनश्चैतन्यानुवर्ती परिणामः स उपयोगः। (नि. सा. वृ. १–१०)। २२. उपयोजनं उपयुज्यते वस्तुपरिच्छेदं प्रति व्यापार्यतेऽनेनेति वा उप-

योगो जीवस्वतत्त्वभूतो बोधः। (संग्रहणी दे. वृ. २७३)। २३. जन्तोर्भावो हि वस्त्वर्थ उपयोगः × × ×। (भावसं. वाम. ४०)। २४. उपयोगः विवक्षितकर्मणि मनसोऽभिनिवेशः। (आव. नि. मलय. वृ. ६४६, पृ. ५२६)। २५. उपयोजनमुपयोगः, यद्वा उपयुज्यते वस्तुपरिच्छेदं प्रति व्यापार्यते जीवोऽनेनेत्युपयोगः,× × ×बोधरूपो जीवस्य तत्त्वभूतो व्यापारः प्रज्ञप्तः। (प्रज्ञाप. मलय. वृ. २६-३१२, पृ. ५२६; पंचसं. मलय. वृ. १-३; शतक. मल. हेम. वृ. २, पृ. ३)। २६. उपयोगः स्व-स्वविषये लब्ध्यनुसारेणात्मनः परिच्छेदव्यापारः। (जीवाजी. मलय. वृ. १–१३, पृ. १६)। २७. उपयोजनमुपयोगः बोधरूपो जीवव्यापारः। × × ×उपयुज्यते वस्तुपरिच्छेदं प्रति व्यापर्यते इत्युपयोगः, × × ×उपयुज्यते वस्तुपरिच्छेदं प्रति जीवोऽनेनेत्युपयोगः,× × ×सर्वत्र जीवस्वतत्त्वभूतोऽवबोध एवोपयोगो मन्तव्यः। (षडशीति मलय. वृ. १–२, पृ. १२२)। २८. उपयुज्यते वस्तु प्रति प्रेर्यते यः वस्तुस्वरूपपरिज्ञानार्थमित्युपयोगः× × ×, अथवा आत्मनः उप समीपे योजनमुपयोग × × ×कर्मक्षयनिमित्तवशादुत्पद्यमानश्चैतन्यानुविधायी परिणाम इत्यर्थः। (त. वृत्ति श्रुत. २–८)।

३ बाह्य और अभ्यन्तर कारण के वश जो चेतनता का अनुसरण करने वाला परिणाम (ज्ञान-दर्शन) उत्पन्न होता है उसे उपयोग कहा जाता है।× × × जिसकी समीपता में आत्मा द्रव्येन्द्रिय निर्वृत्ति के प्रति व्यापृत होता है उसके निमित्त से होने वाले आत्मा के परिणाम को उपयोग (भावेन्द्रिय) कहते हैं।

उपयोगवर्गणा—उवजोगो णाम कोहादिकसाएहिं सह जीवस्स संपजोगो, तस्स वग्गणाओ वियप्पा भेदा त्ति एयट्ठो। जहण्णोवजोगट्ठाणप्पहुडि जाव उक्कस्सोवजोगट्ठाणे त्ति णिरंतरमवट्ठिदाणं तव्वियप्पाणमुवजोगवग्गणाववएसो त्ति वुत्तं होइ। (जयध.—कसा. पा. पृ. ५७६, टि. १)।

क्रोधादि कषायों के साथ जीव का सम्प्रयोग होने को उपयोग कहते है। इस उपयोग के जघन्य स्थान से लेकर उत्कृष्ट स्थान तक निरन्तर जितने भी विकल्प या भेद हैं उन्हें उपयोगवर्गणा कहते हैं।

उपयोगशुद्धि—१. पादोद्धार-निक्षेपदेशजीवपरिहरणावहितचेतस्ता उपयोगशुद्धिः। (भ. आ. विजयो. टी. ११९१)। २. उपयोगशुद्धिः पादोद्धारनिक्षेपदेशवर्तिप्राणिपरिहरणप्रणिधानपरायणत्वम्। (भ. आ. मूला. टी. ११९१)।

चलते समय पैरों को उठाते और रखते हुए तद्देशवर्ती जीवों की रक्षा में चित्त की सावधानता को उपयोगशुद्धि कहते हैं।

उपयोगेन्द्रिय—देखो उपयोग। उपयोगेन्द्रियं यः स्वविषये ज्ञानव्यापारः। (ललितवि. मु. पं. पृ. ३९)।

अपने विषयभूत पदार्थ को जानने के लिए जो ज्ञान का व्यापार होता है उसे उपयोग-इन्द्रिय कहते हैं।

उपवास—× × ×उपवासः उपवसनम् × × × किं तत्? चतुर्भुक्त्युज्झनं चतसृणां भुक्तीनां भोज्यानामशन-स्वाद्य-खाद्य-पेयद्रव्याणां भुक्तिक्रियाणां च त्यागः। (सा. ध. स्वो. टी. ५-३४)।

अशन; स्वाद्य, खाद्य और पेय रूप चार प्रकार के आहार के साथ भोजन क्रिया का भी परित्याग करना, इसका नाम उपवास है।

उपशम—१. आत्मनि कर्मणः स्वशक्तेः कारणवशादनुद्भूतिरुपशमः। (स. सि. २–१; आरा. सा. टी. ४, पृ. १२)। २. कर्मणोऽनुद्भूतस्ववीर्यवृत्तितोपशमोऽधःप्रापितपङ्कवत्। यथा सकलुषस्याम्भसः कतकादिद्रव्यसम्पर्कात् अधःप्रापितमलद्रव्यस्य तत्कृतकालुष्याभावात् प्रसाद उपलभ्यते तथा कर्मणः कारणवशादनुद्भूतस्ववीर्यवृत्तिता आत्मनो विशुद्धिरुपशमः। (त. वा. २, १, १)। ३. उदय अभावो उवसमो। (अनुयो. चू. पृ. ४३)। ४. उपशान्तिरुपशमः। (श्रा. प्र. टी. ५३)। ५. उपशमनमुपशमः। कर्मणोऽनुदयलक्षणावस्था भस्मपटलावच्छन्नाग्निवत्। (त. भा. हरि. व सिद्ध. वृ. २–१)। ६. अनुद्भूतस्वसामर्थ्य वृत्तितोपशमो मतः। कर्मणां पुंसि तोयादावधःप्रापितपङ्कवत्॥ (त. श्लो. २, १, २)। ७. (कर्मणां फलदानसमर्थतया) अनुद्भूतिरुपशमः। (पंचा. का. अमृत. वृ. ५६)। ८. उपशमः स्वफलदानसामर्थ्यानुद्भवः। (अन. ध. स्वो. टी. २–४७)। ९. तत्रोपशमो भस्मच्छन्नाग्नेरिवानुद्रेकावस्था, प्रदेशतोऽपि उदयाभाव इति यावत्। स चेत्थंभूत उपशमः सर्वोपशमः उच्यते। स च

मोहनीयस्यैव कर्मणो न शेषस्य, 'सव्वुवसमणा मोहस्सेव उ' इति वचनप्रामाण्यात् । (पंचसं. मलय. वृ. २–३, पृ. ४५) । १०. यश्च गुणवत्पुरुषप्रज्ञापनार्हत्वेन जिज्ञासादिगुणयोगात् मोहापकर्षप्रयुक्तरागद्वेषशक्तिप्रतिघातलक्षण उपशमः । (धर्मसं. मान. स्वो. वृ. १, १८, १५) । ११. उपशमश्च अनुदीर्णस्य विष्कम्भितोदयत्वम् । (षडशी. दे. स्वो. वृ. ६४) । १२. कर्मणोऽनुदयस्वरूपः उपशमः कथ्यते । (त. वृत्ति श्रुत. २–१) ।

१ आत्मा में कारणवश कर्म के फल देने की शक्ति के प्रगट न होने को उपशम कहते हैं ।

उपशमक— १. अपुव्वकरणपविट्ठसुद्धिसंजदेसु उवसमा खवा ।। अणियट्टिबादरसांपराइयपविट्ठसुद्धिसंजदेसु अत्थि उवसमा खवा ।। सुहुमसांपराइयपविट्ठसुद्धिसंजदेसु अत्थि उवसमा खवा । (षट्खं. १, १, १६–१८) । २. अपूर्वकरणपरिणाम उपशमकः क्षपकश्चोपचारात् ।। ××× तत्र कर्मप्रकृतीनां नोपशमो नापि क्षयः, किन्तु पूर्वत्रोत्तरत्र च उपशमं क्षयं वाऽपेक्ष्य उपशमकः क्षपक इति च घृतघटवदुपचर्यते । अनिवृत्तिपरिणामवशात् स्थूलभावेनोपशमकः क्षपकश्चानिवृत्तिबादरसाम्परायौ ।। पूर्वोक्तोऽनिवृत्तिपरिणामः, तद्वशात् कर्मप्रकृतीनां स्थूलभावेनोपशमकः क्षपकश्चानिवृत्तिबादरसाम्परायाविति भाष्येते । सूक्ष्मभावेनोपशमात् क्षपणाच्च सूक्ष्मसाम्परायौ ।। साम्परायः कषायः, स यत्र सूक्ष्मभावेनोपशान्ति क्षयं च आपद्यते तौ सूक्ष्मसाम्परायौ वेदितव्यौ ।। (त. वा. ६, १, १६–२१) । ३. अपूर्वकरणानामन्तःप्रविष्टशुद्धयः क्षपकोपशमसंयताः, सर्वे संभूय एको गुणः । (धव. पु. १, पृ. १८१); साम्परायाः कषायाः बादराः स्थूलाः, बादराश्च ते साम्परायाश्च बादरसाम्परायाः, अनिवृत्तयश्च ते बादरसाम्परायाश्च अनिवृत्तिबादरसाम्परायाः, तेषु प्रविष्टाः शुद्धिर्येषां संयतानां तेऽनिवृत्तिबादरसाम्परायप्रविष्टशुद्धिसंयताः, तेषु सन्ति उपशमकाः क्षपकाश्च । सर्वे ते एको गुणः अनिवृत्तिरिति । (धव. पु. १, पृ. १८४); सूक्ष्मश्चासौ साम्परायश्च सूक्ष्मसाम्परायः । तं प्रविष्टा शुद्धिर्येषां संयतानां ते सूक्ष्मसाम्परायप्रविष्टशुद्धिसंयताः । तेषु सन्ति उपशमकाः क्षपकाश्च । सर्वे त एको गुणः, सूक्ष्मसाम्परायत्वं प्रत्यभदात् । (धव. पु. १, पृ. १८७) । ४. अनिवृत्तिबादर-सूक्ष्मसाम्परायलक्षणगुणस्थानकद्वयवर्ती जन्तुरुपशमक उच्यते । (षडशीति दे. स्वो. वृ. ७०, पृ. १९६–९७) ।

१ अपूर्वकरण, अनिवृत्तिकरण और सूक्ष्मसाम्पराय ये तीन गुणस्थानवर्ती जीव उपशमक कहलाते हैं । २ अनिवृत्तिबादरसम्पराय और सूक्ष्मसाम्पराय— नौवें व दसवें गुणस्थानवर्ती जीव—उपशमक कहे जाते है । अपूर्वकरण गुणस्थानवर्ती उपचार से उपशमक हैं ।

उपशमकश्रेणी— यत्र मोहनीयं कर्मोपशमयन्नात्माऽऽरोहति सोपशमकश्रेणी । (त. वा. ६, १, १८) ।

जहां (अपूर्वकरण, अनिवृत्तिकरण, सूक्ष्मसाम्पराय और उपशान्तमोह गुणस्थान) जीव मोहनीय— चारित्रमोहनीय—को उपशान्त करता हुआ आरोहण करता है उसे उपशमकश्रेणी कहते हैं ।

उपशमचरण—चारित्तमोहणीए उवसमदो होदि उवसमं चरणं । (भावत्रि. १०) ।

चारित्रमोहनीय के उपशम से जो चारित्र उत्पन्न होता है, उसे उपशमचरण कहते हैं ।

उपशमनाकरण—१. उदयोदीरण-निधत्ति-निकाचनाकरणानां यदयोग्यत्वे व्यवस्थानं तदुपशमनाकरणम् । (पंचसं. स्वो. वृ. १, पृ. १०६) । २. उपशमना सर्वकरणायोग्यत्वसम्पादनम् । (षडशीति हरि. वृ. ११, पृ. १३१) । ३. कर्मपुद्गलानामुदयोदीरणा- निधत्ति - निकाचनाकरणायोग्यत्वेन व्यवस्थापनमुपशमना । ××× उपशाम्यते उदयोदीरणा-निधत्ति-निकाचनाकरणायोग्यत्वेन व्यवस्थाप्यते कर्म यया सोपशमना । (कर्मप्र. मलय वृ. २, पृ. १७–१८) ।

१ कर्मों के उदय, उदीरणा, निधत्ति और निकाचित करण के अयोग्य करने को उपशमनाकरण कहते हैं ।

उपशमनिष्पन्नभाव—उपशमनिष्पन्नस्तु क्रोधाद्युदयाभावफलरूपो जीवस्य परमशान्तावस्थालक्षणः परिणामविशेषः । (पंचसं. मलय. वृ. २–३, पृ. ४५) ।

क्रोधादि कषायों के उदय का अभाव होने से जीव के जो परम शान्त अवस्थारूप परिणामविशेष होता है, उसे उपशमनिष्पन्नभाव कहते हैं ।

उपशमसम्यक्त्व—१. दंसणमोहणीयस्स उवसमेण उवसमसम्मत्तं होदि। (धव. पु. ७, पृ. १०७)। २. सत्तण्हं पयडीणं उवसमदो होदि उवसमं सम्मं। (कार्तिके. ३०८)। ३. सत्तण्हं उवसमदो उवसमसम्मो × × ×। (गो. जी. २६); दंसणमोहुवसमदो उप्पज्जइ जं पयत्थसद्दहणं। उवसमसम्मत्तमिणं पसण्णमलपंकतोयसमं। (गो. जी. ६५०; भावत्रि. ६)। ४. कोहचउक्कं पढमं अणंतबंधीणि णामयं भणियं। सम्मत्तं मिच्छत्तं सम्मामिच्छत्तयं तिण्णि॥ एएसिं सत्तण्हं उवसमकरणेण उवसमं भणियं। (भावसं. दे. २६६–६७)। ५. प्रशमय्य ततो भव्यः कर्मप्रकृतिसप्तकम्। आन्तर्मुहूर्तकं पूर्वं सम्यक्त्वं प्रतिपद्यते॥ (अमित. श्रा. २–५१)। ६. अनन्तानुबन्धिचतुष्कस्य दर्शनमोहत्रयस्य चोदयाभावलक्षणप्रशस्तोपशमेन प्रसन्नमलपंकतोयसमानं यत्पदार्थश्रद्धानमुत्पद्यते तदिदमुपशमसम्यक्त्वम्। (गो. जी. जी. प्र. टी. ६५०)। ७. मिथ्यात्वमिश्रसम्यक्त्वानन्तानुबन्धिक्रोध-मान-माया-लोभानां सप्तानां प्रकृतीनामुपशमात् कतकफलयोगात् जलकर्दमोपशमवत् उपशमसम्यक्त्वम्। (कार्तिके. टी. ३०८)। ८. अस्त्युपशमसम्यक्त्वं दृङ्मोहोपशमाद्यथा। पुंसोऽवस्थान्तराकारं नाकारं चिद्विकल्पके॥ (पंचाध्यायी २–३८०)।

१ दर्शनमोहनीय के उपशम से उत्पन्न होने वाले सम्यक्त्व को—तत्त्वार्थश्रद्धान को—उपशमसम्यक्त्व कहते हैं।

उपशमसम्यग्दृष्टि—१. उवसमसम्माइट्ठी णाम कधं भवदि॥ उवसमियाए लद्धीए॥ (षट्खं. २, १, ७४-७५)। २. समीची दृष्टिः श्रद्धा यस्यासौ सम्यग्दृष्टिः। × × × एदासिं (अणंताणुबंधिचउक्कस्स दंसणमोहत्तयस्स च) सत्तण्हं पयडीणमुवसमेण उवसमसम्माइट्ठी होइ। (धव. पु. १, पृ. १७१); दंसणमोहणीयस्स उवसमेणेदस्स (उवसमसम्माइट्ठिस्स) उप्पत्तिदंसणादो। (धव. पु. ७, पृ. १०६)।

२ औपशमिक लब्धि से—अनन्तानुबन्धी चार और दर्शनमोहनीय तीन, इन सात प्रकृतियों के उपशम से—जीव उपशमसम्यग्दृष्टी होता है।

उपशान्त—१. द्वाभ्यामाभ्यां (उदीर्ण-वध्यमानाभ्यां) व्यतिरिक्तः कर्मपुद्गलस्कन्धः उपशान्तः। (धव. पु. १२, पृ. ३०३); उदए संकम उदए चदुसु वि दादुं कमेण णो सक्कं। उवसंतं च णिधत्तं णिकाचिदं चावि जं कम्मं॥ (जं कम्मं उदए दादुं णो सक्कं तमुवसंतं।) (धव. पु. १५, पृ. २७६ उ.; गो. क. ४४०)। २. यत्कर्मोदयावल्यां निक्षेप्तुमशक्यं तदुपशान्तम्। (गो. क. जी. प्र. टी. ४४०)।

२ जो कर्म उदयावली में न दिया जा सके उसे उपशान्त कहते हैं।

उपशान्त कषाय—१. सर्वस्य (मोहस्य) उपशमात् क्षपणाच्च उपशान्तकषायः क्षीणकषायश्च। (त. वा. ६, १, २२)। २. उपशान्तः कषायो येषां ते उपशान्तकषायाः। × × × उक्तं च—सकयाहलं जलं वा सरए सरवाणियं व णिम्मलयं। सयलोवसंतमोहो उवसंतकसायओ होदि॥ (प्रा. पंचसं. १–२४; धव. पु. १, पृ. १८९ उद्.; गो. जी. ६१)। ३. अधो मले यथा नीते कतकेनाम्भोऽस्ति निर्मलम्। उपरिष्टात्तथा शान्तमोहो ध्यानेन मोहने॥ (पंचसं. अमित. १–४७)। ४. उपशान्ता उपशमिता विद्यमाना एव सन्तः संक्रमणोद्वर्तनादिकरणविपाकप्रदेशोदयायोग्यत्वेन व्यवस्थापिताः कषायाः प्राग्निरूपितशब्दार्था येन स उपशान्तकषायः। (पंचसं. मलय. वृ. गा. १–१५; कर्मस्त. गो. वृ. २, पृ. ७३)। ५. परमोपशममूर्तिनिजात्मस्वभावसंवित्तिबलेनोपशान्तमोहा एकादशगुणस्थानवर्तिनो भवन्ति। (बृ. द्रव्यसं. टी. १३)। ६. जो उवसमइ कसाए मोहस्संबंधिपयडिवूहं च। उवसामओ त्ति भणिओ खवओ णामं ण सो लहइ॥ (भावसं. दे. ६५५)। ७. × × × सूक्ष्मसाम्परायचरमसमयानन्तरोत्तरसमये वीतरागविशुद्धिपरिणामविजृंभितयथाख्यातचारित्रोपयुक्तो यो जीवः स सकलोपशान्तमोहः सन्नुपशान्तकषायनामा भवति। सकलः—प्रकृतिस्थित्यनुभागप्रदेशसंक्रमणोदीरणादिसमस्तकरणगोचरः, उपशान्तः—उदयायोग्यो मोहो यस्य स उपशान्तमोहः। (गो. जी. म. प्र. टी. ६१)। ८. साकल्येनोदयायोग्याः कृताः कषाय-नोकषाया येनासावुपशान्तकषायः। (गो. जी. जी. प्र. टी. ६१)।

१ सम्पूर्ण मोह कर्म का उपशम करने वाले ग्यारहवें गुणस्थानवर्ती जीव को उपशान्तकषाय कहते हैं।

उपशान्तकषायप्रतिपात—सो च उवसंतकसायस्स पडिवादो दुविहो भवक्खयणिबंधणो उवसामणद्धाक्खयणिबंधणो चेदि। × × × उवसंतद्धाए खएण

पडिवदणं वत्तइस्सामो। तं जहा—उवसंतअद्धाखएण पदंतो लोभे चेव पडिवददि, सुहुमसांपराइयगुणमगंतूण गुणंतरगमणाभावा। (धव. पु. ६, पृ. ३१७-१८)।

आयुकर्म के शेष रहने पर भी उपशामनाकाल के क्षय होने से जो उपशान्तकषाय गुणस्थान से नीचे सकषाय गुणस्थानों में गिरता है, उसके इस अधःपात को उपशान्तकषायप्रतिपात कहते हैं। यह उपशान्तकषाय का प्रतिपात उपशामनाद्धाक्षयनिबन्धन है।

उपशान्तमोह—××× उवसंतेहिं तु उवसंतो। (शतक. भा. ९०, पृ. २१)। २. ××× उवसंतेणं तु उवसंतो ॥१०॥ (गु. गु. षट्. स्वो. वृ. १७, पृ. ४५)। ३. अथोपशान्तमोहः स्यान्मोहस्योपशमे सति। (योगशा. स्वो. विव. १-१६)।

देखो उपशान्तकषाय।

उपशान्ताद्धा—जम्हि काले मिच्छत्तमुवसंतभावेणच्छदि सो उवसमसम्मत्तकालो उवसंतद्धा त्ति भण्णदे। (जयध.—क. पा. पृ. ६३०, टि. १)।

जिस काल में मिथ्यात्व उपशान्त रूप में रहता है उस काल को उपशान्ताद्धा कहते हैं।

उपशामना—ताओ चेव संजमासंजमलद्धीओ पडिवज्जमाणस्स पुव्ववद्धाणं कम्माणं चारित्तपडिवंधीणमणुदयलक्खणा उवसामणा। (जयध. पत्र ८१५); उवसामणा णाम कम्माणमुदयादिपरिणामेहि विणा उवसंतभावेणावट्ठाणं। (जयध. पत्र ८५६)।

उदयादि अवस्थाओं के बिना कर्मों का उपशान्त स्वरूप से अवस्थित रहना, इसका नाम उपशामना है।

उपसम्पदा—१. उपसंपया आचार्यस्य ढौकनम्। (भ. आ. विजयो. टी. २-६८)। २. उपसंपया आचार्यस्यात्मसमर्पणम्। (भ. आ. मूला. टी. २-६८)।

२ आचार्य के पास जाकर उन्हें आत्मसमर्पण करने को उपसम्पदा कहते हैं।

उपस्थापना—देखो अनुपस्थान। १. पुनर्दीक्षाप्रापणमुपस्थापना। (स. सि. ९-२२; त. श्लो. ९, २२; त. सुखबो. वृ. ९-२२)। २. पुनर्दीक्षाप्रापणमुपस्थापना। महाव्रतानां मूलोच्छेदं कृत्वा पुनर्दीक्षाप्रापणमुपस्थापनेत्याख्यायते। (त. वा. ९, २२, १०)। ३. उपस्थापनं पुनर्दीक्षणं पुनश्चरणं पुनर्व्रतारोपणमित्यनर्थान्तरम्। (त. भा. ९-२२)। ४. अनवस्थाप्य-पारञ्चिकप्रायश्चित्ते लिङ्ग-क्षेत्र-काल-तपःसाधर्म्यादिकस्थीकृत्योक्ते, तत्र यथोक्तं तपो यावन्न कृतं तावन्न व्रतेषु लिङ्गे वा स्थाप्यते इत्यनवस्थाप्य तेनैव तपसाऽतिचारपारमञ्चति गच्छतीति पारञ्चिकः (सि. वृ. अतिचारपारमञ्चतीति पारञ्चिकः) पृषोदरादिपाठाच्च संस्कारः। तयोः पर्यन्ते व्रतेषूपस्थापनम्, पुनर्दीक्षणं पुनः प्रव्रज्याप्रतिपत्तिः, पुनश्चरणं चारित्रम्, पुनर्व्रतारोपणमित्यनर्थान्तरम्। तत्रानवस्थाप्यस्य विषयः साधर्मिकान्यधार्मिकास्तेयहस्तताडनादिः, दुष्टमूढान्योन्यकरणादिः पारञ्चिकमिति। (त. भा. हरि. व सिद्ध. वृ. ९-२२)।

महान् अपराध के होने पर व्रतों का मूलोच्छेद करके पुनः दीक्षा देने को उपस्थापना कहते हैं।

उपादानकारणत्व—१. उपादानम् उत्तरस्य कार्यस्य सजातीयं कारणम्। (न्यायवि. वि. १-१३२)। २. तादात्म्यसम्बन्धावच्छिन्नकार्यतानिरूपितस्वध्वंसत्वसम्बन्धावच्छिन्नकारणताशालित्वं तदिति उपादानकारणत्वम्। (अष्टस. वृ. १५, पृ. १९५)।

२ जिसके विनष्ट होने पर विवक्षित कार्य उत्पन्न होता है तथा जो उस कार्य के साथ तादात्म्य सम्बन्ध रखता है वह उपादान कारण कहलाता है।

उपादानत्व—कार्ये सकलस्वगतविशेषाधायकत्वं ह्युपादानत्वम्। (शास्त्रवा. टी. ४-८०)।

कार्य में अपनी समस्त विशेषता को समर्पित कर देना, यही उपादान कारण की उपादानता है।

उपाधिवचन—परिग्गहाज्जण-संरक्खणाइआसत्तिहेदुवयणमुवाहिवयणं। (अंगप. पृ. २९२)।

परिग्रह के अर्जन और संरक्षण आदि में आसक्ति के कारणभूत वचन का नाम उपाधिवचन है।

उपाध्याय (उवज्झाय)—१. रयणत्तयसंजुत्ता जिणकहियपयत्थदेसया सूरा। णिक्कंखभावसहिया उवज्झाया एरिसा होंति ॥ (नि. सा. ७४)। २. वारसंगे [गं] जिणक्खादं सज्झायं कथितं बुधे। उवदेसइ सज्झायं तेणुवज्झाउ उच्चदि। (मूला. ७-१०)। ३. घोरसंसार-भीमाडवीकाणणे तिक्ख-वियराल-णह-पाव-पंचाणणे। णट्ठमग्गाण जीवाण पहदेसया वंदिमो ते उवज्झाय अम्हे सया ॥ (प्रा. पंच. गु. भ. ४, पृ. २९५)। ४. धम्माणमोवदि-

मिरे दुरंततीरम्हि हिंडमाणाणं। भवियाणुज्जोयरा उवज्झया वरमदिं देंति। (ति. प. १-४)। ५. मोक्षार्थं शास्त्रमुपेत्य तस्मादधीयत इत्युपाध्यायः। (स. सि. ९-२४)। ६. बारसंगो जिणक्खाओ सज्झाओ कहिओ बुहेहिं। तं उवइसंति जम्हा उवज्झाया तेण वुच्चंति। (आव. नि. ९९७, पृ. ४४९)। ७. आचारगोचरविनयं स्वाध्यायं वा आचार्यादनु तस्मादुपाधीयत इत्युपाध्यायः संग्रहोपग्रहानुग्रहार्थं चोपाधीयते संग्रहादीन् वास्योपाध्येतीत्युपाध्यायः। (त. भा. ९-२४)। ८. उपेत्याधीयतेऽस्मात् साधवः सूत्रमित्युपाध्यायः। (आव. नि. हरि. वृ. ९९५, पृ. ४४९); तं (अर्हत्प्रणीतं द्वादशागरूपं) स्वाध्यायमुपदिशन्ति वाचनारूपेण यस्मात् कारणादुपाध्यायास्तेनोच्यन्ते, उपेत्याधीयतेऽस्मादित्यन्वर्थोपपत्तेः। (आव. नि. हरि. वृ. ९९७, पृ. ४४९)। ९. **उपेत्य यस्मादधीयते इत्युपाध्यायः**। विनयेनोपेत्य यस्माद् व्रत-शील-भावनाधिष्ठानादागमं श्रुताख्यमधीयते स उपाध्यायः। (त. वा. ९ २४, ४)। १०. ससमयपरसमयविऊ अणेगसत्थत्थधारणसमत्था। ते तुज्झ उवज्झाया पुत्त सया मंगलं देंतु। (पउमच. ८९, २१)। ११. चतुर्दशविद्यास्थानव्याख्यातार उपाध्यायास्तात्कालिकप्रवचनव्याख्यातारो वा आचार्यस्योक्ताशेषलक्षणसमन्विताः संग्रहानुग्रहादिगुणहीनाः। "चोद्दसपुव्वमहोयहिमहिगम्म सिवत्थियो सिवत्थीणं। सीलंधराण वत्ता होइ मुणीसो उवज्झाओ॥" (धव. पु. १, पृ. ५०)। १२. उपेत्य तस्मादधीयते इत्युपाध्यायः। (त. श्लो. ९-२४)। १३. उपाध्यायः अध्यापकः। (आचारा. शी. वृ. सू. २७९, पृ. ३२२)। १४. रत्नत्रयेपूद्यता जिनागमार्थं सम्यगुपदिशन्ति ये ते उपाध्यायाः उपेत्य विनयेन ढौकित्वाऽधीयते श्रुतमस्मादित्युपाध्यायः। (भ. आ. विजयो. टी. ४६)। १५. विनयेनोपेत्य यस्माद् व्रत-शील-भावनाधिष्ठानादागमं श्रुताभिधानमधीयते स उपाध्यायः। (चा. सा. पृ. ६६)। १६. येषां तपःश्रीरनघा शरीरे विवेचका चेतसि तत्त्वबुद्धिः। सरस्वती तिष्ठति वक्त्रपद्मे पुनन्तु तेऽध्यापकपुङ्गवा वः॥ (अमित. श्रा. १-४)। १७. जो रयणत्तयजुत्तो णिच्चं धम्मोवदेसणे णिरदो। सो उवज्झाओ अप्पा जदिवरवसहो णमो तस्स॥ (द्रव्यसं. ५३)। १८. योऽसौ बाह्याभ्यन्तररत्नत्रयानुष्ठानेन युक्तः षड्द्रव्य-पञ्चास्तिकाय-सप्ततत्त्व-नवपदार्थेषु मध्ये स्वशुद्धात्मद्रव्यं स्वशुद्धजीवास्तिकायं स्वशुद्धात्मतत्त्वं स्वशुद्धात्मपदार्थमेवोपादेयं शेषं हेयम्, तथैवोत्तमक्षमादिधर्मं च नित्यमुपदिशति योऽसौ ××× स चेत्थंभूतो(?) आत्मा उपाध्यायः। (बृ. द्रव्यसं. टी. ५३)। १९. परसमय-तिमिरदलणे परमागमदेसए उवज्झाए। परमगुणरयणणिवहे परमागमभाविदे वीरे॥ (जं. दी. प. १-४)। २०. आचार्यलब्धानुज्ञाः साधवः उप समीपेऽधीयतेऽस्मादित्युपाध्यायः। (योगशा. स्वो. विव. ४-९०)। २१. अनेकनयसंकीर्णशास्त्रार्थव्याकृतिक्षमः। पंचाचाररतो ज्ञेय उपाध्यायः समाहितैः॥ (नी. सा. १६)। २२. उपदेष्टार उत्कृष्टा उदात्ता उन्नतिप्रदाः। उपाधिरहिता ध्येया उपाध्याया उकारतः॥ (आत्मप्र. १११)। २३. आचारगोचरविषयं स्वाध्यायमाचार्यलब्धानुज्ञाः साधव उप समीपेऽधीयन्तेऽस्मात्स उपाध्यायः। (धर्मसं. मान. स्वो. वृ. ३-४६, पृ. १२९)। २४. एकादशाङ्गसत्पूर्वचतुर्दशश्रुतं पठन्। व्याकुर्वन् पाठयन्नन्यानुपाध्यायो गुणाग्रणीः। (धर्मसं. श्रा. १०-११७)। २५. मोक्षार्थम् उपेत्याधीयते शास्त्रं तस्मादित्युपाध्यायः। (त. वृ. श्रुत. ९-२४; कार्तिके. टी. ४५७)। २६. उपाध्यायः समाधीयान् वादी स्याद्वादकोविदः। वाग्मी वाग्ब्रह्मसर्वज्ञः सिद्धान्तागमपारगः॥ कविः प्रत्यग्रसूत्राणां शब्दार्थैः सिद्धसाधनात्। गमकोऽर्थस्य माधुर्ये धुर्यो वक्तृत्ववर्त्मनाम्॥ उपाध्यायत्वमित्यत्र श्रुताभ्यासोऽस्ति कारणम्। यदध्येति स्वयं चापि शिष्यानध्यापयेद् गुरुः॥ (पंचाध्यायी २, ६५९-६१; लाटीसं. ४, १८१८-३)।

१ जो महर्षि रत्नत्रय से सम्पन्न होकर जिनप्ररूपित पदार्थों का निरीहवृत्ति से उपदेश किया करते हैं उन्हें उपाध्याय कहते हैं।

उपायविचय—देखो अपायविचय। १. उपायविचयं तासां पुण्यानामात्मसात्क्रिया। उपायः स कथं मे स्यादिति संकल्पसन्ततिः॥ (ह. पु. ५६, ४१)। २. उपायविचयं प्रशस्तमनोवाक्कायप्रवृत्तिविशेषोऽवश्यः कथं मे स्यादिति संकल्पो द्वितीयं धर्म्यम्। (चा. सा. पृ. ७७)। ३. उपायविचयं प्रशस्तमनोवाक्कायप्रवृत्तिविशेषोऽवश्यः कथं मे स्यादिति संकल्पोऽध्यवसानं वा, दर्शनमोहोदयाच्चिन्तादिकारणवशाज्जीवाः सम्यग्दर्शनादिभ्यः पराङ्मुखा

इति चिन्तनमुपायविचयं द्वितीयं धर्म्यम् । (कार्तिके. टी. ४८२) ।

१ पुण्यक्रियाओं का—मन, वचन व काय की शुभ प्रवृत्तियों का—आत्मसात् करना, इसका नाम उपाय है। वह उपाय मुझे किस प्रकार से प्राप्त हो, इस प्रकार के चिन्तन को उपायविचय (धर्म्यध्यान का एक भेद) कहते हैं। ३ जो लोग दर्शनमोह के उदय से सन्मार्ग से पराङ्मुख हो रहे हैं उन्हें सन्मार्ग की प्राप्ति कैसे हो, इस प्रकार के चिन्तन को उपायविचय कहा जाता है।

उपार्धपुद्गलपरावर्त—१. उपार्धपुद्गलपरावर्तस्तु किंचिन्न्यूनोऽर्धपुद्गलपरावर्त इति। (श्रा. प्र. टी. ७२)। २. ऊणस्स अद्धपोग्गलपरियट्टस्स उवड्ढपोग्गलमिदि सण्णा। उपशब्दस्य हीनार्थवाचिनो ग्रहणात्। (जयध. २, ३९१)।

१ कुछ कम अर्ध पुद्गलपरिवर्तनकाल को उपार्धपुद्गलपरावर्त कहते हैं।

उपार्धावमौदर्य—उपार्धावमौदर्यं द्वादश कवलाः, अर्धसमीपमुपार्धं, द्वादश कवलाः, यतः कवलचतुष्टयप्रक्षेपात् संपूर्णमर्धं भवति। (त. भा. हरि. व सिद्ध. वृ. ८–१९)।

बारह ग्रास प्रमाण आहार के लेने को उपार्धावमौदर्य कहते हैं। कारण कि वह आधे के समीप है—($\frac{32}{2}$–४=१२)।

उपार्धोनोदर्य—देखो उपार्धावमौदर्य। अर्धस्य समीपमुपार्धं द्वादशकवलाः, यतः कवलचतुष्टयप्रक्षेपात् सम्पूर्णमर्धं भवति, ततो द्वादशकवला उपार्धोनोदर्यम्। (योगशा. स्वो. विव. ४–८९)।

देखो उपार्धावमौदर्य।

उपालम्भ—१. आमफलाणि न कप्पंति तुम्ह मा सेसए वि दूसेहिं। मा य सकज्जे मुज्झसु एमाई होउवालंभो॥ (बृहत्क. ८९९)। २. आमफलानि युष्माकं गृहीतुं न कल्पन्ते, अतः शेषानपि साधून् मा दूषय—निजदुश्चरितेन मा कलङ्कितान् कुरु, मा च स्वकार्ये निरवद्यप्रवृत्त्यात्मके चारित्रे मुहः, इत्येवमादिकः सपिपासशिक्षारूपः उपालम्भो भवति। (बृहत्क. क्षेम. वृ. ८९९); उपालम्भः सपिपासवचनैः शिक्षा। (बृहत्क. क्षे. वृ. ८९६)।

कच्चे फलों का लेना तुम्हें योग्य नहीं है, इससे तुम शेष साधुओं को अपने दुश्चरित्र से कलंकित मत करो तथा अपने निर्मल अनुष्ठान में मोह को प्राप्त न होओ, इत्यादि प्रकार से शिक्षा देने का नाम उपालम्भ है।

उपासकदशा—१. से किं तं उवासगदसाओ? उवासगदसासु णं समणोवासयाणं नगराइं उज्जाणाइं चेइयाइं वणसंडाइं समोसरणाइं रायाणो अम्मापियरो धम्मायरिआ धम्मकहाओ इहलोइअ-परलोइआ इड्ढिविसेसा भोगपरिच्चाया पव्वज्जाओ परिआगा सुअपरिग्गहा तवोवहाणाइं सील-व्वय-गुण-वेरमण-पच्चक्खाण-पोसहोववासपडिवज्जणया पडिमाओ उवसग्गा संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं देवलोगगमणाइं सुकुलपच्चायाईओ पुणबोहिलाभा अंतकिरिआओ अ आघविज्जंति। उवासगदसासु णं परित्ता वायणा संखेज्जा अणुओगदारा संखेज्जा वेढा संखेज्जा सिलोगा संखेज्जाओ निज्जुत्तीओ संखेज्जाओ संगहणीओ संखेज्जाओ पडिवत्तीओ। से णं अंगट्ठयाए सत्तमे अंगे एगे सुअक्खंधे दस अज्झयणा दस उद्देसणकाला दस समुद्देसणकाला संखेज्जा पयसहस्सा पयग्गेणं संखेज्जा अक्खरा अणंता गमा अणंता पज्जवा परित्ता तसा अणंता थावरा सासयकडनिबद्धनिकाइआ जिणपन्नत्ता भावा आघविज्जंति पन्नविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति। से एवं आया एवं नाया एवं विन्नाया एवं चरण-करणपरूवणा आघविज्जइ। से तं उवासगदसाओ। (नन्दी. सू. ५१, पृ. २३२)। २. उपासकाः श्रावकाः, तद्गतक्रियाकलापनिबद्धा दशाः दशाध्ययनोपलक्षिताः उपासकदशाः। (नन्दी. हरि. वृ. पृ. १०४)। ३. उपासकैः श्रावकैरेवं स्यातव्यमिति येष्वध्ययनेषु दशसु वर्ण्यते ता उपासकदशाः। (त. भा. हरि. व सिद्ध. वृ. १–२०)। ४. उपासकाः श्रावकाः, तद्गताणुव्रतादिक्रियाकलापप्रतिबद्धा दशा अध्ययनानि उपासकदशाः। (नन्दी. मलय. वृ. ५१, पृ. २३२)।

१ जिस अंग में श्रमणों के उपासक श्रावकों के नगर व उद्यान आदि के साथ शीलव्रत, गुणव्रत, प्रत्याख्यान और पौषधोपवास के ग्रहण की विधि का विवेचन हो तथा प्रतिमा, उपसर्ग, संलेखना, भक्तप्रत्याख्यान, प्रायोपगमन और देवलोकगमन आदि की

भी चर्चा की गई हो, उसे उपासकदशा कहते हैं।

उपासकाध्ययनांग—१. उपासकाध्ययने श्रावकधर्मलक्षणम्। (त. वा. १, २०, १२)। २. उवासयज्झयणं णाम अंगं एक्कारसलक्खसत्तरिसहस्सपदेहिं ११७०००० दंसण-वद-सामाइय-पोसह-सच्चित्त-राइभत्ते य। बह्मारंभ-परिग्गह-अणुमणमुद्दिट्ठदेसविरदी य॥ इदि एक्कारसविह-उवासगाणं लक्खणं तेसिं चेव वदारोहणविहाणं तेसिमाचरणं च वण्णेदि। (धव. पु. १, पृ. १०२); उपासकाध्ययने सैकादशलक्ष-सप्ततिपदसहस्रे ११७०००० एकादशविधश्रावकधर्मो निरूप्यते। (धव. पु. ६, पृ. २००)। ३. उवासयज्झयणं णाम अंगं दंसण-वय-सामाइय-पोसहोववास-सचित्त-रायिभत्त-बंभारंभ-परिग्गहाणुमणुद्दिट्ठणामाणमेकारसण्हमुवासयाणं धम्ममेक्कारसविहं वण्णेदि। (जयध. १, पृ. १२९-३०)। ४. सप्ततिसहस्रैकादशलक्षपदसंख्यं श्रावकानुष्ठानप्ररूपकमुपासकाध्ययनम् ११७००००। (श्रुतभ. टी. ७)। ५ श्रावकाचारप्रकाशकं सप्ततिसहस्राधिकैकादशलक्षपदप्रमाणमुपासकाध्ययनम्। (त. वृत्ति श्रु. १-२०)। ६. उपासत आहारादिदानैर्नित्यमहादिपूजाविधानैश्च संघमाराधयन्तीत्युपासकास्तेऽधीयन्ते पठयन्ते दर्शनिक-व्रतिक-सामायिक-प्रोषधोपवास-सचित्तविरत-रात्रिभक्तव्रत-ब्रह्मचर्यारम्भ-परिग्रहनिवृत्तानुमतोद्दिष्टविरतभेदैकादशनिलयसम्बन्धिव्रत-गुण-शीलाचारक्रिया-मंत्रादिविस्तरैर्वर्ण्यन्तेऽस्मिन्नित्युपासकाध्ययनं नाम सप्तममंगम्। (गो. जी. जी. प्र. टी. ३५७)।

२ जिस अंगश्रुत में दर्शनिक आदि ग्यारह प्रकार के श्रावकों के लक्षण, उनके व्रत-ग्रहण की विधि एवं आचरण का विधान किया गया हो उसे उपासकाध्ययन कहते हैं।

उपांशुजप—उपांशुस्तु परैरश्रूयमाणोऽन्तःसंजल्परूपः। (निर्वाणक. पृ. ४)।

जिसकी ध्वनि दूसरे को न सुनाई दे, ऐसे अन्तर्जल्परूप मंत्रोच्चारण करने को उपांशुजप कहते हैं।

उपेक्षा—१. सुह-दुक्खवियासणमुवेक्खा। (भ. आ. १६९६)। २. राग-द्वेषयोरप्रणिधानमुपेक्षा। (स. सि. १–१०; त. वा. १, १०, ७; त. वृत्ति श्रुत. १–१०)। ३. अरक्त-द्विष्ट उदासीनस्तद्भाव औदासीन्यम्, तत् उपेक्षेति, ईक्षणम् आलोचनं सामीप्येन अरक्त-द्विष्टतया अरागवृत्तिना अद्वेष्टवृत्तिना। (त. भा. हरि. वृ. ७–६)। ४. परदोषोपेक्षणमुपेक्षा। (षोडशक ४–१५)। ५. मोहाभावाद् राग-द्वेषयोरप्रणिधानादुपेक्षा। (अष्टस. १०२)। ६. द्वेषो हानमुपादानं रागस्तद्द्वयवर्जनम्। ख्यातोपेक्षेति × × ×॥ (त. श्लो. १, २९, १४)। ७. सुखेऽरागा दुःखे वा अद्वेषा उपेक्षेत्युच्यते। (भ. आ. विजयो. टी. १६९६)। ८. उपेक्षा राग-मोहाभावः। (आ. मी. वृ. १०२)। ९. सुह-दुक्खधिआसणा—सुख-दुःखयोः साम्येन भावनम्। उक्तं च —× × × उपेक्षा समचित्तता। (भ. आ. मूला. १६९६)।

२ इष्ट-अनिष्ट में राग-द्वेष न करने का नाम उपेक्षा है।

उपेक्षा-असंयम—उपेक्षाऽसंयमोऽसंयमयोगेषु व्यापारणं संयमयोगेष्वव्यापारणं वा। (समवा. अभय. वृ. सू. १७, पृ. ३३)।

असंयमयोग वाले कार्यों में लगने अथवा संयमयोग वाले कार्यों में प्रवृत्त न होना, इसे उपेक्षा-असंयम कहते हैं।

उपेक्षा-संयम—१. देश-कालविधानज्ञस्य परानुपरोधेन उत्सृष्टकायस्य (त. श्लो.—परानुरोधनोत्सृष्टकायस्य) त्रिधा गुप्तस्य राग-द्वेषानभिष्वंगलक्षण उपेक्षासंयमः। (त. वा. ९, ६, १५; त. श्लो. ९, ६)। २. देशकालविधानज्ञस्य परानुपरोधेनोत्सृष्टकायस्य काय-वाङ्मनःकर्मयोगानां कृतनिग्रहस्य त्रिगुप्तिगुप्तस्य राग-द्वेषानभिष्वंगलक्षण उपेक्षासंयमः। चा. सा. पृ. ३०)। ३. उपेक्षा उपेक्षणम्, उपकरणादिकं व्यवस्थाप्य पुनः कालान्तरेणाप्यदर्शनं जीवसम्मूर्छनादिकं दृष्ट्वा उपेक्षणम्, तस्या उपेक्षायाः संयमनं दिनं प्रति निरीक्षणमुपेक्षासंयमः। (मूला. वृ. ५–२२०)। ४. गृहस्थान् सावद्यव्यापारप्रसक्तानव्यापारणेनोपेक्ष्यमाणस्योपेक्षासंयमः। (योगशा. स्वो. विव. ४–९३)। ५. अथोपेक्षासंयम उच्यते —देश-कालविधानज्ञस्य परेषामुपरोधेन व्युत्सृष्टकायस्य त्रिगुप्तिगुप्तस्य मुनेः राग-द्वेषयोरनभिष्वगः। (त. वृत्ति श्रुत. ९–६)।

१ देश काल के ज्ञाता एवं मन, वचन, काय का निग्रह करने वाले (त्रिगुप्तिगुप्त) साधु के राग-द्वेष के अभाव को उपेक्षासंयम कहते हैं।

उपेक्ष्यसंयम—उपेक्ष्यसंयमः व्यापर्याऽव्यापार्य चेत्यर्थः।

एवं च संयमो भवति, साधून् व्यापारयतः प्रवचनविहितासु क्रियासु संयम इति व्यापारणमेव, अव्यापारणम् उपेक्षणम् गृहस्थान् स्वक्रियासु अव्यापारयत उपेक्ष्यमाणस्य—औदासीन्यं भजतः—संयमो भवति। (त. भा. हरि. व सिद्ध. वृ. ६–६)।

अपनी व्रत-क्रियाओं के पालन करने वाले साधुजनों को उनकी शास्त्र-विहित क्रियाओं में लगाने, तथा अपनी व्रत क्रियाओं का न पालन करने वाले श्रावकों में उपेक्षाभाव धारण करते हुए संयम के परिपालन को उपेक्ष्यसंयम कहते हैं।

उपोद्घात—उपोद्घातस्तु प्रायेण तदुद्दिष्ट (उपक्रमेणोद्दिष्ट) वस्तुप्रबोधनफलः अर्थानुगमत्वात्। (आव. नि. मलय. वृ. १२८, पृ. १४८)।

जिसका प्रयोजन उपक्रम से उद्दिष्ट वस्तु का प्रबोध कराना होता है उसे उपोद्घात कहा जाता है।

उभयक्षेत्र—उभयमुभय-(सेतु-केतु-) जलनिष्पाद्यसस्यम्। (योगशास्त्र स्वो. विव. ३–६५)।

एकान्त मिथ्यात्व—१. तत्र इदमेव इत्थमेवेति धर्मिधर्मयोरभिनिवेश एकान्तः। (स. सि. ८–१; त. वा. ८, १, २८)। २. अत्थि चेव णत्थि चेव, एगमेव अणेगमेव, सावयवं चेव णिरवयवं चेव, णिच्चमेव अणिच्चमेव, इच्चाइओ एयंताहिणिवेसो एयंतमिच्छत्तं। (धव. पु. ८, पृ. २०)। ३. एकान्तमिथ्यात्वं नाम वस्तुनो जीवादेर्नित्यत्वमेव स्वभावो न चानित्यत्वादिकम्। (भ. आ. विजयो. १–२३)। ४. यत्राभिसन्निवेशः स्यादत्यन्तं धर्मि-धर्मयोः। इदमेवेत्थमेवेति तदैकान्तिकमुच्यते॥ (त. सा. ५–४)। ५. क्षणिकोऽक्षणिको जीवः सर्वदा सगुणोऽगुणः। इत्यादिभाषमाणस्य तदैकान्तिकमिष्यते॥ (अमित. श्रा. २–६)। ६. इदमेवेत्थमेवेति सर्वथा धर्मधर्मिणोः। ग्राहिका शेमुषी प्राज्ञैरैकान्तिकमुदाहृतम्॥ (पंचसं. अमित. ५–२६)। ७. सर्वथाऽस्त्येव नास्त्येवैकमेवाऽनेकमेव नित्यमेवाऽनित्यमेव वक्तव्यमेवाऽवक्तव्यमेव जीवादिवस्तु इत्यादि-प्रतिपक्षनिरपेक्षसर्वथानियम एकान्तः, तच्छ्रद्धानमेकान्तमिथ्यात्वम्। (गो. जी. म. प्र. टी. १५)। ८. इदमेव इत्थमेवेति धर्मिधर्मयोर्विषये अभिप्रायः, पुमानेवेदं सर्वमिति, नित्य एवानित्य एवेतिवाऽभिनिवेश एकान्तमिथ्यादर्शनम्। (त. वृत्ति श्रुत. ८–१)। ९. जीवादि वस्तु सर्वथा सदेव सर्वथाऽसदेव, सर्वथा एकमेव सर्वथा अनेकमेवेत्यादि प्रतिपक्ष-निरपेक्षैकान्ताभिप्राय एकान्तमिथ्यात्वम्। (गो. जी. जी. प्र. टी. १५)।

२ पदार्थ अस्तिरूप ही है अथवा नास्तिरूप ही है, एक ही है अथवा अनेक ही है, सावयव ही है अथवा निरवयव ही है, तथा नित्य ही है अथवा अनित्य ही है; इत्यादि प्रकार के एक ही धर्म के अभिनिवेश या आग्रह को एकान्तमिथ्यात्व कहते हैं।

एकान्तसात—जं कम्मं सादत्ताए वद्धं असंछुद्धं अपडिच्छुद्धं सादत्ताए वेदिज्जदि तमेयंतसादं। (धव. पु. १६, पृ. ४९८)।

जो कर्म सातास्वरूप से बन्ध को प्राप्त होकर संक्षेप व प्रतिक्षेप से रहित होता हुआ सातास्वरूप से वेदा जाता है—अनुभव में प्राप्त होता है—उसे एकान्त-सात कहते हैं।

एकावग्रह—एकस्सेव वत्थुवलंभो एयावग्गहो। ××× एयवत्थुग्गाहओ अववोधो एयावग्गहो उच्चदि। ××× विहि-पडिसेहारद्धमेयं वत्थू, तस्स उवलंभो एयावग्गहो। (धव.पु. ६, पृ. १९)।

विधि-प्रतिषेधात्मक एक ही वस्तु के उपलम्भ को—जानने को—एकावग्रह कहते हैं।

एकाश(स)न—१. एक्कं असणं अहवा वि आसणं जत्थ निच्चलपुयस्स। तं एक्कासणमुत्तं इगवेला-भोयणे नियमो॥ (प्रत्याख्यानस्व. १०७)। २. २. एकस्थानं स्थितभोजनम्। (प्राय. स. टी. १, २)। ३. एकस्थानं सकृद्भुक्तम्। (अमित. श्रा. ६–९१)। ४. एकं सकृदशनं भोजनम्, एकं वाऽऽसनम् पुताचलनतो यत्र तदेकाशनमेकासनं च। (योगशा. स्वो. विव. ३-१३०); एक्कासणगं पच्चक्खाइ चउ-विहं पि आहारं असणं पाणं खाइमं साइमं अन्नत्थ-णाभोगेण सह सागारेण सागारि यगारेणं आउंटण-पसारणेणं गुरु अब्भुट्ठाणेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्ति यगारेणं वोसिरइ। (योगशा. स्वो. विव. ३–१३०, पृ. २५२)।

१ जिस नियमविशेष में एक भोजन अथवा पुतों पर स्थिर रहते हुये भोजन के लिये एक आसन को स्वीकार किया जाता है उसे एकाशन या एकासन कहते हैं।

एकासंख्यात—जं तं एयासंखेज्जयं तं लोयावासस्स एगदिसा। कुदो ? सेढिआगारेण लोयस्स एगदिसं पेक्खमाणे पदेसगणणं पडुच्च संखातीदादो। (धव. पु. ३, पृ. १२५)।

प्रदेशपंक्ति स्वरूप से लोक की एकदिशा की ओर देखने पर चूंकि प्रदेशों की गणना सम्भव नहीं है, अतएव उसे एकासंख्यात कहा जाता है।

एकेन्द्रिय—१. इंदियाणुवादेण एइंदिओ × × × णाम कधं भवदि ? । खओवसमियाए लद्धीए। (ष. खं. पु. २, १, १४-१५ पु. ७, पृ. ६१)। २. × × × पुढविकाइयादीया। मणपरिणामविरहिदा जीवा एगेंदिया भणिया॥ (पञ्चा. का. ११२)। ३. एकेन्द्रियजातिनामकर्मोदयादेकेन्द्रियः। (धव. पु. १, पृ. २४८); एदेण एक्केण इंदियेण जो जाणदि पस्सदि सेवदि जीवो सो एइंदिओ णाम। (धव. पु. ७, पृ. ६२)। ४. पृथिवीकायिकादयो हि जीवाः स्पर्शनेन्द्रियावरणक्षयोपशमात् शेपेन्द्रियावरणोदये नोइन्द्रियावरणोदये च सत्येकेन्द्रिया अमनसः। (पंचा. का. अमृत. वृ. ११२)। ५. एकस्य स्पर्शनेन्द्रियज्ञानस्यावरणक्षयोपशमात्तदेकविज्ञानभाजः एकेन्द्रियाः। (कर्मस्तव गो. वृ. ९–१०, पृ. ८४; शतक. मल. हेम. वृ. ३७–३८, पृ. ३७)।

३ जो जीव इस एक स्पर्शन इन्द्रिय के द्वारा जानता देखता है व सेवन करता है वह एकेन्द्रिय कहलाता है। यह एकेन्द्रिय अवस्था एकेन्द्रिय जातिनामकर्म के उदय से हुआ करती है। ४ स्पर्शनेन्द्रियावरण के क्षयोपशम और शेप इन्द्रियावरणों व नोइन्द्रियावरण के उदय से युक्त पृथिवीकायिकादि पांच प्रकार के जीव एकेन्द्रिय जीव कहे जाते हैं।

एकेन्द्रिय जातिनाम—१. यदुदयादात्मा एकेन्द्रिय इति शब्द्यते तदेकेन्द्रियजातिनाम। (स. सि. ८-११; त. वा. ८, ११, २; भ. आ. मूला. टी. २०९६)। २. एइंदियाणमेइंदियेहि एइंदियभावेण जस्स कम्मस्स उदएण सरिसत्तं होदि तं कम्ममेइंदियजादिणामं। (धव. पु. ६, पृ. ६७)। ३. एगिंदियेसु जीवो जस्सिह उदयेण होइ कम्मस्स। सा एगिंदियजाई, × × ×॥ (कर्मवि. ग. ८७)।

१ जिस कर्म के उदय जीव 'एकेन्द्रिय' कहा जाता है उसे एकेन्द्रियजाति नामकर्म कहते हैं।

एकेन्द्रियलब्धि – पासिंदियावरणखओवसमेण समुप्पण्णा सत्ती एइंदियलद्धी णाम। (धव. पु. १४, पृ. २०)।

स्पर्शनेन्द्रियाववण के क्षयोपशम से जीव को जो स्पर्श के जानने की शक्ति प्राप्त होती है उसका नाम एकेन्द्रियलब्धि है।

एलमूक—यस्त्वेलक इवाव्यक्तमूकतया शब्दमात्रमेव करोति स एलमूकः। (गु. गु. षट्. स्वो. वृ. २२)।

भेड़ की तरह अव्यक्त शब्द करने वाले व्यक्ति को एलमूक (भाषाजड़) कहते हैं। ऐसा व्यक्ति जिनदीक्षा के योग्य नहीं होता है।

एवम्भूतनय—१. येनात्मना भूतस्तेनैवाध्यवसाययतीति एवम्भूतः। (स. सि. १–३३; त. वा. १, ३३, ११)। २. वंजण-अत्थ तदुभयं एवंभूओ विसेसेइ। (अनुयो. गा. १३८, पृ. २६६; आव. नि. ७५८)। ३. व्यञ्जनार्थयोरेवम्भूतः। × × × तेषामेव व्यञ्जनार्थयोरन्योन्यापेक्षार्थग्राहित्वमेवम्भूतः। (त. भा. १–३५)। ४. × × × इत्थंभूतः क्रियाश्रयः॥ (लघीय. ४४)। ५. एवं जह सद्दत्थो संतो भूओ तदन्नहाऽभूओ। तेणेवंभूयनओ सद्दत्थपरो विसेसेणं। (विशेषा. २७४२)। ६. व्यज्यतेऽनेन व्यनक्तीति वा व्यञ्जनं शब्दः, अर्थस्तु तद्गोचरः, तच्च तदुभयं च, तदुभयं शब्दार्थलक्षणम्, एवम्भूतः—यथाभूतो नयो विशेषयति। इदमत्र हृदयम्—शब्दमर्थेन विशेषयति, अर्थं च शब्देन, 'घट चेष्टायाम्' इत्यत्र चेष्टया घटशब्दं विशेषयति, घटशब्देनापि चेष्टाम्, न स्थानभरणक्रियाम्, ततश्च यदा योषिन्मस्तकव्यवस्थितः चेष्टावानर्थो घटशब्देनोच्यते तदा स घटः, तद्वाचकश्च शब्दः, अन्यदा वस्त्वन्तरस्येव चेष्टाऽयोगादघटत्वं तद्ध्वनेश्चावाचकत्वम्। (आव. नि. हरि. वृ. ७५८, पृ. २८४; अनुयो. हरि. वृ. गा. १३८, पृ. १२५–२६)। ७. व्यञ्जनं शब्दः तदभिधेयोऽर्थः तयोर्व्यञ्जनार्थयोः, एवंपर्यायाभाववद्वाच्य-वाचकप्रवृत्तिनिमित्तभावे, भूतो यथार्थ एवम्भूत इति। यथा घटशब्दो न कुटार्थवाचकः, प्रवृत्तिनिमित्तभावात्; एवं नाचेष्टावदर्थवाचको-

ऽप्यत एव हेतोः, अर्थोऽपि तत्क्रियाशून्यो न स इति, तथाऽर्थ्यमाणत्वाभावात् । अतो यदैव योषिन्मस्तकाधिरूढो जलाद्यानयनाय चेष्टते तदैव घटः, घटवाचकोऽपि घटशब्दोऽस्य तदैवेत्यध्यवसाय एवम्भूतः। ××× तेषामेव—अनन्तरनयपरिगृहीतघटादीनाम्—यौ व्यञ्जनार्थौ, तयोर्व्यञ्जनार्थयोरन्योन्यापेक्षार्थग्राहित्वमिति स्वप्रवृत्तिनिमित्तभावेन यथा व्यञ्जनं तथाऽर्थो यथार्थः तथा व्यञ्जनम्, एवं सति वाच्य-वाचकसम्बन्धो नान्यथा, प्रष्टप्रवृत्तिनिमित्तभावेनेत्यध्यवसायः एवम्भूतः । (त. भा. हरि. वृ. १-३५) । ८. तेषामेव—अनन्तरनयपरिगृहीतघटादीनाम्—यौ व्यञ्जनार्थौ तयोरन्योन्यापेक्षार्थग्राही योऽध्यवसायः स एवम्भूतः परमार्थः, व्यञ्जनं वाचकः शब्दः, अर्थोऽभिधेयो वाच्यः । अथ का पुनरन्योन्यापेक्षा ? यदि यथा व्यञ्जनं तथार्थो यथा चार्थस्तथा व्यञ्जनम्, एवं हि सति वाच्य-वाचकसम्बन्धो घटते, अन्यथा न; योग्यक्रियाविशिष्टमेव वस्तुस्वरूपं प्रतिपद्यते इति । (त. भा. सिद्ध. वृ. १-३५) । ९. तत्क्रियापरिणामोऽर्थस्तथैवेति विनिश्चयात् । एवम्भूतेन नीयेत क्रियान्तरपराङ्मुखः ॥ (त. श्लो. १, ३३, ७८) । १०. एवं भेदे भवनादेवम्भूतः । ××× पदमेकमेकार्थस्य वाचकमित्यध्यवसाय एवम्भूतनयः । ××× पदगतवर्णभेदाद् वाच्यभेदस्याध्यवसायकोऽप्येवम्भूतः । (धव. पु. १, पृ. ६०); णिरयगइं संपत्तो जइया अणुहवइ णारयं दुक्खं । तइया सो णेरइओ एवंभूदो णओ भणदि ॥ (धव. पु. ७, पृ. २६ उद्.); वाचकगतवर्णभेदेनार्थस्य गवाद्यर्थभेदेन गवादिशब्दस्य च भेदकः एवम्भूतः । (धव. पु. ६, पृ. १८०) । ११. एवम्भवनादेवम्भूतः । ××× एक एव वर्ण एकार्थवाचक इति पदगतवर्णमात्रार्थ एकार्थ इत्येवम्भूताभिप्रायवान् एवम्भूतनयः । (जयध. पु. १, पृ. २४२) । १२. यदेन्दति तदैवेन्द्रो नान्यदेति क्रियाक्षणे । वाचकं मन्यते त्वेवैवम्भूतो यथार्थवाक् ॥ (ह. पु. ५८-४६) । १३. जं जं करेइ कम्मं देही मणवयणकायचिट्ठाहिं । तं तं खु णामजुत्तो एवंभूओ हवे स णओ ॥ पण्णवण भाविभूदे अत्थे जो सो हु भेदपज्जाओ । अह तं एवंभूदो संभवदो मुणह अत्थेसु ॥ (ल. न. च. ४३ व ४५; पृ. न. च. २१६ व २१६) । १४. शब्दो येनात्मना भूतस्तेनैवाध्यवसाययेत् । यो नयो मुनयो मान्यस्तमेवम्भूतमभ्यधुः ॥ (त. सा. १-५०) । १५. एवमित्थं विवक्षितक्रियापरिणामप्रकारेण भूतं परिणतमर्थं योऽभिप्रैति स एवम्भूतो नयः । (प्र. क. मा. ६-७४, पृ. ६८०) । १६. तत्क्रियापरिणामकालः तदित्थंभूतो यथा कुर्वत एव कारकत्वमिति । (मूला. वृ. ६-६७) । १७. क्रियाश्रयेण भेदप्ररूपणमित्थंभावः (एवम्भूतः) । (प्र. र. मा. ६-७४) । १८. पुनरित्थंभूतो नाम नयः— क्रियाश्रयो विवक्षितक्रियाप्रधानः सन्नर्थभेदकृत् । यथा—यदैवेन्दति तदैवेन्द्रः, नाभिषेचको न पूजक इति । अन्यथापि तद्भावे क्रियाशब्दप्रयोगनियमो न स्यात् । (लघीय. अभय. वृ. ४४, पृ. ६४); क्रियाशब्दभेदादर्थभेदकृदेवम्भूतः । (लघीय. अभय. वृ. ७२) । १९. एवमिति तथाभूतः सत्यो घटादिरर्थो नान्यथाप्येवमभ्युपगमपरः एवम्भूतो नयः । अयं हि भावनिक्षेपादिविशेषणोपेतं व्युत्पत्त्यर्थाविष्टमेवार्थमिच्छति, जलाहरणादिचेष्टावन्तं घटमिवेति । (स्थानां. अभय. वृ. १८६, पृ. १५३) । २०. यदैव शब्दप्रवृत्तिनिमित्तं चेष्टादिकं तस्मिन् घटादिके वस्तुनि तदैवासौ युवतिमस्तकारूढ उदकाद्याहरणक्रियाप्रवृत्तो घटो भवति, न निर्व्यापारः, एवम्भूतस्यार्थस्य समाश्रयणादेवम्भूताभिधानो नयो भवति । (सूत्रकृ. शी. वृ. २, ७, ८१ पृ. १८६) । २१. शब्दाभिधेयक्रियापरिणतवेलायामेव 'तद्वस्तु' इति भूतः एवम्भूतः । ××× एकस्यापि ध्वनेर्वाच्यं सदा तन्नोपपद्यते । क्रियाभेदेन भिन्नत्वादेवम्भूतोऽभिमन्यते । (सम्मति. अभय. वृ. ३, पृ. ३१४ उद्.) ।

१ जो द्रव्य जिस प्रकार की क्रिया से परिणत हो, उसका उसी प्रकार से निश्चय कराने वाले नय को एवम्भूत नय कहते हैं ।

एवम्भूतनयाभास—१. क्रियानिरपेक्षत्वेन क्रियावाचकेषु काल्पनिको व्यवहारस्तदाभासः । (प्र. र. मा. ६-७४) । २. क्रियाऽनाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपंस्तु तदाभासः । (प्र. न. त. ७-४२) । ३. क्रियानाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपंस्तु तदाभास इति । स्वकीयक्रियारहितं तद्वस्तु इति शब्दवाच्यतया प्रतिक्षिपति तच्छब्दवाच्यमिदं न भवत्येवैतादृश एवम्भूताभासः । उदाहरणं यथा—विशिष्टचेष्टाशून्यं घटाख्यवस्तु न घटशब्दवाच्यम्, घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्यत्वात् पटवदित्यादि-

रिति । अनेन हि वाक्येन स्वक्रियारहितस्य घटादेर्वस्तुनो घटादिशब्दवाच्यतानिषेधः क्रियते, स च प्रमाणबाधित इत्येवंभूतनयाभासतयोक्तमिति । (नयप्रदीप पृ. १०४) ।

१ क्रियावाचक शब्दों में क्रिया-निरपेक्ष काल्पनिक व्यवहार को एवम्भूतनयाभास कहते हैं।

एषण—किमेषणम् ? असण-पाण-खादिय-सादियं । (धव. पु. १३, पृ. ५५) ।

अशन, पान, खाद्य और स्वाद्यरूप चार प्रकार के आहार को एषण कहते हैं।

एसणासमिति—१. कद-कारिदाणुमोदणरहिदं तह पासुगं पसत्थं च । दिण्णं परेण भत्तं संभुत्ती एसणासमिदी ॥ (नि. सा. ६३;) । २. छादालदोससुद्धं कारणजुत्तं विशुद्धणवकोडी । सीदादी समभुत्ती परिसुद्धा एसणा समिदी ॥ (मूला. १–१३) । ३. उग्गम-उप्पायण-एसणाहिं पिंडमुवधि सेज्जं च । सोधितस्स य मुणिणो विसुज्झए एसणासमिदी ॥ (भ. आ. ११९७; मूला. ५–१२१) । ४. अन्न-पान-रजोहरण-पात्र-चीवरादीनां धर्मसाधनानामाश्रयस्य चोद्गमोत्पादनैषणादोषवर्जनमेषणासमितिः । (त. भा. ९–५) । ५. अन्नादावुद्गमादिदोषवर्जनमेषणासमितिः । अनगारस्य गुणरत्नसंचयसंवाहिशरीरशकटि समाधिपत्तनं निनीषतोऽक्षम्रक्षणमिव शरीरधारणमौषधमिव जाठराग्निदाहोपशमननिमित्तमन्नाद्यनास्वादयतो देश-कालसामर्थ्यादिविशिष्टमगर्हितमभ्यवहरत उद्गमोत्पादनैषणा-संयोजन-प्रमाण-कारणाङ्गार-धूमप्रत्ययनवकोटिपरिवर्जनमेषणासमितिरिति समाख्यायते । (त. वा. ९, ५, ६) । ६. एषणा गवेषणादिभेदा शङ्कादिलक्षणा वा, तस्यां समितिरेषणासमितिः । ××× उक्तं च—एषणासमितिर्नाम गोचरगतेन मुनिना सम्यगुपयुक्तेन नवकोटिपरिशुद्धं ग्राह्यमिति । (श्राव. हरि. वृ. पृ. ६१६) । ७. तत्रासमितस्य षण्णामपि कायानामुपघातः स्याद् अतस्तत्संरक्षणार्थमेषणासमितिः समस्तेन्द्रियोपयोगलक्षणा । (त. भा. हरि. व सिद्ध. वृ. ७–३); सम्यगेषणा गवेषणा आगमविधिना पिण्डादीनाम् । ××× एतद्दोषपरिहारेणान्न-पानादिग्रहणमेषणासमितिः । उक्तं च—उत्पादनोद्गमैषणधूमाङ्गार प्रमाणकारणतः । संयोजनाच्च पिण्डं शोधयतामेषणा समितिः ॥ (त. भा. हरि. व सिद्ध. वृ. ९-५) । ८. पिण्डशुद्धिविधानेन शरीरस्थितये तु यत् । आहारग्रहणं सा स्यादेषणासमितिर्यतेः ॥ (ह. पु. २, १२४) । ९. अन्नादावुद्गमादिदोषवर्जनमेषणासमितिः । उद्गमादयो हि दोषा उद्गमोत्पादनैषण—संयोजन-प्रमाणाङ्गार-कारण-धूमप्रत्ययास्तेषां नवभिः कोटिभिः वर्जनं एषणासमितिरित्यर्थः । (त. श्लो. ९–५) । १०. पिण्डं तथोपधिं शय्यामुद्गमोत्पादनादिना । साधोः शोधयतः शुद्धा ह्येषणासमितिर्भवेत् ॥ (त. सा. ६–९) । ११. एतैर्दोषैः (उद्गमादिषट्चत्वारिंशद्दोषैः) परिवर्जितमाहारग्रहणमेषणासमितिः । (चा. सा. पृ. ३१) । १२. उद्गमोत्पादसंज्ञैस्तैर्धूमाङ्गारादिगैस्तथा । दोषैर्मलैर्विनिर्मुक्तं विघ्नशंकादिवर्जितम् ॥ शुद्धं काले परैर्दत्तमनुद्दिष्टमयाचितम् । अदतोऽन्नं मुनेर्ज्ञेया एषणासमितिः परा ॥ (ज्ञानार्णव १८, १०–११) । १३. षट्चत्वारिंशद्दोषोना प्रासुकान्नादिकस्य या । एषणासमितिभुक्तिः स्वाध्याय-ध्यानहेतवे ॥ (आचा. सा. १–२४) । १४. एषणायाः समितिरेषणासमितिः, लोकजुगुप्सादिपरिहीनविशुद्धपिण्डग्रहणम् । (मूला. वृ. १–१०) । १५. एषणा विशुद्धपिण्डग्रहणलक्षणा, तस्यां या समितिः । (योगशा. स्वो. विव. १–२६); द्विचत्वारिंशताभिक्षादोषैर्नित्यमदूषितम् । मुनिर्यदन्नमादत्ते सैषणासमितिर्मता ॥ (योगशा. १–३८) । १६. विघ्नाङ्गारादिशङ्काप्रमुखपरिकरैरुद्गमोत्पाददोषैः, प्रस्मार्यं वीरचर्याजितममलमधःकर्ममुग्भावशुद्धम् । स्वान्यानुग्राहि देहस्थितिपटु विधिवद्दत्तमन्यैश्च भक्त्या, कालेऽन्नं मात्रयाश्नन् समितिमनुपजत्येषणायास्तपोभृत् । (अन. ध. ४–१६७) । १७. बायालमेषणाओ भोयणदोसे य पंच सोहेइ । सो एसणाइसमिओ । ×××॥ (उपदे. मा. २९८; गु. गु. षट्. वृ. ३, पृ. १४ उ.) । १८. षट्चत्वारिंशता दोषैरन्तरायैर्मलैश्च्युतम् । आहारं गृह्णतः साधोरेषणासमितिर्भवेत् ॥ (ध. सं. श्रा. ९–६) । १९. गवेषणग्रहणग्रासैषणादोषैरदूषितस्यान्न-पानादेः रजोहरण-मुखवस्त्रिकाद्यौघिकोपधेः शय्या-पीठ-फलक-चर्मदण्डाद्यौपग्रहिकोपधेश्च विशुद्धस्य यद् ग्रहणं सा एषणा समितिः । (धर्मसं. मान. स्वो. वृ. ३–४७, पृ. १३१) । २०. एषणासमितिः—चर्मणाऽस्पृष्टस्योद्गमोत्पादादिदोषरहितस्य भोजनस्य पुनः पुनः शोधितस्य प्रासुकस्य भोजनस्य ग्रहणं या समितिर्भव-

ति सा तृतीया समितिः। (चा. प्रा. टी. ३६)। २१. सम्यगेषणासमितिरुच्यते— शरीरदर्शनमात्रेण प्राप्तमयाचितममृतसंज्ञं उद्गमोत्पादनादिदोषरहित-मजिर्नाह्ग्वादिभिरस्पृष्टं परार्थं निष्पन्नं काले भोजन-ग्रहणं सम्यगेषणासमितिर्भवति। (त. वृत्ति श्रुत. ८–५)। २२. षट्चत्वारिंशद्दोषपरिवर्जितम् आहार-ग्रहणं देश-कालसामर्थ्यादिविशिष्टं अगर्हितं नवकोटि-परिशुद्धं एषणासमितिः। (कार्तिके. टी. ३९६)। २३. एषणा समितिर्नाम्ना संक्षेपाल्लक्षणादपि। आहारशुद्धिराख्याता सर्वव्रतविशुद्धये॥ (लाटीसं. ५–२३१)।

१ कृत, कारित व अनुमोदना दोषों से रहित दूसरे के द्वारा दिये गये प्रासुक व प्रशस्त भोजन को ग्रहण करना, इसका नाम एषणासमिति है। ३ उद्गम, उत्पादन और एषण (अशन) दोषों से रहित आहार, उपधि एवं शय्या आदि के शुद्धिपूर्वक ग्रहण करने को एषणासमिति कहते हैं।

ऐकान्तिक मिथ्यात्व—देखो एकान्तमिथ्यात्व।

ऐदंपर्यशुद्ध—इदं परं प्रधानमस्मिन् वाक्य इतीदं-परम्, तद्भाव ऐदंपर्यं वाक्यस्य तात्पर्यं शक्तिरित्य-र्थस्तेन शुद्धम् आगमतत्त्वम्। (षोडशक वृत्ति १, १०)।

जो वाक्य अपने तात्पर्यरूप अर्थ से शुद्ध हो, अर्थात् अपने अभिप्राय को स्पष्ट व्यक्त करे, उसे ऐदंपर्य-शुद्ध (आगमतत्त्व) कहते हैं।

ऐन्द्रध्वज—१. महानैन्द्रध्वजोऽन्यस्तु सुरराजैः कृतो महः। (म. पु. ३८–३२)। २. ऐन्द्रध्वज इन्द्रादिभिः क्रियमाणो बलि-स्नपनं सन्ध्यात्रयेऽपि जगत्त्रयस्वा-मिनः पूजाभिषेककरणम्। (चा. सा. पृ. २१; कार्तिके. टी. ३९१)। ३. × × × सेन्द्राद्यैः साध्या त्विन्द्र-ध्वजो महः॥ (सा. ध. २–२६)। ४. अकृत्रिमेषु चैत्येषु कल्याणेषु च पंचसु। सुरैर्विनिर्मिता पूजा भवेत् सेन्द्रध्वजात्मिका॥ (भावसं. वाम. ५५६)। ५. इन्द्राद्यैः क्रियते पूजा सेन्द्रध्वज उदाहृता॥ (धर्मसं. श्रा. ९–३१)।

१ इन्द्रादि देवताओं के द्वारा की जाने वाली महती पूजा को ऐन्द्रध्वज कहते हैं।

ओघ—ओहो जं सामण्ण सुयाभिहाणं चउव्विहं तं च। अज्झयणं अज्झीणं आय ज्झवणा य पत्तेयं॥ (दशवै. नि. १–२७)। २. तत्रौघः सामान्यं श्रुता-भिधानम्। (दशवै. नि. हरि. वृ. १–२६)। ३. ओघं वृन्दं समूहः संपातः समुदयः पिण्डः अवशेषः अभिन्नः सामान्यमिति पर्यायशब्दाः। (धव. पु. ३, पृ. ९); ओघणिद्देसो दव्वट्ठियणयपदुप्पायणो, संग-हिदत्थादो। (धव. पु. ४, पृ. ३२२); ओघेण पिंडेण अभेदेणेत्ति एयट्ठो। (धव. पु. ४, पृ. १४४)। ओघेन द्रव्यार्थिकनयावलम्बनेन × × ×। (धव. पु. ४, पृ. ९); संखित्तवयणकलावो दव्वट्ठियणिबंधणो ओघो णाम। (धव. पु. ५, पृ. २४३)।

१ सामान्य श्रुत का जो कथन है उसे ओघ कहा जाता है। वह चार प्रकार का है—अध्ययन, अक्षीण, आय और क्षपणा। ३ द्रव्यार्थिक नय के आश्रय से जो कथन किया जाता है वह ओघ कहलाता है। ओघ, वृन्द, समूह, सम्पात, समुदाय, पिण्ड, अवशेष, अभिन्न और सामान्य; ये पर्याय शब्द हैं।

ओघभव—ओघभवो णाम अट्ठकम्माणि अट्ठकम्मज-णिदजीवपरिणामो वा। (धव. पु. १६, पृ. ५१२)। आठ कर्मों को अथवा आठ कर्मों से उत्पन्न हुये जीव के परिणाम को ओघभव कहते हैं।

ओघमरण—ओघमरणं ओघः संक्षेपः पिण्ड इत्य-नर्थान्तरम्। जहा सव्वजीवाणं वि णं आउक्खए मरणं ति। (उत्तरा. चू. ५, पृ. १२६–२७)।

ओघ से—सामान्य से—मृत्यु का निर्देश करना, ओघमरण कहलाता है। जैसे—आयु का क्षय होने पर सभी का मरण होता है।

ओघसंज्ञा—१. ओघसंज्ञा तु अव्यक्तोपयोगरूपा वल्लिवितानारोहणादिलिङ्गा ज्ञानावरणीयाल्पक्ष-योपशमसमुत्था। (आचारा. शी. वृ. १, १, १, १, पृ. १२)। २. ज्ञानोपयोगरूपा ओघसंज्ञा संचरज्जन-मार्गं परिहरन्त्या वृत्याद्यारोहन्त्या लतादेरिव। (गु. गु. षट्. स्वो. वृ. १६, पृ. ४७)।

१ ज्ञानावरण कर्म के अल्प क्षयोपशम से जो अव्यक्त ज्ञानोपयोगरूप संज्ञा होती है उसे ओघसंज्ञा कहते हैं। इसका निश्चय लतासमूह के आरोहण आदि रूप लिंग के द्वारा होता है।

ओघौद्देशिक— सामान्येन स्व-परविभागकरणा-भावरूपेण स्वार्थ एव पाकादौ कियद्भागनिस्तारण-बुद्ध्या कतिपयभिक्षादानप्रवेशेन निर्वृत्तमोघौद्दे-शिकम्। (धर्मसं. मान. स्वो. वृ. ३–२२, पृ. ३८)। स्व और पर का विभाग किये बिना अपने लिये

पकाये जाने वाले चावल आदि में से कुछ भाग को भिक्षार्थ देने के उद्देश से कुछ और चावल मिला कर पकाने को श्रोद्योद्देशिक कहते हैं।

श्रोज – श्रोजं दुविहं तेजोजं कलिश्रोजं चेदि। तं जहा—जम्हि रासिम्हि चदुहि अवहिरिज्जमाणे तिण्णि ट्ठांति सो तेजोजं। चदुहि अवहिरिज्जाणे जम्हि एगं ठादि तं कलिश्रोजं। (धव. पु. ३, पृ. २४९)।

जिस राशि में ४ का भाग देने पर ३ या १ शेष रहता है वह श्रोजराशि कही जाती है। वह तेजोज और कलिश्रोज के भेद से दो प्रकार की है। जिस राशि में चार का भाग देने पर ३ अंक शेष रहें वह तेजोज तथा जिसमें ४ का भाग देने पर एक अंक शेष रहे वह कलिश्रोज राशि कहलाती है।

श्रोज श्राहार—१. आरोह-परीणाहा चियमंसो इंदिया य पडिपुण्णा। अह श्रोश्रो। ××× ॥ (बृहत्क. २०५१)। २. तत्रौज आहारोऽपर्याप्तकावस्थायां कार्मणशरीरेण अम्बुनिक्षिप्ततप्तभाजनवत् पुद्गलादानं सर्वप्रदेशैर्यत् क्रियते जन्तुना प्रथमोत्पादकाले योनौ, अपूपेनेव प्रथमकालनिक्षिप्तेन घृतादेरिति। एष चान्तर्मुहूर्तिकः। (त. भा. सिद्ध. वृ. २–३१)। ३. यस्तु घ्राण-दर्शन-श्रावणैरुपलभ्यते धातुभावेन परिणमति स श्रोज आहारः। (सूत्रकृ. शी. वृ. २, ३, १७० पृ. ८८)। ४. सरिरेणो आहारो × ××। (संग्रहणी सूत्र १४०, पृ. ६७)। ५. पक्खीणुज्जाहारो अंडयमज्भेसु वट्टमाणाणं। (प्रा. भावसं. ११२)। ६. आरोहो नाम शरीरेण नातिदैर्घ्यं नातिह्रस्वता, परिणाहो नाम नातिस्थौल्यं नातिदुर्बलता, अथवा आरोहः शरीरोच्छ्रायः, परिणाहः वाह्वोर्विष्कम्भः, एतौ द्वावपि तुल्यौ, न हीनाधिकप्रमाणौ ××× चितमांसत्वं नाम वपुषि पांसुलिका नावलोक्यन्ते, तथा इन्द्रियाणि च प्रतिपूर्णानि, न चक्षुः श्रोत्राद्यवयवविकलतेति भावः। 'अथ' एतद् आरोहादिकमोज उच्यते। (बृहत्क. क्षे. वृ. २०५१)। ७. शीर्यते उत्पत्तिक्षणादूर्ध्वं प्रतिक्षणं नश्यतीति शरीरम्। तेनव केवलेन य आहारः स श्रोज आहारः। इदमुक्तं भवति—यद्यपि शरीरमौदारिक-वैक्रियिकाहारक-तैजस-कार्मणभेदात् पञ्चधा, तथापीह तैजसेन तत्सहचारिणा कार्मणेन च शरीरेण पूर्वशरीरत्यागे विग्रहेण अविग्रहेण वोत्पत्तिदेशं प्राप्तो जन्तुर्यत् प्रथममौदारिकशरीरयोग्यान् पुद्गलानाहरति यच्च द्वितीयादिसमयेष्वौदारिकादिमिश्रेणाहारयति यावच्छरीरनिष्पत्तिः। यदुक्तम्—जोएण कम्मएणं आहारेइ अणंतरं जीवो। तेण परं मिस्सेणं जाव सरीरस्स निप्फत्ती ॥ एष सर्वोऽप्योजस्तैजससरीरम्, तेन आहार श्रोजश्राहारः। (संग्रहणी दे. वृ. १४०); श्रोज उत्पत्तिप्रदेशे स्वशरीरयोग्यपुद्गलसङ्घातस्तदाहारयन्ति, यद्वा श्रोजस्तैजसशरीरम्, तेनाऽऽहारो येषामित्योजश्राहाराः। (संग्रहणी दे. वृ. १४१)। ८. स सर्वोऽप्योजश्राहार श्रोजो देहार्हपुद्गलाः। श्रोजो वा तैजसः कायस्तद्रूपस्तेन वा कृतः॥ (लोकप्र. ३–११२५)।

१ आरोह—शरीर की ऊंचाई, परिणाह—दोनों भुजाओं का विस्तार, इन दोनों की हीनाधिकता के विना तुल्यता; चितमांसत्व—शरीर में पांशुलिकाओं का न दिखना; और परिपूर्ण इन्द्रियां; इन सब आरोहादि को श्रोज कहा जाता है। ७ पूर्व शरीर को छोड़कर तैजस और कार्मण शरीर के साथ मोडा लेकर या विना मोड़े के—ऋजुगति से—ही अपने उत्पत्तिस्थान को प्राप्त हुआ जीव प्रथम समय में औदारिकशरीर के योग्य तथा द्वितीयादि समयों में औदारिकमिश्र रूप से शरीर के पूर्ण होने तक जो आहार ग्रहण करता है, यह सब श्रोज—तैजसशरीर—कहलाता है; इससे जो आहार होता है वह श्रोज आहार कहलाता है।

श्रोवेल्लिम—एक्क-दु-तिउणसुत्त-डोरा-वेट्ठादिदव्वमोवेल्लणकिरियाणिप्पण्णमोवेल्लिमं णाम। (धव. पु. ९, पृ. २७३)।

श्रोवेल्लण क्रिया से उत्पन्न इकहरे, दुगुने और तिगुने सूत, डोरा एवं वेष्टन आदि द्रव्य श्रोवेल्लिम कहलाते हैं।

श्रोषधदान—रोगिभ्यो भैषजं देयं रोगो देहविनाशकृत्। देहनाशे कुतो ज्ञानं ज्ञानाभावे न निर्वृतिः॥ तस्मात् स्वशक्तितो दानं भैषज्यं मोक्षहेतवे। देहः स्वयं भवेऽन्यस्मिन् भवेद् व्याधिविवर्जितः॥ (उपासका. पृ. ६५–६६)।

रोगी के लिये शक्ति के अनुसार श्रौषधि का देना श्रोषधदान कहलाता है।

श्रोषधिप्राप्त—एए अन्ने य बहू जेसिं सव्वे वि सुरहिणोऽवयवा। रोगोवसमसमत्था ते हुंति तश्रो-

सहिं पत्ता ॥ (प्रव. सारो. १४९७)।
जिनके शरीर के सभी सुगन्धित अवयव जीवों के अनेक रोगों के नष्ट करने में समर्थ होते हैं उन साधुओं को ओषधिऋद्धिप्राप्त कहते हैं।

ओसण्णमरण—देखो अवसन्न व आसन्न मरण।

औत्पत्तिकी (अउप्पत्तिकी, उप्पत्तिया)—१. अउप्पत्तिकी भवंतरसुदविणएणं समुल्लसिदभावा। (ति. प. ४–१०२०)। २. औत्पत्तिकी अदृष्टाश्रुतपूर्वे वस्तुन्युपनते तत्क्षण एव समासादितोपयतनाऽव्याहतफला। (त. भा. हरि. वृ. ९–६, पृ. ४३३)। ३. पुव्वं अदिट्ठमसुअमवेइअतक्खणविसुद्धगहियत्था। अव्वाहयफलजोगा बुद्धी उप्पत्तिआ नाम ॥ (आव. नि. ६३९; गु. गु. षट्. स्वो. वृ. पृ. २८; नन्दी. गा. ६०, पृ. १४४; उपदेशपद ३९)। ४. तत्थ जम्मंतरे चउव्विहणिम्मलमदिवलेण विणएणावहारिददुवालसंगस्स देवेसुप्पज्जिय मणुस्सेसु अविणट्ठसंसकारेणुप्पण्णस्स एत्थ भवम्मि पढण-सुणण-पुच्छणवावारविरहियस्स पण्णा अउप्पत्तिया णाम। (धव. पु. ६, पृ. ८२)। ५. उत्पत्तिरेव प्रयोजनं यस्याः सा औत्पत्तिकी बुद्धिः। (आव. नि. मलय. वृ. ९३, पृ. ५१६)।

४ पूर्व जन्म में चार प्रकार की निर्मल मति के बल से विनय के साथ जिसने द्वादशांगश्रुत को अवधारण किया है, पश्चात् जो मरकर देवों में उत्पन्न हुआ और फिर उस पूर्व संस्कार के साथ मनुष्यों में उत्पन्न हुआ, उसके इस भव में पढ़ने, सुनने व पूछने आदि व्यापार के विना ही जो सहज स्वभाव से प्रकृष्ट बुद्धि उत्पन्न होती है उसे औत्पत्तिकी प्रज्ञा कहते हैं।

औत्पत्तिकी छेदना (उप्पाइया छेदणा)—रत्तीए इंदाउहधूमकेउआदीणमुप्पत्ती पडिमारोहो भूमिकंप-रुहिरवरिसादओ च उप्पाइया छेदणा णाम, एतैरुत्पातैः राष्ट्रभङ्ग-नृपपातादितर्कणात। (धव. पु. १४, पृ. ४३६)।

रात्रि में इन्द्रायुध और धूमकेतु आदि की उत्पत्ति, प्रतिमारोध, भूकम्प और रुधिरवर्षा आदि का होना; इसका नाम औत्पत्तिकी छेदना है। कारण यह कि इन उपद्रवों के द्वारा राष्ट्रविनाश और राजा के पतन का अनुमान होता है।

औत्सर्गिक लिङ्ग—उत्कर्षेण सर्जनं त्यागः सकलपरिग्रहस्योत्सर्गः, उत्सर्गे त्यागे सकलग्रन्थपरित्यागे भवं लिङ्गमौत्सर्गिकम्। (भ. आ. विजयो. व मूला. ७७)।

सकल परिग्रह के त्यागपूर्वक गृहीत यथाजात वेष को औत्सर्गिक लिङ्ग कहते हैं।

औदयिक अज्ञान—१. ज्ञानावरणकर्मण उदयात् पदार्थानवबोधो भवति तदज्ञानमौदयिकम्। (स. सि. २–६)। २. ज्ञानावरणोदयादज्ञानम्। ज्ञस्वभावस्यात्मनः तदावरणकर्मोदये सति नावबोधो भवति, तदज्ञानमौदयिकम्, घनसमूहस्थगितदिनकरतेजोऽनभिव्यक्तिवत्। तद्यथा—एकेन्द्रियस्य रसन-घ्राण-श्रोत्र-चक्षुषामिन्द्रियाणां प्रतिनियताभिनिवोधिकज्ञानावरणस्य सर्वघातिस्पर्धकस्योदयात् रस-गन्ध-शब्द-रूपाज्ञानं यत्तदौदयिकम्। ××× (त. वा. २, ६, ५)। ३. जाव दु केवलणाणस्सुदओ ण हवेदि ताव अण्णाणं। (भा. त्रि. १८)। ४. ज्ञानावरणसामान्यस्योदयादुपवर्णितम्। जीवस्याज्ञानसामान्यमन्यथानुपपत्तितः ॥ (त. श्लो. २, ६, ९)। ५. ज्ञानावरणकर्मोदयात् पदार्थापरिज्ञानमज्ञानमौदयिकम्। (त. वृत्ति श्रुत. २–६)। ६. अस्ति यत्पुनरज्ञानमर्थादौदयिकं स्मृतम्। तदस्ति शून्यतारूपं यथा निश्चेतनं वपुः ॥ (पञ्चाध्यायी २–१०१९); अज्ञानं जीवभावो यः स स्यादौदयिकः स्फुटम्। लब्धजन्मोदयाद्यस्माज्ज्ञानावरणकर्मणः ॥ (पञ्चाध्यायी २–१०९९)।

१ ज्ञानावरण कर्म के उदय से जो पदार्थों का बोध नहीं होता है उसे औदयिक अज्ञान कहते हैं।

औदयिक असंयत—१. चारित्रमोहस्य सर्वघातिस्पर्धकस्योदयात् असंयत औदयिकः। (स. सि. २–६; त. वृत्ति श्रुत. २–६)। २. चारित्रमोहोदयादनिवृत्तिपरिणामोऽसंयतः। चारित्रमोहस्य सर्वघातिस्पर्धकस्योदयात् प्राण्युपघातेन्द्रियविषये द्वेषाभिलापनिवृत्तिपरिणामरहितोऽसंयतः औदयिकः। (त. वा. २, ६, ६)। ३. वृत्तिमोहोदयात् पुंसोऽसंयतत्वं प्रचक्षते। (त. श्लो. २, ६, १०)। ४. ४. असंयतत्वमस्त्यस्ति भावोऽप्यौदयिको यतः। पाकाच्चारित्रमोहस्य कर्मणो लब्धजन्मवान् ॥ (पंचाध्यायी २–१११६)।

२ चारित्रमोहनीय कर्म के सर्वघाती स्पर्धकों के उदय से जो प्राणिपीड़न और इन्द्रियविषय से

विरक्ति नहीं होती है, यह औदयिक असंयत भाव है।

औदयिक असिद्ध—१. कर्मोदयसामान्यापेक्षोऽसिद्ध औदयिकः। (स. सि. २–६)। २. कर्मोदयसामान्यापेक्षोऽसिद्धः। अनादिकर्मबन्धनसन्तानपरतंत्रस्यात्मनः कर्मोदयसामान्ये सति असिद्धत्वपर्यायो भवतीत्यौदयिकः। (त. वा. २, ६, ७)। ३. कर्ममात्रोदयादेवासिद्धत्वं प्रणिगद्यते। (त. श्लो. २, ६, १०)। ४. कम्माण विप्पमुक्को जाव ण ताव दु असिद्धत्तं। (भा. त्रि. १८)। ५. कर्मोदयसाधारणापेक्षयाऽसिद्धः सोऽप्यौदयिकः। (त. वृत्ति श्रुत. २-६)। ६. असिद्धत्वं भवेद् भावो नूनमौदयिको यतः। व्यस्ताद्वा स्यात्समस्ताद्वा जातः कर्माष्टकोदयात्॥ (पंचाध्यायी २, ११३८)।

१ कर्मोदय सामान्य की अपेक्षा होने वाली असिद्धत्व अवस्था को औदयिक असिद्धभाव कहते हैं।

औदयिक गुण—कर्मणामुदयादुत्पन्नो गुणः औदयिकः। (धव. पु. १, पृ. १६१)।

कर्मों के उदय से उत्पन्न हुये गुण को औदयिक गुण कहा जाता है।

औदयिक गुणयोग—तत्थ गदि-लिंग-कसायादीहिं जीवस्स जोगो ओदइयगुणजोगो। (धव. पु. १०, पृ. ४३३)।

गति, लिङ्ग और कषाय आदि औदयिक भावों के साथ जो जीवका सम्बन्ध होता है उसे औदयिक सचित्तगुणयोग कहते हैं।

औदयिक भाव—१. तत्थ उदइय त्ति उदये भवः औदयिकः। अट्ठविहकम्मा पोग्गला संतावत्थातो उदीरणावलियमतिक्कंता अप्पणो विपागेण उदयावलियाए वट्टमाणा उदिन्नाओ त्ति उदयभावो भन्नति, उदयणिप्फण्णो णाम उदिण्णेण जेण अण्णो णिप्फादितो सो उदयणिप्फण्णो। सो दुविहो जीवदव्वे अजीवदव्वे वा। तत्थ जीवे कम्मोदएण जो जीवस्स भावो णिव्वत्तितो, जहा णेरइते इत्यादि। (अनुयो. चू. पृ. ४२)। २. कर्मविपाक उदयः, उदय एव औदयिकः, स चाष्टानां कर्मप्रकृतीनामुदयः, तत्र भवस्तेन वा निर्वृत्त औदयिकः। (अनुयो. हरि. वृ. पृ. ३७)। ३. कर्मविपाकाविर्भाव उदयः, तत्प्रयोजनस्तन्निर्वृत्तो वा औदयिको भावः। (त. भा. हरि. व सिद्ध. वृ. २–१)। ४ कम्मोदयजणिदो भावो ओदइओ णाम। (धव. पु. ५, पृ. १८५)। ५. ये पुनः पुद्गलाः गति-कषायादिपरिणामकारिणः तेषामुदयः अनुभूयमानता या स उदयस्तेन निर्वृत्तोऽध्यवसाय औदयिक इति। (त. भा. सिद्ध. वृ. १–५)। ६. कम्मुदयजकम्मिगुणो ओदयियो तत्थ होदि भावो दु। (गो. क. गा. ८१५)। ७. उदयेन निर्वृत्त औदयिकः। (पञ्चसं. मलय. वृ. २-३)। ८. सर्वः शुभाशुभभेदेन द्विप्रकारोऽपि उदयलक्षणः कर्मोदयनिष्पन्नत्वरूप औदयिकः। (आव. भा. मलय. वृ. १८६, पृ. ५७८); कर्मण उदयेन निर्वृत्त औदयिकः। (आव. भा. मलय. वृ. २०२, पृ. ५९३)। ९. कर्मोदयाद् भवो भावो जीवस्यौदयिकस्तु यः। (भा. सं. वाम. ९)। १०. नारकादौ कर्मण उदये सति जीवस्य जायमानो भावः ओदयिकः। (त. वृत्ति श्रुत. २–१)। ११. कर्मणामुदयाद्यः स्याद् भावो जीवस्य संसृतौ। नाम्नाऽप्यौदयिकोऽन्वर्थात् परं बन्धाधिकारवान्। (पञ्चाध्यायी २–९६७)।

४ कर्म के उदय से उत्पन्न भाव औदयिक भाव कहे जाते हैं।

औदयिक मिथ्यादर्शन—१. मिथ्यादर्शनकर्मण उदयात् तत्त्वार्थाश्रद्धानपरिणामो मिथ्यादर्शनमौदयिकम्। (स. सि. २–६)। २. दर्शनमोहोदयात् तत्त्वार्थाश्रद्धानपरिणामो मिथ्यादर्शनम्। तत्त्वार्थरुचिस्वभावस्यात्मनस्तत्प्रतिबन्धकारणस्य दर्शनमोहोदयात् तत्त्वार्थेषु निरूप्यमाणेष्वपि न श्रद्धानमुत्पद्यते तन्मिथ्यादर्शनमौदयिकम् इत्याख्यायते। (त. वा. २–६)। ३. मिच्छत्तकम्मस्स उदएण उप्पण्णमिच्छत्तपरिणामो कम्मोदयजणिदो त्ति ओदइओ। (धव. पु. ५, पृ. १९४)। ४. दृष्टिमोहोदयात् पुंसो मिथ्यादर्शनमिष्यते। (त. श्लो. २, ६, ६)। ५. तत्त्वार्थानामश्रद्धानलक्षणपरिणामनिर्वर्तकमिथ्यात्वमोहकर्मोदयान्मिथ्यादर्शनमौदयिकम्। (त. वृ. श्रुत. २–६)।

१ मिथ्यात्व कर्म के उदय से तत्त्वार्थ के अश्रद्धानरूप जो परिणाम होता है उसे औदयिक मिथ्यादर्शन कहते हैं।

औदयिकी भावलेश्या—१. भावलेश्या कषायोदयरञ्जिता योगप्रवृत्तिरिति कृत्वा औदयिकी। (स. सि. २–६)। २. कषायोदयरञ्जिता योगप्रवृत्तिर्लेश्या॥ ××× भावलेश्याकषायोदयरञ्जिता योग-

प्रवृत्तिरिति कृत्वा औदयिकीत्युच्यते। (त. वा. २, ६, ८)। ३. कषायोदयतो योगप्रवृत्तिरुपदर्शिता। लेश्या जीवस्य कृष्णादिषड्भेदा भावतोऽनघैः॥ (त. श्लो. २, ६, ११)।

१ कषाय के उदय से अनुरंजित योग की प्रवृत्ति को औदयिकी भावलेश्या कहते हैं।

औदयिकी वेदना— अट्ठकम्मजणिदा ओदइया वेयणा। (धव. पु. १०, पृ. ८)।

आठ कर्मों के उदय से उत्पन्न हुई वेदना को औदयिकी वेदना कहते हैं।

औदारिककाययोग—१. पुरु महमुदारुरालं एयट्ठं तं वियाण तम्हि भवं। ओरालियं त्ति वुत्तं ओरालियकायजोगो सो॥ (प्रा. पञ्चसं. १–९३; धव. पु. १, पृ. २९१ उद्.; गो. जी. २२९)। २. औदारिककायेन योगः औदारिककाययोगः—औदारिककायावष्टम्भोपजातक्रियाभिसम्बन्धः औदारिककाययोगः। (त. भा. सिद्ध. वृ. ६–१)। ३. औदारिकशरीरजनितवीर्याज्जीवप्रदेशपरिस्पन्दनिबन्धनप्रयत्न औदारिककाययोगः। (धव. पु. १, पृ. २९९); औदारिककाययोगो निष्पन्नशरीरावष्टम्भबलेनोत्पन्नजीवप्रदेशपरिस्पन्देन योगः औदारिककाययोगः। (धव. पु. १, पृ. ३१६)। ४. उदारैः शेषपुद्गलापेक्षया स्थूलैः पुद्गलैर्निर्वृत्तमौदारिकम्, तच्च तच्छरीरं चेति समासस्तस्य काययोगः औदारिकशरीरकाययोगः। (औपपा. अभय. वृ. ४२, पृ. ११०)। ५. उदारं प्रधानम्, उदारमेवौदारिकम्। प्राधान्यं चेह तीर्थंकर-गणधरशरीरापेक्षया वेदितव्यम्। × × × अथवा उदारं सातिरेकयोजनसहस्रमानत्वाच्छेषशरीरेभ्यो बृहत्प्रमाणम्, उदारमेवौदारिकम्। × × × औदारिकमेव चीयमानत्वात्कायः, तेन सहकारिकारणभूतेन तद्विषयो वा योगः औदारिककाययोगः। (षडशीति हरि. व मलय. वृ. ३४, पृ. १६३ व १६५; शतक. मल. हेम. वृ. २, पृ. ५)। ६. औदारिककायार्थं या आत्मप्रदेशानां कर्म-नोकर्माकर्षणशक्तिः स एव काययोगः। (गो. जी. म. प्र. व जी. प्र. टीका २३०)।

३ औदारिक शरीर के आश्रय से उत्पन्न हुई शक्ति से जो जीव के प्रदेशों के परिस्पन्दन का कारणभूत प्रयत्न होता है, उसे औदारिककाययोग कहते हैं।

औदारिक-कार्मणबन्धन—१. तेषामेवौदारिकपुद्गलानां पूर्वगृहीतानां गृह्यमाणानां च कार्मणपुद्गलैर्गृह्यमाणैः पूर्वगृहीतैश्च सह सम्बन्ध औदारिककार्मणबन्धनम्। (कर्मप्र. यशो. टी. १, पृ. ७; पंचसं. मलय. वृ. ३–११)। २. येनौदारिकपुद्गलानां कार्मणशरीरपुद्गलैः सह सम्बन्धो विधीयते तत् औदारिक-कार्मणबन्धननाम। (कर्मवि. दे. स्वो. वृ. ३६, पृ. ४८)।

२ जिसके द्वारा औदारिक पुद्गलों का कार्मणशरीर सम्बन्धी पुद्गलों के साथ सम्बन्ध किया जाता है उसे औदारिक-कार्मणबन्धन नामकर्म कहते हैं।

औदारिक-कार्मणशरीर-नोकर्मबन्ध— औदारिक-कार्मणशरीर-नोकर्मप्रदेशानामन्योन्यानुप्रवेश औदारिक-कार्मणशरीर-नोकर्मबन्धः। (त. वा. ५, २४, ९)।

औदारिकशरीर और कार्मणशरीर नोकर्मप्रदेशों के परस्पर में प्रवेशरूप बन्ध को औदारिक-कार्मणशरीर-नोकर्मबन्ध कहते हैं।

औदारिक-कार्मणशरीरबन्ध — ओरालियखंधाणं कम्मइयखंधाणं च एक्कम्हि जीवे ट्ठिदाणं जो बंधो सो ओरालिय-कम्मइयशरीरबंधो णाम। (धव. पु. १४, पृ. ४२)।

एक जीव में स्थित औदारिक और कार्मण स्कन्धों का जो बन्ध होता है उसका नाम औदारिक कार्मण-शरीरबन्ध है।

औदारिक-तैजस-कार्मणबन्ध—औदारिकपुद्गलानां तैजसपुद्गलानां कार्मणपुद्गलानां च गृहीत-गृह्यमाणानां यो मिथः सम्बन्धस्तदौदारिक-तैजस-कार्मणबन्धनं नाम। (कर्मप्र. यशो. टी. १, पृ. ७)।

पूर्वगृहीत और गृह्यमाण औदारिक, तैजस व कार्मण पुद्गलों का जो परस्पर में सम्बन्ध होता है उसे औदारिक-तैजस-कार्मणबन्ध कहते हैं।

औदारिक-तैजस-कार्मणशरीरनोकर्मबन्ध— औदारिक-तैजस-कार्मणशरीर-नोकर्मप्रदेशानामन्योन्यानुप्रवेश औदारिक-तैजस-कार्मणशरीरनोकर्मबन्धः। (त. वा. ५, २४, ९)।

औदारिकशरीर, तैजसशरीर और कार्मणशरीर के नोकर्मप्रदेशों के परस्पर में प्रवेशरूप बन्ध को औदारिक-तैजस कार्मणशरीर नोकर्मबन्ध कहते हैं।

औदारिक-तैजस-कार्मणशरीरबन्ध— ओरालिय-तेया-कम्मइयसरीरखंधाणं एक्कम्हि जीवे णिविट्ठाणं जो अण्णोण्णेण बंधो सो ओरालिय-तेया-कम्मइय-सरीरबंधो णाम। (धव. पु. १४, पृ. ४३)।

एक जीव में स्थित औदारिक, तैजस और कार्मण शरीर सम्बन्धी स्कन्धों का जो परस्पर में बन्ध होता है, उसे औदारिक-तैजस-कार्मणशरीरबन्ध कहते हैं।

औदारिक-तैजसबन्धननाम—१. येनौदारिकपुद्गलानां तैजसशरीरपुद्गलैः सह सम्बन्धो विधीयते तत् औदारिक-तैजसबन्धनं नाम। (कर्मवि. दे. स्वो. वृ. ३६, पृ. ४८)। २. तेषामेवौदारिकपुद्गलानां पूर्वगृहीतानां गृह्यमाणानां च तैजसपुद्गलैर्गृह्यमाणैः पूर्वग्रहीतैश्च सह सम्बन्ध औदारिक-तैजस-बन्धनम्। (कर्मप्र. यशो. टी. १, पृ. ७; पंचसं. मलय. वृ. ३-११)।

१ जिसके द्वारा औदारिकशरीर सम्बन्धी पुद्गलों का तैजसशरीर सम्बन्धी पुद्गलों के साथ सम्बन्ध किया जाता है, उसे औदारिक-तैजसबन्धन नामकर्म कहते हैं।

औदारिक-तैजसशरीरबन्ध— ओरालियसरीरपोग्गलाणं तेयासरीरपोग्गलाणं च एक्कम्हि जीवे जो परोप्परेण बंधो सो ओरालिय-तेयासरीरबंधो णाम। (धव. पु. १४, पृ. ४२)।

एक जीव में स्थित औदारिकशरीर सम्बन्धी पुद्गलों का और तैजसशरीर सम्बन्धी पुद्गलों का जो परस्पर में बन्ध होता है उसे औदारिक-तैजसशरीर-बन्ध कहते हैं।

औदारिकनाम—ओरालियं सरीरं उदएण होइ जस्स कम्मस्स। तं ओरालियनामं ×××॥ (कर्मवि. ग. ८९, पृ. ३९)।

जिस कर्म के उदय से औदारिकशरीर होता है, उसे औदारिकनामकर्म कहते हैं।

औदारिकमिश्र—यदौदारिकमारब्धं न च पूर्णीकृतं भवेत्। तावदौदारिकमिश्रः कार्मणेन सह ध्रुवम्॥ (लोकप्र. ३-१३०८)।

प्रारम्भ किया हुआ औदारिकशरीर जब तक पूर्ण नहीं होता है तब तक वह कार्मणशरीर के साथ औदारिकमिश्र कहलाता है।

औदारिकमिश्रकाययोग—— १. अंतोमुहुत्तमज्झं वियाण मिस्सं अपरिपुण्णं त्ति। जो तेण संपओगो ओरालियमिस्सकायजोगो सो॥ (प्रा. पंचसं. १, ९४; धव. पु. १, पृ. १९१ उद्.; गो. जी. २३१)। २. सः (औदारिककाययोगः) एव कार्मणसहचरित औदारिकमिश्रकाययोगः केवलिसमुद्घाते द्वितीय-षष्ठ-सप्तमसमयेषु समस्ति। (त. भा. सिद्ध. वृ. ६-१)। ३. कार्मणौदारिकस्कन्धाभ्यां जनितवीर्यात्तत्परिस्पन्दनार्थः प्रयत्नः औदारिकमिश्रकाययोगः। (धव. पु. १, पृ. २९०); कार्मणौदारिकस्कन्धनिबन्धन जीवप्रदेशपरिस्पन्देन योगः औदारिकमिश्रकाययोगः। (धव. पु. १, पृ. ३१६)। ४. ××× मिश्रोऽपर्याप्त इष्यते॥ (पंचसं. अमित. १-१७२)। ५. औदारिकं मिश्रं यत्र, कार्मणेनेति गम्यते, स भवत्यौदारिकमिश्रः। (शतक. मल. हेम. वृ. २-३, पृ. ५)। ६. तदेवान्तर्मुहूर्तपर्यन्तमपूर्णमपर्याप्तं तावन्मिश्रमित्युच्यतेऽपर्याप्तकालसम्बन्धिसमयत्रयसम्भविकार्मण-काययोगाकृष्टकार्मणवर्गणासंयुक्तत्वेन, परम गमरूढ्या वा ऽपर्याप्तम्, अपर्याप्तशरीरं मिश्रमित्यर्थः। ततः कारणादौदारिककायमिश्रेण सह तदर्थं वर्तमानो यः संप्रयोग आत्मनः कर्म-नोकर्मादानशक्तिप्रदेशपरिस्पन्दयोगः स शरीरपर्याप्तिनिष्पत्त्यभावेनौदारिक-वर्गणास्कन्धानां परिपूर्णशरीरपरिणमनासमर्थ औदारिकमिश्रकाययोगः। (गो. जी. जी. प्र. टी. २३१)।

३ कार्मण और औदारिक स्कन्धों से उत्पन्न हुई शक्ति से जो जीवप्रदेशों के परिस्पन्दन के लिये प्रयत्न होता है, उसे औदारिकमिश्रकाययोग कहते हैं। यह अपर्याप्त अवस्था में हुआ करता है।

औदारिकशरीर—१. उदारं स्थूलम्, उदारे भवमौदारिकम्, उदारं प्रयोजनमस्येति वा औदारिकम्। (स. सि. २-३६) २. उद्गतारमुदारम्, उत्कटारमुदारम्, उद्गम एव वोदारम्, उपादानात्प्रभृति अनुसमयमुद्गच्छति वर्धते जीर्यते शीर्यते परिणमतीत्युदारम्, उदारमेवौदारिकम्। ××× यथोद्गमं वा निरतिशेषम्, ग्राह्यं छेद्यं भेद्यं दाह्यं हार्यमित्युदाहरणादौदारिकम्। ××× उदारमिति च स्थूलनाम स्थूलमुद्गतं पुष्टं वृहन्महदिति, उदारमेवौदारिकम्। (त. भा. २-४९)। ३. उदारात् स्थूलवाचिनो भवे प्रयोजने वा ठञ्। उदारं स्थूलमिति यावत्, ततो भवे प्रयोजने वा ठञि औदारिकमिति भवति। (त. वा. २, ३६, ५)। ४. उदारं

बृहत्, स्थूरद्रव्यमित्यर्थः, तन्निर्वृत्तमौदारिकम्; औदारिकशरीरनामकर्मोदयनिष्पन्नं वौदारिकम्। (त. भा. हरि. वृ. २-३७)। ५. असारस्थूलवर्गणानिर्मापितमौदारिकशरीरम्। (त. भा. हरि. व सिद्ध. वृ. ८-१२)। ६. तत्थ ताव उदारं उरालं उरलं उरालियं वा उदारियं, तित्थगर-गणधरसरीराइं पडुच्च उदारम्, उदारं नाम प्रधानं, उरालं नाम विस्तरालं विशालं ति वा जं भणितं होति, × × × उरलं नाम स्वल्पप्रदेशोपचितत्वात् बृहत्वाच्च भिण्डवत्, उरालं नाम मांसास्थिस्नाय्वाद्यवयवबद्धत्वात्। (अनुयो. हरि. वृ. पृ. ८७)। ७. पुरुमहदुदारुरालं एयट्ठो संविजाण तम्हि भवं। ओरलियं तमुच्चइ ओरालियकायजोगो सो॥ (प्रा. पंचसं. १-९३; गो. जी. २३०)। ८. उदारैः पुद्गलैर्निवृत्तमौदारिकम्। (आव. नि. हरि. वृ. १४३४, पृ. ७६७)। ९. खुद्दाभवग्गहणप्पहुडि जाव तिण्णि पलिदोवमसंचिदपदेसकलाओ ओरालियसरीरं णाम। (धव. पु. १४, पृ. ७८)। १०. उरालैः पुद्गलैर्निवृत्तमौदारिकम्, उदारैर्निवृत्तमौदारिकं च। (पंचसं. स्वो. वृ. १-४, पृ. ३)। ११. उदारं स्थूलं प्रयोजनमस्येत्यौदारिकम्, उदारे भवमिति वा। (त. श्लो. २-३६)। १२. उदारं बृहदसारं यद् द्रव्यं तन्निर्वृत्तमौदारिकमसारस्थूलद्रव्यवर्गणासमारब्धमोदारिकप्रायोग्यपुद्गलग्रहणकारणपुद्गलविपाक्यौदारिकशरीरनामकर्मोदयनिष्पन्नम्। (त. भा. सिद्ध. वृ. २-३७)। १३. उदारे यो भवः स्थूले यस्योदारं प्रयोजनम्। औदारिकोऽस्त्यसौ कायः × × ×॥ (पंचसं. अमित. १-१७२)। १४. औदारिकवर्गणापुद्गलैः जातं औदारिकशरीरम्। (कर्मस्तव गो. वृ. ९-१०, पृ. ८४)। १५. उदारं प्रधानं यद्वा उदारं बृहत्प्रधानम्, उदारमेवौदारिकम्। (जीवाजी. मलय. वृ. १-१३)। १६. उदारं प्रधानम्, प्राधान्यं तीर्थंकर-गणधरशरीराण्यधिकृत्य, ततोऽन्यस्यानुत्तरशरीरस्याप्यनन्तगुणहीनत्वात्। यद्वा उदारं सातिरेकयोजनसहस्रमानत्वात्, शेषशरीरापेक्षया बृहत्प्रमाणम्, बृहत्ता चास्य वैक्रियं प्रति भवधारणीयसहजशरीरापेक्षया दृष्टव्या। × × × उदारमेव औदारिकम्। (प्रज्ञाप. मलय. वृ. २१-२६७, पृ. ४०९)। १७. स्थूलपुद्गलोपचितत्वादौदारिकम्। (संग्रहणी दे. वृ. २७२)। १८. उदारैः पुद्गलैर्जातं जिनदेहाद्यपेक्षया। उदारं सर्वतस्तुङ्गमिति चौदारिकं भवेत् (लोकप्र. ३-९६)। १९. औदारिकनामकर्मोदयनिमित्तम् औदारिकम्, चक्षुरादिग्रहणोचितं स्थूलं शरीरम् औदारिकशरीरमित्युच्यते। उदारं स्थूलमिति पर्यायः, उदारे भवं वा औदारिकम्, उदारं स्थूलं प्रयोजनमस्येति वा औदारिकम्। (त. वृत्ति श्रुत. २-३६)। २०. औदारिककायः औदारिकशरीरनामकर्मोदयसम्पादितः औदारिकशरीराकारः स्थूलपुद्गलस्कन्धपरिणामः। (गो. जी. म. प्र. व जी. प्र. टी. २३०)।

१ उदार का अर्थ स्थूल होता है, उदार में जो होता है अथवा जिसका प्रयोजन उदार या स्थूल है वह औदारिकशरीर कहलाता है। ४ उदार का अर्थ स्थूल द्रव्य होता है, उस स्थूल द्रव्य से जो शरीर निर्मित होता है उसे औदारिक शरीर कहते हैं। अथवा औदारिकशरीरनामकर्म के उदय से उत्पन्न होने वाले शरीर को औदारिकशरीर जानना चाहिए।

औदारिकशरीरनाम—१. तत्प्रायोग्य- (औदारिकशरीरप्रायोग्य-)पुद्गलग्रहणकारणं यत् कर्म तदौदारिकशरीरनामोच्यते। (त. भा. हरि. व सिद्ध. वृ. ८-१२)। २. जस्स कम्मस्स उदएण आहारवग्गणाए पोग्गलक्खंधा जीवेणोगाहदेसट्ठिदा रस-रुहिर-मांस-मेदट्ठि-मज्ज-सुक्कसहावओरालियसरीरसरूवेण परिणमंति तस्स ओरालियसरीरमिदि सण्णा। (धव. पु. ६, पृ. ६९)। ३. यस्य कर्मण उदयादौदारिकवर्गणापुद्गलान् गृहीत्वा औदारिकशरीरत्वेन परिणमयति तदौदारिकशरीरनाम। (प्रव. सारो. वृ. १२६३; कर्मस्तव गो. वृ. ९-१०, पृ. ८५; शतक. मल. हेम. वृ. ३७-३८, पृ. ४८)। ४. यदुदयवशादौदारिकशरीरप्रायोग्यान् पुद्गलानादाय औदारिकशरीररूपतया परिणमयति परिणमय्य च जीवप्रदेशैः सहान्योन्यानुगमरूपतया सम्बन्धयति तदौदारिकशरीरनाम। (षष्ठ कर्म. मलय. वृ. ६; प्रज्ञाप. मलय. वृ. २३-२९३, पृ. ४६८; पंचसं. मलय. वृ. ३-६, पृ. ११४; कर्मप्र. यशो. टी. १, पृ. ४)। ५. यदुदयादाहारवर्गणागतपुद्गलस्कन्धा जीवगृहीता रस-रुधिर-मांसास्थि-मज्जा-शुक्रस्वभावौदारिकशरीरं भवन्ति तदौदारिकशरीरनाम। (मूला. वृ. १२-१९३)।

२ जिस कर्म के उदय से जीव के द्वारा ग्रहण किये गये आहारवर्गणारूप पुद्गलस्कन्ध जीव के द्वारा अवगाहित देश में स्थित होते हुए रस, रुधिर, मांस, मेदा, हड्डी, मज्जा और शुक्र स्वभाव वाले औदारिक शरीररूप से परिणत होते हैं उसे औदारिकशरीर नामकर्म कहते हैं।

औदारिकशरीरबन्धननाम—१. जस्स कम्मस्स उदएण ओरालियसरीरपरमाणू अण्णोण्णबंधमागच्छंति तमोरालियसरीरबंधणं णाम। (धव. पु. ६, पृ. ७०)। २. यस्य कर्मण उदयेनौदारिकशरीरपरमाणवोऽन्योन्यबन्धमागच्छन्ति तदौदारिकशरीरबन्धनं नाम। (मूला. वृ. १२–१९३)। ३. पूर्वगृहीतैरौदारिकपुद्गलैः सह गृह्यमाणानौदारिकपुद्गलानुदितेन येन कर्मणा बध्नात्यात्मा—परस्परसंसक्तान् करोति—तदौदारिकबन्धनं नाम। (प्रव. सारो. वृ. १२६३)। ४. यदुदयादौदारिकशरीरपुद्गलानां पूर्वगृहीतानां गृह्यमाणानां च परस्परं तैजसादिशरीरपुद्गलैश्च सह सम्बन्धः तदौदारिकबन्धनम्। (षष्ठ कर्म. मलय. वृ. ६, पृ. १२४; प्रज्ञाप. मलय. वृ. २३–२९३, पृ. ४७०)। ५. पूर्वगृहीतैरौदारिकपुद्गलैः सह परस्परं गृह्यमाणान् औदारिकपुद्गलान् उदितेन येन कर्मणा बध्नाति—आत्माऽन्योन्यसंयुक्तान् करोति, तद् औदारिकशरीरबन्धननाम. दारु-पाषाणादीनां जतु-रालाप्रभृतिश्लेषद्रव्यतुल्यम्। (कर्मवि. दे. स्वो. वृ. ३४, पृ. ४६)।

१ जिस कर्म के उदय से औदारिकशरीर के परमाणु परस्पर बन्ध को प्राप्त होते हैं, उसे औदारिकशरीरबन्धन नामकर्म कहते हैं।

औदारिकशरीरसंघातनाम—१. जस्स कम्मस्स उदएण ओरालियक्खंधाणं सरीरभावमुवगयाण बंधणणामकम्मोदएण एगबंधणबद्धाणं मट्ठत्तं होदि तमोरालियसरीरसघादं णाम। (धव. पु. ६, पृ. ७०)। २. यस्य कर्मण उदयेनौदारिकशरीरस्कन्धानां शरीरभावमुपगतानां बन्धननामकर्मोदयेनैकबन्धनबद्धानामौदार्यं भवति तदौदारिकशरीरसंघातनाम। (मूला. वृ. १२–१९३)। ३. यस्य कर्मण उदयादौदारिकशरीरपरिणतान् पुद्गलानात्मा संघातयति पिण्डयत्यन्योन्यसंनिधानेन व्यवस्थापयति तदौदारिकसंघातनाम। (प्रव. सारो. वृ. १२६०; कर्मवि. दे. स्वो. वृ. ३४, पृ. ४७)। ४. यदुदयादौदारिकपुद्गला ये यत्र योग्यास्तान् तत्र संघातयति ××× तदौदारिकसंघातनाम। (षष्ठ क. मलय. वृ. ६)। ५. यदुदयवशादौदारिकपुद्गला औदारिकशरीररचनानुकारिसंघातरूपा जायन्ते तदौदारिकसंघातनाम। (प्रज्ञाप. मलय. वृ. २३–२९३, पृ. ४७०)।

१ शरीरभाव को प्राप्त तथा बन्धननामकर्म के उदय से एकबन्धनबद्ध औदारिकशरीर के स्कन्ध जिस कर्म के उदय से पुष्टता को प्राप्त होते हैं—छिद्ररहित एकरूप होते हैं, उसे औदारिकशरीरसंघात नामकर्म कहते हैं।

औदारिकशरीरांगोपांगनाम—१. जस्स कम्मस्स उदएण ओरालियसरीरस्स अंगोवंग-पच्चंगाणि उप्पज्जंति तं ओरालियशरीरअंगोवंगणामं। (धव. पु. ६, पृ. ७३)। २. यस्य कर्मण उदयेनौदारिकांगोपांगानि भवन्ति तदौदारिकांगोपांगं नाम। (मूला. वृ. १२–१९४)। ३. यदुदयादौदारिकशरीरत्वेन परिणतानां पुद्गलानामङ्गोपाङ्गविभागेन परिणतिरुपजायते तदौदारिकशरीराङ्गोपाङ्गनाम। (प्रज्ञाप. मलय. वृ. २३–२९३, पृ. ४६८; पंचसं. मलय. वृ. ३–६; प्रव. सारो. वृ. १२६३; कर्मस्तव. गो. वृ. ९–१०, पृ. ८५; शतक. मल. हे. वृ. ३७–३८, पृ. ४८; कर्मवि. दे. स्वो. वृ. ३३, पृ. ४६; कर्मप्र. यशो. टी. १, प. ४)।

१ जिस कर्म के उदय से औदारिकशरीररूप से परिणत पुद्गलों के अंग, उपांग और प्रत्यंग उत्पन्न होते हैं उसे औदारिकशरीराङ्गोपाङ्ग नामकर्म कहते हैं।

औदारिकौदारिकबन्धननाम—१. पूर्वगृहीतानामौदारिकपुद्गलानां स्वैरेवौदारिकपुद्गलैर्गृह्यमाणैः सह यः सम्बन्धः स औदारिकौदारिकबन्धनम्। (पंचसं. मलय. वृ. ३–११, पृ. १२१; कर्मप्र. यशो. टी. १, पृ. ७)। २. पूर्वगृहीतैरौदारिकशरीरपुद्गलैः सह गृह्यमाणौदारिकपुद्गलानां बन्धो येन क्रियते तद् औदारिकौदारिकबन्धननाम। (कर्मवि. दे. स्वो. वृ. ३६)।

१ पूर्वगृहीत औदारिकशरीर के पुद्गलों का गृह्यमाण अपने ही औदारिक पुद्गलों के साथ जो सम्बन्ध होता है उसे औदारिकौदारिकबन्धन कहते है। यह जिस कर्म के उदय से होता है वह औदारिकौदारिकबन्धन नामकर्म कहलाता है।

औदारिकौदारिकशरीरनोकर्मबन्ध — औदारिकशरीरनोकर्मप्रदेशानामौदारिकशरीरनोकर्मप्रदेशैरन्योन्यानुप्रवेशादौदारिकौदारिकनोकर्मबन्धः । (त. वा. ५, २४, ९) ।

औदारिकशरीर के नोकर्मप्रदेशों का अन्य औदारिकशरीरनोकर्मप्रदेशों के साथ परस्पर में परस्पर अनुप्रवेशरूप जो बन्ध होता है उसे औदारिकौदारिकनोकर्मबन्ध कहते हैं ।

औदार्य—औदार्यं कार्पण्यत्यागाद्विज्ञेयमाशयमहत्त्वम् । गुरु-दीनादिष्वौचित्यवृत्ति कार्ये तदत्यन्तम् ॥ (षोडशक ४–३, पृ. २५) ।

कृपणता को छोड़कर उदार हृदय से जो गुरु एवं दीन आदि जनों के विषय में यथोचित व्यवहार किया जाता है उसे औदार्यगुण कहते हैं ।

औद्देशिक—१. देवद-पासंडट्ठं किविणट्ठं चावि जं तु उद्दिदियं । कदमण्णसमुद्देशं चदुव्विहं वा समासेण ॥ जावदियं उद्देसो पासंडो त्ति य हवे समुद्देसो । समणो त्ति य आदेसो णिग्गंथो त्ति य हवे समादेसो ॥ (मूला. ६, ६–७) । २. उद्देशनं साध्वाद्याश्रित्य दानारम्भस्येत्युद्देशः, तत्र भवमौद्देशिकम् । (दशवै. हरि. वृ. ३–२, पृ. ११६) । ३. श्रमणानुद्दिश्य कृतं भक्तादिकम् उद्देसिगमित्युच्यते । (भ. आ. विजयो. ४२१) । ४. आत्मार्थं यत्पूर्वसिद्धमेव लड्डुकचूर्णकादि साधुमुद्दिश्य पुनरपि [संत] गुडादिना संस्क्रियते तदुद्देशिकं सामान्येन, विशेषतो विशेषसूत्रादवगन्तव्यमिति । (आचा. शी. वृ. २, १, २६६, पृ. ३१७) । ५. उद्देशेन साधुसंकल्पेन निवृत्तमौद्देशिकं आधाकर्म । (जीतक. चू. वि. व्याख्या, पृ. ५३) । ६. देवतार्थं पाखण्डार्थं कृपणार्थं चोद्दिश्य यत्कृतमन्नं तन्निमित्तं निष्पन्नं भोजनं तदौद्देशिकम् । (मूला. वृ. ६–६); सामान्यमुद्दिश्य पाषण्डानुद्दिश्य श्रमणानुद्दिश्य निर्ग्रन्थानुद्दिश्य यत्कृतमन्नं तच्चतुर्विधमौद्देशिकं भवेदन्नमिति । (मूला. वृ. ६–७) । ७. उद्देशः साधुपर संकल्पः, स प्रयोजनमस्य औद्देशिकं यत्पूर्वकृतमोदन-मोदक-क्षोदादि तत्साधूद्देशेन दध्यादिना गुडखण्डेन च संस्कुर्वतो भवति । (योगशा. स्वो. विव. १-३८)। ८. उद्देशिकं श्रमणानुद्दिश्य कृतं भक्तादिकम् । (भ. आ. मूला. ४२१) । ९. तदौद्देशिकमन्नं यद्देवता-दीन-लिङ्गिनः । सर्वपाषण्डपार्श्वस्थसाधून् वोद्दिश्य साधितम् ॥ (अन. ध. ५–७) । १०. यत्पुनर्गृहिणा स्वार्थकृतं पश्चाद्यत्युद्देशेन पृथक् क्रियते तदौद्देशिकम् । (गु. गु. षट्. स्वो. वृ. २०, पृ. ४८) ।

१ देवता, पाषण्ड—जैनमत से बहिर्भूत अनुष्ठान करनेवाले वेषधारी साधुजन—और कृपण(दीन)जन के उद्देश से किया गया भोजन औद्देशिक कहलाता है। (१) उद्देश—जो भी भोजन के लिए आवेंगे उन सबको दूंगा, इस प्रकार के उद्देश से बनाया गया भोजन । (२) समुद्देश—पाषण्डियों के उद्देश से बनाया गया भोजन। (३) आदेश—आजीवक आदि अन्य साधुवेषधारी अथवा छात्रों के उद्देश से बनाया गया भोजन । (४) समादेश—जो भी निर्ग्रन्थ मुनि आवेंगे उन सबको आहार दूंगा; इस प्रकार के उद्देश से बनाया जाने वाला भोजन। उक्त चार प्रकार का भोजन औद्देशिक कहलाता है।

औनोदर्य—देखो अवमौदर्य । १. ऊनमवममुदरं यस्य स ऊनोदरस्तस्य भाव औनोदर्य्यम् । (योगशा. स्वो. विव. ४–८९) । २. प्रमाणप्राप्त आहारो द्वात्रिंशत् कवलाः, स चैकादिकवलैरूनश्चतुर्विंशतिकवलान् यावत् प्रमाणप्राप्तात् किंचिदूनम् औनोदर्य्यम् । (योगशा. स्वो. विव. ४–८९, पृ. ३११) ।

प्रमाणप्राप्त आहार ३२ ग्रास है। उसे एक-दो ग्रासों से कम करते हुए चौबीस ग्रास पर्यन्त ग्रहण करना, यह औनोदर्य बाह्य तप कहलाता है । तत्त्वार्थभाष्य की सिद्धसेन गणी की वृत्ति (९-१९) के अनुसार अवमौदर्य्य (औनोदर्य) तीन प्रकार का है—१ अल्पाहार अवमौदर्य—आठ ग्रास प्रमाण । २ उपार्ध अवमौदर्य—बारह ग्रास (१६/२–४=१२) प्रमाण । ३ किंचिदूनावमौदर्य—बत्तीस ग्रास जो पुरुष का प्रमाणप्राप्त आहार है उसमें एक ग्रास से कम ।

औपक्रमिकी—उपक्रमणमुपक्रमः, स्वयमेव समीपे भवनमुदीरणाकरणेन वा समीपानयनम्, तेन निर्वृत्ता औपक्रमिकी—स्वयमुदीर्णस्य उदीरणाकरणेन वा उदयमुपनीतस्य वेदनीयकर्मणो विपाकानुभवनेन निर्वृत्ता इत्यर्थः । (प्रज्ञाप. मलय. वृ. ३५–३२६, पृ. ५५७) ।

स्वयं समीप में होना अथवा उदीरणाकरण के द्वारा समीप में ले आना; इसका नाम उपक्रम है। इस उपक्रम से होने वाली वेदना औपक्रमिकी कहलाती

है। अभिप्राय यह है कि स्वयं उदय को प्राप्त हुए अथवा उदीरणाकरण के द्वारा उदय में लाये गये वेदनीय कर्म के फल के अनुभवन से रचित वेदना को औपक्रमिकी वेदना कहा जाता है।

औपचारिक विनय—देखो उपचारविनय। उपचरणम् उपचारः—श्रद्धानपूर्वकः क्रियाविशेषलक्षणो व्यवहारः, स प्रयोजनमस्येत्यौपचारिकः। × × × विनीयते क्षिप्यतेऽनेनाष्टप्रकारं कर्मेति विनयः। × × × विनीयते चास्मिन् सति ज्ञानावरणादिरजोराशिरिति विनयः। (त. भा. सिद्ध. वृ. ९–२३)।

उपचार का अर्थ है श्रद्धापूर्वक किया गया विशिष्ट क्रियारूप व्यवहार तथा जिसके द्वारा या जिसके होने पर आठ प्रकारका कर्म-रज विनष्ट होता है उसे विनय कहते हैं। उपर्युक्त उपचाररूप प्रयोजन जिससे सिद्ध होता है वह औपचारिक कहलाता है।

औपमिक—उपमया निर्वृत्तमौपमिकम्, उपमामन्तरेण यत्कालप्रमाणमनतिशयिना गृहीतुं न शक्यते तदौपमिकमिति। (अनुयो. हरि. वृ. पृ. ८४; जम्बूद्वी. शा. वृ. २–१८)।

उपमा से निर्मित काल को औपमिक काल कहा जाता है। अभिप्राय यह है कि साधारण बुद्धि वाला प्राणी पल्य व सागर आदि उपमा के विना जिस कालप्रमाण को नहीं जान सकता है उसे औपमिक काल कहते हैं।

औपम्योपलब्धि—१. पुव्वं पि अणुवलद्धो घिप्पइ अत्थो उ कोइ ओवम्मा। जह गोरेवं गवयो किंचिविसेसेण परिहीणो। (बृहत्क. ५२)। २. × × × अत्रेयं भावना—'यथा गौस्तथा गवयः' इति श्रुत्वा कालान्तरेणाटव्यां पर्यटन् गवयं दृष्ट्वा 'गवयोऽयम्' इति यदक्षरजातं लभते, एषा औपम्योपलब्धिः। (बृहत्क. वृ. ५२)।

पूर्वमें कभी नहीं जाना गया कोई पदार्थ उपमाके बल से जो जाना जाता है, इसे औपम्योपलब्धि कहते हैं। जैसे—'गवय गौ के समान होता है' इस उपमान के आश्रय से पूर्व में अज्ञात गवय का 'यह गवय है'। इस प्रकार जो अक्षरज्ञान हुआ करता है, इसी का नाम औपम्योपलब्धि है।

औपशमिक अविपाकप्रत्ययिक जीवभावबन्ध—जो सो ओवसमिओ अविवागपच्चइओ जीवभावबंधो णाम तस्स इमो णिद्देसो—से उवसंतकोहे उवसंतमाणे उवसंतमाए उवसंतलोहे उवसंतरागे उवसंतदोसे उवसंतमोहे उवसंतकसायवीयरायछदुमत्थे उवसमियं सम्मत्तं उवसमियं चारित्तं जे चामण्णे एवमादिया उवसमिया भावा सो सव्वो उवसमियो अविवागपच्चइओ जीवभावबंधो णाम। (ष. खं. ५, ६, १७—पु. १४, पृ. १४)।

क्रोध, मान, माया, लोभ, राग, द्वेष और मोह; इनमें से प्रत्येक के उपशान्त होने पर तथा उपशान्तकषाय-वीतराग-छद्मस्थ के जो औपशमिक सम्यक्त्व व औपशमिक चारित्र तथा और भी जो इसी प्रकार के अन्य औपशमिक भाव होते हैं उन सबको औपशमिक अविपाकप्रत्ययिक जीवभावबन्ध कहते हैं।

औपशमिकगुणयोग— ओवसमियसम्मत्त-संजमेहि जीवस्स जोगो ओवसमियगुणजोगो। (धव. पु. १०, पृ. ४३३)।

जीव का जो औपशमिक सम्यक्त्व और औपशमिक संयम के साथ सम्बन्ध होता है उसे औपशमिकगुणयोग कहते हैं।

औपशमिक चारित्र—१. कृत्स्नस्य मोहनीयस्योपशमादौपशमिकं चारित्रम्। (स. सि. २–३)। २. अष्टाविंशतिमोहविकल्पोपशमादौपशमिकं चारित्रम्। अनन्तानुबन्ध्यप्रत्याख्यान-प्रत्याख्यान-संज्वलनविकल्पाः षोडशकषायाः, हास्य-रत्यरति-शोक-भय-जुगुप्सा-स्त्री-पुंनपुंसकवेदभेदाः नवनोकषाया इति एवं चारित्रमोहः पंचविंशतिविकल्पः। मिथ्यात्व-सम्यङ्मिथ्यात्व-सम्यक्प्रकृतिभेदात् त्रितयो दर्शनमोहः। एषामष्टाविंशतिमोहविकल्पानां उपशमादौपशमिकं चारित्रम्। (त. वा. २, ३, ३)। ३. चारित्रमोहोपशमादौपशमिकचारित्रम्। (त. श्लो. २, ३)। ४. उपशमश्रेण्यां त्रिषूपशमकेषु उपशान्तकषाये चैकविंशतिचारित्रमोहप्रकृतीनामुपशमादुत्पन्नसंयमरूपं निर्मलतरं सकलचारित्रमौपसमिको भावः। (गो. जी. म. प्र. टी. १४)। ५. षोडशकषायाणां नवनोकषायाणां च उपशमादौपशमिकं चारित्रम्। (त. वृत्ति श्रुत. २–३)।

१ समस्त मोहनीय के उपशम से जो चारित्र (यथाख्यात) प्रादुर्भूत होता है वह औपशमिक चारित्र कहलाता है।

औपशमिक भाव—१. आत्मनि कर्मणः स्वशक्तेः कारणवशादनुद्भूतिरुपशमः। यथा कतकादिद्रव्य-

